कृत्ते वज्रमुखेन नाम कृमिणा दैवात्तदूरुद्वये
निद्राच्छेदभयादसह्यत गुरोर्धैर्यात्ततो वेदना ।
उत्थाय क्षतजाप्लुतः स सहसा रोषानलोद्दीपितो
बुद्ध्वा तं च शशाप कालविफलान्यस्त्राणि ते सन्त्विति ॥

दुर्मुखः —

अहो कष्टमभिहितं तत्रभवता । गच्छावः ।

(निष्क्रान्तौ)

भरतवाक्यम् —

सर्वत्र सम्पदस्सन्तु विपदोऽपि न सन्तु च ।

सर्वे सन्तु च सन्तुष्टा असन्तुष्टा न सन्तु च ॥

---

(*b*) स्यमन्तकम्.

SYAMANTAKAM.

Foll. 18*a*—31*a*. Fol. 17*a* gives the name of the work.

A small work in prose and poetry narrating the incidents that lead to the loss of Syamantaka, a valuable gem possessed by Satrājit, and its recovery by Lord Kṛṣṇa, etc. The story is fully narrated in the Viṣṇupurāṇa and in the Śrībhāgavata.

Complete.

**Beginning:**

मध्येपाथोनिधानं महितमणिमयूखावलीसङ्करोत्थै-

र्माहेन्द्रैश्चापचक्रैरलमखिलदिशां मण्डलं मण्डयन्ती ।

लक्ष्मीकान्तेन साक्षाद्यदुकुलपतिना निर्मिता द्वारकेति

प्रख्याता विश्वचक्रे विलसति विपुला राजधानी यदूनाम् ।

अस्मिन् पुराणपुरुषेण पुरे चिराय

नारायणेन विधिवत्परिपाल्यमाने ।

कश्चित्त्रिलोकवलयोर्जितसद्गुणश्रीः

सत्राजिदित्युदलसत्किल यादवेन्द्रः ॥

* * * *

वत्स प्रसादसुमुखोऽहमयं मणिस्ते

भाराष्टकेन तुलितं तपनीयराशिम् ।

आराधितः प्रतिदिनं वमतीत्यमुष्मै

दत्वा स्यमन्तकमथान्तरधत्त देवः ॥

**End:**

अथ स भगवान् बिलान्निर्गत्य पुरीं समाप्य सद्यः सत्राजितं सदसि समाहूय मणिं प्रादात् ।

सत्राजित्तनयां तन्वीं कृष्णाय कृतकिल्बिषः ।
स्यमन्तकेन मणिना स्वयमुद्यम्य दत्तवान् ॥
इत्थं मिथ्याभिशङ्कामयमयशःपङ्कमुत्साहतोयै-
र्दैवः संक्षाल्य विश्वत्रयदुरितहरोदारमङ्गल्यकीर्तिः ।
मन्यूनप्रेमलज्जावदनमधुरिमोल्लासिभिर्मानिनीनां
नैत्रैरापीयमानः सुचिरमरमत प्रेमतो द्वारवत्याम् ॥

**Colophon :**

स्यमन्तकं समाप्तम् ।

---

(c) षट्त्रिंशत्तत्त्वदर्पणम्.

ṢAṬTRIṀŚATTATTVADARPAṆAM.

Foll. 33a—43a. Fol. 32a gives the name of the work.

Deals with the 36 Tattvas or categories as accepted in Śaiva philosophy. By Mañjunātha.

Complete.

**Beginning :**

(तत्त्वा)त्मिकां तदुत्तीर्णां हृदयं परमेशितुः ।
परादिशक्तिरूपेण स्फुरन्तीं संविदं नुमः ॥

इह खलु परमेश्वरः प्रकाशात्मा । प्रकाशो हि विमर्शस्वभावः । विमर्शो हि नाम विश्वाकारेण विश्वप्रकाशनेन विश्वसंहरणेन वा कृत्रिमाह-मितिस्फुरणम् । यदि निर्विमर्शस्स्यादनीश्वरो जडश्च प्रसज्येत । एष एव विमर्शः । चितिश्चैतन्यम् ।

* * * *

षट्त्रिंशत्तत्त्वानि तु शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्याराग-कालनियतिपुरुषप्रकृत्यहङ्कारबुद्धिमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायू-पस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलभूमयः । तत्र शिवतत्त्वं नाम जगत् स्रष्टुमिच्छा परिगृहीतवतः परमशिवस्य प्रथमस्पन्दः । एषैवेच्छा शक्तितत्त्वम् ।

**End :**

एवंभूतस्य हृदयबीजस्य महामन्त्रात्मको विश्वमयविश्वोत्तीर्णः परम-शिव एवोदयविश्रान्तिस्थानम् । ईदृश हृदयं बीजं तत्त्वतो यो वेद

स्वात्मतया समाविशति च स प्राणान् धारयन् लौकिकवद्वर्तमानो जीवन्मुक्तो भवति । देहपाते तु परमशिवभट्टारक एव ।

**Colophon :**

इति श्रीमज्जुनाथविरचितः षट्त्रिंशत्तत्त्वोपन्यासः सम्पूर्णः ॥

इति दर्पणं संपूर्णम् ।

(प्रसेत वा श्वा प)तितं शरीरं वैश्वानरो वा कवलीकरोतु ।
अहं शिवः सत्वविलात्मभूतः स्वधाम्नि (लीये परमात्मभूते) ॥
विश्वशिवाह्वयशीलनविध्युपदेशोपशमितविश्वरुजे ।
गुरवे नमो गुरूणामभिनवगुप्ताय रुद्रवैद्याय ॥

---

## R. No. 5043.

Paper. 12¾ × 8 inches. Foll. 114. Lines, 16 in a page. Dēvanāgarī. Good.

Purchased in 1925–26 from M.R.Ry. V. Veṅkaṭarāmaśarma of Chenganur, Travancore State.

Written on one side only of paper.

### जानाश्रयी—छन्दोविचितिः, सव्याख्या.

### JĀNĀŚRAYĪ: CHANDŌVICITIH WITH COMMENTARY.

The Janāśrayī is a work on Sanskrit prosody written under the patronage of Janāśraya. There are reasons to believe that he was also called Madhavavarman, that he belonged to the Viṣṇukuṇḍin dynasty, and ruled over the Telugu country in 592 A.D. It is followed by a commentary and verses are quoted in this commentary from Kalidasa, Sudraka, Vararuci and Sundarapaṇḍya. The commentator, whose name is not given, refers to one Gaṇasvāmin as a prior commentator on the same work.

Complete in six Adhyāyas

**Beginning :**

स भूपतिरुदारधीर्नयति सम्पदेकाश्रयो
जनाश्रय इति श्रिया वहति नाम सार्थं विभुः ।
मघैरुरुभिरद्भुतैर्मघवतो जयश्रीरपि
जिता विजितशत्रुणा जगति येन रुद्राचरत् ॥

अथातश्छन्दोवृत्तजातीनां तत्त्वजिज्ञासवे शिष्याय पौराणिकीषु पैङ्गलादिछन्दोविचितिषु यथासंभवं न्यूनातिरेकं परीक्ष्य परिहृत्य तद्दोषपरिहृता-

मिमामप्रपञ्चामनाकुलां न(जा)नाश्रयीं छन्दोविचितिं गणस्वामिरचितव्याख्यां व्याख्यास्यामः ।

तत्र तावच्छन्दांसि षड्विंशतिः ॥

अवद्यान्याश्रयतया छादयन्तीति छन्दांसि, तानि षड्विंशतिरिति ज्ञेयानि ।

तन्नामानि स्ववृत्तेषु ॥

तेषां छन्दसां नामानि तेषु वृत्तेषूत्तरत्र वक्ष्यमाणेषु आद्यात्प्रभृत्यनुक्रमेण वक्ष्यन्ते । तद्यथा—

उक्तम्, अत्युक्तम्, मध्यमम्, प्रतिष्ठा, सुप्रतिष्ठा, गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्करी, अतिशक्करी, अष्टिः, अत्यष्टिः, धृतिः, अतिधृतिः, कृतिः, प्रकृतिः, आकृतिः, विकृतिः, संकृतिः, अभिकृतिः, उत्कृतिः ।

**End:**

योजनसंख्यया त्रयश्चत्वारिंशद्योजनार्धयोजनश्च धनुषां सहस्राणि पञ्चविंशत्यधिकानि पञ्चशतानि च सप्ताङ्गुलाधिको हस्तश्चैक इति समाहा चे येनाक्षरेभ्योऽधिका स खलु गुरुर्भवति । गङ्गा, कुरुते, विभाति, सा तव, न चरति, इत्यादि चतुष्काभ्यां गणाभ्यां षट्सप्तकाष्टकैश्च मात्रासमूहैर्यथास्वमल्पभेदान्निष्पन्नानां वैतालीयादीनां जातिश्लोकानां लाघवे मात्रा येन प्रमाणेन यावताङ्गेनाक्षरेभ्योऽधिका भवन्तीति ॥

**Colophon:**

इति जानाश्रय्यां छन्दोविचित्यां प्रक्रियाध्यायः षष्ठः ॥

समाप्तेयं छन्दोविचितिः ॥

Name of the scribe—

वे. वेङ्कटरामशर्मा शास्त्री.

---

R. No. **5044.**

Palm-leaf. 16¼ × 1 inches. Foll. 36. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1925–26 from M.R.Ry. Pendyala Veṅkaṭa-Subrahmanya Śastri of Pithapuram.

भगवद्गीता, व्यासभावप्रकाशिकाव्याख्यासहिता.

## BHAGAVADGĪTĀ WITH THE COMMENTARY VYĀSA-BHĀVAPRAKĀŚIKĀ.

Same work with same commentary as that described under R. No. 2294 ante. The commentator is Lingōjipandita

Contains the Adhyāyas 2 and 3 complete.

**Beginning:**

योगसिद्धिकामोऽधिकारी । सम्बन्धश्च यथायथमुन्नेयः । तत्र प्रथमाध्यायः कथाप्रस्तावसूचनार्थः । स च नास्माभिः व्याख्यायते । किन्तु द्वितीयादिरेव व्याख्येयः । तत्र द्वितीयाध्याये तं तथा कृपयाविष्टमित्यारभ्य न योत्स्य इति गोविन्दमित्यन्तो ग्रन्थः योगसिद्धिस्संपादयितुं न शक्येत्येवमाक्षेपपरः । अशोच्यानन्वशोचस्त्वमित्यादिग्रन्थस्तु तत्समाधानपरो बोध्यः । अथ श्लोकव्याख्यानम्—तत्र प्रातीतिकार्थस्य स्पष्टत्वादध्यात्मपरतयैव व्याख्यायते—अध्यात्मपरत्ववर्णने च प्रायशः पदानां मुख्यवृत्त्यसंभवात् लक्षणादिसमाश्रयणं न दोषायेति गुणज्ञैर्विभावनीयम् ।

सञ्जय उवाच—

(मू)—

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥

(व्या)—

मधुसूदनः श्रीकृष्णः तथा पूर्वाध्यायोक्तप्रकारेण कृपया दैन्येनाविष्टमत एवाश्रुपूर्णाकुलेक्षणं बाष्पपूरितनेत्रं विषीदन्तं विषादयुक्तमर्जुनमिदं वक्ष्यमाणं वाक्यमुवाच ।

**End:**

एवमुपक्रमोपसंहारादीनामन्तश्शत्रुविजयपरत्वेनैकार्थकत्वे संभवति तत्र तत्र युद्धादिशब्दानां बाह्यशत्रुवधतात्पर्यवर्णनेन केषाञ्चिद्व्याख्यानमनादेयम् । एकार्थकत्वेनैकवाक्यतायां शास्त्रस्य संभवन्त्यां भिन्नार्थकत्वेन वाक्यभेदस्यान्याय्यत्वात्, प्रथमाध्यायस्थितबाह्यशत्रुयुद्धानुवादस्य दृष्टान्तार्थत्वेन बोधोद्वातत्वेन चोपपन्नत्वात् । तथा चास्मिन्नध्याये ज्ञानेन्द्रियनियमनपूर्वकमनोनिरोधलक्षणो योगः प्रतिपाद्यः । न तु कर्मयोगः, जहि शत्रुं दुरासदमित्युपसंहारदर्शनात् । नियतं कुरु कर्म त्वमित्यादौ च योगाभ्यासाविरो-

ध्यवर्जनीयकर्मकर्तव्यताप्रतिपादनपरत्वस्य दर्शितत्वात् । अत एवैतदध्यायार्थानुवादसमये वक्ष्यति इमं विवस्वते योगमिति । न च तत्र योगशब्दः कर्मयोगपरः, इममित्यनेन पूर्वाध्यायान्तोपसंहृतार्थस्यैव बुद्धिस्थत्वादित्यलं पल्लवितेन ॥

कर्माणि देहयात्रार्थं कुर्वंश्चित्तं निरुध्य च ।
साधयेद्योगमित्येवं तृतीयेऽवददच्युतः ॥

**Colophon**:

इति श्रीविठ्ठलगुरुकटाक्षसमाहितमतिवैभवेन कारुगामान्वयसिन्धुसुधाकरेण काण्वशाखाग्रगण्येन लिङ्गाजिपण्डितेन विरचिते व्यासभावप्रकाशिकानामनि गीताभाष्ये तृतीयोऽध्यायः ॥

---

R. No. **5045.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 96. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1925-26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śastri of Piṭhapuram.

(*a*) वेदान्तकौस्तुभः.

VĒDĀNTAKAUSTUBHAḤ.

Foll. 1*a*—87*b*.

Same work as that described under No. 5010 of the D.C.S. MSS., Vol. X. By Śrīśaila Rāghavācārya.

Incomplete.

---

(*b*) ब्रह्मसूत्राणि.

BRAHMASŪTRĀṆI.

Foll. 88*a*—95*a*.

Same work as that described under No. 4649 of the D.C.S. MSS., Vol. IX.

Complete.

Foll. 95*a*—96*b* give the names of the various Adhikaraṇas of the Brahmasūtras.

R. No. **5046.**

Palm-leaf. 17 × 1½ inches. Foll. 68. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

न्यायसिद्धान्तमञ्जरीव्याख्या—भावदीपः.

NYĀYASIDDHĀNTAMAÑJARĪVYĀKHYĀ : BHĀVADĪPAḤ.

Same work as that described under R. No. 1464 ante. By Kṛṣṇanyāyavāgīśa.

Incomplete.

---

R. No. **5047.**

Palm-leaf. 17 × 1⅝ inches. Foll. 107. Lines, 7 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

वेदान्तकण्टकोद्धारः.

VĒDĀNTAKAṆṬAKŌDDHĀRAḤ.

Same work as that described under No. 5003 of the D.C.S. MSS., Vol. X. By Campakēśācārya.

Contains the first Sūtra incomplete.

---

R. No. **5048.**

Palm-leaf. 14¼ × 1 inches. Foll. 97. Lines, 7 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

अद्वैतविद्याविजयः.

ADVAITAVIDYĀVIJAYAḤ.

Same work as that described under No. 4851 of the D.C.S. MSS., Vol. X. By Rāmānujadāsa alias Mahācārya.

Contains the Prapañcamithyātvabhaṅga complete and Jīvēśvaraikyabhaṅga incomplete.

---

R. No. **5049.**

Palm-leaf. 16¼ × 1⅝ inches. Foll. 133. Lines, 6 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

निक्षेपरक्षाव्याख्या.

NIKṢEPARAKṢĀVYĀKHYĀ.

Same work as that described under No. 5268 of the D.C.S. MSS., Vol. XI. By Nṛsiṁharāja.

Complete.

The last stanza is slightly different as given below :—

इत्येवं निगमान्तसूरिरचितां निक्षेपरक्षामिमां
श्रीमत्कौशिकवंशसंभवगुरोः श्रीश्रीनिवासात्मजात् ।
तत्राम्नस्समधीत्य सर्वमसकृत्कारुण्यसिन्धोर्गुरो-
र्व्याख्यां वात्स्यनृसिंहसूरितनयः श्रीसिंहदेवोऽलिखम् ॥

---

## R. No. 5050.

Palm-leaf. 13¾ × 1 inches. Foll. 10. Lines, 7 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śastri of Pithapuram.

(a) अद्वैतरत्नप्रकाशिका.

ADVAITARATNAPRAKĀŚIKĀ.

Foll. 1a—4b.

Explains the leading principles of the Advaita school of Vēdānta in one hundred verses.

Complete.

**Beginning:**

ब्रह्माण्डदेवालयगर्भसंस्थपिण्डाण्डगर्भालयचित्तपीठे ।
विभासमानं विततं स्वकीयचैतन्यलिङ्गं शिवमाश्रयामः ॥

महामायागुहालीनं मायातीतं महोत्तमम् ।
दक्षिणास्याभिधं ज्योतिराविरस्तु ममाग्रतः ॥

देवस्तत्त्वमसीति दक्षिणास्यं गुरुं(नुमः) ।
ब्रह्मविद्यासंप्रदायप्रवर्तनजगद्गुरुम् ॥

सूत्रभाष्यकृतौ भावे भावये व्यासशङ्करौ ।
अद्वितीयापरिच्छिन्नसच्चिदानन्दमूर्तये ॥

दक्षिणामूर्तिरूपाय मह्यमेव नमो नमः ।
अनृणो विन्दते सौख्यं यस्य संस्मरणान्मुनेः ॥
तदद्वैतमहारत्नं मया सम्यक् प्रकाश्यते ॥
प्रसादाद्दक्षिणामूर्तेर्मया सम्यक् प्रकाशितम् ।
गूढमद्वैतसद्रत्नं गृह्यतां ब्राह्मणोत्तमैः ॥
वेदचोदितनिष्कामकर्मोपासनशुद्धधीः ।
निर्विण्णो दक्षिणामूर्तिं श्रीगुरुं शरणं रहः ॥
स्थिरमज्ञाख्यकन्यार्थी ब्राह्मणो नियतव्रतः ।
गुरोरग्रे स्ववृत्तान्त नत्वा विज्ञापयेन्मुनिः ॥
चिन्मचिद्ब्रह्मणो नप्ता पौत्रोऽहं प्रत्यगात्मनः ।
आनन्दमयपुत्रोऽहमस्मि ब्रह्मकुलोद्भवः ॥

**End:**

एवं वेदान्तकल्पोक्तस्यात्मलिङ्गप्रपूजनम् ।
कुर्वन्नामरणं वापि क्षणं वा सुसमाहितः ॥
सर्वदुर्वासनाजालं पदपांसुमिव त्यजेत् ।
बिभेदज्ञानदुःखौघं मोक्षानन्दस्वरूपकम् ॥
सर्ववेदशिरोगूढाद्वैतरत्नप्रकाशिका ।
मया कृता शतश्लोकी वीक्ष्यतां वीतकल्मषैः ॥
देवस्तत्त्वमसि ॥

---

(b) दशश्लोकी.
**DAŚAŚLOKĪ.**

Foll. 4b—5b.

A small work in ten stanzas on the Advaita-Vēdānta describing how one can completely remove the evil impressions and realize Brahman.

Complete.

**Beginning:**

ब्रह्माण्डदेवालय( . . . )माश्रयामः ॥
इति पूर्वश्लोको वक्तव्यः ।
ये वेदमणिसंछन्नप्रणवोन्नतपीठगे ।
ताभ्यां श्रीदक्षिणामूर्तिपादुकाभ्यां नमो नमः ॥

ब्रह्मविद्यासंप्रदायश्रीगुरुभ्यो निरन्तरम् ।
नमो नमस्सूत्रकृद्भ्यो भाष्यकृद्भ्यो नमो नमः ॥
नमो वार्तिककारेभ्यष्टीकाकृद्भ्यो नमो नमः ।
नमः श्रीभारतीतीर्थब्रह्मविद्भ्यो नमो नमः ॥
सर्वदुर्वासनात्यागप्रकारामलसिन्धुना ।
ब्रह्मविश्रान्तिसिद्ध्यर्थं दशश्लोक्या विराजते ।

**End:**

धैर्यैरावतशान्तिधेनुमथ सन्मन्दारवृन्दं मुदा
मैत्र्याद्यप्सरसं विवेकतुरगं सन्तोषचिन्तामणिम् ।
आत्मज्ञानमहामृतं नवरसं नैराश्यचन्द्रोदयं
वेदान्तार्णवमादरादनुदिनं सेवस्व मुक्तिश्रियम् ॥
प्रसादाद्दक्षिणामूर्तेः श्रुत्वाचार्यप्रसादतः ।
दुर्वासनाप्रतीकारदशकं रचितं मया ॥

---

(c) बिम्बदृष्टिः.

BIMBADṚṢṬIḤ.

Foll. 6a—10b.

Same text as that described under R. No. 2903(a) ante. By Kambampati Amarēśvara Śāstrin.

Complete.

The first three stanzas in the beginning are slightly different as given below :—

ब्रह्माण्डदेवालयगर्भसंस्थपिण्डाण्डगर्भालयचित्तपीठे ।
विराजमानं विततं स्वकीयचैतन्यलिङ्गं शिवमाश्रयामः ॥
मत्प्राक्तनमहाभाग्यकल्पपादपसत्फलम् ।
प्रत्यग्रूपं परानन्ददक्षिणामूर्तिमाश्रये ॥
ये वेदमणिसंछन्नप्रणवोन्नतपीठगे ।
ताभ्यां श्रीदक्षिणामूर्तिपादुकाभ्यां नमो नमः ॥

---

R. No. **5051.**

Palm-leaf. 16 × 1 inches. Foll. 53. Lines, 5 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyala Veṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

सिद्धान्तचिन्तामणिः.

SIDDHĀNTACINTĀMAṆIḤ.

Same work as that described under R. No. 2121 ante. By Śrīnivāsārya.

Complete.

---

## R. No. 5052.

Palm-leaf. 16 × 1¼ inches. Foll. 58. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1925-26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

ब्रह्मसूत्रभाष्यव्याख्या—पञ्चपादिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : PAÑCAPĀDIKĀ.

Same work as that described under No. 4666 of the D.C.S. MSS., Vol. IX. By Padmapādācārya.

Catussūtri complete.

---

## R. No. 5053.

Palm-leaf. 14¾ × 1½ inches. Foll. 172. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1925-26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

प्रतापरुद्रीयव्याख्यानम्—रत्नशाणम्.

PRATĀPARUDRĪYAVYĀKHYĀNAM : RATNAŚĀṆAM.

Same work as that described under R. No. 1923 ante. By Tirumalācārya.

Contains from the beginning to the end of Rasaprakaraṇa.

---

## R. No. 5054.

Palm-leaf. 9 × 1½ inches. Foll. 109. Lines, 7 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

चम्पूरामायणव्याख्यानम्—विद्वत्कौतूहलम्.

CAMPŪRĀMĀYAṆAVYĀKHYĀNAM : VIDVATKAUTŪHALAM.

Same work as that described under R. No. 2646 ante. By Kōdamarti Kāmēśvarapaṇḍita.

Contains the Bālakāṇḍa.

---

## R. No. 5055.

Palm-leaf. 12 × 1 inches. Foll. 42. Lines, 7 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

उत्तररामायणचम्पूः.

UTTARARĀMĀYAṆACAMPŪḤ.

Same work as that described under No. 12224 of the D.C.S. MSS., Vol. XXI. By Rāghava.

Complete; but with the following additional stanza in the beginning.

**Beginning:**

श्रावीक्षावनमण्डनं श्रुतिशिरस्सीमन्तसीमोल्लस-
त्सिन्दूरारुणिताङ्घ्रि विश्वजननस्थेमान्तलीलाततम् ।
कल्याणास्पदमस्तकायमसमं कल्याणवल्लीसखं
प्राप्यं भक्तजनस्य राघवपरब्रह्म प्रपद्यामहे ॥

---

## R. No. 5056.

Palm-leaf. 16 × 1½ inches. Foll. 51. Lines, 5 in a page. Telugu. Much injured.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

कुवलयविलासः.

KUVALAYAVILĀSAḤ.

Same work as that described under R. No. 2319 ante. By Rāyasa Ahōbilamantrin.

Complete.

---

## R. No. 5057.

Palm-leaf. 14¾ × 1½ inches. Foll. 11. Lines, 6 in a page. Telugu. Injured.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

आपस्तम्बशुल्बसूत्रम्.

ĀPASTAMBAŚULBASŪTRAM.

Same text as that described under R. No. 911 ante.

Complete.

---

R. No. **5058.**

Palm-leaf. 14½ × 1½ inches. Foll. 33. Lines, 8 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyāla Veṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

आपस्तम्बशुल्बसूत्रभाष्यम्.

ĀPASTAMBAŚULBASŪTRABHĀṢYAM.

Same work as that described under R. No. 931(c) ante. By Karavindasvāmin.

Incomplete.

---

R. No. **5059.**

Palm-leaf. 16 × 1½ inches. Foll. 35. Lines, 9 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyāla Veṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

(a) अगस्त्यसंहिता.

AGASTYASAṂHITA.

Foll. 1a—31a.

Same work as that described under No. 5190 of the D.C.S. MSS., Vol. XXI.

Contains 1 to 34 Adhyāyas complete.

---

(b) रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 31b—32a.

Same work as that described under No. 8973 of the D.C.S. MSS., Vol. XVII.

Complete.

(c) सीतानवरत्नमालास्तोत्रम्.

SĪTĀNAVARATNAMĀLĀSTOTRAM.

Foll. 32b—34a.

Nine stanzas in praise of Sītā. Taken from the Mṛkaṇḍusaṁhitā. Complete.

**Beginning :**

सोमाभामरविन्दसुन्दरदृशां सौन्दर्यसद्मैभवां
मन्दं मन्दमनोहरस्मितमुखीं मन्दारमालान्विताम् ।
कुन्देन्दीवरपाटलीसुरभितां वृन्दारकैर्वन्दितां
वन्दे राघवसुन्दरीं त्रिभुवनानन्दैकदीपाङ्कुराम् ॥

शृङ्गारार्णवमङ्गलाङ्गरुचिरे श्रीमत्कपोलाञ्चिते
राजद्रत्नकिरीटकुण्डलधरे मन्दस्मितोल्लासिते ।
काञ्चीनूपुरकङ्कणक्वणझणत्कारैर्नवैर्मोहने
अम्ब ! त्वच्चरणाम्बुजद्वयमहं सञ्चिन्तये मानसे ॥

**End :**

ह्रीङ्कारद्वयसंपुटेन महता मन्त्रेण सन्दीपितं
स्तोत्रं यः प्रतिवासरं जपति नो मातुर्जपेन्मन्त्रवित् ।
तस्य क्षोणिभुजो भवन्ति वशगा लक्ष्मीश्चिरस्थायिनी
वाणी निर्मलसूक्तिभारभरिता जागर्ति दीर्घं वयः ॥

ओं तत्सत्.

**Colophon :**

इति मृकण्डुसंहितायां परमरहस्ये सीतानवरत्नमालास्तोत्रं संपूर्णम् ॥

---

(d) श्रीरामस्तवराजः.

ŚRĪRĀMASTAVARĀJAḤ.

Foll. 34a—36a

Same work as that described under No. 10308 of the D.C.S. MSS., Vol. XVIII.

Complete.

This is said to have been taken from the Hiraṇyagarbhasaṁhitā.

**Colophon :**

इति हिरण्यगर्भसंहितायां ब्रह्मनारदसंवादे श्रीरामस्तवराजे नाम पञ्चदशोऽध्यायः ॥

## R. No. 5060.

Palm-leaf. 14¼ × 1½ inches. Foll. 12. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

### अथर्वणकारिकाः.

### ATHARVAṆAKĀRIKĀḤ.

A work on Telugu grammar written in Sanskrit verses by Atharvaṇācārya. For further particulars see R. No. 405 of the Triennial Catalogue of Telugu MSS., Vol. III.

Contains the following Paricchēdas :—

१. संज्ञापरिच्छेदः.
२. सन्धिपरिच्छेदः.
३. अजन्तपरिच्छेदः.
४. हलन्तपरिच्छेदः.
५. क्रियापरिच्छेदः.

Complete.

**Beginning:**

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥
गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुस्सैव शंसति ॥
श्रुतेऽपशब्दे चोक्ते वा प्रमादात् पाणिनिं स्मरेत् ।
अथवा फणिनामीशं चिन्तयेद् बहुशो बुधः ॥
प्राकृते षड्विधे चापि वाल्मीकिं वा महेश्वरम् ।
ध्यायेदत्र तु मामेव स्मरेत् पण्डितसत्तमः ॥
गुणदोषावशात्मज्ञः कथं विभजते जनः ।
किमन्यस्याधिकारोऽस्ति रूपभेदोपलब्धिषु ॥
सन्मूलवत्त्वाद्वृद्धत्वाद्गृहीतत्वाच्च साधुभिः ।
नापभ्रंशत्वमेतस्या नियमाभावतस्तु तत् ॥
निवारणाय तस्यैव प्रवृत्तिर्विदुषामभूत् ।
तदर्थमेव हि वयं भूयसा प्रयतामहे ॥
कवितापश्रुतौ दोषं नैव किञ्चित्सहामहे ।
कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चतु ॥

तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ।
कन्ये कामयमानं मां त्वं न कामयसे कथम् ॥
इति ग्राम्योऽयमर्थात्मा वैरस्यायैव कल्पते ।
कामं कन्दर्पचण्डालो मयि वामाक्षि निर्दयः ॥
त्वयि निर्मत्सरो दिष्ट्येत्यग्राम्योऽर्थो रसावहः ।
शब्देऽपि ग्राम्यतास्त्येव सा सभ्येतरकीर्तनात् ॥

* * * *

**Colophon:**

इति श्रीमदथर्वणाचार्यविरचिते संज्ञापरिच्छेदः ॥

**End:**

तच्चित्रता तु द्रष्टव्या पूज्यपादसुभाषितैः ।
वक्ता वाचस्पतिर्यत्र श्रोता शक्रस्तथापि तौ ॥
शब्दपारायणस्यान्तं न गतौ तत्र के वयम् ।
तथापि किंचित् कस्मैचित् प्रतिबोधाय सूचितम् ॥
बोधयेत् कियदुक्तिज्ञो मार्गवित्सह याति किम् ।
प्रमाणमकलङ्कस्य पूज्यपादस्य लक्षणम् ॥

**Colophon:**

इति श्रीमदथर्वणाचार्यकृतौ क्रियापरिच्छेदः ॥

---

R. No. **5061.**

Palm-leaf. 14 × 1½ inches. Foll. 6. Lines, 5 in a page. Telugu. Good.

Purchased in 1925–26 from M.R.Ry. Pendyāla Vĕṅkaṭa-Subrahmanya Śāstri of Pithapuram.

कस्तूरीतिलकस्तवः.

KASTŪRĪTILAKASTAVAḤ.

Same work as that described under No. 9677 of the D.C.S. MSS., Vol. XVIII, and with the following additional stanza in the beginning:—

वात्स्यश्रीदेवराजार्यतनयं विनयोज्ज्वलम् ।
वात्सल्यादिगुणावासं वन्दे वरवरं गुरुम् ॥

R. No. 5062.

Palm-leaf. 16 × 1⅛ inches. Foll. 9. Lines, 7 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śastri of Pithapuram.

धनञ्जयविजयव्यायोगः.

DHANAÑJAVIJAYAVYĀYŌGAḤ.

Same work as that described under No. 18 of M. Seshagiri Sastri's Report No. 1. By Kāñcanakavi.

Wants the beginning; otherwise complete.

---

R. No. 5063.

Palm-leaf. 16 × 1⅛ inches. Foll. 44. Lines, 6 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmanya Śastri of Pithapuram.

नृसिंहमन्त्रः, मुद्रासहितः.

NṚSIṀHAMANTRAḤ WITH MUDRĀS.

Foll. 1*a*—44*a*. Fol. 44*b* is left blank.

Similar to the Mantra described under No. 6528 of the D.C.S. MSS., Vol. XIII.

This Mantra is also accompanied with Mudrās, i.e., certain peculiar positions of fingers used in connexion with devotional and religious worship.

Complete.

**Beginning:**

शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं सन्निधिः सन्निधिं क्रियात् ॥

मुद्रालक्षणानि—

द्वात्रिंशत्तेषु शस्तानि पुराणेषु मुनीश्वरैः ।
घोरातिघोरशान्तानि तानि वक्ष्यामि भो द्विजाः ॥
प्रथमः कुण्डपादाख्यो नरसिंहोऽद्भुताकृतिः ।
कोपसिंहो दिव्यसिंहो ब्रह्माण्डाख्यस्तुरीयकः ॥
समुद्रनरसिंहश्च विश्वरूपाभिधस्ततः ।
वीरसिंहः क्रूरसिंहो बीभत्सो नवमस्तथा ॥

रौद्रसिंहो धूम्रसिंहो वह्निसिंहस्तथैव च ।
व्याघ्रसिंहो बिडालाख्यः कालमूषकसंहरः ॥
भीमसिंहः पञ्चदशः पातालाख्यस्तु षोडशः ।
आकाशनरसिंहश्च कथ्यते तार्क्ष्यवाहनः ॥

* * * *

अथ पीताम्बरादिमुद्रा निरूप्यन्ते—
अङ्गुष्ठयुततर्जन्या कटिपार्श्वद्वयं गते ।
नाभिदेशं समापन्ने तत्र ग्रन्थिवदाचरेत् ॥
पीताम्बरस्य मुद्रेयं पीताम्बरधरप्रिया ।
भाग्यसौभाग्यजननी भुक्तिमुक्तिप्रदायिनी ॥

**End:**

इत्युच्चरन् प्रणम्याथ महाभक्त्या प्रयत्नतः ।
मन्त्रजापी मन्त्रवेत्ता हरिमुद्रेयमीरिता ॥
नृसिंहेति नृसिंहेति नृसिंहेति च संस्मरन् ।
सर्वेश श्रीमहादेव कपर्दिन् नीललोहित ॥
त्रिलोचन विरूपाक्ष हर शङ्कर देव भो ।
गिरीश मृड गौरीश पार्वतीशेति संस्मरन् ॥
हस्ताभ्यां प्रणमेद्देवं हरिरामशिवात्मकम् ।
हरिमुद्रेयमाख्याता महापातकनाशनी ॥
भुक्तिमुक्तिप्रदा भुक्तिशौर्यविवर्धनी ॥
लमित्यादिपञ्चपूजां कृत्वा मन्त्रजपं कुर्यात् ।

**Colophon:**

इति श्रीनृसिंहमन्त्रमुद्रास्समाप्ताः ॥

---

R. No. 5064.

Palm-leaf. 12 × 1 inches. Foll. 49. Lines, 6 in a page. Telugu. Broken in the middle portion.

Purchased in 1925–26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pīṭhāpuram.

## आपस्तम्बीयपितृमेधप्रयोगकारिका, सव्याख्या.

## ĀPASTAMBĪYAPITṚMĒDHAPRAYŌGAKĀRIKĀ WITH COMMENTARY.

A metrical work on ritualistic procedure relating to funeral rites to be observed by the followers of Āpastamba. The author follows Kapardisvāmin's commentary on the Pitṛmēdhapraśna and adds his own commentary on the Kārikās. The colophon found in the end seems to be inconsistent with the contents of the work.

Complete.

The MS. is said to have been copied by one Kēśava, son of Rāmāvadhānin, on the 11th day of the bright fortnight of the Puṣya month in the year Nandana.

**Beginning:**

आपस्तम्बमुनिं (नत्वा) प्रयोगः पैतृमेधिकः ।
न्यायं कपर्दिभाष्योक्तमनुसृत्याभिधीयते ॥

सूत्रकारमापस्तम्बं मुनिं नत्वा नमस्कृत्य तत्प्रसादाद्भाष्यकारस्य कपर्दिस्वामिनो मतमनुसृत्य पितृमेधप्रयोगोऽभिधीयत इत्यर्थः । अत्रापस्तम्बीयभरद्वाजीययोः पितृमेधकल्पयोः प्रायेण तुल्यरूपत्वात् किंविषयेयं प्रयोगक्लृप्तिरिति मन्दानां सन्देहः स्यात् । स पुनराचार्यनमस्कारव्याजेन सम्प्रदायप्रदर्शनेन च निराक्रियत इति द्रष्टव्यम् । इदानीं प्रयोगं वक्तुमुपक्रमते—

आहिताग्नेरिहाध्वर्युः प्राप्ते मरणसंशये ।
अग्न्यगारे विहृत्याग्नीन् तूष्णीं नित्यांश्च धारयेत् ॥

यथा दैवादाहिताग्नेर्मरणसंशयः प्राप्तस्तदा अग्न्यगार एव तूष्णीमाहवनीयादीन् विहृत्य तानजस्रान् धारयेत् । तत्र प्रथमपक्षस्याशक्यानुष्ठानत्वात् ग्रामे वास्यैतेन कल्पेन जुहुयादितीमं पक्षमाश्रित्य प्रयोगोऽभिधीयत इति द्रष्टव्यम् ।

**End:**

यमयज्ञस्त्वयं प्रोक्तः प्रशंसे . . . नित्यतः ।
ऊर्ध्वमुक्तं तु यच्चिचं तद्यथासूत्रमूह्यताम् ॥

यमयज्ञस्त्वयं प्रोक्त इति प्रशंसा प्ररोचनार्था । नित्येऽपि काम्यश्रुतिः, ऊर्ध्वं यदुक्तं ग्रन्थजातं तत्प्रायश्चित्तपटलं यथासूत्रमेवोह्यम् । तत्र

व्याख्येयांशो नास्तीत्यर्थः। लोष्टचयनं कर्तव्य आध्वर्यवम्। अध्वर्युः स्वकर्मान्ते ऋत्विग्भ्यो नम इत्युक्त्वा मृतस्य पुत्रादिभिर्धनादिना तोषितो गच्छेत्।

एवमालोच्य शास्त्राणि कपर्दिस्वामिनो मतम्।
अनुसृत्य मया प्रोक्तं भाष्यं सूत्रस्य भावतः॥

**Colophon:**

इति भारद्वाजसूत्रभाष्यं समाप्तम्॥

---

R. No. 5065.

Palm-leaf. 16 × 1½ inches. Foll. 41. Lines, 6 in a page. Telugu. Injured.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

कृष्णचम्पूः.

KṚṢṆACAMPŪH.

A work in prose and poetry describing the story of Lord Śrī-Kṛṣṇa as found in the Śrī-Bhāgavata: by Śēṣasndhi (Vāṇala), apparently a pupil of Vadhūla-Bhavanacārya.

Contains Stabakas one to three complete; fourth incomplete.

**Beginning:**

श्रीदः श्रीदसखद्युनायकमुखद्योचारिकोटीरस-
त्कोटीराजितरत्नराजिगुरुभानीराजिताङ्घ्रिद्वयः।
द . . . . . . . . . . . . मद्वं तमोऽन्तस्स्थितं
निघ्नन्विघ्नचयं नुदन् सदवनोत्कण्ठो नृकण्ठीरवः॥

श्रीवेङ्कटाचलविहारिसुरेन्द्रनील-
नीलं समुद्रतनया . . . . . . ।
. . . . मिव सदाचलकान्तिभाज-
मभ्रं दधद्दितनुतां मम शर्म धाम॥

कांचन काचनलतिकां सुवर्णबाहुकतमालकलिताम्।
ललिता . . . . सुमनस्सन्ततिविभूतिकृतमीडेऽहम्॥

पक्षद्वयाक्षीणविहारशाली विक्षोभिताहिर्गुरुमोददायी।
कोऽप्युज्ज्वलाङ्गो द्विजराज एनः प्रणाशयत्वार्जितमस्मदीयम्॥

* * * *

. . . . पामरवशात्क्लेशो गुरु . . . . . . .

चाव स्यातुमनीश्वरा बलिगृहं स्वः काननं चाश्रिताः ।

वाधूलान्वयवार्धिशीतकिरणं वादीभपञ्चाननं

. . . . . . . . . . . . . . श्रीभावनार्यं गुरुम् ॥

श्रीशुकं निगमशालिशिखासञ्चारचारुशुकमात्तविवेकम् ।

इत्युवाच विनयेन परीक्षित् मेदुरादरचकालितचित्तः ॥

भगवन् पुण्यवत्सन्ततिवर्तसानां महा . . . . . नुसारिणामकृष्णवर्त्मसखानां च राजशेखराणामप्याविषादिनां भुजङ्गसङ्गरहितानां च . . . . . गमनाश्रयाशानां च द्विपा . . . सदादानवारिपङ्किलधरातलानां विष्णुकराणामिव महोदरसाधुचक्रनन्दकश्रीयुतानाम् ।

* * * *

सर्वेषां पूर्वधरापतीनां सुधाश्रयामपि यथा कुर्वन्तीरतिमधुराः कथाः कथयता भवता निरवधिप्रमजितोऽहममन्दगुणवृन्दस्य यदुकुलानन्दस्य नन्दसूनोर्मुकुन्दस्य विचित्रं चरित्रमशेषमाकर्णयितुमभिलषामीति । अथ मधुकाल" प्रतिपाद . . . न्तमुदितः पिक इव शुकः प्रवक्तुमुपाक्रमत ।

राजन् पुरा राक्षसराजसङ्घो राजन्य . . . . . . . . ।

. . महेत्युत्तमनामरूढ्या योगेन वास्या इति चिन्तयेव ॥

* * * *

**Colophon :**

इति श्रीमद्वाणालशेषसुधीविरचितकृष्णचम्पूप्रबन्धे प्रथमः स्तवकः ।

**End :**

इति श्रीमद्वाणालशेषसुधीविरचिते कृष्णचम्पूप्रबन्धे तृतीयस्स्तवकः ॥

अधिगतगुहेन तेन धरेशेन कदर्यजनावने कालयवने हनूमते वाधिगतमहागुहेन धरेशेन त्रिपुरदानवविलास इव दग्धे मुग्धतरशरीरो हरिर्न(न्दि)तसाधुवृन्दस्य मुचुकुन्दस्य वेगवता मरुतापहृते जलधरावरणे हरिरिव कमलवनस्य क्षिप्रमक्षिविषयो बभूव ।

मुचुकुन्दस्तमात्मानमद्वितीयाक्षरं परम् ।

जगाद परमानन्दामन्दतुन्दिलमानसम् ॥

अतिदुर्गमदुर्गमार्गतो भगवन्नागतवान् गुहामिमाम् ।
कथमब्जसदृक्पदद्वयः कतरस्त्वं कतरो मया हृतः ॥

---

R. No. 5066.

Palm-leaf. 14⅛ × 1½ inches. Foll. 33. Lines, 10 in a page. Telugu. Slightly injured.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmanya Śāstri of Piṭhāpuram.

**आपस्तम्बश्रौतसूत्रभाष्यम्.**
**ĀPASTAMBAŚRAUTASŪTRABHĀṢYAM.**

A commentary on the Āpastambaśrautasūtras. It is written in the margin of the manuscript that the commentary is by Kapardisvāmin.

Contains the Praśnas 16th complete and 17th incomplete.

**Beginning:**

अग्निं चेष्यमाणः—अग्निरिति इष्टकाकृतं स्थण्डिलमुच्यते । तत्संयोगात् क्रतुरपि अग्निरित्युच्यते । तं चेष्यमाणः स्थण्डिलाग्निगुणकेन क्रतुना यक्ष्यमाणो भवतीत्य . . . सोमार्थः । सोमाङ्गैरनुषङ्गवचनात् त . . . तो नारम्यादीक्षितोऽपि सन् पृथक्फलः सोमाङ्ग एव नोत्तरवेदि विकारत्वाद्वा तस्यैष लोको यदुत्तरवेदिनाभिरिति प्रणयने प्राकृते श्रूयते । साग्निचित्ये क्रतौ स्वयमातृण्णायां सार्ध . . . . अकाम्यत्वाच्च । यदि हि काम्यस्स्यात् गोदोहनवत् प्रकृतौ निवेशेत । तेनाग्निगुणकेन क्रतुना यक्ष्यमाणः अमावास्यायां पौर्णमास्यामेकाष्टकायां वोख्यासंभरणं करोति । एकाष्टका . . . सूत्रकारेण या माघ्याः पौर्णमास्या इति अपादात्कृतात्प्रालिखिता इष्टका मध्य उपधीयते । तामधिकृत्यैके शाखिनः धर्मोपरि पठन्ति । तदा तूष्णीं . . . . . . . ख इत्येवंविधास्तेषां ।नद्वाचिः ।

**End:**

पञ्च पूर्वाश्रितयो भवन्त्यथ षष्ठिं चितिं चिनुत इति तुल्यत्वादस्यामतिधर्माः क्रियन्ते, न त्वग्निधर्माः कर्षणादयः । प्रचर्यपौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यामोपवसथ्यसुब्रह्मण्याह्वानां ताभ्यामग्रेण प्राग्वंशमष्टौ नानामन्त्रा उपदधाति । ततो लोकंपृणादि । सोऽयं प्रथमविकारो भवति । भरद्वाजमता-

श्चोत्तरवेद्यभिमर्शनानामन्यग्रहणं स्वयं चित्वाभिमर्शनं च, तत्त्वायामीति चाद्यक्त्वा निवर्तते । गायत्र्याभिमर्शनान्तं प्रथमचितिवदापराह्णिकीभ्यां प्रचर्याश्वपरिणयनान्तम् । ततः प्रवर्ग्योद्वासनादि ज्योतिष्टोमवत् ।

---

R. No. **5067.**

Palm-leaf. 16¾ × 1 inches. Foll. 91. Lines, 6 in a page. Telugu. Much injured.

Purchased in 1925-26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śastri of Pithapuram.

आपस्तम्बगृह्यप्रयोगवृत्तिः.

ĀPASTAMBAGṚHYAPRAYŌGAVṚTTIḤ.

Same work as that described under R. No. 2158 ante. By Nṛsiṁha.

The work is also called Nṛsiṁhakārikāvṛtti after the name of the author.

Wants the beginning; otherwise complete.

This MS. is said to have been copied by one Brahmaṇṇa, son of Ayyaṇṇa, on the 3rd day of the bright fortnight of the Pauṣa month in the year Citrabhānu.

---

R. No. **5068.**

Palm-leaf. 16 × 1¼ inches. Foll. 18. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1925-26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śastri of Pithapuram.

साहित्यकण्टकोद्धारः.

SĀHITYAKAṆṬAKŌDDHĀRAḤ.

Same work as that described under R. No. 2321 ante; but with the following additional stanzas in the beginning.

The author, whose name is not given in the MS., was the son of Nārāyaṇa of Śrīvatsagōtra and Dharmāvatī. The author salutes two persons, namely, Kōnāri and Viṭṭhala of Śrīvatsagōtra and speaks of them as well-versed in Sāhitya and Vaidya.

Contains the Pūrvaparicchēda complete.

**Beginning:**

संसारमरुसंचारतृषितानां शरीरिणाम् ।
सुधाकादम्बिनीभूतं तन्महस्समुपास्महे ॥

ध्यात्वा यं मुनयो मनस्सरसिजे संसारपाथोनिधेः
पारं यान्ति जनुस्सुखादिकमहानक्राहिर्मोमस्य ते ।
तं क्षीराब्धिशयानमम्बुजदृशं लक्ष्मीसमेतं विना
कं देवं शिरसा नमामि सततं विघ्नौघविच्छित्तये ॥
उमावामकायं हताशेषमायं खलानामपायं श्रितानामुपायम् ।
प्रसन्नामधेयं महत्सामगेयं सुरेशं गिरीशं शिवं शान्तमीडे ॥

* * * *

साहित्यशास्त्रसरसीरुहसूर्यभूतौ
श्रीवत्सगोत्रकनकाचलसानुभूतौ ।
श्रीवैद्यशास्त्रकथने विजिताश्विनेयौ
कोनेरिविट्ठलबुधौ प्रणमामि नित्यम् ॥
नित्यं वैद्यकशास्त्र(जाल)विविधव्याख्यानदीक्षागुरुः
श्रीवत्सान्वयभूषणं यदभवत्तातस्तु नारायणः ।
माता यस्य पतिव्रताविधमहाधर्मावती सङ्गता
सोऽहं व्याकरणामृतस्य सरसं सारं लिखाम्यद्भुतम् ॥
ग्रन्थशिक्षाशतं वीक्ष्य ग्रन्थकानुपसेव्य च ।
साहित्यकण्टकोद्धारनामग्रन्थं करोम्यहम् ॥
न क्षुण्णोऽयं परैर्मार्गस्तत्र सञ्चरता मया ।
पदे पदे प्रस्खलतः सन्तः सन्त्ववलम्बनम् ॥
नामूलं लिख्यते किञ्चिन्नानपेक्षितमेव च ।
अतोऽभिलषितोऽर्थोऽयमहेयस्सहसा बुधैः ॥
दूषणान्येव कुर्वन्तु किन्तु दोषान्निरूप्य वै ।
फणिभाषितभाष्यज्ञा मद्ग्रन्थस्य निरन्तरम् ॥

---

R. No. 5069.

Palm-leaf. 16¾ × 1¼ inches. Foll. 16. Lines, 6 in a page. Telugu. Good.

Purchased in 1925–26 from M.R.Ry. Pendyāla Vāṅkaṭa-Subrahmaṇya Śāstri of Pithpuram.

(a) हयग्रीवपञ्जरम्.

HAYAGRÎVAPAÑJARAM.

Foll. 1a—2a.

Similar to the work described under No. 7699 of the D.C.S. MSS., Vol. XIV.

Complete.

**Beginning:**

श्रीहयग्रीवपञ्जरमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, हयग्रीवो देवता । ओं बीजम्, लक्ष्मीवल्लभायेति शक्तिः, क्लीं सर्ववशीकरण स्वाहेति कलिकम्, ह्रां हयग्रीवायेत्यादिकरन्यासः ।

शुद्धस्फटिकसङ्काशं तुषाराचलसन्निभम् ।
श्वेतपर्वतसङ्काशं चन्द्रमण्डलमध्यगम् ॥

**End:**

हसें आत्मने स्थूलदेहं शोधयामि स्वाहा । हसौं विद्यातत्त्वात्मने सूक्ष्मदेहं शोधयामि स्वाहा । हसौं श्वेततत्त्वात्मने कारणदेहं शोधयामि स्वाहा । हसौं सर्वतत्त्वात्मने अव्याकृतदेहं शोधयामि स्वाहा ॥

---

(b) हयग्रीवास्त्रम्.

HAYAGRÎVÂSTRAM.

Fol. 2a.

The repetition of this Mantra which is addressed to Hayagrîva is considered to have the power to enable one to remove all difficulties, to cure all kinds of diseases, to destroy one's enemies and to accomplish one's desires.

**Beginning:**

ओं आं ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोरतर हयग्रीव एहि एहि सुरूप क्षीरगौर हयानन चट चट प्रचट प्रचट कह कह अश्ववक्त्र-युत भ्रम भ्रम भ्रामय भ्रामय भस्मीकुरु भस्मीकुरु भूतान् त्रासय त्रासय ।

**End:**

हयग्रीवमहास्त्रं च बीजयन्त्रं शतोत्तरम् ।
अयुतं च जपेन्नित्यमत्यन्तं शुभदायकम् ॥

सर्वरोगहरं शस्तं सर्वानिष्टविनाशनम् ।
सर्वसिद्धिकरं चैव सर्वशत्रुनिकृन्तनम् ॥
महैश्वर्यप्रदं चैव महावश्यकरं तथा ।
इत्यादिसुगुणैर्युक्तं हयग्रीवास्त्रमेव च ॥

---

(c) हयग्रीवकवचम्.

HAYAGRĪVAKAVACAM.

Foll. 2a—3a.

Similar to the work described under No. 7698 of the D.C.S. MSS., Vol. XIV.

Complete.

**Beginning:**

पार्वत्युवाच—

देव देव महादेव करुणाकर शङ्कर ।
त्वया प्रसादशीलेन कथितानि रमापतेः ॥
बहूनामवताराणां बहूनि कवचानि च ।
इदानीं श्रोतुमिच्छामि हयास्यकवचं विभो ॥

शिवः—

देवि प्रियंवदे तुभ्यं रहस्यमपि मत्प्रिये ।
कलशाम्बुधिपीयूषं हयास्यकवचं वदे ॥
महाकल्पान्तयामिन्यां सञ्चरंस्तु हरिस्स्वयम् ।
लीलया हयवक्रोऽयं रूपमास्थाय योऽहरत् ॥
पुत्रवात्सल्यतो मह्यं विरिञ्चिरुपदिष्टवान् ।
हयास्यकवचस्यास्य ऋषिर्ब्रह्मा प्रकीर्तितः ॥
छन्दोऽनुष्टुप् तथा देवो हयग्रीव उदाहृतः ।
ह्रौं बीजं तु समाख्यातं ह्रीं शक्तिस्समुदाहृता ॥
ओं कीलकं समाख्यातमुच्चैरुत्कीलकं तथा ।

**End:**

प्राच्यां रक्षतु वागीशो दक्षिणस्यां वरायुधः ।
प्रतीच्यां विश्वमूर्त्यातु उदीच्यां शिववन्दितः ॥

ऊर्ध्वं पातु हरिस्साक्षादधः पातु गुणाकरः ।
अन्तरिक्षे हरिः पातु विश्वतः पातु विश्वसृट् ॥
य एतत्कवचं धीमान् संनह्येन्निजविग्रहे ।
दुर्वादिराक्षसव्यूहैः स कदाचिन्न बध्यते ॥
पठेद्य एतत्कवचं त्रिसन्ध्यं भक्तिभावितः ।
मूढोऽपि गीष्पतिस्पर्धी जायते नात्र संशयः ॥

---

(d) हयग्रीवकवचम्.

HAYAGRĪVAKAVACAM.

Fol. 3.

Similar to the above.

This work is said to have been taken from the Hayagrivatantra.

Complete.

**Beginning:**

श्रीहयग्रीवकवचस्य हयग्रीव ऋषिः, अनुष्टुप् छन्दः, श्रीहयग्रीवो देवता । ह्रीं वागीश्वराय नम इति बीजम् । क्ष्रीं विद्याधराय नम इति शक्तिः । सौं वेदनिधये नम इति कीलकम् । ओं हयग्रीवाय शुक्लवर्णाय ज्ञानमूर्तये ओङ्काराय अच्युताय ब्रह्मविद्याप्रदायकाय स्वाहा ।

ओं क्षीराम्भोनिधिसङ्काशं कमलायतलोचनम् ।
कलानिधिकृतावासं कर्णिकापीठवासिनम् ॥

**End:**

रक्षाहीनं तु मे स्थानं रक्षत्वखिलदायकः ।
एवं न्यस्तशरीरस्तु साक्षाद्योगीश्वरो भवेत् ॥
आयुरारोग्यमैश्वर्यं सर्वशास्त्रप्रवक्तृताम् ।
लभते नात्र सन्देहो हयग्रीवप्रसादतः ॥

**Colophon:**

इति हयग्रीवतन्त्रे गोपालार्जुनसंवादे अथर्वणवेदे संहितायां हयग्रीवकवचस्तोत्रं नाम नवमोऽध्यायः ॥

ओं ह्सौं आत्मने स्थूलदेहं शोषयामि स्वाहा । ओं ह्सौं विद्यातत्त्वात्मने सूक्ष्मदेहं शोषयामि स्वाहा । ओं ह्सौं श्वेततत्त्वात्मने कारणदेहं शोषयामि स्वाहा । ओं ह्सौं सर्वतत्त्वात्मने अव्याकृतदेहं शोषयामि स्वाहा ।

(*e*) हयग्रीवमालामन्त्रः.

**HAYAGRĪVAMĀLĀMANTRAḤ.**

Foll. 4*a*—6*a*.

Similar to the work described under No. 7704 of the D.C.S. MSS., Vol. XIV.

Complete.

**Beginning:**

अथातो भगवन्तं सर्वतेजोनिधिं सर्वदुष्टदुरितविध्वंसिनं महाविद्याराज-रूपिणं हयशिरसमावर्तयिष्यामि । तद्यथा—ओं नमो भगवन् पुरुषोत्तम पुण्डरीकाक्ष एह्येहि वरवाजिशिरोधर विकीर्णप्रदीप्तांशुसूर्यकोटिप्रतिकाश-भास्वरमूर्धन् आजानान्तापातितारकाकारमहादीप्तिप्रदीप्तरक्तकनकपिङ्गलायत-विस्फारितलोचन महाभास्वरतारकाकारशशिशुद्धदशनपङ्क्तिलिखिततेजोराजि-विजितलोकत्रितय ।

* * * *

अथ पीठपूजा—

ओं अनन्तदाय नमः, ओं कूर्मासनाय नमः, ओं क्षीराब्धये नमः, ओं कल्पवनाय नमः, ओं कल्पवृक्षाय नमः ।

**End:**

शिरोमन्त्रः—विदिताङ्गाय विद्महे हयग्रीवाय धीमहि । तन्नो हरिः प्रचोदयात्। देहमन्त्रः—ओं ह्रीं क्लीं श्रीं ऐं आं क्रौं ह्रां हयग्रीव वं सं हुं फट् स्वाहा; ओं ह्रां हसौं ह्रां सीं ग्लौं क्लीं आं क्रां दीं हं हं श्रीहयग्रीवाय नमः । उत्तरन्यासः—पुनः पूजान्ते पद्मपूजा.

---

(*f*) हयग्रीवाष्टोत्तरशतनामस्तोत्रम्.

**HAYAGRĪVĀṢṬŌTTARAŚATANĀMASTŌTRAM.**

Foll. 6*b*—7*b*.

Same work as that described under No. 9093 of the D.C.S. MSS., Vol. XVII.

Complete.

**Colophon:**

इति पराशरसंहितायामगस्त्यनारदसंवादे श्रीहयग्रीवाष्टोत्तरशतनाम-स्तोत्रं संपूर्णम् ॥

(७) हयग्रीवस्तोत्रम्.
HAYAGRĪVASTŌTRAM.

Foll. 7b—9b.
In praise of god Hayagrīva.
Complete.

**Beginning:**

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥
पुण्डरीकासनासीनं पाण्डुराभ्रेन्दुसन्निभम् ।
अखण्डबोधजनकं हयग्रीवमुपास्महे ॥
वन्दे कुन्देन्दुमन्दारवदनामलविग्रहम् ।
हयग्रीवं सुराग्रण्यं समस्तानुग्रहं हरिम् ॥
ओं नमो वेदनिधये यज्ञानां निधये नमः ।
शास्त्राणां निधये नित्यकर्मणां निधये नमः ॥
विद्याधराय योगाय वागीशाय नमो नमः ।
अचिन्त्याय नमो नित्यं सर्वज्ञानात्मने नमः ॥
ऋङ्मूर्तिस्त्वं महाबाहो यजुर्मूर्तिरधोक्षज ।
साममूर्तिस्त्वमेवाथ सर्वथाथर्वमूर्तिमान् ॥

**End:**

चतुर्भुजमुदाराङ्गं पुण्डरीकायतेक्षणम् ।
शङ्खचक्रधरं देवं श्रीवत्साङ्कितवक्षसम् ॥
कौस्तुभोद्भासिताङ्गं च वनमालाविभूषितम् ।
पीताम्बरधरं देवं किरीटमकुटोज्वलम् ॥
मुख्यहस्तद्वयेनैतज्ज्ञानमुद्राक्षपुस्तकम् ।
धारयन्तं हयग्रीवं ध्यायेदिष्टार्थसिद्धये ॥

---

(८) हयग्रीवस्तोत्रम्.
HAYAGRĪVASTŌTRAM.

Foll. 9b—12a.

Same work as that described under No. 10465 of the D.C.S. MSS., Vol. XVIII; but with the following additional stanzas in the beginning. By Vēdāntadēśika.

Complete.

**Beginning :**

तुषाराद्रिसमच्छायं तुलसीदामभूषणम् ।
तुरङ्गममुखं वन्दे तुङ्गसारस्वतप्रदम् ॥
अभङ्गुरकलादानस्थूललक्षलक्ष्मीयुषे ।
तुङ्गाय महसे तस्मै तुरङ्गाय मुखे नमः ॥

---

(*i*) हयग्रीवयन्त्रलेखनक्रमः.

HAYAGRĪVAYANTRALĒKHANAKRAMAḤ.

Foll. 12*a*—13*a*.

On the mode of drawing the Hayagrivayantra and placing the letters of the Mantra in the various parts of the Yantra.

Complete.

**Beginning :**

मध्ये वृत्तं समालिख्य तन्मध्ये प्रणवं न्यसेत् ।
एकाक्षरहयग्रीवं श्रीभूनीलादिबीजकान् ॥
वारुणं वृत्तसंयुक्तं पाशाङ्कुशसमन्वितम् ।
ज्ञानैश्वर्यादिकं चाथ मम धापय तावकम् ॥
तारबीजेन संवेष्ट्य बहिः षट्कोणमुल्लिखेत् ।
कोणेषु तद्विष्णुपदं सन्धौ रामषडक्षरम् ॥
भूबीजेन च संवेष्ट्य बहिरष्टदलं लिखेत् ।
अष्टाक्षरं तद्दलेषु नारायणमनुत्तमम् ॥

**End :**

भूतदिक्पालबीजानि यन्त्रस्याग्राणि वै ततः ।
एतज्ज्ञात्वा विधानेन तद्यन्त्रं च समुद्धरेत् ॥
स्वाभीष्टफलसिद्ध्यर्थं ज्ञानमोक्षार्थसिद्धये ।
हयग्रीवस्य यन्त्रं वै सर्वेषां भुक्तिमुक्तिदम् ॥

(*f*) हयग्रीवकल्पः.

**HAYAGRĪVAKALPAḤ.**

Foll. 13*a*—14*b*.

On the details connected with the repetition of the Mantra addressed to god Hayagrīva.

Complete.

**Beginning:**

अथोच्यते विशेषेण क्रमात् द्वादशसङ्ख्यया ।
हयग्रीवमहामन्त्रान् विद्यामोक्षादिदायकान् ॥
सान्तं षान्तं समुद्धृत्य प्रणवान्तं सबिन्दुकम् ।
एकाक्षरहयग्रीवमेतत् ज्ञानादिदायकम् ॥
षट्स्वरैस्तु करन्यासं कुर्यादेवं षडङ्गकम् ।
व्याप्यं तद्व्यापकं चैव कुर्यान्मन्त्रेण तत्क्रमात् ॥
एकाक्षरहयग्रीवं दृष्ट्वा पूर्वोक्तमादरात् ।
पुन(र)श्चरणहोमादि कुर्यान्मन्त्रस्य सिद्धये ॥

**End:**

उद्गीथप्रणवोद्गीथसर्ववागीश्वरेश्वरः ।
सर्ववेदमयाचिन्त्य सर्वं बोधय बोधय ॥
षादैरङ्गैः करन्यासं कुर्यादेवं षडङ्गकम् ।
अनुष्टुबुद्धयं न्यस्य ज्ञानाद्यैश्वर्यदायकम् ॥
ध्यानादिकं च सर्वत्र एकाक्षरवदाचरेत् ।

**Colophon:**

इति श्रीपराशरसंहितायां विशिष्टधर्मशास्त्रे हयग्रीवकल्पो • नामाष्टा• विंशोऽध्यायः ॥

---

(*k*) हयग्रीवयन्त्रक्रमः.

**HAYAGRĪVAYANTRAKRAMAḤ.**

Foll. 14*b*—15*a*.

Similar to the work described under subdivision (*i*) above.

Complete.

**Beginning:**

अथान्तरं प्रवक्ष्यामि हयग्रीवाख्ययन्त्रकम् ।
त्रिकोणं विलिखेन्मन्त्रं तन्मध्ये प्रणवान्वितम् ॥
हयास्यैकाक्षरं लिख्य प्रणवेनैव वेष्टयेत् ।
पञ्चकोणं बहिर्लिख्य तार्क्ष्यपञ्चाक्षरं लिखेत् ॥
वपार्धदशकं लिख्य हयग्रीवदशाक्षरम् ।
तद्दलेषु लिखित्वाथ श्रीबीजेनैव वेष्टयेत् ॥

**End:**

तस्मात्सर्वप्रयत्नेन यन्त्रराजमिदं मुने ।
ततो हरिकृपा जाता तस्मादुक्तं तु विस्तरात् ॥
व्यासाय तु सुखायैव एतदुक्तं हि निश्चितम् ।
हयग्रीवप्रसादेन व्यासोऽपि सुमहानभूत् ॥

**Colophon:**

इति हयग्रीवसंहितायां हयग्रीवयन्त्रं संपूर्णम् ॥

---

(*l*) हयग्रीवाष्टकम्.
HAYAGRĪVĀṢṬAKAM.

Foll. 15*a*—16*a*. Fol. 16*b* is left blank.

Eight stanzas in praise of god Hayagrīva. The composition of this work resembles that of the Sudarśanāṣṭaka of Vēdāntadēśika, described under No. 10660 of the D.C.S. MSS., Vol. XIX.

Complete.

**Beginning:**

प्रणवसुद्गीथविग्रह प्रणुतसद्ब्रातसुग्रह
विहतदुर्वादिदुर्ग्रह विमतसंजातनिग्रह ।
विधुतसुज्ञानमुद्रण विहितसज्ज्ञानमुद्रण
जय जय श्रीहयानन जय जय श्रीहयानन ॥

**End:**

स्फटिकशुद्धप्रभामय त्रुटितविश्वत्रयामय
विशदवाणीविराजित विबुधलोकैकपूजित ।
निचिततेजोविनिस्तुल निजकराब्जसुपुस्तक
जय जय श्रीहयानन जय जय श्रीहयानन ॥

## R. No. 5070.

Palm-leaf. 13 × 1 inches. Foll. 65. Lines, 7 in a page. Telugu. Good.

Purchased in 1925-26 from M.R.Ry. Pendyāla Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

(a) शतपथब्राह्मणम्.
### ŚATAPATHABRĀHMAṆAM.

Foll. 1a—50a. Fol. 50b is left blank.

Same work as that described under Nos. 195 and 196 of the D.C.S. MSS., Vol. I, Part II.

Contains the Kāṇḍas 13 and 2.

---

(b) सर्वानुक्रमणिका (काण्वीया).
### SARVĀNUKRAMAṆIKĀ (KĀṆVĪYĀ).

Foll. 50a—65a. Fol. 65b is left blank.

Gives the names of the Ṛṣis, Chandas and Dēvatās of the hymns in the Śukla-Yajurvēda. By Kātyāyana.

Breaks off in the fourth Adhyāya.

**Beginning :**

अथ मण्डलं दक्षिणमक्षि हृदयं चाधिष्ठितं येन शुक्लानि यजूंषि भगवान् याज्ञवल्क्यो यतः प्राप तं विवस्वन्तं त्रयीमयमर्चिष्मन्तमभिधाय काण्वीये वाजसनेयके यजुर्वेदाम्नाये सर्वे निखिलेन शुक्रियऋषिदेवतच्छन्दांस्यनुक्रमिष्यामः । यजुषामनियताक्षरत्वादेकेषां छन्दो न वेद्यते । द्रष्टार ऋषयः स्मर्तारः परमेष्ठ्यादयः देवता मन्त्रान्तर्भूता अग्न्यादिका हविर्भाजः स्तुतिभाजो वानः शाम्बोखाश्म्यापवेषकपालेध्मोलूखलादयश्च भतिमामूताः । छन्दांसि गायत्र्यादीनि । एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यथान्तराश्वगर्तं वापद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान् भवति । अथ विज्ञायैतानि योऽधीते तस्य वीर्यं वदथ योऽर्थवित्तस्य वीर्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते । इषेत्वेत्यादि नम उक्ति विधेमेत्यन्तं विवस्वानपश्यत् । तत्तत्मतिकर्मविभागेन ब्राह्मणानुसारेण ऋषयो वेदितव्याः ।

* * * * *

**Colophon:**

इति कात्यायनाचार्यकृते सर्वानुक्रमणीये प्रथमोऽध्यायः ।

**End:**

स्वस्त्यात्रेयो वसन्तेन ऋतुना षड्‌चमानुष्टुभं लिङ्गोक्तं होता पक्षद्वादशा प्रैषा अश्विसरस्वतीन्द्रदेवत्या आश्विनौ छागस्य सहलिङ्गोक्तदेवताः प्रैषावनस्पतिमभियूपोऽग्निं स्विष्टकृदग्निदेवं बर्हिरेकादशानूयाजप्रैषा अश्विसरस्वतीन्द्रदेवत्या अग्निमद्य सूक्तवाकप्रैषोलिङ्गोक्तदेवतः ॥

---

### R. No. 5071.

Palm-leaf. 16 × 1½ inches. Foll. 2. Lines, 7 in a page. Telugu. Injured and broken in the left side.

Purchased in 1925–26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śastri of Pithapuram.

रामायणताराबलिः

RĀMĀYAṆATĀRĀVALIḤ.

Twenty-seven stanzas briefly narrating the story of Rāma as found in the Vālmiki Rāmāyaṇa.

Complete.

**Beginning:**

शक्रादिक्रतुभुकिरीटमणिभाभास्वत्पदाम्भोरुहं
भास्वच्चेलधरं सदादरमहं लम्बोदरं सादरम् ।
पूर्वं सर्वजनस्य पूज्यमनघं भक्तेष्टकामप्रदं
वन्दे सिन्धुरवक्त्रमद्रितनुजापुत्रं पवित्राकृतिम ॥ १ ॥
हृष्टात्मन्परिपुष्टशिष्टनिचय स्पष्टातिगम्भीरवा-
ग्मुखाकष्टहरेष्टदाय(क) भुजानिष्पिष्टदुष्टाग्रह ।
क्षिप्रं दीप्तशरीरमाशुकवितायुक्तं कुरु त्वं प्रभो
योगक्षेम . सचरन् स दयसे हे पावने पावने ॥ २ ॥

**End:**

नन्दिग्रामपुरेऽवतीर्य सहसा श्रीराघवः पुष्पकात्
दत्वाऽस्मै च निदेशमीशसुहृदः प्राप्त्यै पुनस्सादरम् ।
हित्वा . . . . श्र मित्रसहजैस्साकेतमासेदिवां-
स्तत्रापालयदत्र कोसलपतिसत्पुनः प्रजाः सप्रजाः ॥ २७ ॥

R. No. **5072.**

Paper. 9¾ × 4 inches. Foll. 2. Lines, 13 in a page. Telugu. Good.

Purchased in 1925–26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

स्वप्नाध्यायः.

SVAPNĀDHYĀYAḤ.

Same work as that described under No. 14010 of the D.C.S. MSS., Vol. XXIV; but with slight differences in the readings.

Complete.

**Colophon:**

इति बृहस्पतिकृतं(तः) स्वप्नाध्यायस्समाप्तः ॥

---

R. No. **5073.**

Paper. 8¼ × 2 inches. Foll. 18. Lines, 6 in a page. Telugu. Good.

Purchased in 1925–26 from M.R.Ry. Pendyala Vēṅkaṭa-Subrahmaṇya Śāstri of Pithapuram.

स्मृतिसंस्कारवादः.

SMṚTISAṀSKĀRAVĀDAḤ.

Foll. 1*b*—18*b*. Fol. 1*a* contains the name of the work.

A discussion on the subject that mental impression (संस्कार) produces recollection (स्मृति).

Complete.

**Beginning:**

घटगोचरस्मृतिं प्रति घटगोचरज्ञानत्वेन हेतुता, घटनिर्विकल्पकादपि घटस्मरणापत्तेः । अवच्छिन्नविषयताशालित्वेन हेतुत्वं कल्पयित्वा तद्वारणेऽपि द्रव्यत्वेन घटज्ञानादिसत्त्वे घटत्वेन तत्स्मरणापत्तेः । न च घटत्वस्मरणं प्रति घटत्वज्ञानत्वेन हेतुत्वकल्पनादेव न तादृशस्मरणापत्तिरिति वाच्यम्, घटत्वेन पटविज्ञानस्यापि तदानीं सत्त्वेन तदापत्तिसंभवात् । किन्तु घटत्वेन तद्घटस्मरणं प्रति घटत्वेन तद्घटज्ञानत्वेन हेतुता । स्वजन्यसंस्कारः प्रत्यासत्तिः ।

**End:**

न च तथापि वह्निव्याप्यभाववान् धूम इति ज्ञानकाले वह्निव्याप्यो धूम इति संस्कारसत्त्वेऽपि विपरीतज्ञानरूपकारणबलात् तन्नाशापत्तिरिति वाच्यम् । तादृशसंस्कारनाशं प्रति तादृशसंस्कारस्यापि प्रतियोगिविधया हेतुत्वेन तदभावादेव तदापत्त्यसंभवादित्याहुः ।

**Colophon:**

इति स्मृतिसंस्कारवादस्समाप्तः ॥

Fol. 18*b* contains the following stanza which is the beginning of a work named Samāsatattva by Jayarāma:—

न्यायपञ्चाननः श्रीमान् जयरामस्समासतः ।
समासतत्त्वं व्याचष्टे विबुधानां सुधोपमम् ॥

---

R. No. **5074.**

Palm-leaf. 15¾ × 1¼ inches. Foll. 361. Lines, 8 in a page. Grantha and Nandināgarī. Slightly injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

महाभाष्यप्रदीपव्याख्या.

MAHĀBHĀṢYAPRADĪPAVYĀKHYĀ.

Foll. 1*a*—361*a*. Fol. 361*b* is left blank.

Same work as that described under R. No. 39 ante. By Nārāyaṇa Śāstrin, disciple of Dharmarājādhvarin.

Contains the Āhnikas one to seven complete and the eighth incomplete in the first Pada of the first Adhyāya.

---

R. No. **5075.**

Palm-leaf. 16 × 1½ inches. Foll. 146. Lines, 6 in a page. Grantha. Good.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

लक्ष्मीकाव्यम्.

LAKṢMĪKĀVYAM.

Foll. 1*a*—146*a*. Fol. 146*b* is left blank.

Same work as that described under R. No. 1377 ante. By Uttamarāyasa Tirumaladhara.

Contains the Sargas 1—18 complete; but wants the beginning.

## R. No. 5076.

Palm-leaf. 15⅜ × 1⅛ inches. Foll. 24. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1925–26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudamūr, South Arcot district.

वराहक्षेत्रमाहात्म्यम्.

VARĀHAKṢETRAMĀHĀTMYAM.

On the greatness of Varāhakṣetra in the Pāṇḍya country. It is said that the place is near Dindigul in the Madura district.

Breaks off in the eighth Adhyāya.

**Beginning:**

श्रीमन्नारायणकथासुधास्वादनतत्पराः ।
प्रातस्सवनहोमान्ते मुनयस्सूतमाययुः ॥
. . . . . . . . . . . . ध्यानपरायणम् ।
पुराणानां प्रवक्तारं व्यासशिष्यं महामुनिम् ॥
ऋत्विजश्च सदस्याश्च दीक्षिता . . . . . ।
(मु)नयस्समचित्तास्ते प्रणिपत्येदमब्रुवन् ॥
त्वत्तोऽस्माभिः पुराणानि श्रुतानीह . . . . ।
. . . . . तीर्थानि पुण्यान्यायतनानि च ॥
मोक्षधर्माश्च बहवो दुष्करास्सुकरा . . ।
. . . . . कारश्च स्त्रीशूद्रायुचितास्तथा ॥

* * * *

उवाच रहसि व्यक्तं शृण्वत्सु सनकादिषु ।
ब्रह्मणे च पुरा प्रोक्तं विष्णुना गुह्यमुत्तमम् ॥
. . . . . . . . . मुक्तो भवति मानवः ।
ऐहिकामुष्मिकं सर्वं फलमन्यच्च विन्दति ॥
वाराहक्षेत्रमाहात्म्यमिद . . . . . . ।
. . . . . वक्तव्यं नाभक्ताय शठाय च ॥
न चाशुश्रूषवे वाच्यं न च पाषण्डसङ्गिने ।
अन्येभ्योऽप्येवमादिभ्यो . . . . . . . . ॥
तस्मात्समाहितास्शुद्धाः शृणुध्वं भक्तिसंयुताः ।
वाराहक्षेत्रमाहात्म्यमुच्यमानं यथामति ॥

कुमारीतीर्थं . . . . . . . . . पर्वतः ।
पूर्वाम्भोधिं समारभ्य यावन्मलयपर्वतम् ॥
इयन्तो विषयाः पाण्ड्याः पावनाः पुण्यभूमयः ।
बहूनि वा वना . . . . . . . . . राणि च ॥
सन्त्यन्यान्यपि तीर्थानि पुण्यान्यायतनानि च ।
भगवत्सन्निधानेन मुनिभिस्संश्रितानि च ॥
विशेषतोऽत्र . . . . . . . . . . . . ॥
अत्र पूर्वं महाविष्णुर्वाराहं रूपमास्थितः ।
हत्वा सुरं हिरण्याक्षं दानवं सुमहाबलम् ॥
समुद्रमग्ना . . . . . . . . . लीलया ।
यथापूर्वं प्रतिष्ठाप्य पन्नगेन्द्रफणासु च ॥
भूधरान् सागरान् द्वीपान् सरितश्च सरांसि च ।
पुराणि च . . . . . . . . . प्रसन्नधीः ॥

* * * *

**Colophon:**

इति श्रीवराहशेखरहस्यखण्डे वाराहक्षेत्रमाहात्म्ये प्रथमोऽध्यायः ॥

वाराहक्षेत्रमाहात्म्यशुश्रूषाश्रवणेरिताः ।
पप्रच्छुर्मुनयस्सर्वे पुनस्सूतं महामतिम् ॥
पाण्ड्येष्विह विशेषेण कुत्रेदं क्षेत्रमुत्तमम् ।
कियद्योजनविस्तीर्णं कियत्तीर्थसमन्वितम् ॥

* * * *

पाण्ड्यस्य पश्चिमे प्रान्ते मलयो नाम पर्वतः ।
सेव्यमानो मुनिश्रेष्ठैर्यत्रागस्त्यो महामुनिः ॥
सदा तपश्चरन्नास्ते लोकानां हितकाम्यया ।
तस्य तु प्रागुदग्देशे केचित्पर्यन्तपर्वताः ॥
मण्डूकपर्वतो नाम तेषु . . . भूधरः ।
यत्र मण्डूकनामास्ते तपस्वी मुनिभिर्वृतः ।
तत्प्राचीनार्धमारभ्य ततः प्राच्यां समन्ततः ॥
दिशि द्वियोजनायामं वाराहक्षेत्रमुच्यते ॥
तत्र नित्यं सन्निधत्ते श्रीमान्नारायणो हरिः ॥

**End:**

वैद्यधरं पञ्चमं तु तीर्थं सर्वफलप्रदम् ।
धनुष्मन्नूतनपुरमुदीच्यां . . पर्वतः ॥
तन्निर्झरसरोरूपं कण्वतीर्थमुदाहृतम् ।
कण्वशिष्यो मुनी रङ्कुस्तत्र मुक्तं जगन्महः ॥
नैर्ऋते . . तीर्थस्य त्रिभिः कोशैः समन्विते ।
शेष एवाचले मृत्वा शेषितामश्नुते हरौ ।
उपत्यकायां तस्याद्रेरु.

---

R. No. **5077.**

Palm-leaf. 17 × 1½ inches. Foll. 253. Lines, 8 in a page. Telugu. Much injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudāmūr, South Arcot district.

स्मृतिचन्द्रिका.

SMṚTICANDRIKĀ.

Same work as that described under Nos. 2774 to 2777 of the D.C.S. MSS., Vol. V. By Dēvaṇabhaṭṭōpadhyāya.

Contains the Śrāddha, Āśauca and Āhnika Kāṇḍas complete.

---

R. No. **5078.**

Palm-leaf. 13¾ × 1¾ inches. Foll. 13. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudāmūr, South Arcot district.

वेदान्ताचार्यविजयचम्पूः.

VĒDĀNTĀCĀRYAVIJAYACAMPŪḤ.

Same work as that described under No. 12365 of the D.C.S. MSS., Vol. XXI. By Kavitārkikasiṁha Vēdāntācārya.

Breaks off in the second Stabaka.

---

R. No. **5079.**

Palm-leaf. 13¾ × 1¾ inches. Foll. 90. Lines, 10 in a page. Grantha. Injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudāmūr, South Arcot district.

28267

पराशरधर्मशास्त्रव्याख्यानम्—लघुहितधर्मः.

PARĀŚARADHARMAŚĀSTRAVYĀKHYĀNAM: LAGHU-HITADHARMAḤ.

A commentary on the Parāśarasmṛti, which work has been described under Nos. 2633 to 2645 of the D.C.S. MSS., Vol. V: by Kāmeśvara.

Begins in the 38th stanza of the 1st Adhyāya and breaks off in the 79th stanza of the 12th Adhyāya.

**Beginning:**

षट्कर्मनिरतो नित्यं देवतातिथिपूजकः ।
हुतशेषं तु भुञ्जानो ब्राह्मणो नावसीदति ॥

तथा चावसादितशब्दितपातित्वहेतु . . . . प्रत्यवायनिवर्तकत्वेन रूपेण धर्मपालकत्वमुपपन्नमिति भावः । षडपि कर्माणि सन्ध्यास्नानमित्युत्तरश्लोकोक्तानि । ते . . . . मिरतः श्रद्धावान् । ननु षट्कर्मान्तःपातित्वाद्देवतापूजादेः किं पृथगुपादानेनेति चेन्न, भक्तिदानयोः कलौ मुख्य . . . . . . कत्वात् । हुतशेषमिति वैश्वदेवस्येहोपादानं च । तस्यां न संस्कारतासिद्धयर्थमुत्तरश्लोके तदुपादान . . . . . . . . रार्थम् । माधवीये तु षट्कर्माण्यध्यापनादीनीत्युक्तम् । तानि निरूप्यन्ते—तत्र मनुः—

अध्यापनं चाध्य(यनं याजनं य)जनं तथा ।
दानं प्रतिग्रहश्चापि षट्कर्माण्यग्रजन्मनः ॥ इति ।

* * * *

व्यासः—

अनध्यायेष्वधीतं यद्यच्च शूद्रस्य संनिधौ ।
प्रतिग्रहनिमित्तं च न . . . . . . . . ॥ इति ।

इदं च वृत्त्यर्थमिति ।

मनुः—

षण्णां तु कर्मणां मध्ये त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशिष्टाच्च प्रतिग्रहः ॥

* * * *

**Colophon:**

इति श्रीकामेश्वरकृतौ पराशरधर्मशास्त्रव्याख्याने हितधर्मे प्रथमोऽध्यायः ।

**End:**

सर्वेषामेव पापानां सङ्करे समुपस्थिते ।

दशसाहस्र(संख्याक)गायत्री शोधनं परम् ॥ इति ।

अतः अनुक्रमन्यतो ग्राह्यमिति न्यायोऽत्र न प्रसरतीति द्रष्टव्यम् ।

**Colophon:**

इति श्रीकामेश्वरस्य कृतौ पराशरधर्मशास्त्रव्याख्याने हितधर्मे एकादशोऽध्यायः ।

गजानन नमस्तुभ्यमभीष्टफलदायक ।

प्रायश्चित्ते तथाचारे शेषो द्वादश उच्यते ॥

तत्रादौ दुस्स्वप्नादौ प्रायश्चित्तमाह—

दुस्स्वप्नं यदि पश्येत्तु वान्ते च क्षुरकर्मणि ।

मैथुने प्रेतधूमे च स्नानमेव विधीयते ॥ इति ।

* * * *

आसनमेकपीठादौ, शयनमेककटादौ, यौनमपत्यसम्बन्धः, संभाषणं संलापः, न तु भाषणमात्रम् । सहभोजनमेकपङ्क्ताविति निमित्तानि । अथ नैमित्तिकान्याह—

चान्द्रायणं यावकं च तुलापुरुष एव च ।

गवां चैवानुगमनं सर्वपापप्रणाशनम् ॥

---

## R. No. 5080.

Palm-leaf. 16 × 1½ inches. Foll. 148. Lines, 8 in a page. Grantha. Injured.

Purchased in 1925–26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

**पूर्वोत्तरमीमांसावादनक्षत्रमालिका.**

**PŪRVŌTTARAMĪMĀṂSĀVĀDANAKṢATRAMĀLIKĀ.**

Same work as that described under R. No. 1788 ante. By Appayadīkṣita.

Contains the following Vadas:—

१. मासाग्निहोत्रवादः (wants the beginning).

२. हिंसिधात्वर्थवादः.

३. गुणगुण्येकशक्तिवादः.

४. गुणगुण्यनेकशक्तिवादः.
५. एकशक्तिपक्षश्रेयोवादः.
६. गुणलक्षणापक्षनिरासवादः.
७. अरुणैकहायनीसामानाधिकरण्यवादः.
८. क्रयारुण्यान्वयवादः.
९. भ्रममूलत्वशङ्कानिरासार्थं जीवान्तर्यामिशक्तिवादः.
१०. अहमादिपदविषयान्तर्यामिपर्यन्तत्वशङ्कानिरासार्थमन्तर्यामिशक्ति-वादः.
११. ब्राह्मणादिशब्ददृष्टान्तमतक्तगौरादिशब्दवाच्यत्वशङ्कानिरासान्त-र्यामिशक्तिवादः.
१२. अन्तर्यामिविश्वपृथिव्यादिशब्दवाच्यत्वसमर्थनवादः.
१३. व्याकरणश्रुतिगतद्धितैकवचनसमर्थनवादः.
१४. सर्वोपादानत्वहेतुकसर्वशब्दवाच्यत्वसमर्थनवादः.
१५. ऐकशास्त्र्यनिराकरणवादः.
१६. अध्ययनस्य स्वविधिप्रयुक्तत्वसमर्थनवादः.
१७. उद्धूलनत्रिपुण्ड्रयोस्सकलविद्याङ्गत्वसमर्थनवादः.
१८. अयथार्थज्ञानसमर्थनवादः.
१९. समायथार्थवादः.
२०. शुक्तिरजताद्युत्पत्तिसमर्थनवादः.

**Beginning:**

(अ)ग्निहोत्रप्रकरणपठितपवागुणविधिपरजुहोतिविषये व्यभिचारवारणार्थं नैयमिकाग्निहोत्रहोमविध्यसन्निहितेति विशेषणम् । नैयमिकाग्निहोत्रहोमविध्य-सन्निहितस्याहवनीयाख्यगुणविधिपरस्य यदाहवनीये जुहोतीत्यारभ्याधीत-वाक्यश्रुतस्य जुहोतेर्विषयो भवति नैयमिकाग्निहोत्रं न तु स्वस्माद्भिद्यत इति तत्र व्यभिचारवारणार्थमनेकाविषयकेति ॥

**End:**

विशेषार्थतत्पुरोदेशे प्रत्यग्रजनितोत्पत्तौ कारणसत्त्वादसन्निहितरजतभाने कारणाभावाच्च मदनुमानम . . . विषयं त्वदनुमानमेव बाधितविषयमिति सिद्धम् । शुक्तिरजतादिकमिदं पुरोवर्ति प्रसिद्धरजतादिभिन्नमिति । एतेन स्वमचित्तभ्रममनोराज्यविषय . . . व्याख्याताः ।

**Colophon :**

इति शुक्तिरजताद्युत्पत्तिसमर्थनवादः ।

तथा शुक्तिरजतादिकमिदं पुरोवर्ति प्रसिद्धमग्रे नेदं रजतमित्यादिप्रकारेण वा . . भ्रमकाले शुक्तीदन्तयेदमितिवच्छुक्तिसत्तया सदिति प्रतीयते । एवं च ब्रह्मसत्तया सदिति.

---

## R. No. 5081.

Palm-leaf (Śrītāla). 13¼ × 1½ inches. Foll. 297. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1925–26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

शब्दकौमुदीव्याख्या.

ŚABDAKAUMUDĪVYĀKHYĀ.

Similar to the work described under R. No. 4476 ante. By Dvādaśāhayājin, son of Śokkanātha and grandson of Dvādaśāhayājin. The commentary is called Dvādaśāhayājīya.

Contains Samāsa and Taddhita complete and Dvirukti incomplete.

**Beginning :**

संख्ययाव्ययासन्नादूराधिकसङ्ख्यास्सङ्ख्येये ॥

अनेकमन्यपदार्थ इत्यत्र मत्वर्थं इत्युक्तत्वादमत्वर्थार्थोऽयमारम्भः । प्रथमार्थोऽपि यथा स्यादिति वा ।

बहुव्रीहौ ॥

बहुव्रीहाविति पञ्चम्यर्थे सप्तमी । सङ्ख्ययाव्ययेति बहुव्रीहेर्न ग्रहणम् । तस्यैव सङ्ख्येयवृत्तित्वात् । डचो डित्करणस्य.

**End and Colophon :**

इति श्रीकौशिककुलतिलकसंचारिभाष्यश्रीद्वादशाहयाजिपौत्रेण शब्दतन्त्रस्वतन्त्रचोकनाथशास्त्रिपुत्रेण बालपतञ्जलिना द्वादशाहयाजिना विरचितायां शब्दकौमुदीव्याख्यायां द्वादशाहयाजीयायां तद्धितप्रक्रिया समाप्ता ।

* * * *

परः सर्परिपूर्णगुण एवाल पटुः नतु तत्सा.

---

## R. No. 5082.

Palm-leaf. 10¼ × 1½ inches. Foll. 66. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1925–26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

क्रियाक्रमद्योतिका.

KRIYĀKRAMADYŌTIKĀ.

Same work as that described under No. 5435 of the D.C.S. MSS., Vol. XI. By Aghōraśivācārya.

Wants the beginning and the end.

---

R. No. 5083.

Palm-leaf. 13¼ × 1⅝ inches. Foll. 21. Lines, 10 in a page. Grantha. Slightly injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudamūr, South Arcot district.

तर्कसङ्ग्रहार्थप्रकाशिका.

TARKASAṄGRAHĀRTHAPRAKĀŚIKĀ.

A commentary on Annambhaṭṭa's Tarkasaṅgraha, which work has been described under No. 4143 of the D.C.S. MSS., Vol. VIII: by Puruṣōttama.

Complete.

**Beginning:**

निधायेति । हृदि विश्वेशमीश्वरं निधाय ध्यात्वा शिष्यशिक्षार्थं श्लोकरूपं वाचनिकमङ्गलं ग्रन्थादौ निबध्नन् शिष्यावधानाय प्रतिज्ञां करोति—क्रियत इति । शिष्यावधानं शिष्याणां श्रोतुमिच्छा । शाब्दबोधः— हृदयनिष्ठविश्वेश्वरविषयकध्यानानन्तरकालीनगुरुविषयनमस्कारानन्तरकालीनबालनिष्ठानायासप्रयोज्यबोधजनकस्तर्कसङ्ग्रहः मन्निष्ठकृतिविषयीभूत इति । पदार्थविभागं करोति—द्रव्येति । द्रव्यं च गुणश्च कर्म च सामान्यं च विशेषश्च समवायश्चाभावश्चेति पदार्थाः सप्त । तत्रेति, सप्तपदार्थेषु मध्ये द्रव्याणि नवैवेत्यन्वयः ।

**End:**

ननु प्राचीनमते प्रमाणप्रमेयसंशयादिषोडशपदार्थानां विद्यमानत्वात् कथं सप्त पदार्था इत्याशङ्कायां सर्वेषामेवेति । एवं च षोडशपदार्थानां सप्तपदार्थेऽन्तर्भावात् सप्तैव पदार्था इति सिद्धम् ।

काणादन्यायमतयोर्बालव्युत्पत्तिहेतवे ।
अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

कणानत्तीति कणादः. कणादमते नवीनमते न्यायमते गौतमादिप्राचीनमते बालानां पदार्थज्ञानसिद्ध्यर्थं अन्नंभट्टकविना तर्कसङ्ग्रहः कृत इत्यर्थः ।

नवीनन्यायमतयोर्बालानां सुखबोधिका ।
पुरुषोत्तमेन रचिता तर्कसङ्ग्रहार्थप्रकाशिका ॥

गुरुणा करुणा कृता यदि स्यात् तरुणा किं गुरुणापि नाकभाजाम् ।
स तु संविदधाति वाञ्छितार्थं सकलार्थानपि सन्दधाति सेयम् ॥

---

R. No. 5084.

Palm-leaf. 16 × 1¼ inches. Foll. 47. Lines, 6 in a page. Grantha. Good.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

विजयीन्द्रपराजयः.

VIJAYĪNDRAPARĀJAYAḤ.

Same work as that described under No. 4994 of the D.C.S. MSS., Vol. X. By Kumbhakōṇam Tātācarya.

Wants the beginning in the 20th Bhaṅga and breaks off in the 21st Bhaṅga.

---

R. No. 5085.

Palm-leaf. 17 × 1½ inches. Foll. 68. Lines, 8 in a page. Grantha. Injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

ब्रह्मसूत्रवृत्तिः—ब्रह्मतत्त्वप्रकाशिका.

BRAHMASŪTRAVṚTTIḤ : BRAHMATATTVAPRAKĀŚIKĀ.

Same work as that described under No. 4690 of the D.C.S. MSS., Vol. IX. By Sadāśivēndrasarasvatī.

Contains the Adhyāyas third and fourth only.

---

R. No. 5086.

Palm-leaf. 17 × 1½ inches. Foll. 40. Lines, 10 in a page. Grantha. Slightly injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

(a) वृत्तिदीपिका.

VṚTTIDĪPIKĀ.

Foll. 1a—26b.

Same work as that described under No. 1522 of the D.C.S. MSS., Vol. III, wherein see for the beginning. By Kṛṣṇabhaṭṭa, son of Raghunāthabhaṭṭa and grandson of Gōvardhanabhaṭṭa.

The author salutes his Guru Mādhavēndrasarasvatī in the beginning.

Complete.

**End:**

नन्वस्तु वर्णानां नित्यत्वम्; तथापि फलाभावात्तदतिरिक्तः स्फोटो न स्वीक्रियत इति चन्न । तदेवेदं घटपदं तदेवेदं वाक्यमेकं पदमेकं वाक्यमित्यबाधितप्रतीत्या तत्सिद्धिः । अन्यथा घटपटादीनामप्यवयवातिरिक्तावयव्यसिद्धिप्रसङ्गः । न चेष्टापत्तिः, भवत्सिद्धान्तभङ्गापत्तेः । इत्थं निरूपिताः पञ्च व्यक्तिस्फोटाः । बोपदेवेन तु शक्यतावच्छेदिका जातिरेव वाचिकेत्युक्तम् । जातिश्चाविद्यको धर्मविशेषः । तथा च वर्णजातिस्फोटः पदजातिस्फोटः वाक्यजातिस्फोट इति तन्मते स्फोटत्रयं सिद्धम् ।

**Colophon:**

इति श्रीमन्मौनिकुलतिलकायमानगोवर्धनभट्टात्मजरघुनाथभट्टसुतश्रीकृष्णभट्टविरचिता वृत्तिदीपिका समाप्ता ॥

The scribe adds—

इदं पुस्तकं ध्रुवसंवत्सरे मार्गशीर्षबहुलामावास्यायां भूमितनूजवासरे दिवि एकोनत्रिंशघटिकायां लेखनद्वारा समापितवान् सूर्योपनामकनारायणः ॥

---

(b) वैयाकरणसिद्धान्तमञ्जूषा.

VAIYĀKARAṆASIDDHĀNTAMAÑJŪṢĀ.

Foll. 27a—40a.

Same work as that described under No. 1487 of the D.C.S. MSS., Vol. III. By Nāgēśabhaṭṭōpādhyāya.

Contains the Vṛttivicāra.

R. No. **5087.**

Palm-leaf. 14¼ × 1 inches. Foll. 24. Lines, 6 in a page. Grantha, Injured.

Purchased in 1925–26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudāmūr, South Arcot district.

लक्ष्मीस्तुतिः.

LAKṢMĪSTUTIḤ.

*Foll.* 1*a*—4*b*.

A eulogy addressed to goddess Lakṣmī.

Wants the beginning and end.

**Beginning:**

मूर्धन्येन जघन्य . . . . . . . . . . केयेन ।
चपलं तुलयति वालं चामरमपि यस्सवाल एवासीत् ॥
. . . . . . . . गर्भे धम्मिल्लं देवि तावकं मन्ये ।
प्रसवशरण्ये न्यस्तं तरुणं प्राणीचपूर्णमणिवर्जे ॥
सिन्दूरसुन्दरा ते पद्मे सीमन्तपद्धतिर्भाति ।
वर्षावलाहकस्था विद्युल्लेखेव वीतचापल्या ॥
सामानाधिकरण्यं तेजस्तमसोर्न हीति वाञ्छिष्या ।
त्वन्मूर्ध्नि हेमभूषातेजश्चिकुरा(न्धकारयोः) स्थित्वा ॥
रम्यां ललाटरेखां पद्मे नीलालकाञ्चिताममलाम् ।
मन्ये पयोधरान्तरस्फुरितामिव शीततेजसो रेखाम् ॥

**End:**

तव कुचकुम्भद्वन्द्वे बद्धरपर्धीनि दाडिमफलानि ।
कमले ! केलिशुकौघास्तुण्डैरेतानि खण्डयन्ति रुषा ॥

Foll. 5*a*—24*b* contain some stanzas in the eighth Stabaka of the Lakṣmīsahasra.

---

R. No. **5088.**

Palm-leaf. 16 × 1½ inches. Foll. 28. Lines, 7 in a page. Grantha, Slightly injured.

Purchased in 1925–26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudāmūr, South Arcot district.

तप्तचक्राद्यङ्कनप्रमाणानि.

TAPTACAKRĀDYAṄKANAPRAMĀṆĀNI.

Same work as that described under R. No. 526 ante.

Incomplete.

---

R. No. **5089.**

Palm-leaf. 17 × 1 inches. Foll. 6. Lines, 6 in a page. Grantha. Good.

Purchased in 1925–26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

सुभाषितकौस्तुभः.

SUBHĀṢITAKAUSTUBHAḤ.

Same work as that described under No. 12123 of the D.C.S. MSS., Vol. XX. By Veṅkaṭācarya, son and disciple of Raghunātha of Ātrēyagōtra.

Contains the Paddhatis one to four only.

---

R. No. **5090.**

Palm-leaf. 13½ × 1½ inches. Foll. 21. Lines, 4 in a page. Grantha. Slightly injured and broken in the left side.

Purchased in 1925–26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

(a) पुरुषसूक्तभाष्यम्.

PURUṢASŪKTABHĀṢYAM.

Foll. 1*a*—17*b*.

Slightly different from the work described under No. 212 of the D.C.S. MSS., Vol. I, Part II. By Śriraṅganātha of Gautamagōtra, disciple of Mukundanarāyaṇa.

Complete.

**Beginning:**

यतः प्रपञ्चसंभूतिविभूतिपरिभूतयः ।
पुरुषाय नमस्तस्मै परस्मै चिन्मयात्मने ॥
तं प्रणम्यादिपुरुषं जगतामपि कारणम् ।
दुर्ज्ञानं पौरुषं सूक्तं व्याकरोमि यथामति ॥
स्वमनीषिकया प्रोक्ता न किंचिदभिधीयते ।
सुखग्रहार्थं भाष्याणि केवलं संक्षिपाम्यहम् ॥

उक्तज्ञानेष्वशक्तानां मनूक्तोक्तौ तु का कथा ।
न ह्यलब्धानुमननं को वा रोहावरोहति ॥
अर्थानां विप्रकीर्णानां सङ्क्षेपेणावधारणम् ।
सुखग्रहार्थमिष्टं हि पण्डितानां बहुश्रुताम् ॥

* * * *

श्रीशास्त्रे पुरुषसूक्तसंहितां भगवान् सनत्कुमारो नारदाय मुनये भगवज्ज्ञानमुपदिशन् पुरुषसूक्तमवतारयामास ।

पुरा नारायणो . . . परविष्टया ।
देवतिर्यङ्मनुष्यादीन् वीक्ष्य संसारमध्यगान् ।
एवं सञ्चिन्तयामास संसारवैभवं स्वकम् ॥
सता . माणवाक्यानां दुर्विज्ञानं वदन्ति माम् ।
अणोरणीयान्महतो महीयान्निर्गुणो गुणी ॥

**End :**

तमेतं पुरुषसूक्तार्थमतिरहस्यं राजगुह्यं गुह्यतमादीक्षितायोपदि(शेत्) नायज्ञ(ज्ञाया)वैष्णवायानाम्नो(नम्रये) सर्ववेदाद्विशिष्यते ।
तस्माद्व्रजध्वं शरणं हरिं मोक्षप्रदायिनम् ।
मोक्षं दातुमशक्तांस्तांस्त्यजध्वमितरान् सुरान् ॥

**Colophon :**

इति गौतमस्य मुकुन्दनारायणदासस्य सर्वक्रतुयाजिनः श्रीरङ्गनाथस्य कृतौ पुरुषसूक्तभाष्यं संपूर्णम् ॥

---

(*b*) वेदान्तदेशिकमङ्गलाशासनम्.

VEDĀNTADEŚIKAMAṄGALĀŚĀSANAM.

Foll. 18*a*—19*b*.

Same work as that described under R. No. 660 ante. By Naināracārya.

Complete.

---

(*c*) प्रार्थनाष्टकम्.

PRĀRTHANĀṢṬAKAM.

Foll. 20*a*—21*b*.

Eight stanzas in praise of Vēdāntadēśika : by Nainarācārya.
Complete.

**Beginning :**

श्रीमान् + सदा हृदि ॥
श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥
त्रयीचूडागुरो स्वामिन् कृपाम्भोराशिना त्वया ।
विज्ञापनं मामकीनं श्रोतव्यं श्रितवत्सल ॥

**End :**

श्रीमद्वेङ्कटनाथार्य त्वदीयचरणद्वयम् ।
भवत्वत्र परत्रापि मदीयं शरणं सदा ॥
सादरं व्याहरन्नेतत्प्रत्यहं प्रार्थनाष्टकम् ।
वेदान्ताचार्यपादाब्ज(भक्ति)रत्नाकरो भवेत् ॥

**Colophon :**

इति नैनाचार्यकृतिषु प्रार्थनाष्टकं संपूर्णम् ।

---

R. No. **5091.**

Palm-leaf. 15¾ × 1¼ inches. Foll. 6. Lines, 10 in a page. Grantha.
Slightly injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

रङ्गनाथस्तुतिमाला.
RAṄGANĀTHASTUTIMĀLĀ.

A collection of stanzas in praise of Lord Raṅganātha worshipped at Srirangam.

Complete.

**Beginning :**

विघ्नविघाताय परं चित्ताश्रय वाहिनीपतिं रुचिरम् ।
सद्रत्नावलिविततं कमलाकरभावतः प्रथितम् ॥
राजदनल्पकवनितासहवासपरं सुचिन्तनीयपदम् ।
अमृतकलादरमाश्रय रङ्गपतिं चित्त सत्कविप्रथितम् ॥

रङ्गेश नामसदृशं खलु चेष्टितं ते
रथ्यासु हन्त वनितां च पुरस्करोषि ।
गृह्णासि वेषनिचयं च सहस्रधा त्वं
लोकांश्च नर्तयसि कर्मगुणैर्निबध्नन् ॥

**End:**

रङ्गपतिः स्तुतिमालां स्वीकुरुतां स स्वयं सुकारुण्यात् ।
निरवधिदयापयोधिः श्रीरङ्गनिवाससादरो भूमा ॥
सद्गुणगुम्भनमधुरां श्राव्यां सर्वैर्विशिष्य विषयधुराम् ।
स्तुतिमालामम्लानां स्वीकुरु रङ्गक्षमाविभो स्वामिन् ॥

The scribe adds—

शामार्योपरनामधेयेन लिखितम् ।

---

R. No. **5092.**

Palm-leaf. 16¾ × 1 inches. Foll. 19. Lines, 7 in a page. Grantha. Injured and broken in the left side.

Purchased in 1925–26 from M.R.Ry. R. Varadacaryar, Village Munsif, Śirudāmūr, South Arcot district.

**शिवभक्तानन्दनाटकम्.**

ŚIVABHAKTĀNANDANĀṬAKAM.

A drama in five Acts describing the story of the Śaiva devotee Śiruttoṇḍar. He killed and cooked his only son to please god Śiva who came incognito as a guest to test the devotion of his supplicant. By Śiva's grace, the son was also restored back to life. The author **Rakṣanātha**, son of Janārdana of Bhāskaradīkṣita's family, wrote this work for being staged on the occasion of the festival of god Aruṇācaleśvara of Tiruvaṇṇāmalai.

Complete in five Aṅkas, but with many lacunæ.

**Beginning:**

स्वाहादृष्टिमहोत्सवस्य महसः स्वादुत्वमापादितो
भूयो येन दयाविधेयमनसा पुत्रेणुरुज्जीवितः ।
यत्कारुण्यनिरीक्षणं प्रणमतां सर्वार्थसिद्धि . . .
. . . दृढभक्तियोगसुलभो दद्यादभीष्टं फलम् ॥

नान्द्यन्ते सूत्रधारः—

भरतकुलभाग्यकलिके भावरसानन्दपरिणताकारे ।
जगदेकमोहनकले जय रङ्गाधिदेवते . . . ॥

इति सपुष्पाञ्जलिक्षेपं नेपथ्याभिमुखमवलोक्य, आर्ये इत इतः ।

प्रविश्य नटी—

अ०अ किं करणि०जम् ।

सू—

किमन्यत् ! अद्याहमादिष्टोऽस्मि सबहुमानम्—अखिलसुरमकुटमाणि- . . . . . . णनीराजितचरणराजीवस्य सन्ततसन्तन्यमानमहोत्सवविशेष-विस्मृतकैलासनिवासकुतूहलस्यापीतकुचनायिकासनाथस्य श्रीमदरुणगिरिनाथस्य . . . . यात्रामहोत्सवे समागतेन सकलकलाविलासभाजनेन सभाजनेन ।

नटी—किंति ।

सू—

वीरमाहेश्वरकथासुधास्वादनलालसाः ।
विनोदनीयाः केनापि तादृशा . . . . . ॥ इति ।

नटी—

तारिस०पवंधणि०वाहइ०त्तओ को वा कई भवे ।

सू—प्रिये किन्न जानासि ।

भार्गवकुलप्रदीपः परमेश्वरभक्तिभावितस्वान्तः ।
भास्करदीक्षि . . . . . . . . . . . . . . भः ॥

नटी—पसि०धो खु सो ।

सू—

पौत्रस्तस्य जनार्दनस्य तनयः प्रख्यातनानागुणो
रक्षानाथ इति प्रतीतिमतुलां प्राप्तः कविः श्रूयते ।
. . . . . . . . . . . . . . देवराजो भुवि
ख्यातौ हस्तिगिरीश्वरश्च कविताधौरेयकौ देशिकौ ॥

नटी—

अहिजाओ संपदाओ ।

सू—

कल्पितममुना कविना शिवभक्तानन्दमिति कृत . . . ।

. . . . . . . . . . . . . . . . . समर्थयिष्यामः ॥

नटी—

ता जिदं अह्मेहिं ।

सू—

कविः कमलसंभवप्रणयिनीकराम्भोरुह-
क्वणन्मणिविपञ्चिकागमकगन्धिवाग्वैरम्(?) ।
स्वभावसरला सभा पु . . . . . . . . .
. . . परिपाटिका परिचिताश्च नाट्ये वयम् ॥

* * * *

प्रस्तावना ॥

ततः प्रविशति नारदः ।

नारदः—

सन्तु शतमित्यादि पठित्वा ।

अहो महनीय(ता) कवेरजाप्रवाहसन्ततसन्तन्यमानसौभाग्यस्य चोलमही-भागस्य । यतः—

नानाविधैर्विनोदैर्नगराजसुतातपःफलं धाम ।
विधिहरिविमृग्यमाणं विधेयतामत्र भजति भक्तानाम् ॥

कल्य एव गोकर्णेश्वरमुपवीण्यागच्छता मया रक्तारण्यपुरे दभ्रभक्तस्य तद्गृहिण्याश्च माहेश्वराराधनक्रमावलोकनेनाविज्ञातः कालातिपातः । तदिदानीम्—

कैलासवासिनश्शम्भोरपि नाम घटेत मे ।
महनीयो महास्थानसेवातिद्धिमहोत्सवः ॥

पदान्तरं गत्वा, सविस्मयोल्लासम्, अपूर्वोऽयं दभ्रभक्तस्य भक्ति विशेषः । तथाहि—

ये केचन शिवभक्तास्तानिह शिवमेव मनसि मन्वानः ।
तनुते सहस्रशस्त्वयमहरहरिष्टान्नदानसन्तुष्टान् ॥

**End:**

नारदः—

अहो दयानिधेरस्य भक्तिपरीक्षासंविधानचातुरी । किं देव्यानयनमे . . . . . . . . . . . ।

परमपि—

दभ्रभक्तो वैरिरिष्टैः भावितः प्रीतिमुत्तमाम् ।
सर्वास्तथा . . . . यौपि य . . . . . . ॥
. . . . . . . . शालिनो वसुमती रक्षन्तु धर्मोत्तराः
श्लाघन्तां गतमत्सरास्सुमनसस्सूक्तीस्सुधा(स्यन्दिनी): ।
. . . . . . . . मुपैतु मे प्रतिभवं पादे भवानीपतेः ॥

इति निष्क्रान्तास्सर्वे ।

**Colophon:**

पञ्चमोऽङ्कः ।

---

R. No. **5093.**

Palm-leaf. 13 × 1 inches. Foll. 296. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1925–26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

**(a) सिद्धान्तकौमुदीव्याख्या—सुखबोधिनी.**

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: SUKHABŌDHINĪ.

Foll. 1*a*–120*a*.

A commentary on Bhaṭṭōjidīkṣita's Siddhāntakaumudi, which work has been described under No. 1411 of the D.C.S. MSS., Vol. III: by Nīlakaṇṭhavājapēyin, son of Paramēśvara and grandson of Rāmacandra.

Breaks off in the Sandhiprakaraṇa.

**Beginning:**

विश्वेश्वरं विशालाक्षीं गणेशं षण्मुखं गुरुम् ।
मुनित्रयं नन्दिकेशं भारतीं नौमि सिद्धये ॥

पदवाक्यप्रमाणानां पारगं विबुधोत्तमम् ।
रामचन्द्रमहीन्द्राख्यपितामहमहं भजे ॥

आत्रेयाब्धिकलानिधिः कविबुधालङ्कारचूडामणि-
स्तातः श्रीपरमेश्वरो मखिवरो योऽयष्ट देवान्मखैः ।
अध्यैष्टाप्पयदीक्षितस्य तनयात्तन्त्राणि कात्स्न्यं पुनः
षड्वर्गानपि यो व्यजेष्ट शिवतां यः प्राप नस्सोऽवतात् ॥

श्रीवाजपेयिना नीलकण्ठेन विदुषां मुदे ।
सिद्धान्तकौमुदीव्याख्या क्रियते सुखबोधिनी ॥

अस्मद्गुरुकृतां व्याख्यां वहर्यां तत्त्वबोधिनीम् ।
विभाव्य तत्रानुक्तं च व्याख्यास्येहं यथामति ॥
महायासेन यल्लभ्यं तदनायासतो बुधाः ।
गृह्णन्तु सुखबोधिन्या पाण्डित्याय विमत्सराः ॥

तन्त्रे पाणिनिकर्तृके दृढतरं सत्सम्प्रदायाच्चिरं
भक्त्याधीत्य निबन्धजातमखिलं शेषीयभाष्यं पुनः ।
टीकाभिः परिभाव्य सारमखिलं ये जानते पण्डिताः
तेष्वेकोऽपि विलोकयेन्मम कृतिं धन्यो मदीयश्रमः ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये मङ्गलादीनि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्तीति महाभाष्योक्तविशेषफलावाप्तये च प्रकृत-शास्त्रनिर्मातृत्वेनाभ्यर्हितानां सूत्रवार्तिकभाष्यकारकाणां पाणिनिकात्यायन-पतञ्जलीनां मुनीश्वराणां नमस्कारपूर्वं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन् विषयप्रयोजनादीनि च ध्वनयन्नात्मनो निगूढार्थज्ञत्वं च ज्ञापयन् चिकीर्षितं प्रतिजानीते—मुनित्रयमित्यादिना । शास्त्राविरुद्धसूक्ष्मयुक्तिभिः पुनः पुनरनुचिन्तनं मननम् । तच्छीला मुनयः । मन अवबोधन इत्यस्मात्तानादिकात् मन ज्ञाने इति दैवादिकाद्वा मनेरुच्चोपधाया इत्युणादि-सूत्रेणेन्प्रत्ययः, उपधाया उत्वं च । किदित्यधिकारादिन्प्रत्ययश्च कित् । आर्धधातुकं शेष इतीन्प्रत्ययस्यार्धधातुकत्वात् पुगन्तलघूपधस्य चेति प्राप्तो गुणः क्ङिति चेति प्रतिषेधान्न भवति ।

**End:**

गुम्फत इति । गुम्फ ग्रन्थने क्तः । मस्यानुस्वारे परसवर्णेन मः । कुर्वन्तीत्यत्र डुकृञ् करण इत्यस्माल्लटि प्रथमपुरुषबहुवचने तनादिकृञ्भ्य उरिति विकरण उप्रत्ययः । गुणे रपरत्वे अत उत्वे झोऽन्त इत्यन्तादेशः । अत्र झेरन्तादेशे नकारस्य रषाभ्यामट्कुप्वाङिति णत्वमाशङ्क्य णत्वस्य परत्वेनासिद्धत्वात्पूर्वमनुस्वार एव क्रियते । ततः.

---

(b) काशिकावृत्तिव्याख्या—पदमञ्जरी.
KĀŚIKĀVṚTTIVYĀKHYĀ : PADAMAÑJARĪ.

Foll. 121a—263b.

Same work as that described under No. 1316 of the D.C.S. MSS., Vol. III. By Haradatta.

Contains the fourth Adhyāya only.

---

R. No. **5094.**

Palm-leaf. 12¾ × 1½ inches. Foll. 9. Lines, 7 in a page. Grantha. Good.

Purchased in 1925-26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudāmūr, South Arcot district.

आनन्दतारतम्यखण्डनम्.
ĀNANDATĀRATAMYAKHAṆḌANAM.

Similar to the work described under No. 4870 of the D.C.S. MSS., Vol. X. By Veṅkaṭācārya.

Incomplete.

**Beginning:**

सुब्रह्मण्याचार्यमाध्वप्रसङ्गे मुक्तानन्दे खण्डितं तारतम्यम् ।
सङ्क्षिप्यैतत्खण्डनस्य प्रकारं पत्रारूढं वेङ्कटार्यो विधत्ते ॥

मुण्डकोपनिषदि श्रूयते—यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैतीति । अत्र जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्चेत्यारभ्य भोगमात्रसाम्यलिङ्गाच्चेत्यन्तेनोक्तसूत्रकदम्बकप्रदर्शितन्यायेन परमं साम्यमुपैतीत्यस्य भोगमात्रे परमं साम्यमुपैतीत्यर्थोऽवश्यमभ्युपगन्तव्यः । न च भोगमात्रेत्यत्र

मात्रचा ज्ञानादेरपि व्यवच्छेदप्रतीत्या भवन्मते ज्ञानेनापि परमसाम्यस्याभ्युपगतत्वेन भोगमात्रेत्यादिसूत्रविरोध इति वाच्यम्, मुक्ते सर्वस्यापि ज्ञानस्य मुक्तावनङ्गीकारेण विरोधाभावात् ।

**End:**

अस्मन्मते च कर्तारमित्यनेनासङ्कोचात् निखिलजगत्कर्तृत्वप्रतीतौ चतुर्मुखस्यापि हिरण्यगर्भस्समवर्तताग्रे इत्यादिना निखिलजगत्कारणत्वसिद्धेः तस्य कार्यकोटिनिवेशाभावेन कर्तृपदोक्तनिखिलजगत्

---

R. No. **5095.**

Palm-leaf. 17 × 1¼ inches. Foll. 29. Lines, 7 in a page. Grantha. Good.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

अलङ्कारकौस्तुभः.

ALAṄKĀRAKAUSTUBHAḤ.

Same work as that described under R. No. 369(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-B, and No. 12785 of the D.C.S. MSS., Vol. XXII. By Vēṅkaṭācārya, son of Aṇṇayācārya of Bukkapaṭṇa and of Śrīśaila family.

Complete.

---

R. No. **5096.**

Palm-leaf. 15 × 1¼ inches. Foll. 215. Lines, 6 in a page. Grantha. Injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

(*a*) तर्कभाषा.

TARKABHĀṢĀ.

Foll. 1*a*—35*a*. Fol. 35*b* is left blank.

Same work as that described under No. 4104 of the D.C.S. MSS., Vol. VIII. By Kēśavamiśra.

Complete.

---

(*b*) श्रुतिसूक्तिमाला, विकासिनीव्याख्यासहिता.

ŚRUTISŪKTIMĀLĀ WITH THE COMMENTARY VIKĀSINĪ.

**Foll. 36*a*—215*b*.**

Same work as that described under No. 5077 of the D.C.S. MSS., Vol. X. By Haradattācārya. It is followed by a commentary called Vikāsinī by Yajñēśvarabhaṭṭōpādhyāya, son of Nṛsiṁhayajvan. The text is also called Caturvēdatātparyasaṅgraha.

Complete.

**Beginning :**

पातु मां पार्वतीकान्तः पञ्चाननतनुः परः ।

चिकीर्षुर्लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेन तत्सिद्ध्यर्थमस्यां सूक्तिमालायां प्राधान्येन प्रति(पि)पादयिषतानि नमःशेषित्वनिरतिशयैश्वर्यादिगुणकत्वनारायणोपनिषदुदीरितोपास्यत्वगायत्रीप्रतिपाद्यत्वक्रतुशेषित्वरूपाणि शिवैकनियतानि पञ्च ब्रह्माणीव पञ्चाकाराणीव श्रुतिसिद्धानि पञ्च ब्रह्माण्यधिष्ठाय पञ्चधावस्थितस्य परमेश्वरस्य पञ्चलक्षणानि सङ्कलानः तद्विशिष्टत्वेनानन्यसाधारणत्वादस्यैवाश्रयणीयत्वम् अनीश्वराणामीश्वरपरतन्त्राणामन्येषामाश्रयणीयता दूरतोऽपास्तेतीश्वरस्यैवाश्रयणीयत्वे हेतुं च दर्शयन्नाह—यस्मै नम इति ।

यस्मै नमो भवति यस्य गुणास्समग्रा
नारायणोपनिषदा यदुपासनोक्ता ।
यो नः प्रचोदयति बुद्धिमथक्रतौ य-
स्तन्त्वामनन्यगतिरीश्वरमाश्रयामः ॥

अस्यार्थः—नमो नमस्कारो यस्मै यस्य सम्बन्धि भवति नमस्कारक्रियया अस्यैवाभीप्सितत्वान्नमसस्तत्सम्बन्धित्वम् । यस्मै नमस्तस्मै त्वा जुष्टान्नियुनज्मीति मन्त्रानुकरणार्थत्वादनुकार्यानुकरणयोरभेदविवक्षया नमस्स्वस्तिस्वाहेत्यादि व्याकरणसूत्रेण चतुर्थी ।

**End:**

परमेश्वरेण विष्णवे दत्तमिति हरदत्तं सुदर्शनमेवोच्यते । . . . . . . सकलवेदतात्पर्यं सम्यक् जानातीति तद्भक्तिरेव सूचयति । यैः परमकारु . . . . . . नां चतुर्वेदतात्पर्यसंग्रहरूपोडुपः कृतः तेभ्यो नित्यं नमोऽस्तु ।

**Colophon:**

. . . . . . नरसिंहयज्वतनूजश्रीरघुनाथेश्वरभट्टोपाध्यायविरचिता श्रुतिसूक्तिमालाविकासिनी समाप्ता ॥

मिथ्या . . . . . . . . . . . . . . . ख्यापन-
च्छद्माणामचिरप्रभा च विबुधप्रेम्णा महेशद्विषाम् ।
मूर्च्छन्ध्वे(ध्वंसे)व दुरात्मनां वि . . . . . . . .
. . . परमेश्वरश्रुतिकथातात्पर्यसंग्राहकैः ॥

निजव्याख्यानोक्तिर्विहतहरदत्तोक्ति . . .

. . . . . . . . . . . . . स्पालिरनिशम् ।

जगज्जाड्यं दृष्ट्वा शमयति नृसिंहाध्वरिवरो

दयार्द्रैरुद्भूत . . . . . . . . . . . . ॥

The scribe adds—

नळ वर्षे तुलामासे चतुर्थ्यां भानुवासरे ।

लिखिता शङ्करेणायं सर्वे . . . . . . ॥

---

R. No. **5097.**

Palm-leaf. 13⅝ × 1¼ inches. Foll. 33. Lines, 9 in a page. Grantha. Good.

Purchased in 1925–26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudamūr, South Arcot district.

मुद्राराक्षसव्याख्या.

MUDRĀRĀKṢASAVYĀKHYĀ.

Same work as that described under No. 12621 of the D.C.S. MSS., Vol. XXI. By Duṇḍirāja Vyāsayajvan.

Contains one to four Aṅkas.

The scribe adds—

नृसिंहनामधेयेन व्याख्या विलिखिता बभूत् ।

समुद्राराक्षसस्येयं विदुषां ज्ञानवृद्धये ॥

---

R. No. **5098.**

Palm-leaf. 14 × 1½ inches. Foll. 15. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1925–26 from M.R.Ry. R. Varadācaryār, Village Munsif, Śirudāmūr, South Arcot district.

भारतसंग्रहसारः.

BHĀRATASAMGRAHASĀRAḤ.

Foll. 1a—12b.

A short work in prose giving very briefly the contents of each Parvan of the Mahābhārata.

Complete.

**Beginning :**

अस्मद्गुरुसमारम्भां यतिशेखरमध्यमाम् ।
लक्ष्मीवल्लभपर्यन्तां वन्दे गुरुपरम्पराम् ॥

गुरुपरम्परां नत्वा श्रीमहाभारतसारसंग्रहः क्रियते—भारतमित्येताव-देवास्ताम्, महाभारतमिति किमर्थमुच्यते इति चेत्,

महत्त्वे च गुरुत्वे च ध्रियमाणं ततोऽधिकम् ।
महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ॥

इति व्यासवाक्यान्न विरोधः । ननु भारतानां चरित्रमित्येवं वक्तव्य-मस्ति. भारतस्य भारतचरित्रता कथमुच्यत इति चेत्; एको गोत्रे गोत्रे एक एव प्रत्ययस्स्यादिति सूत्रात् प्रत्ययान्तरस्यासंभावितत्वात् । भरतस्येमे भारताः, भारतानां चरित्रं भारतमित्युच्यते । अतो नायं विरोधः । श्रीमद्व्यासविरचितभारतसंग्रहः क्रियते—

अथ पाण्डवानां वंशावलिरुच्यते—

विष्णोर्ब्रह्मा, तस्मान्मरीचिस्तस्मात्काश्यपस्तस्माद्विवस्वान्, तस्मान्मनुः, मनोरिला, पुरूरवाः, आयुः, नहुषः, ययातिः, ययातेर्द्वे भार्ये, शर्मिष्ठा देवयानीति, देवयान्याः द्वौ पुत्रौ, यदुः तुर्वसुः इति । शर्मिष्ठायास्त्रय-स्सुताः, द्रुह्युः अनुः पुरुरिति । यदोर्वंशजाः यादवाः । पुरोः वंशजाः पौरवाः ।

* * * *

अथ पाण्डवानां परमायुर्निर्णय क्रियते—

अरण्याद्धस्तिनापुरप्रवेशसमये युधिष्ठिरस्य षोडशवर्षाणि, भीमस्य पञ्चदश, बीभत्सोश्चतुर्दश, यमयोः त्रयोदश, तत्र त्रयोदशवर्षाणि धार्त-राष्ट्रैस्सहस्थितिः ।

**End :**

अथ हरिवंशम् । यत्र व्यासेन पापनाशनाः पुण्यकथाश्च देवा-सुरकथाश्च भविष्यत्कथाश्च कृष्णस्य जन्मकर्मणां प्रभावश्चैतत्सर्वमखिल-माख्यातम् । एवं सपादलक्षग्रन्थस्य श्रीमहाभारतस्य सारसंग्रहः कृतः ॥

सर्वान्तर्यामिणे सर्वकर्माराध्याय विष्णवे ।
सम्प्रदाय साधूनां सर्वबीजाय ते नमः ॥ इति ।

Foll. 13—15 contain the Yakṣapraśna, a portion of the Mahābhārata.

R. No. **5099**.

Palm-leaf. 14½ × 1¼ inches. Foll. 33. Lines, 7 in a page. Grantha. Good.

Purchased in 1925-26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudamūr, South Arcot district.

(*a*) जटावलिः.

JAṬĀVALIḤ.

Foll. 1*a*—3*b*.

Same work as that described under No. 909 of the D.C.S. MSS., Vol. II.

Complete.

---

(*b*) जटामणिः, सव्याख्यः.

JAṬĀMAṆIḤ WITH COMMENTARY.

Foll. 4*a*—15*b*.

Same work as that described under No. 908 of the D.C.S. MSS., Vol. II.

Incomplete.

---

(*c*) जटान्यायपञ्चाशद्भाष्यम्.

JAṬĀNYĀYAPAÑCĀŚADBHĀṢYAM.

Foll. 16*a*—33.

Same work as that described under R. No. 1631(*b*) ante.

Incomplete.

---

R. No. **5100**.

Palm-leaf. 14 × 1 inches. Foll. 82. Lines, 7 in a page. Grantha. Injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudamūr, South Arcot district.

(*a*) पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Foll. 1*a*—46*b*.

Same work as that described under No. 2633 of the D.C.S. MSS., Vol. V.

Contains 1 to 22 Adhyāyas.

---

(*b*) आपस्तम्बस्मृतिः.

ĀPASTAMBASMṚTIḤ.

Foll. 47*a*—82*b*.

Same work as that described under No. 2620 of the D.C.S. MSS., Vol. V.

Breaks off in the sixth Paṭala.

---

## R. No. **5101**.

Palm-leaf. 16 × 1¼ inches. Foll. 72. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

न्यायदर्पणम् (मीमांसा).

NYĀYADARPAṆAM (MĪMĀṀSĀ).

An expository treatise on the Pūrvamīmāṁsā of Jaimini: by Rāmakṛṣṇādhvarin.

Contains the second Pāda of the first Adhyāya almost complete.

**Beginning:**

. . . . . . . . . . . . . . . . . . |

रामकृष्णाध्वरीन्द्रेण तन्यते न्यायदर्पणम् ॥

. . . . . . . . . . . . . . . . . . . . . . . .

प्रामाण्यमुपपादितम् । सम्प्रत्यर्थवादमन्त्रनामधेयात्मनो . . . . . . .

* * * *

ब्राह्मणशब्दप्रवृत्तिनिमित्तस्य संभवादिति चेन्न, विकल्पासहत्वात् । तथाहि आचाराणां प्रवृत्तिनिमित्तत्वं जात्यभिव्यञ्जकत्वमाहोस्वित्तज्जनित-संस्कारस्य प्रवृत्तिनिमित्तत्वमभिव्यञ्जकत्वं वा । आद्ये आचारमात्रेऽथवा ब्राह्मणविहिताचारे वा । नाद्यः, क्षत्रियादावतिप्रसङ्गात् । न द्वितीयः, आत्माश्रयापत्तेः । किंचाचार . . . प्रत्येकं प्रवृत्तिनिमित्तत्वं प्रत्येकं व्यभिचारात् । नापि मिलितानां युगपन्मेलनाभावात् ।

**End:**

सू—विधिशब्दाश्च ।

* * * *

तथा ब्राह्मणवाक्यावगताग्नेयाग्नीषोमीयोपांशुयाजक्रमस्याग्निर्मूर्धेदिव इत्यादि याज्यापुरोनुवाक्यागतक्रमाधीनत्वात् । एवमग्नीषोमीयं पशुमालभेतेत्यत्र पशुपदस्य छागपरत्वकल्पनस्य वपाया मेदसोऽनुब्रूहीति मन्त्रलिङ्गाधीनत्वात् ।

R. No. 5102.

Palm-leaf. 15 × 1½ inches. Foll. 5. Lines, 9 in a page. Telugu. Slightly injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudamūr, South Arcot district.

शृङ्गारतिलकभाणः.

ŚṚṄGĀRATILAKABHĀṆAḤ.

A drama of the Bhāṇa kind: by Rāmabhadradikṣita, a disciple of Nīlakaṇṭhadikṣita and Śokkanāthamakhin (author's father-in-law).

It is stated that the work was written at the request of the author's disciple Raghunātha. The work has been printed in the Kāvyamālā series.

Incomplete.

**Beginning:**

. . . . वसरयेव दृढोपगूढा
रागस्पृशा रघुपतेर्नयनाञ्चलेन ।
लज्जावशान्नववधूरिव सङ्कुचन्ती
दृष्टिर्महीदुहितुरस्तु विभूतये वः ॥

. . . . . . . . . . . . . . . हठालिङ्गनात्
. . . . पुनर्लिख्याम्यहमिति स्मेरे रघूणां वरे ।
रोषेणारुणितस्त्रपातरलितः प्रेम्णा च विस्तारितो
दत्तो मैथिलकन्यया दिशतु वः क्षेमं कटाक्षाङ्कुरः ॥

नान्द्यन्ते सूत्रधारः—सादरमञ्जलिं बद्ध्वा ।

भ्रमद्भ्रूवल्लीकं भृशतरलितापाङ्गवलनं
समुद्यत्सीत्कारं पुलकितकपोलस्थलयुगम् ।
करौ व्याधून्वत्याः कनकवलयध्वानमुखरौ
मुदे वस्तद्भूया . . . . . पानं मृगदृशः ॥

इति पुष्पाञ्जलिं विकीर्य । नेपथ्याभिमुखमवलोक्य । मारिष इतस्तावत् ।

प्रविश्य पारिपार्श्वकः—भाव एषोऽस्मि

सूत्र—अत्र किल वृत्रारिसमाराधितचरणारविन्दस्य चित्रीकृतचतुःषष्टिविधविहारनायकस्य सुन्दरेशनाम्नो भगवतश्चन्द्रकलाधरस्य नित्यनिवा- . . . . . नगरातिशायिनि सौभाग्यधुरन्धरे मधुरापुरे मीनाक्षीपरिणयमहोत्सवदिदृक्षया समागतैर्वैदेशिकैरादिष्टोऽस्मि सामाजिकैः ।

पारिपार्श्वकः—किमिव ।

सू—अयि मधुरापुरवास्तव्यभरतकुलचूडामणे रमणीयरूपकप्रयोगेषु निपुण इति श्रुतोऽसि । तदधुना सरसकविनिबद्धं हृद्यं किमपि नूतनरूपकमभिनीय चरितार्थय चक्षुष्मत्तामस्माकमिति ।

सहर्षम् ।

तदद्य चिरलब्धायास्सदस्यानन्दलक्षणम् ।
अस्माकं गानविद्यायाः फलमेवोपतिष्ठते ॥

पारि—अहो विप्रतिषिद्धमेतत् यदुत सरसकविनिबद्धत्वं रूपकस्य नूतनत्वं च । न खल्विदानीं निबन्धारस्सरसकवयः ।

सू—स्मरणमभिनीय । मैवम् ।

गिरिक्षुभितनिस्वनत्कल . . . . . स्थली-
निरर्गलविनिर्गलन्नवसुधारसस्रोतसम् ।
सुधांशुनिरणक्षमो भवति यस्य सूक्तिक्रमः
स एष सरसः कविर्जयति रामभद्रस्सुधीः ॥

पारि—भाव, क एषः ? न जानामि ।

सू—किमेतमपि जगद्विदितं न जानासि ।

यश्चतुर्वेदयज्व्येन्द्रवंशवारिधिकौस्तुभः ।
यस्य कण्डरमाणिक्यग्रामो भवति जन्मभूः ॥

पारि—सशिरःकम्पम् । आः स्मरामि, स एवायम् । यः किल निखिलविद्वज्जनश्लाघनीयवैदुष्यशाली . . . . . शिष्यसहस्रविभाज्यमाननिजप्रभावाः श्रौतधर्मा इव मूर्तिमन्तस्तत्रभवन्तः चोक्कनाथमखिप्रवरा वितीर्णवन्तोऽपि प्रथमं तत्कन्यामन्यामिव पुनरपि स्नेहेन निरवद्यां वितरन्ति स्म सर्वां विद्याम् । तेनैव सरसकविना प्रणीतं शृङ्गारतिलकं नाम भाणं रमणीयं प्रयुञ्जानास्सामाजिकहृदयमनुरञ्जयावः ।

पारि—कथमस्य रघुवीरचरणारविन्दप्रवणनिरन्तरप्रवीणचेतसो भाणनिर्माणप्रवृत्तं हृदयम् ।

सू—उक्तमत्र तेनैव ।

प्रार्थितो निजशिष्येण रघुनाथेन धीमता ।
शृङ्गारतिलकं नाम भाणं विरचयाम्यहम् ॥ इति ।

पारि—पुनरपि किञ्चिदाशङ्कते मे हृदयम् ।

सू—किन्तत् ?

पारि—तस्य परिचितभूयिष्ठनिष्ठुरकैयटवचनसम्पर्ककर्कशवाक्यक्रमस्य सरसपदसन्दर्भेऽपि प्रागल्भ्यमिति ।

सू—यत्किञ्चिदेतत् । किं न पश्यसि ? समन्ततोपि दुष्कविभिरुपहतस्य सरसकविताकन्दरस्य पुनरुज्जीवनाय धरण्यां गूढमवतीर्णां चतुर्मुखवरवर्णिनीमात्मानुरूपामेत्य साधारणसर्वतन्त्रस्वातन्त्र्येण विवृण्वतां नीलकण्ठमखिनां सदसि सकृत्प्रविष्टस्यापि समुन्मीलति सरसपदसन्दर्भवैदग्धी । अस्य पुनः कवेस्तदीयशिष्यतद्भजनानुरक्तस्य किमु वक्तव्यम् । किञ्च सर्वमपि सुघटितमस्मद्भाग्यवशात् ।

**End :**

रजनीमुखमेणाङ्को रागी यावन्न मुञ्चति ।
तावदेव त्वया सार्धं तन्वङ्गीं योजयामि ताम् ॥

तत्कियन्तं कालं सोढव्यो विरहावेश इति ।

सखे सर्वथा योजयिष्यामीत्यमृतमयैरक्षरैराह्लादयसि कर्णपुटीम् । साधय सखे साधयेत्युक्त्वा कतिचित्पदानि गत्वा, विचिन्त्य.

---

R. No. **5103.**

Palm-leaf. 17 × 1½ inches. Foll. 78. Lines, 10 in a page. Grantha. Very much injured and in disorder.

Purchased in 1925–26 from M.R.Ry. R. Varadâcâryar, Village Munsif, Śirudâmûr, South Arcot district.

**बृहतीव्याख्या—ऋजुविमला.**

**BṚHATĪVYĀKHYĀ : ṚJUVIMALĀ.**

Same work as that described under R. Nos. 2682, 3293, 3590 and 3770 ante. By Śālikanātha.

Contains 1, 2 Pādas in the 8th Adhyāya and 1, 6 Pādas in the 6th Adhyāya and 2nd Pāda of the 9th Adhyāya and 1, 2 Pādas in the 5th Adhyāya.

---

## R. No. **5104.**

* Palm-leaf. 16, 14 × 1½ inches. Foll. 37. Lines, 9-12 in a page. Grantha. Good.

Purchased in 1925-26 from M.R.Ry. R. Varadacāryar, Village Munsif, Śirudāmūr, South Arcot district.

(*a*) पुच्छब्रह्मवादनिरासः.

PUCCHABRAHMAVĀDANIRĀSAḤ.

Foll. 1*a*—6*a*.

Same work as that described under No. 4929 of the D.C.S. MSS., Vol. X; but with the following additional stanzas in the beginning. By Śrīnivāsācārya.

Complete.

**Beginning :**

श्रीमत्त्रय्यन्तसीमायुगलविभजनाखण्डपाण्डित्यभूमा
षट्तन्त्रोदन्तदन्तावलबलनसृणी बोभवद्युक्तिदामा ।
श्रीशैलाख्यान्वयेन्दुस्सकलगुणनिधिस्सर्वतन्त्रस्वतन्त्रः
कारुण्यात् सन्निधत्तां मम हृदि सततं श्रीनिवासार्यवर्यः ॥

यद्ध्यानात्परमानन्दास्सिध्येद्वाचामगोचरः ।
कारणं जगतामीशं तमानन्दमयं श्रये ॥
त्रयीसिद्धान्तशुद्धान्तशुद्धान्तःकरणान् गुरून् ।
प्रणम्याद्वैतिनो भिक्षोः पक्षो विक्षोभ्यतेऽधुना ॥

---

(*b*) आनन्दतारतम्यखण्डनम्.

ĀNANDATĀRATAMYAKHAṆḌANAM.

Foll. 6*a*—9*b*.

Same work as that described under No. 4869 of the D.C.S. MSS. Vol. X. By Śrīnivāsācārya of Śaṭhamarṣaṇagōtra.

Complete.

(c) परिभाषेन्दुशेखरव्याख्या.

PARIBHĀṢENDUŚEKHARAVYĀKHYĀ.

Foll. 10a—11b.

Same work as that described under No. 1463 of the D.C.S. MSS., Vol. III.

Contains Apavādaparibhāṣā only incomplete.

**Beginning:**

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति । भावे क्त इति । गत्यर्थ इति । अविवक्षितकर्मत्वेनाकर्मकतया नपुंसके भावे क्त इत्यर्थः । येनेति कर्तरि तृतीया । नपुंसके भावे क्तस्य योगे षष्ठीति वार्तिकस्य शेषत्वविवक्षया भाष्ये प्रत्याख्यानात् नाप्राप्त इत्यत्र न-शब्देन समासः । पृषोदरादित्वाद्वा साधुः । एतद्भाष्यमेवात्र मानम् । अवश्यमित्यर्थलाभे बीजमाह—द्वाविति । तदुक्तं विनञ्भ्यामिति सूत्रे—द्वौ प्रतिषेधौ ।

**End:**

षष्ठ्यन्तपदमित्पदयोर्बहुव्रीहित्वेन षष्ठ्यन्तत्वस्य मित्वस्य च षष्ठी-मकाररूपतया स्वाधिकरणमस्तेर्भूरिति शास्त्रं तद्वृत्तियों भेदः मिद्भेदः तत्प्रतियोगितावच्छेदकस्य मित्वस्याधिकरणमिदितो नुम् धातोरिति शास्त्रं तत्र वृत्तित्वस्य मित्वे सत्वान्न दोषः ।

Foll. 12a—18b contain a portion of the commentary on Mīmāṃsā-sūtras.

---

(d) मालविकाग्निमित्रम्.

MALAVIKĀGNIMITRAM.

Foll. 19a—35a.

Same work as that described under No. 12605 of the D.C.S. MSS., Vol. XXI. By Kālidāsa.

Complete.

Foll. 36—37 contain Pañcagavyaprayōga.

---

R. No. **5105.**

**Palm-leaf.** 15 × 1½ inches. **Foll** 36. **Lines,** 6 in a page. **Grantha. Injured.**

**Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.**

शतचण्डीसहस्रचण्डीपूजाप्रयोगः.
ŚATACAṆḌĪSAHASRACAṆḌĪPŪJĀPRAYOGAḤ.

Same work as that described under R. No. 424 ante. This procedure forms a part of the Śāntisāra attributed to Dinakarabhaṭṭa, son of Rāmakṛṣṇa of Mīmāṁsaka Rāmēśvarabhaṭṭa family.

Complete.

**Colophon :**

इति मीमांसकश्रीमद्रामेश्वरभट्ट . . . . . . . सूनु . . . . नाराचणभट्टसुत . . . . . द्रामकृष्णात्मजदिनकरभट्टकृते शान्तिसारे नित्यचण्डीविधानचण्डीनवचण्डीशतचण्डीसहस्रचण्ड्यादिविधिः ।

---

R. No. **5106.**

Palm-leaf. 16 × 1½ inches. Foll. 80. Lines, 7 in a page. Telugu. Very much injured.

Purchased in 1925-26 from M.R.Ry. R. Varadacaryar, Village Munsif, Śirudāmūr, South Arcot district.

शिवनामाष्टोत्तरशतस्तोत्रव्याख्यानम्—शिवतत्त्वरहस्यम्.
ŚIVANĀMĀṢṬŌTTARAŚATASTŌTRAVYĀKHYĀNAM :
ŚIVATATTVARAHASYAM.

A commentary on the Śivāṣṭōttaraśatastōtra, which work has been described under R. No 610(b) ante : by Nīlakaṇṭhadīkṣita.

Wants the beginning ; otherwise complete.

**Beginning :**

ब्रह्मशिवादिप्रतिपादनाभिनिविष्टस्य निबन्धस्य भगव . . . . . . . . . . . संभवेनास्य वचनस्य तत्त्व . . . . . . . . . . . . पुराणप्रामाण्यकल्पनादेकस्यै तस्य . . . . प्रामाण्यकल्पनं ज्यायः, भूयसां बलीयस्त्वादिति वाच्यम् । ब्रह्मशिवप्रतिपादकपुराणेष्वेतद्वचनप्रतिपाद्यस्य . . . . . तमोमूलकत्वस्य कण्ठरवेण प्रतिषेधाभावान्न साक्षादस्ति विरोधः । किन्तु स्ववाचोदाहृतं प्रामाण्यमेतद्वचनगम्यरजस्तमोमूलकत्वविरोधीति परं . . . . . . तत्रापि नानेन वचनेन प्रागसिद्धं तेषाम प्रामाण्यं प्रतिपाद्यते । किन्तु परस्परविरुद्धार्थानां सर्वेषां पुराणानां प्रामाण्यानुपपत्तौ क्वचिदप्रामाण्ये पर्यवस . . . . . . . . व्यवस्थामात्रतात्पर्येण प्रवृत्ततया विरोधाभावात् ।

**End:**

इतरश्रुतिबाधापेक्षया रुद्राध्यायस्य कर्मकाण्डा.

* * * *

**Colophon:**

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्वाहक . . . . . . . . . . . . दीक्षितात्मजेन भूमिदेवीगर्भजन्मना नीलकण्ठदीक्षितेन विरचितं शिवनामाष्टोत्तरशतस्तोत्रव्या . . . . . . . . . ।

. . . . . . . . . . नीलकण्ठेन यज्वना ।
शिवतत्त्वरहस्याख्या शिवयोः प्रीतये कृतिः ॥

---

R. No. **5107**.

Palm-leaf (Śritāla). $12\frac{1}{4} \times 1\frac{3}{4}$ inches. Foll. 86. Lines, 13 in a page. Grantha. Good.

Purchased in 1925-26 from M.R.Ry. R. Varadācāryar, Village Munsif, Śirudāmūr, South Arcot district.

**रुक्मिणीकल्याणम्, मौक्तिकमालाव्याख्यासहितम्.**

RUKMIṆĪKALYĀṆAM WITH THE COMMENTARY MAUKTIKAMĀLĀ.

Rajacūḍāmaṇidīkṣita's Rukmiṇīkalyāṇa, which work has been described under No. 11713 of the D.C.S. MSS., Vol. XX: together with the commentary called Mauktikamālā, by Yajñavēdēśvara, son of Bālacandrārya of Viśvāmitragōtra and Ratnakhēṭadīkṣita's family.

Contains the Sargas 2 to 6 complete

**Beginning:**

(मू.)—

अथ स्मरोद्दीपनमात्मनिष्कुटं विलोदनासेचनकं विलोकयन् ।
अतन्तनीदेष हृदन्तरातिथिर्मधुद्विषन् भीममहीशनन्दनाम् ॥

(व्या)—

अथ यूनोः परस्परदर्शनश्रवणस्मरणादिसमुद्भूतस्य शृङ्गारस्थायिनो रतिभावस्यैवाङ्कुरितत्वपल्लवितत्वकोरकितत्वकुसुमितत्वादिक्रमेण शृङ्गाररसतापत्त्या तादृशमेव भगवतो रुक्मिणीविषयकं रतिभावं क्रमशः प्रपञ्चयति—

अथेति । अथ दारुकवचनानन्तरम् एष मधुद्विषन् अयं मधुनामका-
सुरसंहारी कृष्णः द्विषोऽमित्रे इति द्विष अप्रीताविति धातोर्लटश्शतृप्रत्ययः ।
द्विषन्निति जातिवाचकतया सन्नित्यादिवत् क्वाचित्कतया प्रथमासमानाधि-
करणत्वेऽपि शतृत्वा . . रम्यनुज्ञानात् । अत्र मधुशब्दश्लेषेण वसन्त-
विद्वेषीत्यर्थो लभ्यते । तेन च तात्कालिकी रुक्मिणीविषयिणी विरहावस्था
व्यज्यते । विलोचनयोः नयनयोः ॥

* * * *

**Colophon:**

इति श्रीविश्वामित्रकुलकलशपारावारराकासुधाकरश्रीबालचन्द्रार्यतातचरण-
करुणापरिग्रहसमासादितविविधविद्याविलासेन यज्ञवेदेश्वरेण विरचितायां
रुक्मिणीकल्याणाख्यसरसमहाकाव्यव्याख्यायां मौक्तिकमालिकाख्यायां द्वितीय
सर्गस्संपूर्णः ॥

**End:**

(मू.)—

वामे भागे हिमगिरिसुतामिन्दुमौलेस्स्फुरन्तीं
वक्षस्सीमन्यपि मुररिपोर्वारिराशेः कुमारीम् ।
आलेख्येषु प्रणयसुभगं दर्शयन् वीतलज्जां
कारङ्कारं चिरमरमयत्तन्नवोढां स वोढाम् ॥

(व्या)—

इत्थं लज्जापारवश्येन स्वच्छन्दभोगाक्षमामपि कालेन युक्त्या शक्त्या
चाटूक्त्या च विस्रम्भवैयात्यसञ्जननेन स्ववशीकृत्य चिराभिलषितं निरति-
शयानन्दमन्वभूदित्याह—वाम इति । सः कृष्णः वोढा यथोक्तविधानेन
परिणीतां नवोढां लज्जाभयपराधीनरतिं तां रुक्मिणीं आलेख्येषु अवरोध-
भित्त्यादिविलिखितविचित्रचित्रेषु इन्दुमौलेश्चन्द्रशेखरस्य वामे सव्यभागे
अर्धे स्फुरन्तीम् ।

* * * *

वामेत्यादिना प्रतिपादितस्य भगवतोऽर्धनारीश्वरस्यैव वामेति सर्गान्त-
पद्येऽपि प्रतिपादिततया चोपक्रमोपसंहारयोरेकवाक्यत्वप्रतीत्या चात्रैव काव्य-
परिसमाप्तिरुत्तरसर्गचतुष्टयस्य तु चिरमरमयदिति प्रतिपादितसामान्यस्य तत्काल-
तद्रमणयोः प्रपञ्चनरूपविशेषपरतया काव्याङ्गत्वमिति च वेदितव्यम् ।

**Colophon:**

इति श्रीविश्वामित्रकुलकलशपारावारराकासुधाकरश्रीमद्ब्रह्मखेटमखिवर-सन्तानाङ्कुरायमाणश्रीबालयज्ञवेदेश्वरविरचितायां रुक्मिणीकल्याणाख्यसरसमहा-काव्यव्याख्यायां मौक्तिकमालिकाख्यायां षष्ठः सर्गः संपूर्णः ॥

---

R. No. 5108.

Palm-leaf. 15 × 1¼ inches. Foll. 23. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

(a) सभाभूषणमञ्जरी.

SABHĀBHŪṢAṆAMAÑJARĪ.

Foll. 1a—6a. Fol. 6b is left blank.

A collection of one hundred ingenious stanzas chiefly hyperbolising the greatness of kings: by Gautama.

Complete.

**Beginning:**

वाणी यस्य सुधारसप्रणयिनी विद्यानवद्या मति-
र्ज्ञानं तत्त्वकलाकलापकुशलं सम्पत्तिरन्यादृशी ।
दानाम्भःकणिकाङ्कितं करतलं सामन्तभूमीश्वरा
यस्याज्ञावशवर्तिनः स हि परं राजा बुधैः सेव्यताम् ॥

हे राजन्यशिखामणे तव यशश्चन्द्रे दिवाप्युद्गते
सानन्दं गिरिकन्दरासु रमणीराकृष्य रन्तुं सुराः ।
तत्रया झटिति त्यजन्ति निकटे क्रीडाकृतोः कोकयो-
र्दाम्पत्यं समुदीक्ष्य विस्मयमयव्रीडाकुलाः केवलम् ॥

**End:**

महाराजस्य माहात्म्यं यावद्वर्णयितुं फणी ।
सहस्रवदनः श्रीमानुद्युक्तो यदि शक्यते ।
गौतमेन कृता सैषा सभाभूषणमञ्जरी ।
जगदानन्दजननी जीयादाचन्द्रतारकम् ॥

(b) चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Foll. 7a—11b.

Similar to the work described under No. 12747 of the D.C.S. MSS., Vol. XXI.

Complete.

**Beginning:**

छायावृक्षमुपाश्रयन्ति पथिषु श्रान्ता हि पान्थाः समं
तेष्वेकोऽस्य शुभं शुभेन मनसा हृष्यन्ननुध्यायति ।
अन्यो भङ्क्तुमपेक्षतेऽस्य विटपानालम्बयष्टेः कृते
कश्चिच्छिन्नुते कवाटफलकं कर्तुं तमेव क्षणात् ॥
श्वानः सन्त्यपितोऽपि दन्तमुकुलव्यावर्तनोत्पातितैः
स्वैरोत्तानितविड्वराहपृथुकाः किं तैरस्थितैर्वा मृतैः ।
वस्तव्यं गिरिराजमौलिषु विहर्तव्यं पुनः स्वेच्छया
हन्तव्याः करिणो मृगेन्द्र इति च प्राप्तव्यमुच्चैर्यशः ॥

**End:**

स्निग्धश्यामलकोमलं दलमतिप्रच्छायशीतं तलं
मूर्धान्तविलम्बिजम्बलफलस्थू . . . . . ।
संपश्यन् विजने वने व्यवसितस्तत्रैव वस्तुं सुखं
पा . . न्धमुखाद्विषद्रुममम्मुं दैवादवैत्य द्रुमः ॥

---

(c) सभारञ्जनम्.
SABHĀRAÑJANAM.

Foll. 12a—17a.

Same work as that described under R. No. 1428(b) ante. By Nīlakaṇṭhadīkṣita.

Complete.

---

(d) कलिविडम्बनम्.
KALIVIḌAMBANAM.

Foll. 17a—23a. Fol. 23b is left blank.

Same work as that described under R. No. 1428(a) ante. By Nīlakaṇṭhadīkṣita.

Complete.

R. No. **5109.**

Palm-leaf. 15¼ × 1¼ inches. Foll. 30. Lines, 8 in a page. Nandināgari. Slightly injured.

Purchased in 1925-26 from M.R.Ry. R. Varadacaryar, Village Munsif, Śirudamūr, South Arcot district.

तत्त्वोद्द्योतटिप्पणीशेषः—वाक्यार्थचन्द्रिका.

TATTVŌDDYŌTAṬIPPAṆĪŚEṢAḤ: VĀKYĀRTHA-CANDRIKĀ.

This is a supplement to Vēdēśatīrtha's commentary on the Tattvōddyōtavivaraṇa described under No. 4792 of the D.C.S. MSS., Vol. X. By Śrīnivāsācārya.

Complete.

**Beginning:**

ननु पारमार्थिकभेदसाधनान्न मायावादिना सिद्धसाधनतोद्भावयितुं शक्या ; अनौपाधिकभेदसाधनान्न सोपाधिकतत्सत्वभेदवादिना भास्करेणापीति चेत्तत्राह—भेदस्य चेति । गौरवं स्यादिति ; संसारान्मुक्त इत्यस्य पञ्चाक्षरत्वाद्भिमतमित्यस्य त्र्यक्षरत्वाद्गौरवं स्यादित्यर्थः ।

**End:**

एवं समापितप्रकरणव्याख्यानो भगवांष्टीकाकारः स्वग्रन्थप्रचयावान्तेऽपि भगवत्प्रार्थनारूपं मङ्गलं कृत्वा शिक्षायै ग्रन्थान्ते निबध्नाति—कमलेति । रसो रागः सक्तिः प्रीतिरिति यावत् । तथा च कमलाया महालक्ष्म्याः कमला श्रीरित्यभिधानात्, आश्लेषः आलिङ्गनं तत्र रसिकः प्रीतिविशेषयुक्त इत्यर्थः । परः पुमान् उत्तमपुरुष इति । श्रीमदानन्दतीर्थेत्यादिविशेषणेन कमलाश्लेषरसिक इत्यनेन कमलानन्दतीर्थयोरपि प्रीतिराशासितेति ज्ञातव्यम् ।

वेदेशतीर्थटिप्पण्यामव्याख्यातानि यानि च ।
व्याख्यातान्यपि दुःखानि वाक्यानि विवृतान्यलम् ॥
श्रीनिवासेन बालानां बोधायैव हि केवलम् ।
अतोऽस्या व्यर्थता नैव शङ्कनीया सुबुद्धिभिः ॥

**Colophon:**

इति श्रीनिवासेन कृता तत्त्वोद्योतटिप्पणीशेषवाक्यार्थचन्द्रिका संपूर्णा ।

## R. No. 5110.

Palm-leaf. 15 × 1 inches. Foll. 23. Lines, 8 in a page. Grantha. Very much injured.

Purchased in 1925–26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

### शाकुनम्.
### ŚĀKUNAM.

Similar to the work described under No. 13995 of the *D.C.S. MSS.*, Vol. XXIV. By Vasantarāja.

Incomplete and wants beginning.

**Beginning:**

. . . . सर्वनिदानहर्ता महोदरः कुण्डलवान् किरीटी ।
श्वानं समभ्यर्च्य विचित्रवाक्यैः ध्येयः क्षणं वैश्रवणोत्तरेण ॥
स्तनन्धयैस्सप्तभिरभ्युपेता शिवाशिवाद्येत्यनुचिन्तनीया ।
यश्शाकुनज्ञानमुनिर्विशेषादभ्यर्चनीयश्शकुनेक्षणाय ।
तं पूजयेत्तत्रभवत्यभीष्ट . . . . . . . . . . . . . ॥
. . . भिर्भूमिनिविष्टजानुर्मूर्ध्ना प्रणम्य त्रिदशाधिपादीन् ।
यथावदभ्यर्चनतोषिताय पूजां समस्तां गुरवे प्रदेयात् ॥

* * * *

वसन्तराजशाकुने सदागमार्थशोभने
समस्तसत्यकौतुके विचारितोऽर्चनाविधिः ॥

. . . . गमसारः—

क्रियते सा विहगशास्त्रे येन स्यादधिकारिहृदयगतेन ।
सार्थे प्रधानं शिबिने नरेशं समात्मकार्येण नरे च दैवम् ॥

**End:**

लग्ना भवेदुत्तरतः प्रयातुः पुरस्कृता वाञ्छितसाधयित्रीम् ।
पुरप्रवेशादिषु च प्रशस्ता . . . . . . . . . . . . ॥
वामोऽथवा दक्षिणतो निनादः श्रेयःप्रदस्स्यात्किल कोकिलायाः ॥
इति लट्वादयः ।
कामखिको ।

R. No. 5111.

Palm-leaf. 16 × 1½ inches. Foll. 42. Lines, 8 in a page. Grantha. Very much injured.

Purchased in 1925-26 from M.R.Ry. R. Varadācaryar, Village Munsif, Śirudāmūr, South Arcot district.

## वादार्थमाला·

## VĀDĀRTHAMĀLĀ.

A series of controversial discussions relating to the two schools of Vēdānta, viz., Advaitism and Viśiṣṭādvaitism. The author, who belongs to the Viśiṣṭādvaita school, states and refutes the views of Advaitins regarding certain subjects, as set forth below. By Campakēśacārya, son and disciple of Varadācārya of Kauśikagōtra.

It is stated that the author wrote many other works such as Vēdāntakaṇṭakōddhāra, two commentaries—one big and another small—on the Śrutaprakāśikā, Nayamauktikamālā, Jīvanmuktvasamarthana, (Madhva) Tātparyacandrikākhaṇḍana, Siddhāntavaijayantī, Pañcaratnapradīpikā, Karmamīmāṁsāsārasaṅgraha, Nyāyakaustubha, Nyāyakaustubhahēmapariṣkāra, Bhīṣaṇāsurasaṁhāra, Mādhavānandanāṭaka, Śrīkaṭākṣasahasra, Ūrdhvapuṇḍravijaya, Muṇḍasannyāsakhaṇḍana and Jayantīnirṇaya.

Contains the following Vadas :—

| | |
|---|---|
| मोक्षवादः (wants beginning). | जीवानां परस्परभेदवादः. |
| मोक्षकारणवादः· | जीवाणुत्ववादः. |
| भेदवादः. | आत्मकर्तृत्ववादः· |
| जीवब्रह्मभेदवादः· | अहमर्थात्मतावादः. |

**Beginning :**

प्रतिपन्नं · · साम्यं पारम्येन विशेष्यते ।
भेदगर्भं च साहित्यं न तत्सम इतीरितः ॥

निषिद्धमेवात्र ततो ब्रह्मैक्यं प्रतिपाद्यते ।
नामरूपाद्विमुक्तं च · · · · · · · · · ॥

तथा च . . . मिदं न साम्यं प्रतिपाद्यते ।
अत्र ह्येते सर्व एकं भवन्तीत्याह च श्रुतिः ॥

अतो मदनुमा युक्ता त्वदीया च न युज्यते ।
इति कत्था हि षष्ठी स्यान्मध्यवेदान्तिनां मते ॥

**End:**

अहमर्थात्मता नूनं साधयत्यत्र नो भरः ।
नास्त्येव तस्माद्विजितमहमर्थात्मवादिभिः ॥
अतो न द . . . . सम्यङ् न स्याच्च तावकम् ।
इत्येवं दशमी कत्था विशिष्टाद्वैतवादिनाम् ॥

इत्यहमर्थात्मतावादः ।

**Colophon:**

इति श्रीभगवद्रामानुजाचार्यनियमितचतुस्सप्तति(पीठपति)स्थितगुरुगण-विभूषणतन्नियमितानेकबिरुदावलीशोभमानकौशिककुलसोमित्रिदेशिककुलजलधि-कौस्तुभस्य श्रीमद्वरदाचार्य(चरणनलिन)मधुव्रतायमानस्य कविकुलसार्व-भौमस्य कथकजनकण्ठीरवस्य श्रीमद्रामानुजसिद्धान्तविजयध्वजस्य (चम्प-केशाचार्य)स्य कृतिषु वादार्थमालिका संपूर्णा ॥

वेदान्तकण्टकोद्धारो विस्तृता च सुसंग्रहा ।
श्रुतप्रकाशिका(व्याख्या) . . . . प्रकाशिका ॥
नयमौक्तिकमाला च जीवाणुत्वसमर्थनम् ।
माध्वव्यासोक्ततात्पर्यचन्द्रिकाखण्डनं परम् ॥
सिद्धान्तवैजयन्ती सा पञ्चरत्नप्रदीपिका ।
. . . . . मृते ह्यं हरदत्तीयखण्डनम् ॥
वेदान्तविषयेऽसङ्ख्या वादार्था येन निर्मिताः ।
मीमांसायां कृताः कर्ममीमांसासारसंग्रहः ॥
अन्ये च तर्कविषये ग्रन्था राजन्ति(यत्कृताः) ।
(न्या)यकौस्तुभतद्धेमपरिष्कारादयोऽनघाः ॥
भीषणासुरसंहाराह्वयं सर्वमनोरमम् ।
एकाह्ना यत्कृतं काव्यं प्रशंसन्ति विपश्चितः ॥
गद्यकाव्यं च . . . रामायणकथाश्रयम् ।
यत्कृतं भुवने भाति माधवानन्दनाटकम् ॥

श्रीकटाक्षसहस्राख्यं स्तोत्रं लक्ष्म्याश्च यत्कृतम् ।
कवितामार्गमास्थाय प्रबन्धा य . . . . ॥
आख्यातुमपि शक्यन्ते नैवान्यविदुषां गणैः ।
शुभ्रोर्ध्वपुण्ड्रविजयो मुण्डसंन्यासखण्डनम् ॥
जयन्तीनिर्णयश्चान्ये यद्ग्रन्थास्स्मृतिमार्गगाः ॥
यस्य . . . . . . . . बन्धा बहवः कृताः ।
एवं यस्यापदानानि प्रसिद्धानि जगत्त्रये ॥
तेन कौशिकसौमित्रि(वंश)वार्धिसुधांशुना ।
श्रीमता चम्पकेशार्य(विदुषा) रचिता भुवि ॥
वेदान्तविषयेऽसङ्ख्या वादार्था येन निर्मिताः ।
इत्युक्तिर्यदभिप्राया . . . . . . . . . ॥
श्रीमद्वरदाचार्यसूनुं तत्पादसंश्रितम् ।
कौशिकान्वयनीवाड्ं चम्पकेशगुरुं (नुमः) ॥

---

R. No. **5112.**

Palm-leaf. 10 × 1½ inches. Foll. 39. Lines, 8 in a page. Grantha. Good.

Presented in 1925-26 by Subbalakṣmi Ammaḷ, wife of M.R.Ry. N. C. Subrahmaṇya Śāstrigaḷ, Nidamangalam, Tanjore district.

सर्वसिद्धान्तसंग्रहः.
SARVASIDDHĀNTASAṂGRAHAḤ.

Same work as that described under No. 4760 of the D.C.S. MSS., Vol. IX. By Śaṅkarācarya.

Complete.

---

R. No. **5113.**

Palm-leaf. 16 × 1½ inches. Foll. 17. Lines, 12 in a page. Grantha. Slightly injured.

Presented in 1925-26 by Subbalakṣmi Ammāḷ, wife of M.R.Ry. N. C. Subrahmaṇya Śāstrigaḷ, Nidamangalam, Tanjore district.

व्याप्तिवादः.
VYĀPTIVĀDAḤ.

Foll. 1*a*—16*a*. Fol. 17 is left blank.
Same work as that described under R. No. 223(*b*) ante.
Complete.

---

### R. No. 5114.

Palm-leaf. 17 × 1½ inches. Foll. 27. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1925-26 by Subbalakṣmi Ammaḷ, wife of M.R.Ry. N. C. Subrahmaṇya Śāstrigaḷ, Nidamangalam, Tanjore district.

**कविकल्पलता.**
**KAVIKALPALATĀ.**

Same work as that described under No. 32 on pages 80, 81 and 224—227 of M. Seshagiri Sastri's Report No. 2. By Dēvēśvara, son of Vāgbhaṭa.

Complete.

---

### R. No. 5115.

Palm-leaf. 13½ × 1¼ inches. Foll. 43. Lines, 8 in a page. Grantha. Good.

Presented in 1925-26 by Subbalakṣmi Ammaḷ wife of M.R.Ry. N. C. Subrahmaṇya Śāstrigaḷ, Nidamangalam, Tanjore district.

(*a*) **रामवर्णमालिकास्तोत्रम्.**
**RĀMAVARṆAMĀLIKĀSTŌTRAM,**

Foll. 1*a*—4*a*.

A collection of 51 stanzas in praise of Rāma, the first letters of these stanzas being the successive letters of the Sanskrit alphabet.

Complete.

**Beginning:**

अन्तः समस्तजगतां यमनुप्रविष्ट-
माचक्षते मणिगणेष्विव सूत्रमार्याः ।
तं केलिकल्पितरघूद्वहरूपमाद्यं
पङ्केरुहाक्षमनिशं शरणं प्रपद्ये ॥ १ ॥
आम्नायशैलशिखरैकनिकेतनाय
वाल्मीकिवाग्जलनिधिप्रतिबिम्बिताय ।
कालाम्बुदाय करुणारसमेदुराय
कस्मैचिदस्तु मम कार्मुकिणे प्रणामः ॥ २ ॥

**End:**

क्षन्तुं त्वमर्हसि रघूद्वह मेऽपराधान्
सर्वंसहा ननु वधूरपि ते पुराणी ।
वात्सल्यं च तनु हृत्कमलं मदीयं
कान्ता परापि न हि किं कमलालया ते ॥ ९० ॥
इत्थं मम स्तुवदमर्त्यनिगद्यमान-
त्रय्यन्तमन्त्रमुखरीकृतपादपीठ ।
राजाधिराज कृपया रघुवीर वर्ण-
मालास्तवं त्वमवकर्णयितुं प्रसीद ॥ ९१ ॥

**Colophon:**

वर्णमालास्तवः समाप्तः ॥

---

(*b*) रामकर्णामृतम्.
RĀMAKARṆĀMṚTAM.

Foll. 4*a*—10*b*.

Similar to the work described under No. 10275 of the D.C.S. MSS., Vol. XVIII.

Complete in 100 stanzas.

**Beginning:**

दिशतु स कुशलं जिते दशास्ये
विधिविहितस्तुतिर्विदितस्वरूपः ।
उपदिशति शिवो नृणां यदीयं
मनुविधिमुक्तपुरे विमुक्तिहेतोः ॥ १ ॥
विहितविधिमपास्यता निषिद्धा
न्यपि चरताप्यकृताक्षनिग्रहेण ।
यदघमुपचितं मया यतिष्ये
रघुवरसंस्मरणेन तन्निमार्ष्टुम् ॥ २ ॥

**End:**

दलितेन्दीवररूपे दर्शितदशकण्ठयौवतविलोपे ।
धृतशरचापकलापे दीव्यति हृदयं दिलीपकुलदीपे ॥ ९९ ॥

निगमान्तवनकुरङ्गे निर्मलमुन्यन्त(रङ्ग)नटरङ्गे ।
रुचितुलितरवितुरङ्गे क्वचन रमे रघुकुलार्णवतरङ्गे ॥ १०० ॥

**Colophon:**

श्रीरामकर्णामृतं समाप्तम् ।

---

(c) वेदसारशिवसहस्रनामस्तोत्रम्.

VĒDASĀRAŚIVASAHASRANĀMASTŌTRAM.

Foll. 11a—13a. Fol. 13b is left blank.

Same work as that described under R. No. 142(c) ante, but without some introductory stanzas.

Incomplete.

---

(d) दशश्लोकी.

DAŚAŚLŌKĪ.

Fol. 14.

Same work as that described under No. 4594 of the D.C.S. MSS., Vol. IX. By Śaṅkarācārya.

Complete.

---

(e) रङ्गनाथाष्टोत्तरशतनामावलिः.

RAṄGANĀTHĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 15a—16b.

Similar to the work described under No. 8962 of the D.C.S. MSS., Vol. XVII.

Complete.

**Beginning:**

श्रीरङ्गशायिने नमः । श्रीकान्ताय नमः । श्रीप्रदाय नमः । आश्रितवत्सलाय नमः । अनन्ताय नमः । माधवाय नमः । जेत्रे नमः । जगन्नाथाय नमः । जगद्गुरवे नमः । सुरवर्याय नमः ।

**End:**

मायाधराय नमः । निराधाराय नमः । सर्वाधाराय नमः । धराधराय नमः । पुण्यकीर्तये नमः । भक्तवश्याय नमः । लक्ष्मीनारायणाय नमः । महते नमः । त्रैलोक्यनायकाय नमः ॥

**Colophon:**

अष्टोत्तरशतं समाप्तम् ॥

(*f*) लक्ष्मीनारायणाङ्गपूजा
LAKṢMĪNĀRĀYAṆĀṄGAPŪJĀ.

Foll. 16*b*—17*b*.

On the worship of the different parts of the body from foot to head of goddess Lakṣmī and god Nārāyaṇa.

Complete.

**Beginning :**

अणिमादिसमाराध्यपदाब्जायै नमो नमः ।
अनन्तगुणकल्याणचरणाय नमो नमः ॥

पादौ ।

गङ्गादिसु^०^रित्पूज्यसरोजाङ्घ्रयै ।
गङ्गोद्भवनूपुराङ्घ्रियुगलाय नमः ॥

गुल्फौ ।

ब्रह्माणीन्द्राणिसंसेव्यसुजङ्घायै ।
श्रीभूनीलासमाराध्यसुजङ्घाय नमः ॥

जङ्घे ।

**End :**

सुवासितलसत्पुष्पकुन्तलायै ।
नवरत्नाचितश्रीमत्किरीटाय नमः ॥

शिरः ।

सर्वलोकदयापूर्णकटाक्षिण्यै नमः ।
ब्रह्मादिकीटपर्यन्तशरण्याय नमः ॥

सर्वाङ्गम् ॥

लक्ष्मीनारायणाभ्यां नमः । पादादिशिरोऽन्तं पूजयामि ।

**Colophon :**

अङ्गपूजा समाप्ता ॥

---

(*g*) चिदम्बरेशसहस्रनामस्तोत्रम्
CIDAMBARĒŚASAHASRANĀMASTŌTRAM.

Foll. 18*a*—25*b*.

Gives in verse 1,000 names in praise of god Naṭarāja worshipped in the Śaiva shrine at Chidambaram.

Complete.

**Beginning:**

श्रीस्कन्दः—

पुरा देव्यै शिवेनोक्तं सर्वसिद्धिकरं परम् ।
नाम्नां सहस्रं स्वानन्दनटनोल्लाससुन्दरम् ॥
सकृत्पठनमात्रेण भोगमोक्षप्रदं शिवम् ।
तत्तेऽहं संप्रवक्ष्यामि नियमोऽस्य सदा जपः ॥
मया षड्भिश्च वदनैस्सर्वदा जप्यते हृदि ।
ताण्डवं सर्वदा शम्भुः कुरुते शिवया सह ॥
कैलाससौधमध्यस्थं शिवं लास्यविशारदम् ।
प्रणम्य परमप्रीतं पप्रच्छ गिरिकन्यका ॥
केन तुष्टोऽपराधानि सहसे भक्तवत्सल ।
किं तवातिप्रियकरं प्रसादकरमुत्तमम् ॥
तन्मे वद कृपासिन्धो सर्वलोकशिवङ्कर ।
इति संप्रार्थितो देव्या कृपामूर्त्या कृपानिधिः ॥
प्राह तां हर्षयन् शम्भुरानन्दनटनं प्रियः ।

श्रीशिवः—

नाम्नां सहस्रं देवेशि मम नृत्तप्रकाशकम् ॥
गोप्याद्गोप्यतमं ह्येतन्नोक्तपूर्वमिदं शृणु ।
ऋषिस्सदाशिवस्साक्षादहमेवास्य देवता ॥

* * * *

श्रीशिवः श्रीसभानाथः श्रीमान् श्रीपतिपूजितः ।
शिवङ्करशिवतरश्शिष्टहृष्टश्शिवागमः ॥
अखण्डानन्दचिद्रूपः परमानन्दताण्डवः ।
अपस्मृतिन्यस्तपादः कृत्तिवासाः कृपाकरः ॥

**End:**

इति ते कथितं देवि नटेशस्यातिसुन्दरम् ।
नाम्नां सहस्रमेतद्धि गोप्याद्गोप्यतरं मम ॥
शैवायैव प्रदातव्यं नान्यायैव कदाचन ।
सर्वसिद्धिकरं ह्येतत्सर्वाविद्यानिवर्तकम् ॥

* * * *

तस्माच्छिव शिवेत्येवं जपन्त्वनिशमादरात् ।
कृतलिङ्गार्चना भस्मरुद्राक्षवरभूषणाः ॥
शिवसंत्रेषु निरताः सर्वदा शिवभावनाः ।
जीवन्मुक्ताश्शिवाचारा भवेयुर्नापरे खलाः ॥

Fol. 26*a* contains two Ślōkas in praise of Rāma.

---

(*h*) रामदुर्गमन्त्रः.
RĀMADURGAMANTRAḤ.

Fol. 26*b*.

The repetition of this Mantra, which is addressed to Rama, is held to be efficacious in the destruction of one's enemies and in removing one's sorrows.

Complete.

**Beginning:**

श्रीरामो रक्षतु प्राच्यां याम्यां रक्षतु लक्ष्मणः ।
प्रतीचीं भरतो रक्षेदुदीच्यां शत्रुघातकः ॥

**End:**

रामदुर्गं पठन् भक्त्या सर्वशत्रुविनाशनम् ।
सर्वक्लेशापहरणं स गच्छेद्वैष्णवं पदम् ॥

---

(*i*) हनूमत्कवचम्.
HANŪMATKAVACAM.

Foll. 26*b*—27*b*.

Same work as that described under No. 7652 of the D.C.S. MSS., Vol. XIV.

Complete.

---

(*j*) विष्णुभुजङ्गः.
VIṢṆUBHUJAṄGAḤ.

Fol. 28.

Same work as that described under No. 10850 of the D.C.S. MSS., Vol. XVIII. By Śaṅkarācārya.

Complete.

---

(*k*) रामभुजङ्गस्तोत्रम्.
RĀMABHUJAṄGASTŌTRAM.

Fol. 29.

Similar to the work described under No. 10286 of the D.C.S. MSS., Vol. XVIII.

Complete.

**Beginning:**

सदा राम रामेति नामामृतं ते

(m) गणनाथाष्टोत्तरशतनामावलिः.

GAṆANĀTHĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 31a—32a. Fol. 32b is left blank.

Similar to the work described under No. 8815 of the D.C.S. MSS., Vol. XVII.

Complete.

**Beginning:**

गणेशाय नमः । विघ्नराजाय नमः । गजाननाय नमः । महादेवाय नमः । स्निग्धाञ्जनसमद्युतये नमः । एकदन्ताय नमः ॥

**End:**

सिद्ध(द्धि)विनायकाय नमः । उमापुत्राय नमः । जगद्गुरवे नमः । चतुर्भुजाय नमः । श्रीमहागणपतये नमः ।

**Colophon:**

गणनाथनामावलिस्संपूर्णा ।

---

(n) शनिस्तोत्रम्.

ŚANISTŌTRAM.

Foll. 33a—37b.

Same work as that described under No. 10809 of the D.C.S. MSS., Vol. XIX; but with Ṛṣicchandōdēvatās in the beginning and different end and colophon as given below.

Complete.

**End:**

राज्यकामो लभेद्राज्यं जयार्थी विजयी भवेत् ।
आयुष्कामो लभेदायुः श्रीकामो लभते श्रियम् ॥
यद्यदिच्छति तत्सर्वं भगवान् भक्तवत्सलः ।
चिन्तितान्यस्य सर्वाणि प्रयच्छति न संशयः ॥
शनिनायाभ्युनुज्ञातस्स्वस्थानमगमन्नृपः ।
स्वस्थानं तु ततो गत्वा प्राप्तकामोऽभवत्तदा ॥

**Colophon:**

इति ब्रह्माण्डपुराणे दशरथप्रोक्तं शनैश्चरस्तोत्रं संपूर्णम् ।

(o) शिवभुजङ्गम्.
ŚIVABHUJAṄGAM.

Foll. 38a—39b.
Same work as that described under R. No. 61(o) ante.
Complete.

(p) साम्बपरब्रह्मस्तोत्रम्.
SĀMBAPARABRAHMASTŌTRAM.

Fol 40a.
Same work as that described under No. 11265 of the D.C.S. MSS., Vol. XIX. By Haradatta.
Complete.

(q) कालभैरवाष्टकम्.
KĀLABHAIRAVĀṢṬAKAM.

Fol. 40b.
Same work as that described under R. No. 488(d) ante.
Complete.

(r) पञ्चाक्षरार्चना.
PAÑCĀKṢARĀRCANĀ.

Foll. 41—42b.
On the worship of god Śiva by uttering groups of significant expressions, the initial letters of these groups being the successive letters of the Pañcākṣara.
Complete.

**Beginning:**

ओङ्काररूपिणे नमः । ओङ्कारनिलयाय नमः । ओङ्कारबीजपतये । ओङ्कारसरोहंसाय । ओङ्कारपद्मध्यगाय । ओङ्कारमन्त्रवाच्याय ॥

**End:**

मायायै महेश्वराय मुखम् । त्रिनेत्रायै त्रिनेत्राय नेत्राणि । ललितायै लास्यप्रियाय ललाटम् । शिवायै शिवाय शिरः । सर्वेश्वर्यै नमः । सर्वेश्वराय नमः सर्वाङ्गम् ।

**Colophon:**

पञ्चाक्षरार्चना समाप्ता ।

### R. No. 5116.

Palm-leaf. 15¾ × 1½ inches. Foll. 59. Lines, 6 in a page. Grantha. Good.

Presented in 1925-26 by Subbalakṣmi Ammāḷ, wife of M.R.Ry. N. C. Subrahmaṇya Śastrigaḷ, Nidamangalam, Tanjore district.

सामवेदगानम्—रहस्यम्.

SĀMAVĒDAGĀNAM : RAHASYAM.

Same work as that described under No. 53 of the D.C.S. MSS., Vol. I, Part II.

Complete.

---

### R. No. 5117.

Śrītāla. 7 × 1½ inches. Foll. 21. Lines, 17 in a page. Grantha. Slightly injured.

Presented in 1925-26 by Subbalakṣmi Ammāḷ, wife of M.R.Ry. N. C. Subrahmaṇya Śastrigaḷ, Nidamangalam, Tanjore district.

(a) प्रबोधसुधाकरः.

PRABŌDHASUDHĀKARAḤ.

Foll. 1a—6b.

A metrical treatise on Advaita-Vēdānta: by Śaṅkarācārya. According to the colophon of the MS. described under No. 2845, in Rājēndralāl Mitra's Catalogue, the work is attributed to the well-known Śaṅkarācarya, disciple of Gōvindabhagavatpūjyapāda.

Complete in the following 15 Prakaraṇas:—

१. देहनिन्दाप्रकरणम्.
२. विषयनिन्दाप्रकरणम्.
३. मनोनिन्दाप्रकरणम्.
४. बाह्येन्द्रियनिग्रहप्रकरणम्.
५. मनोनिग्रहप्रकरणम्.
६. वैराग्यप्रकरणम्.
७. स्वात्मप्रकाशप्रकरणम्.
८. मायाप्रकरणम्.
९. देहलिङ्गप्रकरणम्.
१०. अद्वैतप्रकरणम्.
११. कर्तृत्वभोक्तृत्वप्रकरणम्.
१२. प्रकाशप्रकरणम्.
१३. नादप्रकरणम्.
१४. मनोलयप्रकरणम्.
१५. स्वरूपस्थितिप्रकरणम्.

**Beginning:**

नित्यानन्दैकरसं सच्चिन्मात्रं स्वयं ज्योतिः ।
पुरुषोत्तममजमीशं तं वन्दे यादवाधीशम् ॥

यं वर्णयितुं साक्षाच्छ्रुतिरपि मूकेव मौनमावहति ।
सोऽस्माकं मनुजानां किं वाचां गोचरो भवति ॥
यद्यप्येवं विदितं तथापि परिभाषणं भवत्येव ।
अध्यात्मशास्त्रसारो हरिचिन्तनकीर्तनाभ्यासः ॥
कृच्छ्रैर्बहुभिरुपायैरभ्यासज्ञानभक्त्याद्यैः ।
पुंसो विना विरागं मुक्तेरधिकारिता न स्यात् ॥
वैराग्यमात्मबोधो भक्तिश्चेति त्रयं कथितम् ।
मुक्तेस्साधनमादौ तत्र विरागो वितृष्णैव ॥

**End:**

अन्तरदृष्टे यस्मिन् जगदिदमारात् परिस्फुरति ।
दृष्टे यस्मिन् सकृदपि विलीयते क्वाप्यसद्रूपम् ॥
बाह्याभ्यन्तरपूर्णपरमानन्दार्णवे निमग्नो यः ।
चिरमाप्लुत इव कलशो महाह्रदे जह्नुकन्यायाः ॥

**Colophon:**

इति स्वरूपस्थितिर्नाम पञ्चदशप्रकरणम् ।
इति श्रीमच्छङ्कराचार्यविरचितः प्रबोधसुधाकरस्संपूर्णः ।

---

(*b*) भगवद्गीता.

BHAGAVADGĪTĀ.

Foll. 7*a*—16*b*.

Same work as that described under No. 1992 of the D.C.S. MSS., Vol. IV, Part I.

Contains from the 10th Adhyāya to the end of the 15th Adhyāya. Fol. 17 contains Gītāsāra.

---

(*c*) उत्तरगीता.

UTTARAGĪTĀ.

Foll. 18*a*—21*b*.

Same work as that described under No. 2371 of the D.C.S. MSS., Vol. IV, Part II; but with the following additional stanzas in the beginning.

Contains the first two Adhyāyas.

**Beginning :**

जगदङ्कुरकन्दाय सच्चिदानन्दमूर्तये ।
गलिताखिलभेदाय नमश्शान्ताय तेजसे ॥
अन्तर्हृदि नियन्तारं बहिश्च गुरुरूपिणम् ।
उभयत्र हि कृष्णाख्यं तं वन्दे देवकीसुतम् ॥

---

R. No. **5118.**

Śritāla. $7\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 87. Lines, 8 in a page. Grantha. Injured.

Presented in 1925-26 by Subbalakṣmi Ammaḷ, wife of M.R.Ry N. C. Subrahmanya Śāstrigaḷ, Nidamangalam, Tanjore district.

(*a*) वेदसारशिवसहस्रनामस्तोत्रम्.

VĒDASĀRAŚIVASAHASRANĀMASTŌTRAM.

Foll. 1*a*—9*a*.

Same work as that described under R. No. 142(*c*) ante; but with the following additional stanzas in the beginning.

Complete.

**Beginning :**

अधस्तान्मानवाकारमुपरिष्टाद्गजाकृतिम् ।
निरस्ताशेषदुरितं पुरस्तादस्तु वस्तु नः ॥
मङ्गलं दिशतु मे गजाननो मङ्गलं दिशतु मे षडाननः ।
मङ्गलं दिशतु मे महेश्वरो मङ्गलं दिशतु मे महेश्वरी ॥

---

(*b*) लघुन्यासविधिः.

LAGHUNYĀSAVIDHIḤ.

Fol. 10.

Similar to the work described under No. 3751 of the D.C.S. MSS., Vol. VII.

Complete.

**Beginning :**

अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः । उदित एव तीर्थे स्नात्वोदेत्याहतं वासः परिधाय शुचिः प्रयतो ब्रह्मचारी शुक्लवासास्तस्य

दक्षिणप्रत्यग्देशे तन्मुखं स्थित्वा, आत्मनि देवतास्स्थापयेत् । प्रजनने ब्रह्मा तिष्ठतु । पादयोर्विष्णुस्तिष्ठतु । हस्तयोर्हरस्तिष्ठतु ।

**End:**

अथैनं गन्धाक्षतपत्रपुष्पधूपदीपनैवेद्यताम्बूलैरभ्यर्च्यात्मानं प्रत्याराधये- दथैनं प्रत्याराधयेत् ।

---

(c) गायत्रीरामायणम्.

GĀYATTRĪRĀMĀYAṆAM.

Fol. 11.

Same work as that described under R. No. 3988(f) ante.

Complete.

---

(d) वेदपादस्तवः.

VĒDAPĀDASTAVAḤ.

Foll. 12a—19b.

Same work as that described under R. No. 488(e) ante; but with the following additional stanzas in the beginning. By Jaimini.

**Beginning:**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥
पुण्डरीकपुराधीशं पुण्डरीकाजिनाम्बरम् ।
पुण्डरीकरुचिं वन्दे पुण्डरीकाक्षसेवितम् ॥

Fol. 20 contains Mahēśapūjāvidhāna.

---

(e) लक्ष्मीनृसिंहकरावलम्बस्तोत्रम्.

LAKṢMĪNṚSIṀHAKARĀVALAMBASTŌTRAM.

Foll. 21a—22a. Fol. 22b is left blank.

Same work as that described under R. No. 321(p) ante. By Śaṅkarācārya.

Complete.

(*f*) आदित्यहृदयम्.

ĀDITYAHṚDAYAM.

Foll. 22*a*—23*b*.

Same work as that described under No. 5945 of the D.C.S. MSS., Vol. XII.

Complete.

---

(*g*) रामायणम्.

RĀMĀYAṆAM.

Foll. 24*a*—26*b*.

Same work as that described under No. 1837 of the D.C.S. MSS., Vol. IV, Part I.

Contains the 36th Sarga of the Sundarakāṇḍa.

Complete.

---

(*h*) भागवतम्.

BHĀGAVATAM.

Foll. 27*a*—39*b*.

Same work as that described under No. 2186 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyāyas 29 to 33 in the tenth Skandha.

---

(*i*) रामस्तवराजः.

RĀMASTAVARĀJAḤ.

Foll. 40*a*—44*a*. Fol. 44*b* is left blank.

Same work as that described under No. 10303 of the D.C.S. MSS., Vol. XVIII.

Complete.

---

(*j*) रामसहस्रनामस्तोत्रम्.

RĀMASAHASRANĀMASTŌTRAM.

Foll. 45*a*—52*b*.

Same work as that described under No. 8965 of the D.C.S. MSS., Vol. XVII; but with different stanzas in the beginning as given below.

Complete.

**Beginning:**

इन्दीवरश्यामलमायताक्षं धनुर्धरं नीलजटावचूडम् ।
पार्श्वद्वये लक्ष्मणमैथिलीभ्यां निषेव्यमाणं प्रणतोऽस्मि रामम् ॥

इन्दीवरदलश्यामः पुण्डरीकनिभेक्षणः ।
धृतकोदण्डतूणीरो राम एव गतिर्मम ॥

अस्य श्रीरामदिव्यसहस्रनामस्तोत्रमहामन्त्रस्य ईश्वर ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता । स्वयं ज्योतिरिति बीजम् । आनन्दं परं ब्रह्मेति शक्तिः । अकार उकार मकार इति कीलकम् । श्रीरामचन्द्रप्रीत्यर्थे मोक्षार्थे जपे विनियोगः ।

*    *    *    *

ईश्वर उवाच—
श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनामवत्तु(स्तु)ल्यं रामनाम वरानने ॥

---

(*k*) कृष्णस्तवराजः.

KRṢṆASTAVARĀJAḤ.

Foll. 53*a*—63*b*.

Same work as that described under R. No. 71(*d*) ante.

Complete.

---

(*l*) गजेन्द्रमोक्षः.

GAJĒNDRAMŌKṢAḤ.

Foll. 64*a*—69*b*.

Same work as that described under No. 2400 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

---

(*m*) विष्णुसहस्रनामस्तोत्रम्.

VIṢṆUSAHASRANĀMASTŌTRAM.

Foll. 70*a*—79*b*.

Same work as that described under No. 9008 of the D.C.S. MSS., Vol. XVII.

Complete.

---

(*n*) स्वामिपर्वतमाहात्म्यम्.

SVĀMIPARVATAMĀHĀTMYAM.

Foll. 80*a*—87*b*.

This work forms a part of the Brahmakaivartapurāṇa and deals with the greatness and holiness of the Śaiva shrine at Svāmimalai, a village five miles from Kumbakonam in the Tanjore district.

Breaks off in the fourth Adhyāya.

**Beginning :**

शुक्लाम्बरधरं विष्णुं * * * * * * विघ्नोपशान्तये ॥
श्रीपार्वतीपुत्रमनन्तगात्रमापूर्णकारुण्यमजं शरण्यम् ।
पाप। . . . . . व्दं परमेश्वरस्य शापापहं स्कन्दमहं भजामि ॥
पारिजातसुममालिकुलस्य(कावलद्) गन्धलोलुपमदालिकुन्तलम् ।
चारुवामकरशोभिसत्कटिं स्वर्णदण्डधरमाश्रये गुहम् ॥
शङ्करं सर्वलोकेशं पार्वतीं भक्तवत्सलाम् ।
स्कन्दं बृन्दारकश्रेष्ठं कलये कामितार्थदम् ॥

मुनयः—

सूत सूत महाप्राज्ञ पौराणिकशिखामणे ।
पृच्छामोऽत्र महाभाग स्वामिमाहात्म्यमद्भुतम् ॥
अष्टादश पुराणानि सेतिहासानि कृत्स्नशः ।
त्वत्तः श्रुतान्यनेकानि कृपया तव सुव्रत ॥
इदानीं विस्मृतप्रायमस्माकं रोमहर्षणम् ।
स्वामिपर्वतमाहात्म्यं सेतिहासं सुविस्तरम् ॥
पुनर्नवं भवान् वक्तुमर्हत्यस्माकमञ्जसा ।
कुतूहलसमाविष्टा वयं सर्वे द्विजोत्तम ॥

सूतः—

शृण्वन्तु मुनयस्सर्वे सावधानेन चेतसा ।
न विस्तरान्मया वक्तुं गुरुणाऽपि न शक्यते ॥
श्रीनन्दिकेशसंवादमगस्त्येन च धीमता ।
संग्रहेण प्रवक्ष्यामि यावद्वा संश्रुतं मया ॥

* * * *

श्रीनन्दिकेश्वरः—

अगस्त्य परमं गुह्यं शृणु सर्वार्थसिद्धये ।
मरुद्वृधा नदी पुण्या लोपामुद्रांशसंभवा ॥

तस्या उत्तरतीरे च स्वामिपर्वत उत्तमे ।
स्वामी स्वामित्वमापन्नः स्वपितुर्गुरुभावनात् ॥
तस्मिन् पर्वतराजेच शिवो लब्ध्वा स्वकं मनुम् ।
औपदेशेन मार्गेण सन्तोषं परमाप सः ॥

**Colophon:**

इत्यादिमहापुराणे ब्रह्मकैवर्तकाख्ये स्वामिगिरिमाहात्म्ये पञ्चाक्षरप्रभावो नाम प्रथमोऽध्यायः ॥

* * * *

**End:**

**Colophon:**

इत्यादिमहापुराणे स्वामिगिरिमाहात्म्ये तृतीयोऽध्यायः ।

नन्दिकेश्वरः—

पञ्चाक्षरप्रवक्तॄणां फलं वक्ष्ये महामुने ।
य इदं पठते नित्यं त्रिःस्नायी विजितेन्द्रियः ॥

* * * *

एतन्नामाष्टशतकं जपेच्चोरादिसङ्कुले ।
राजद्वारे विशेषेण प्रतिवादिविवादने ॥
भूतवेतालपैशाचब्रह्मराक्षसपीडने ॥

---

## R. No. 5119.

Paper. 10½ × 9½ inches. Foll. 284. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Kṛṣṇakamal, Oorakam, Cochin State.

Bound in two volumes.

### युधिष्ठिरविजयव्याख्यानम्—पदार्थचिन्तनम्

### YUDHIṢṬHIRAVIJAYAVYĀKHYĀNAM: PADĀRTHA-CINTANAM.*

Foll. 1a—283a. Foll. 283b and 284 are left blank.

A commentary on the poem called Yudhiṣṭhiravijaya described under No. 11634 of the D.C.S.MSS., Vol. XX. The author of the text is

Vāsudēvakavi, a disciple of Bhārata Bhaṭṭāraka. The commentary is called Padārthacintana. The commentator is Śrīkaṇṭhadāsa and he says that he was a pupil of Śrīkaṇṭha and wrote the commentary at the instance of king Kēraḷavarman.

Complete.

**Beginning :**

हैरम्बं हरदुग्धाब्धिकौस्तुभं स्तुमहे महः ।
आम्नायहृदि सन्धार्यं सन्धार्यं विघ्नविप्लवे ॥
वाग्देवि वावदूकेष्टपुष्टचित्तपदात्मिके ।
त्वद्दासं त्वत्पदाम्भोजसविधे प्रविधेहि माम् ॥
अष्टादशानां विद्यानामिष्टानां प्रभवं सताम् ।
कष्टापत्तिप्रणाशाय शिष्टामोदि भजे महः ॥
निद्रां वितन्वन्नम्भोधौ भद्रं कुर्वन् जगत्त्रये ।
छिद्रं नयन् सुराराति क्षुद्रं नः क्षपयेत्प्रभुः ॥
वाणीसुधाविधूतोरुपङ्काः किङ्करताजुषाम् ।
गुरवो नः प्रसीदन्तु निषीदन्तु हृदम्बुजे ॥
नन्दन्तु नः सदा सन्तः स्वान्तपूर्णकृपाभराः ।
निन्दन्तु च खलाः किं तैरन्ते सद्भिर्बहिष्कृतैः ॥
श्रीविहारधरावासा वासवानुजसोदरी ।
सादरा भक्तवर्गेषु सादरा मम रक्षिका ॥
श्रीकण्ठाख्यासमाख्याता श्रीकण्ठाकुण्ठधीगुणाः ।
सुश्रुता विश्रुता लोके गुरवो मम रक्षकाः ॥
श्रीकेरलवर्मनृपः परिभूतारातिभूतिभूरिमदः ।
आस्थानमलङ्कुर्वन्नाम्नायोगात्कदाचिदशिषन्माम् ॥
रचय युधिष्ठिरविजयव्याख्यां प्रख्यापितोरुतात्पर्याम् ।
पर्यालोचनचतुरां राघवलाघवविवर्जितामजिताम् ॥
इत्थं समाज्ञया राज्ञः प्रज्ञावैधुर्यभागपि ।
पदार्थचिन्तनं नाम व्याख्यानं कर्तुमारभे ॥
वासुदेवकवेः काव्ये भव्ये कविभिरीडिते ।
व्याचिख्यासा तु शिक्षायै महत्यै भविता मम ॥

स्मरत युधिष्ठिरविजयं काव्यं कण्ठैकभूषणं विदुषाम् ।
हारवदस्यक्तगुणं गुरुतरकृष्णाश्मतेजसोल्लसितम् ॥
पाण्डवचरितं मुनिना प्रोक्तं यद्विस्तरेण तदिह सुधीः (!) ।
समुचितपदविन्यासैरसूचयत्तत्र तत्र कविराजः ॥

इह खलु श्रीमद्द्वैपायनमहामुनिप्रतिभाप्रसरपरिपाकविलसितं सर्वजनमनोहारि सर्वपुरुषार्थसाधनं पुरातनसकलाख्यानप्रख्यापकं पाण्डवचरितसर्वस्वसन्दर्शनपरमादर्शायमानं महाभारतमितिहासरत्नं सङ्क्षिप्य यमककाव्यत्वेन विरचयितुकामः कविकुलशेखरः कुलशेखरसभासमास्तारसभाजितकविताकौशलः सकलविद्यासागरपारीणशेमुषीको गुरुकरुणाकटाक्षपीयूषसंवर्धितकविताकल्पलतोपघ्नतरुः भारतभट्टारकपरमाचार्यान्तेवासी वासुदेवनामा वासुदेवभक्ताग्रणीः द्विजकुलतिलकः प्रारिप्सितस्य प्रबन्धस्याविघ्नेन परिसमाप्त्यादिसिद्धये इष्टदेवतानुस्मरणपूर्वकं प्रथममाशिषं प्रयुङ्क्ते—प्रदिशत्वित्यादिना । सः गिरिशः वः ज्ञानदृशं प्रदिशतु गिरि श्रियं चेति वाक्ययोजना । उत्तरवाक्यगतयच्छब्दापेक्षया तच्छब्दोपादानं त्वनुक्तसिद्धमेवेति स इत्युक्तम् । गिरिशः आकाशवत्सर्वासु दिक्षु परिपूर्णत्वेन वर्तमानत्वेऽपि भक्तानुग्रहार्थं कैलासगिरिमधितिष्ठन् परमेश्वरः वः महाकाव्यश्रवणलोलुपेभ्यः श्रोतृभ्यो युष्मभ्यमिति श्रोतॄन् प्रतीयमाशीः ।

**End :**

सत्सभारतः सतां सर्वज्ञानां सभायां रतः तत्परः । व्यवहा(रा)न् स्वयं पश्येद्विद्वद्भिर्ब्राह्मणैस्सहेत्युक्तराजाचारयुक्तः गां भुवं ररक्ष च रक्षितवान् । अत्र चशब्दोऽध्याहर्तव्यः । पुरूरववद्गां ररक्ष चेति वक्तव्यम् । पुरा पुरूरवा इव सोऽपि सत्सभारतः पुरूरवो निर्विशेषं गोरक्षणं कृतवानित्यर्थः । सुखशब्दप्रयोगेण काव्यस्य मङ्गलान्तत्वमपि प्रकटीकृतम् । सर्वालङ्काराणामुपमायामन्तर्भाव इति समासावुपमानेन सूचितम् । अनेनाद्भुतरसो व्यज्यते, कुर्यान्निर्वहणेऽद्भुतमित्युक्तत्वादिति शिवम् ।

**Colophon :**

इति श्रीकण्ठदासविरचिते पदार्थचिन्तननाम्नि युधिष्ठिरविजयव्याख्याने अष्टम आश्वासः ॥

गुरवो हृदि वर्तन्तां परमा मम भूतये ।
श्रीकण्ठाख्यां भुवि ख्यातां बिभ्रतो ब्रह्मवर्चसः ।
विहारक्षितिभृत्क्षेत्रविहर्त्रीं विश्वरक्षिकाम् ।
पद्माक्षसोदरीमीक्षे दाक्ष्यायानुक्षणं गिरा(म्) ॥
विहरतु मम हृदयाब्जे गिरिवरतनया विहारगिरिनिलया ।
अनुदिनमिनविधुदहनत्रयमयनयना पिनाकिनयनसुधा ॥

---

R. No. 5120.

Paper. 10¼ × 9¼ inches. Foll. 583. Lines, 20 in a page. Grantha Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Śaṅkaran Nambūdirippad, Avanapparampa, Vadakancheri post, Cochin State.

Bound in three volumes.

रामायणव्याख्या—सर्वार्थसारः.

RĀMĀYAṆAVYĀKHYĀ : SARVĀRTHASĀRAḤ.

Foll. 1a—583b. Foll. 339, 340, 582b and 583 are left blank.

A commentary by name Sarvārthasāra on Vālmīki's Rāmāyaṇa: by Vēṅkaṭēśvara, disciple of Vēṅkaṭakṛṣṇayajvan.

Contains the Bālakāṇḍa and the Ayōdhyākāṇḍa complete.

**Beginning:**

दिशति निजपदं यो मुक्तिमप्याश्रितानां
जनयति जनकानौ(ताया) मुद्रया यस्त्वबोधम् ।
यमनुचरति सर्वो देवतानां निकायः
स भवतु हृदये मे देवदेवो महेशः ॥
रामचन्द्रः कृपाशाली कृतज्ञो गुणसागरः ।
शरण्यस्सर्वलोकस्य मानसे मम वर्तताम् ॥
स भवतु वेङ्कटाध्वरिवर्यो विदितसर्वशास्त्रार्थः ।
मम हृदये यो रामं परमशिवाभिन्नमीश्वरं भजति ॥
प्राचीनां व्याकर्तॄनां (नि)गम(म)नुसरन् विश्वनाथस्य शम्भो-
राज्ञामात्रावलम्बी निजविबुधजनैरीरितो रामभद्रम् ।
प्रीतं कृत्वा चिकीर्षन् विशयमपनुदन्नत्र पूर्वैरनुक्तं
कुर्वे सर्वार्थसारं विवरणमुचितं ख्यातरामायणस्य ॥

व्याख्याय . . . . . हारीतो वेङ्कटेश्वरः ।
कृतकृत्यो विभूषामि कृपया जानकीपतेः ॥
पौलस्त्यवधमम्भोधिगम्भीरं विघ्नाशयन् ।
करिष्ये तत्र विबुधास्सहन्तां मम साहसम् ॥

इत्येवमादावनुसन्धेयम् ।

विष्णोः कर्माणि पश्यतेति श्रुत्वा श्रोतव्यं पुराणमिति स्मृत्वाचारावगतस्य श्रवणविधेरिव तत्र शब्दग्रहणतदर्थावगमपूर्वकेण तत्प्रतिपादितनित्यनैमित्तिकसाधारणधर्मानुष्ठानेन चेष्टप्रावनमार्थमिति, अत इदं कर्तव्यमेवं कर्तव्यमिदं न कर्तव्यमेव न कर्तव्यमिति ज्ञातव्यार्थप्रकाशकत्वात्पुराणस्य प्रतिसर्गं बोधनीयोऽर्थः प्रकाशनीयः । तत्र प्रथमसर्गेणाचार्यवान् पुरुषो वेदेति श्रुत्यनुसारेण स्वावगतोऽप्यर्थो गुणवता गुरुणोपदिष्ट एवानुष्ठाने कर्तुरदृष्टं जनयति ; पृष्टेनापि गुरुणा यावदर्थं पुनः पुनः प्रश्नविषयतया विस्तरेण वक्तव्यमित्यर्थद्वयं प्रकाश्यते—ओं तप इति । तपसि अनशनादौ चक्षुरादिकरणषट्कस्यैकाग्र्ये च, स्वाध्याये स्ववेदे निरतं वाग्विदां स्वरूपतोऽर्थतश्च सर्वशब्दविदां वरं निरवशेषतया वाच्यवाचकराशिं विदुषामुत्तमत्वं प्रतिपाद्य वाङ्मनसयोरगोचरस्य स्वानुभवैकगम्यस्य ब्रह्मणोऽप्यपरोक्षसाक्षात्कारोऽस्तीत्याह—मुनिपुङ्गवमिति । मुनयः मननशीलाः ।

* * * *

**Colophon:**

इति रामायणव्याख्याने सर्वार्थसारे बालकाण्डे सप्तसप्ततितमः सर्गः ॥
सर्वेश्वरस्य रामस्य गुरोश्च कृपया कवेः ।
व्याख्यातं वेङ्कटेशेन बालकाण्डं गुणोज्ज्वलम् ॥

बालकाण्डव्याख्यानं समाप्तम् ।

अथ भगवतो भक्तपरिपालनाय प्रतिश्रुतार्थसाधनाय चाघटितघटनीयशक्तिं भजनीयगुणत्वं च प्रथमं दर्शयति—गच्छतेति ।

**End:**

निर्भरतया निशाचरबहुलदेशप्रवेशः । दृष्टान्तं सौम्यमेवाह—अभ्रमण्डलं गगनतलं सूर्य इव तामसनिशाचरनिरासाय सर्वजनसुखसञ्चाराग्निहोत्रादि-

सर्वकर्मप्रवृत्तये च । अस्मिन् काण्डे धर्मज्ञः सत्यसन्धः नियतात्मा स्मृतिमान् प्रतिभानवान् इति यथापि गुणाः विवृततमा इति स्पष्टमवगन्तव्यम् ।

उमापतौ शंसति जानकीपतौ पुरः स्थिते वेङ्कटकृष्णयज्वनः ।
अनुग्रहे जाग्रति वेङ्कटेश्वरो द्वितीयकाण्डं व्यवृत प्रमास्पदम् ॥

**Colophon:**

इत्ययोध्याकाण्डव्याख्याने सर्वार्थसारे नवदशशततमस्सर्गः ॥

---

R. No. 5121.

Paper. 10½ × 9¼ inches. Foll. 11. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Gōdavarma Raja, Chalur, Trichur, Cochin State.

(a) भगवद्गीतामाहात्म्यम्.

BHAGAVADGĪTĀMĀHĀTMYAM.

*Foll. 1a—3b.*

Similar to the work described under No. 2486 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

**Beginning:**

गीतासु भगवद्गीता नृणां संसारमोचनी ।
सर्वदेवमयी गीता गङ्गेवामृतधारिणी ॥
नारायणाङ्घ्रिजा गङ्गा गीता तन्मुखपद्मजा ।
गङ्गा स्नानान्मोक्षदा स्याज्जपाद्गीताखिलार्थदा ॥
यासावष्टादशाध्यायी प्रोक्ता भगवता पुरा ।
साष्टादशानामङ्गानां पातकघ्नीति कथ्यते ॥
पादं वा द्विपदं वाऽपि त्रिपदं वा चतुष्पदम् ।
नियमेन जपेन्नित्यं श्लोकं वा सोऽश्नुते सुखम् ॥

**End:**

देवदेवेशमाहात्म्यं दर्शयन्तमिवानघम् ।
तत्पत्रं वायुनानीतं निषादैश्च बहिष्कृतम् ॥

वैकुण्ठपार्षदैर्लब्धं ददृशुर्देवसत्तमाः ।
गीतायास्सारभूताया माहात्म्यमखिलार्थदम् ॥
हरिणा कथितं सम्यक् पार्थायात्मप्रियाय च ।
हरेर्ज्योतिःस्वरूपां वां गायत्रीं वेदमातरम् ।
यो(वा) जपेत्त्रिसन्ध्यायां स तपस्वी भवेद् द्विजः ॥

**Colophon:**

इति गीतामाहात्म्यम् ॥

---

(*b*) तर्कसंग्रहदीपिकाटिप्पणी—तत्त्वार्थप्रदीपिका.

TARKASAṄGRAHADĪPIKĀṬIPPAṆĪ: TATTVĀRTHA-PRADĪPIKĀ.

Foll. 4*a*—10*b*. Fol. 11 is left blank.

Same work as that described under R. No. 1718 ante.

Contains the Pratyakṣakhaṇḍa complete, but wants the beginning.

**Beginning:**

नन्वयं घट इत्यादिप्रत्यक्षे गेः प्रकारो घटादिः स च घटाभावे नास्तीति तच्छून्यत्वरूपं निष्प्रकारकत्वं सविकल्पकेऽप्यस्त्येव ; तथा च तस्य कथं निर्विकल्पकलक्षणत्वमित्यत आह—विशेषणविशेष्येति । अत्र घटादावतिव्याप्तिवारणाय ज्ञानमिति । यद्यपि निष्प्रकारकशब्दस्य प्रकारशून्यत्वं मुख्यार्थः, तच्च विषयतासम्बन्धेन विवक्षणीयमिति प्रकारविषयकज्ञानमित्यर्थ इति व्याख्यातुमुचितम् ; तथापि तथा व्याख्याने प्रकारपदस्य भासमानवैशिष्ट्यप्रतियोग्यर्थकतया प्रकारविषयत्वं भासमानवैशिष्ट्यप्रतियोग्यविषयत्वं पर्यवस्येत् ।

**End:**

ननु तर्हि तस्मादित्यादिना किमुच्यत इत्यतस्तदप्यवतारयति—प्रत्यक्षमिति ; प्रत्यक्षप्रमाणमित्यर्थः । मूले तस्मादित्यस्य प्रत्यक्षज्ञानकरणत्वादित्यर्थः । प्रत्यक्षज्ञानकरणं प्रत्यक्षमिति तल्लक्षणाभिधानात्तस्य चेन्द्रिय एव सत्वादिन्द्रियमेव प्रत्यक्षप्रमाणमिति सिध्यतीति भावः ।

**Colophon:**

इति प्रत्यक्षखण्डः समाप्तः ।

R. No. **5122.**

Paper. 10½ × 9½ inches. Foll. 182. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Śrīmān Rāja Erlagadda Ankinīdu Prasad Bahadur, Zamindar of Challapalli, Kistna district.

श्यामासपर्याविधिः.

ŚYĀMASAPARYĀVIDHIḤ.

Foll. 1*a*—181*b*. Fol. 182 is left blank.

A digest on Tantric religious duties to be observed in connexion with the worship of Śakti also called Śyāma : by Kāśīnāthatarkālaṅkāra.

The author mentions a number of Tantric works which he consulted in writing this work.

Complete.

Deals with the following subjects :—

१. प्रातःकृत्यादिविवरणम्.
२. अन्तर्यजनान्तविवरणम्.
३. बहिर्यागविवरणम्.
४. जपरहस्यादिविवरणम्.
५. नैमित्तिकार्चनादिविवरणम्.

**Beginning :**

(भक्त्या संप्रणतिं) विधाय पदयोर्हंसाख्यपीठे गुरो-
श्चिन्मय्याश्चरणाम्बुजे विजयदे मोक्षास्पदे (विश्रु)ते ।
ज्ञात्वा तन्त्रचयं विचार्य बहुधा वन्द्योदितः श्रीयुतः
काशीनाथधरा(सुरः) प्रतनुते श्यामासपर्याविधिम् ॥

चिदानन्दरूपां जगद्धेतुभूतां महामोक्षकर्त्रीं कृपां सेवकानाम् ।
कृपासिन्धुचित्तां महामेघवर्णां सदा कामदात्रीं सदाहं प्रपद्ये ॥

कालीतन्त्रं कौलतन्त्रं कामाख्यां कु . कां तथा ।
कालिकोपनिषत्सारं कालीकल्पं कुलार्णवम् ॥
कुमारीतन्त्रकं चैव तस्याश्च कल्पमुत्तमम् ।
वारातन्त्रं योनितन्त्रं शक्तिसङ्गमतन्त्रकम् ॥
ज्ञानतन्त्रं तन्त्रसारं गुप्तसाधनतन्त्रकम् ।
पुरश्चर्यारसोल्लासं महाकालस्य संहिताम् ॥

रुद्रयामलतन्त्रं च तारासूक्तं तथोत्तरम् ।
तन्त्रं निरुत्तरं चैव मातृकाभेदमेव च ॥
बालाविलासं विमलां वा . . श्चैव विला कम् ।
वीरतन्त्रं विश्वसारं ये . . गुरुतन्त्रकम् ॥
सङ्कोपनं च समयां स्वतन्त्रं च सरस्वतीम् ।
. यां तथोत्तरातन्त्रं म . जाकल्पमुत्तमम् ॥
उड्डीशोत्तरखण्डं च तथाचारस्य सारकम् ।
चिन्तामणिं भूतशुद्धिं तथाचाथर्वणश्रुतिम् ॥
एतानि मूलतन्त्राणि बहूनपि च संग्रहान् ।
कालीतत्त्वं तत्त्वबोधं . . . . तरङ्गिणीम् ॥
तारा . . . . . . त्रिपुरासारसंज्ञकम् ।
तारारहस्यवृत्तिं च ताराकल्पलतां तथा ॥
तन्त्रसारं तन्त्रबीजं ताराभक्तिसुधार्णवम् ।
शा . . मं शारदां च शाक्तानन्दतरङ्गिणीम् ॥
श्यामारहस्यकं चैव कालिकार्चाविधिं तथा ।
कुल्यार्णवं च . क्षारं कालिकार्चनदीपिकाम् ॥
कालीबलिं पञ्चवक्रं पूजाक्रम . . तथा ।
मन्त्रदर्पणसंज्ञं च तथा मन्त्रमहोदधिम् ॥
इत्यादिकुलशास्त्राणि समालोच्य पुनः पुनः ।
साधकानां हितार्थाय ग्रन्थमेनं वदाम्यहम् ॥

तत्रादौ सृष्टिप्रकारमाह बालाविलासतन्त्रे—

. . याते सर्वशून्ये पञ्चाशद्गगनोपरि ।
सच्चिदानन्दरूपा सा क्रीडार्थमसृजच्च . ॥
पराशक्त्या परशिवो रेमेल(ऽन)ल्पायुतं चषे(समाः) ।
कियदन्ते स्मृतवती पूर्ववृत्तान्तमद्भुतम् ॥
ततस्तस्यादिशिशु . सीद् सूक्ष्मादौ सा त्रिधा, भवे(व)त् ।
पश्यन्ती मध्यमा नाम वैखरी तिग्मतेजसा ॥

बिन्दुनाशश्च बीजं च बिन्दुरेव शिवस्वयम् ।
शक्तिर्बीजं तयोर्नित्यसम्बन्धो नाद उच्यते ॥

* * * *

सारसर्वस्वेऽपि—

शक्त्या सर्वं समुत्पन्नं नाकिंचिज्जगतीतले ।
तस्माच्छुद्धमशुद्धं वा सर्वं शक्तिस्वरूपकम् ॥

बृहन्नारदीये—

एक एव परानन्दो निर्गुणः परमात्परः ।
स तु . . . . . . . . . . . रूपधरोऽव्ययः ॥
मायिनो मायया भेदं . . . परमात्मनि ।
तस्मान्मायां त्यजेद्योगान्मुमुक्षुर्विप्रसत्तम ॥

* * * *

**Colophon:**

इति निगमागमविद्याविनोदितसर्वशास्त्रगुरुश्रीकाशीनाथतर्कालङ्कारपण्डितेन्द्रविरचिते सिद्धान्तसारात्मकश्यामासपर्याविधौ प्रथमो विभागः ॥

**End:**

तन्त्रान्तरे—

. . . . . . नाम ये स्मरन्ति दिवा निशि ।
सर्वपापैः परित्यक्तो जीवन्मुक्तो भवेन्नरः ॥
विष्णोर्नामसहस्राणां निरावृत्तेन यत्फलम् ।
तत्फलं लभते . . . . . कालीति . . . ॥
तथा विचारः . . . . . . कात्यायनेश्वरी ।
काली कालीति कालीति स्मरन्नुच्चैर्जयं लभेत् ॥

**Colophon:**

इति निगमागमविद्याविद्योतितश्रीकाशीनाथतर्कालङ्कार(पण्डितेन्द्र)विरचिते सिद्धान्तसारात्मकश्यामासपर्याविधौ नैमित्तिकार्चनादिविवरणं नाम पञ्चमो विभागः ॥

## R. No. 5123.

Paper. 10¼ × 9¾ inches. Foll. 26. Lines, 29 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Palliseri Perumbadappu Nārāyana Nambūdiri, Oorakam, Cochin State.

रुद्राध्यायवृत्तिः.

RUDRĀDHYĀYAVṚTTIḤ.

Foll. 1a—26a. Fol. 26b is left blank.

Similar to the work described under No. 140 of the D.C.S. MSS., Vol. I, Part II. By Gōvindasvāmin.

Complete.

**Beginning:**

नमः स्वकीयबोधाब्धिप्रचरद्विश्वमस्तवे ।
रुद्राय भवदुःखस्य द्रावकायाखिलात्मनाम् ॥
रुद्राध्यायप्रतीतार्थो पाणितमोमुखैः । !
व्यासादिभिश्च मुनिभिर्महादेवोवुटादिभिः ॥
सर्वोऽर्थस्सूच्यतेऽस्माभिस्सम्प्रदायानुरूपतः ।
रुद्रैकादेयिता(दशिका) वेत्तुं स्वयं येषाश्च न क्षमः ॥
तथापीयमुमेशस्य प्रसादाद्भव्यसूनुना ।
वृत्ती रुद्रानुवाकानां गोविन्दस्वामिना कृता ॥

अर्थज्ञानं साक्षाज्जपः । तज्जपस्तदर्थभावनमित्यार्षाद्भकताल्वोष्ठपुटव्यापारजनितः उपांशुर्मानसो वेति त्रिविधो जप उक्तः । स चार्थभावपुरस्सर एव यथोक्तफलं ददाति । अर्थहीनस्तु शङ्खादिशब्दवन्मङ्गलादृष्टरूपेण फलदाय्येव । मोक्षाख्यपरमपुरुषार्थसिद्धिरर्थज्ञानेनैव । तदुक्तम्—

ज्ञानेन मोक्षोपरतस्य सौख्यं
विन्दन्ति सर्वे पुरुषाः स्त्रियश्च । इति ।

अतोऽर्थज्ञानमपि सकलपुरुषार्थावाप्तयेऽवश्यमादरणीयम् । तत्र रुद्राध्यायस्य जपेन मोक्षाख्यामृतत्वसिद्धिः सकलपापप्रणाशश्चेति श्रुतिस्मृतिपुराणेषु बहुशः प्रत्यपादि । तथा च जाबालश्रुतिः—

**End:**

तं पुरुषं वो जम्भे युष्माकमभिमुखे दधामीति क्षिपामीति यूयमेव तदपि नय अवसमुष्वमित्यर्थः । भगवतः श्रीपरमेश्वरस्य श्रीपादाब्जसेवी युष्माकं चानुचरं मत्कार्यगर्भित . . . मेव मम योगक्षेमं कुरुध्वमिति तात्पर्यार्थः ॥

इति रुद्रानुवाकानां वृत्तिरुक्ता यथागमम् ।
वर्ततां हृदयाम्भोजे मुमुक्षूणां नृणामियम् ॥

**Colophon:**

इति श्रीरुद्राध्यायवृत्तौ आचार्यगोविन्दस्वामिकृतायाम् एकादशानुवाकः समाप्तः ॥

---

R. No. 5124.

Paper. 10½ × 9¾ inches. Foll. 64. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Paravastu Veṅkaṭa-Raṅganāthacaryar Avargal, Vizagapatam.

लीलावतीविलासः.

LĪLĀVATĪVILASAḤ.

A commentary called Līlāvatīvilāsa by Rucidatta, pupil of Jayadēva, on the Līlāvatīprakāsa, which itself is a commentary by Vardhamānōpadhyāya on the Nyāyalīlāvatī of Vallabhacarya. Rucidatta mentions here one Prabhākarōpadhyāya as the author of a work named Darpaṇa.

Contains the Dravyapadārtha complete and Guṇapadārtha incomplete.

**Beginning:**

यत्पादपङ्केरुहरेणुलेशः शक्नोति हर्तुं सकलानघौघान् ।
तं दक्षिणामूर्ति . . . . . . . . . . . . . . . . ॥

गण्डभ्रमद्भ्रमरभाङ्कृतिकैतवेन
मन्त्रं जपन्निव विरोधिनिरोधहेतोः ।
सेवाविनम्रजनजातकृताव . .
. . . . दुरितपूरित . . . . ॥

श्रीजयदे(दै)व(त)गुरुणा ह्युपदिष्टां मानसे धृत्वा ।
लीलावतीविलासः श्रीरुचिदत्तेन तन्यते कृतिना ॥

प्रमाणं दर्शयन् मङ्गलस्वरूपमाह—विशिष्टेति ; शिष्यशिक्षार्थमिति शेषः । यद्यपीति; ननु संज्ञाशब्दत्वेनाव्युत्पन्नरूढतया समानविकल्पोऽयमसङ्गतः ; अतएव दर्पणे प्राभाकरोपाध्याया अप्येवमाहुरिति चेन्नैवम् । योगार्थाभावे तद्विरोधे वा केवलरूढि . . . . . . . तत्प्रतीत्या नमस्कार- . . . योनकत्वलाभात्तदर्थाभावे च योगत्व . . . . योरावश्यकतया योग . . . . . . . पुरुषश्चाता इति ।

ननु विशेषणतया कामचारा . . . . . . . यथाह— . . . . . . वर्तये . . . . . दत्वमप्युक्त . . . . . . . . अतएव परस्परव्यभिचारे कर्मधारयप्रसङ्गोऽपीति चेत् मैवम् , एवमुत्पलनीलमित्यापत्तेः । न चेष्टापत्तिः ।

* * * *

ननु षडेवेत्यत्र तादृशस्य भाष्यस्य सूत्रस्य वादर्शनाद्विकल्पोऽयमाश्रयासिद्ध इत्यत आह—इहेति । तथा च तात्पर्यविषया च . . . तावधारणविकल्पोऽयमिति भावः । विशेषाकाङ्क्षायामिति । यद्यप्येवं सामान्यजिज्ञासायामित्यग्रिमग्रन्थविरोधः, तथापि पदार्थसामान्यापेक्षया विशेषाकाङ्क्षायामित्युक्तम् ।

* * * *

**Colophon:**

इति श्रीमहोपाध्यायश्रीरुचिदत्तमिश्रविरचिते लीलावतीविलासे द्रव्यपदार्थस्समाप्तः ।

पदार्थान्तरमिति, नित्यमिति शेषः । अतएव नित्यत्वमेव दूषयति— द्वित्वेति । न चैवं जन्यत्वेऽपि पदार्थान्तरत्वशङ्का तदवस्थेति वाच्यम् ॥

**End:**

न चाश्रयवृत्तिधर्मिणोपस्थितस्यावधित्वम् ; अतो न घटाच्च पटः पृथगिति प्रतीतिरिति वाच्यम् , पटत्वादिना तादृशेनैव घटादेरुपस्थितिसत्त्वात् । न चाश्रयवृत्तिमात्रेणोपस्थितत्वं तन्त्रं वृत्तित्वेनाप्युपस्थितिरधिकरणपरत्वादेवान्यथासिद्धेः । तृतीयपक्षतया तयोः परत्वापरत्वेऽन्यापेक्षत्वात् परत्वभावेन घटावृत्ती प . . नमिति प्रत्ययानापत्त्या . . . द्वि परत्वाभ्युपगमादिति ।

R. No. **5125.**

**Paper.** 10¼ × 9½ inches. Foll. 48. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1925–26 from a MS. of Śrīman Cakrapāṇimiśra Khandaduli, Rajasimhapuram, Aska, Ganjam district.

**शिवामृतसारसमुच्चयः.**

ŚIVĀMṚTASĀRASAMUCCAYAḤ.

On the importance and greatness of the ceremonial worship of god Śiva with all due formalities, etc., as found in Purāṇas, Āgamas, etc.; by Śrīsadēva.

Contains the following Prakaraṇas as given below :—

१. शिवमहिमकथनम्.
२. हरिहराद्वैतकथनम्.
३. शिवभक्तिकथनम्.
४. भक्तगतिकथनम्.
५. यात्राकथनम्.
६. दर्शनफलकथनम्.
७. स्पर्शकथनम्.
८. प्रदोषफलकथनम्.
९. कीर्तनफलकथनम्.
१०. स्मरणफलकथनम्.
११. Wanting.
१२. दीक्षाफलकथनम्.
१३. पूजालिङ्गकथनम्.
१४. शिवलिङ्गपूजाकथनम्.
१५. पूजाफलकथनम्.
१६. पुण्यकालार्चनफलकथनम्.
१७. Wanting.
१८. स्नपनफलकथनम्.
१९. नृत्यगीतफलकथनम्.
२०. अर्घ्यदानादिकथनम्.
२१. चन्दनादिप्रलेपफलकथनम्.
२२. सकलकुसुमदानफलकथनम्.
२३. धूपदानफलकथनम्.
२४. दीपदानफलकथनम्.
२५. ताम्बूलनैवेद्यफलकथनम्.
२६. प्राणायामध्यानकथनम्.
२७. जपफलकथनम्.
२८. प्रदक्षिणफलकथनम्.
२९. दण्डप्रणामफलकथनम्.
३०. विद्यादिदानफलम्.
३१. शिवरात्रिचतुर्दश्युपवासफलम्.
३२. अपवर्गादिफलकथनम्.
३३. रुद्रस्वाध्यायतनविधानफलकथनम्.
३४. लिङ्गस्थापनफलकथनम्.
३५. क्षेत्रतीर्थफलकथनम्.

**Beginning :**

नमोऽस्तु सिन्धुचन्द्रांशुनिर्धूतामलमौलये ।
भूतिशुभ्राभ्रतुल्यव्यक्तसभ्वसत्त्वाय शम्भवे ॥

स्थाणुः कामफलं ददाति विलसद्भूतिर्विभूतिर्दिश-
न्नेत्रान्तर्ज्वलितानन: प्रशमयंस्तापत्रयं व्यापदम् ।
उग्रस्पष्टविभक्तिभावहृदयं यद्दे शिवं प्राणिनां
दुर्भिक्षाद्भुतवैभवः स भगवान् विश्वेऽस्तु निःश्रेयसे ॥
राज्ये गौडमहीभुजां समभवत्कोशाधिकारी परः
पात्रणां बुधदेव इत्युपचितो भूलोककल्पद्रुमः ।
तस्माद्गौतमवामदेवतनयो लेभे पदं पैतृकं
जज्ञे भूतनिरम्बकः शिवपरः श्रीशोऽभिदेवस्ततः ॥
भारतपुराणरामायणपाशुपतादितद्वचनानि ।
तस्माद्व्याकृष्यते न रुचितः शिवामृतसारसमुच्चयोऽयम् ॥

आद्यं प्रवक्ष्ये महिमानमैश्वर-
मद्वैतकं केशवशङ्करं तथा ।
ततोऽपि भक्तिं प्रति चेष्टदायिनीं
यां त्वां प्रवक्ष्यामि समासतस्ततः ॥

दर्शनमथ वक्ष्ये स्पर्शनं चैश्वरं वै
प्रदोषफलमशेषं कीर्तनं तस्य पुण्यम् ।
समरमपि च वक्ष्ये पापराश्यां घनाग्नि
हरनिकेतनदत्तं सद्यः संमार्जनं च ॥

शैवीं दीक्षामथ पुनरिदं पूज्यलिङ्गा च शम्भोः
तस्माच्छिष्टाद्यभीष्टं शुभफलगतं शैवलिङ्गानि लोके ।
तत्पूजायाः फलमविकलं पुण्यकालार्चनीयं
चातुर्वर्ण्यार्चनफलमतो शङ्करस्य प्रवक्ष्ये ।
स्नपनमथ प्रवक्ष्ये नृत्तगीतं च शम्भोः
सतिलमपि च . . . चन्दनार्द्रप्रलेपम् ।
सकलकुसुमदानं धूपदीपौ तथा च
निवेदनमपि वक्ष्ये ताम्बूलादिप्रयुक्तम् ॥

घ्राणं ध्यानं जपं चैव प्रदक्षिणप्रणामकौ ।
नानादानफलं वक्ष्ये शिवरात्रिव्रतं ततः ॥

अथ स्वर्गादिफलमथ वक्ष्ये रुद्रस्याप्यायतनविधानफलम् ।
लिङ्गस्थापनमथ तत्क्षेत्रे तथैव शीर्णायतनो शङ्करफलम् (!) ॥

अथ शङ्करनिन्दकनिन्दां नन्दीश्वरोक्तगीतं च ।
तस्य कीर्तनमथ पुनरीशमिति चत्वारिंशत्प्रकरणानि ।

तत्रादौ शिवमाहात्म्यं वर्ण्यम् । स्मृतौ—

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च महीपते ।
एते यस्य कलाः प्रोक्ताः स शिवः प्रोच्यते बुधैः ॥

तथा च स्कान्दे—

उत्कृष्टे त्वन्यजातीनां महाशब्दः प्रयुज्यते ।
तस्मात्समस्तदेवानां महादेवोऽयमुत्तमः ॥

लिङ्गभविष्ययोः—

आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
आलयस्सर्वभूतानां लयनाल्लिङ्गमुच्यते ॥

**End:**

शिवधर्मे—

शिवक्षेत्रसमीपस्थं यत्तोयं पुरतः स्थितम् ।
शिवगङ्गोदकं ज्ञेयं तत्र स्नात्वा शिवं व्रजेत् ॥

शतानन्दसंग्रहे—

चैत्रकृष्णचतुर्दश्यां यः स्नात्वा शिवसन्निधौ ।
गङ्गायाः सर्वशेषं च फलं प्राप्नोति मानवः ॥

सह्याद्रिखण्डे—

चैत्रकृष्णचतुर्दश्यामङ्गारकदिनं यदि ।
पिशाचत्वं पुनर्न स्यात्तीर्थेषु स्नानभोजनात् ॥

**Colophon:**

इति श्रीशदेवविरचिते शिवामृतसारसमुच्चये तत्क्षेत्रतीर्थफलकथनं नाम पञ्चत्रिंशत्प्रकरणम्.

---

R. No. 5126.

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 122. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Trivikraman Nambūdirippad, Chennamangalam-mana, Veleyaukod, Malabar district.

मातृसद्भावतन्त्रम्.

## MĀTṚSADBHĀVATANTRAM.

On certain details connected with the worship of Śakti. The work is said to be an abridgment of the Yāmalatantra.

Contains the Paṭalas 1—27 complete and 28th incomplete.

**Beginning:**

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
प्रणम्य च गुरुं विघ्नं दुर्गां च क्षेत्रपालकम् ।
मातृसद्भावनाम्ना च तन्त्रमेतत्प्रवक्ष्यते ॥
यामलेषु समालोच्य स्वसामर्थ्यानुरूपतः ।
जगद्धिताय चास्माभिः क्रियते सारसंग्रहः ॥
तानीश्वरमुखाम्भोजसमुद्गीर्णान्यनेकधा ।
ब्रह्मणापि न शक्यानि ज्ञातुं किमुन मादृशैः ॥
अल्पवीर्यबलोत्साहधैर्यायुस्सत्त्वबुद्धिभिः ।
निस्सारैर्नीरसैर्निस्सत्त्वैर्जनैरस्मिन् कलौ युगे ॥
बहुदोषैर्लघुगुणैरिति मत्वानुकम्पया ।
प्रमाणं भुवनस्यास्य यथाकृपशयो हरिः ॥
वक्तुमारभते मूढस्तथा व्यवसितं त्विदम् ।
तथाऽपि खलु विस्पष्टं भक्तिश्चोदयतीव माम् ॥
तया सञ्चोद्यमानस्तु यास्यामि हसनीयताम् ।
कारणेनागमस्यास्य सर्वैः सर्वत्र सर्वदा ॥
एवं गतस्य मे नित्यं क्षमां कुर्वन्तु सूरयः ॥
लालनीयस्य बालस्य स्वपुत्रस्यैव जल्पिते ।
नैकत्र तेषु सम्प्रोक्ता क्रियास्तन्त्रेषु शम्भुना ॥
मातृयागं समुद्दिश्य न जानीमोऽत्र कारणम् ।
तस्मादावश्यकाः कर्तुं क्रिया लोकेषु नैष्ठिकाः ॥
अनुक्रमेण वक्ष्यन्ते संग्रहेण यथाविधि ।
आचार्यलक्षणाद्यं तु जीर्णोद्धारावसानकम् ॥

अनुक्रममिति प्राहुरस्मिंस्तन्त्रे विचक्षणाः ।
आचार्यलक्षणं चैव पृथिव्याश्च विशोधनम् ॥
वास्तुयागविधानं च ततः प्रासादलक्षणम् ।
आधानमिष्टकायाश्च गर्भाधानमनन्तरम् ॥
प्रतिमालक्षणं चैव दीक्षाकल्पमतः परम् ।
बीजारोपणकल्पं च बलिं तत्रैव पूजनम् ॥
जलाधिवासं बिम्बानां तेषां चैव विशोधनम् ।
अधिवासक्रमं तासां प्रतिमानं तथैव च ॥
रत्नन्यासविधानं च प्रतिष्ठालक्षणं तथा ।
अर्चनाया विधानं च स्नपनं चोत्सवक्रमम् ॥
तीर्थाभिषेकगमनं स्नपनं चाप्यनन्तरम् ।
जीर्णोद्धारं च तन्त्रज्ञाः प्राहुरेवमनुक्रमात् ॥
आचार्यं सर्वतन्त्रज्ञं शुचिदेशकुलोद्भवम् ।
प्राज्ञं कृतज्ञं धर्मज्ञमात्मज्ञं सत्कुलोद्भवम् ॥

* * * *

**Colophon:**

इति मातृसद्भावे प्रथमः पटलः ।

गुरुः स्थपतिभिर्दक्षैः कुर्यादायतनं ततः ।
महेशस्य तु मातृणां शास्त्रदृष्टेन धर्मणा ॥
तत्रादौ पृथिवीं सम्यग्विशोध्य शुभलक्षणैः ।
प्रागुदक्प्रवणां स्निग्धां क्षीरक्षितिरुहैर्वृताम् ॥
अन्यैश्च याज्ञिकैर्वृक्षैः समन्तादुपशोभिताम् ।
समातृभिश्च पशुभिः सदा संसेवितां शुभाम् ॥

* * * *

**End:**

**Colophon:**

इति मातृसद्भावे मुद्रापटलः सप्तविंशः ।

अथ तन्त्रोक्तमार्गेण बुद्ध्वा दोषबलाबलम् ।
ततः प्रतिक्रियां कुर्यात्तन्त्रेष्वालोच्य देशिकः ॥

प्रासादस्थे मृते वा मलरुधिरहते धूमयुक्ते विवर्णे
क्षुद्रे मन्त्रैः प्रयुक्ते ज्वलनविनिहते सूतिकाद्यैः प्रदुष्टे ।
चण्डालोन्मत्तकैश्च क्रिमिभिरुपहते पूजने दीर्घलुप्ते
प्रासादे प्राङ्गणे वा व्यभिचरणविधौ तत्र शान्तिं विदध्यात् ॥

* * * *

द्वादशं तु दश प्रोक्तं ह्रस्वाङ्गुलं तु वेष्टनम् ।
एवं बाहुलता ज्ञेया द्वादशप्रकरी स्मृता ॥
सप्ताङ्गुलं करतलं पञ्चमध्यमिकाङ्गुलिम् ।
मध्यमात्सप्तभागोनतर्जनीमानतः स्मृता ॥
अनामा पञ्चभागोना विज्ञेया तु कनीयसी ।
तर्जनी मध्यमापर्वादधस्ताच्चतुरङ्गुला ॥

---

R. No. **5127.**

Paper. $10\frac{1}{4} \times 9\frac{1}{2}$ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Śaṅkaran Nambūdirippād, Avanapparamba, Vadakancheri, Cochin State.

**महिम्नस्स्तवः, शिवप्रकाशिकाव्याख्यासहितः.**

MAHIMNASSTAVAḤ WITH THE COMMENTARY ŚIVA-PRAKĀŚIKĀ.

Foll. 1*a*—28*a*. Fol. 28*b* is left blank.

The work Mahimnasstava is already described under R. No. 399(*a*) ante. The commentary is called Śivaprakāśikā and is by Śvetagiri, disciple of Nṛsiṁhamuni.

Complete.

**Beginning:**

(मू.)—

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥

(व्या)—

हे हर ते महिम्नः परं पारमविदुषः मम स्तुतः त्वयि यद्यसदृशी तत् ब्रह्मादीनामपि गिरस्त्वयि अवसन्नास्स्युः । सर्वः स्वमतिपरिणामावधि गृणन्न वाच्यः । अथ तर्हि त्वत्स्तोत्रे ममप्येष परिकरः निरपवादः इति श्लोकस्य पदयोजना । तव माहात्म्यसागरस्य परस्तात्तनं कूलमजानतः पुरुषस्य स्तुतिरननुरूपा यदि तर्हि ब्रह्मादीनामपि वाचस्त्वयि विषये कुण्ठितवृत्तयः । तैरपि त्वन्महिमसागरस्य ज्ञातुमशक्यत्वात् । अथ सर्वो जनः स्वस्य मतिः अन्तःकरणं तस्य परिणामः वृत्तिरूपं ज्ञानं स एवावधिः सीमा यस्य तत् स्वमतिपरिणामावधि क्रियाविशेषणमेतत् ॥

End:

हे वरद क्लेशावश्यं कृशपरिणति चेतः चित्तं क च गुणसीमोल्लङ्घिनी शश्वदृद्धिः क चेति चकितं वैक्लव्यं यस्य मनसो गोचरयितुमशक्यत्वात् स्तोतुं भीतं मां तव चरणयोः भक्तिरमन्दीकृत्य प्रोत्साहितमापाद्य वाक्यपुष्पोपहारं मां त्वच्चरणयोरधात् प्रक्षिप्तवती भक्तत्वात् स्तोतुमशक्यत्वेऽपि अहं भक्तिवशात्तुष्टाव । मम जल्पितं शिशुजल्पितमिव पिता स्नेहपूर्णेन मनसा स्वीकुरु मामनुगृहाणेति समुदायार्थः ।

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेहि(खि)नी पत्रमुर्वी ।
यदि लिखति गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यनृसिंहगुरुमुनिशिष्यश्रीमच्छ्वेतगिरिमुनिविरचिता महिम्नःस्तवटीका शिवप्रकाशिका समाप्ता ॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
नास्त्यघोरात्परो मन्त्रो नास्ति तत्त्वं गुरोः पदम्(रम्) ॥

---

R. No. 5128.

Paper. 10½ × 9¼ inches. Foll. 28. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. V. Rāmānuja Ayyangār, Tirukkōṭṭiyūr, Ramnad district.

हरिकर्णामृतम्.

HARIKARṆĀMṚTAM.

The author herein maintains that all the scriptural passages teach that god Nārāyaṇa is the supreme Brahman and that he alone should be worshipped by those who wish to attain final and complete release from bondage. The author is Campakēśācārya, son of Varadācārya.

Wants the beginning; otherwise complete.

अनन्तरं च देव इत्याशङ्क्य जनयन् देव एक इति दिव्यो देव एको नारायण इतीत्येतत् प्रत्यभिज्ञाप्य स नो बन्धुरिति माता पितेत्यादि प्रत्यभिज्ञाप्य धाता यथा पूर्वमकल्पयदिति सृष्ट्यैकरूप्यं प्रतिपाद्यानन्तरं च अणोरणीयानित्यारभ्य जगत्कारणत्वमेव प्रपञ्चितम् । अनन्तरं च यो देवानामिति शङ्करात् ज्ञानमन्विच्छेत् , उपायोऽस्मि हरेः स्मृताविस्यादिप्रकारेण रुद्रात् ज्ञानं प्रार्थितम् । अनन्तरं च दहरविद्यायामित्यादीनां दहराकाशवर्तिध्यानं विधाय तस्मिन्नयं पुरुषो मनोमय इति पूर्वमुक्तत्वेऽपि व्यवहितत्वाद्भेदादाविति विविच्य तावन्मात्रेण मन्दमतीनामपर्याप्ते सहस्रशीर्षमित्यारब्धम् । अनन्तरं च ऋतं सत्यमिति तदेव विवृतम् ।

**End:**

एतत्सर्वमभिप्रेत्य भगवद्बादरायणलब्धपरावरतत्त्वबोधो जैमिनिराचार्यो महामीमांसकोऽनुगृह्णाति—स विष्णुराह हि । तं ब्रह्मेत्याचक्षते तं ब्रह्मेत्याचक्षते इति । एतदुक्तं भवति—नारायणो देवः परं मुमुक्षुभिः सेव्यः प्राप्यश्च । तस्यैव शेषा ब्रह्मशिवादय इति ।

मुधा जल्पन्त्वन्ये मुरमथनमायामुकुलिता
मुहु . . . . इह न किंचित्परिहृतम् ।
दुरावारोद्रेकस्फुरदुरुरमाकान्तकरुणा-
परीवाहश्रेणीपरिहृतपरीतापनिवहे ॥

**Colophon:**

श्रीमद्रामानुजाचार्यनियमितचतुस्सप्ततिसङ्ख्यातभद्रपीठप्रतिष्ठितगुरुगणविभूषणतन्नियमितानेकबिरुदावलीशोभमानकौशिकसौमित्रिदेशिकवंशकौस्तुभस्य श्रीमद्वरदाचार्याभिधानतातपादश्रीपादकमलमधुव्रतायमानस्य कविकुलसार्वभौमस्य कथकजनकण्ठीरवस्य श्रीमद्रामानुजसिद्धान्तविजयश्रीचम्पकेशाचार्यस्य कृतिषु हरिकर्णामृतं संपूर्णम् ।

R. No. **5129.**

Palm-leaf. 10½ × 9¼ inches. Foll. 88. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Śrikumāran Nambūdirippaḍ, Kaṭṭumaḍam-mana, Andattod, Tirur, Malabar district.

सोमभुजगवल्ली.

SOMABHUJAGAVALLI.

Foll. 1—88*a*. Fol. 88*b* is left blank.

A work on Śaktism dealing with the conduct of the worship of goddess Durgā or Śakti.

Breaks off in the 13th Paṭala.

**Beginning :**

वन्दे सन्देहसन्दोहध्वान्तभास्करभासुराम् ।
आम्नायवदनोदारां गुरुमूर्तिं परां शिवाम् ॥

श्रीमहादेव उवाच—

अथ वक्ष्यामि पद्माक्ष मदेकशरणाय ते ।
रहस्यानां रहस्यत्वान्न कस्यापि मयोदितम् ॥
यज्ञानां भक्तिसुलभमक्रमक्रमविग्रहम् ।
येन विज्ञातमात्रेण मद्भावः सम्प्रजायते ॥
विश्वविश्वाधिको देवः स्वतन्त्रः पञ्चकृत्यकृत् ।
विमृश्यते स्वात्मतया येन तज्ज्ञानमिष्यते ॥
न देयमेतन्मूर्खाय सिद्ध्यर्थे संशयात्मने ।
अन्यशास्त्रप्रसक्ताय कुतर्कोपहताय च ॥

* * * * *

अहमेव गुरुर्भूत्वा चरामि वसुधातले ।
अतिनेत्रचतुर्बाहुर्धर्मकामार्थविग्रहः ॥
अनुग्रहाय लोकानामादिक्षान्ताद्भुताकृतिः ।
गुरुं मामेव मन्यस्व हररूपतिरस्कृतम् ॥
नो चेदहं गुरुर्दद्यादुक्तमुक्तिं कथं हि सः ।
तस्मान्मदाश्रितः शिष्यो मच्यते पाशबन्धनात् ॥

ध्वान्ताक्रान्ता गृहा यद्वत्तथाज्ञानेन पूरुषाः ।
ज्ञानप्रदीपदानेन तदाज्ञानं विनश्यति ॥
आचारं शृणु शिष्याणामात्मसंवित्तिकारणम् ।
श्रीमान् जातिगुणोत्कृष्टः सर्वज्ञः कुलज्ञोऽपि वा ।
दृष्टौ(ष्टे) गुरौ तु निर्लज्जः प्रपतेद्दण्डवद्भुवि ॥

**End:**

**Colophon:**

इति श्रीसोमभुजगवल्ल्यां रहस्यभागे द्वादशः पटलः समाप्तः ।

महादेवः—

द्रव्यशुद्ध्यादिकं वक्ष्ये कुलन्यासस्तु विद्यया ।
तारैः स्यादङ्गुलिन्यासेष्वन्दैं भ्रीं च तथा ह्सौ ॥
हस्तयोश्च तले न्यस्येद्विद्याङ्गे चापि विन्यसेत् ।
संहारस्तु कनिष्ठाद्यः सृष्टिरङ्गुष्ठपूर्विका ।

* * * *

वन्दे सन्देहविच्छित्त्यै जन्तूनामन्तरुद्गतम् ।
कुन्दगौरवपुः श्रीमत्सुन्दरं योगिनीकुलम् ॥
गुरून् गरिमनिर्धूतजगदाद्यविजृम्भणान् ।
नमामि कारणायातज्ञानविज्ञानचक्षुषः ॥
नमो वटुकनाथं तं कुलाध्यक्षं नमाम्यहम् ।
शिवेच्छयानुगृह्णन्तं जन्तूनां कोटिसप्तकम् ॥
मुक्तादामेव या व्योमवितानस्याभिवासिनी ॥

---

R. No. **5130.**

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 17. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. N. Veṅkaṭacāryar, B.A., B.L., Vakil, Coimbatore.

(a) वेदान्तसिद्धान्तकौमुदी.

VEDĀNTASIDDHĀNTAKAUMUDĪ.

Foll. 1a—11a. Fol. 11b is left blank.

A brief work on Vēdānta explaining the various categories in accordance with the Viśiṣṭadvaita view of the Vēdānta: by Śrīnivāsa, grandson and pupil of Kṛṣṇasūri of Ātrēyagōtra.

Complete in three Paricchēdas as given below :—

१. चित्परिच्छेदः.
२. अचित्परिच्छेदः.
३. ईश्वरपरिच्छेदः

**Beginning :**

भाष्यकारं प्रणम्याहं कृष्णार्यं च गुरूत्तमम् ।
कुर्वे वेदान्तसिद्धान्तकौमुदीं विदुषां मुदे ॥

निखिलवेदान्तप्रसिद्धानि तत्त्वानि त्रीणि—चिदचिदीश्वरभेदात् । अत्र चिच्छब्देन ज्ञानमुच्यते । तच्च द्विविधम् । धर्मधर्मिभेदात् । तत्र धर्मी जीवः । तदाश्रितं ज्ञानं धर्मः । यद्वा चित्त्वं चेतनत्वम् । तच्च ज्ञानाश्रयत्वे सत्यणुत्वम् । अणुत्वनिवेशादीश्वरे नातिव्याप्तिः । लक्षणस्य त्रीणि दूषणानि सन्ति—अव्याप्तिरतिव्याप्तिरसंभवश्चेति । तत्र लक्ष्यैकदेशावृत्तित्वं लक्षणस्याव्याप्तिः ; यथा जीवानां बद्धत्वम् । अलक्ष्ये लक्षणगमनमतिव्याप्तिः ; यथा तेषामेव ज्ञानवत्त्वम् । लक्ष्ये क्वाप्यवर्तनमसंभवः ; यथा तेषामेव विभुत्वम् । स चायं चेतनो जीवशब्देनाभिधीयते ।

* * * *

यदप्येकविंशतिदुःखध्वंसो मोक्ष इति; तदप्ययुक्तम्, तस्यासुखात्मकत्वेनापुरुषार्थत्वात् सुखासाधनत्वाच्च । मुक्तश्च भगवत्प्राप्तिरूपमुक्तिरसानुभवशीलः ; तथा हि भक्तिप्रपत्त्योरन्यतरोपायानुष्ठानेन सुप्रीतो भगवानस्य चेतनस्यानादिदुस्तरपुण्यपापाविद्यानिवृत्तिपूर्वकमर्चिरादिमार्गेण तमसः परस्तादवस्थितविरजानद्युत्तरणपूर्वकपरमपदाख्यदेशविशेषप्राप्तिं संपाद्य स्वस्वरूपगुणाविभूतिविशिष्टस्वानुभूतिपूर्वकनित्यकैङ्कर्यरसानुभवशीलं करोति । स एव मुक्तः । तदुक्तम्—

सत्सङ्गाद्भवनिस्पृहो गुरुमुखाच्छ्रीशं प्रपद्यात्मवान्
प्रारब्धं परिभुज्य कर्मशकलं प्रक्षीणकर्मान्तरः ।
न्यासादेव निरङ्कुशेश्वरदयानिर्लूनमायान्वयो
हार्दानुग्रहलब्धमध्यमनिद्वारा वहिर्निर्गतः ॥

**End:**

लोके बालानामम्बाताताmatुलादीनुद्दिश्य तत्तद्वाचकपदप्रयोगे सति शक्तिग्रहदर्शनात् शक्तिग्रहणेनैव मातास्ति तातं पश्येत्यादिशक्तिग्रहो जायते । पुत्रजन्मादिप्रतिपादकवाक्यैरपि हर्षादिदर्शनेन बोधानुमानाच्च । तस्मात्सिद्धपराणामप्यस्ति बोधकत्वमिति वेदान्तवाक्यान्यपि ब्रह्मप्रतिपादने शक्नुवन्तीति सर्वं समञ्जसम् ।

**Colophon:**

इत्यात्रेयगोत्रकलशोदधिसुधाकरश्रीविष्णु(कृष्ण)सूरिचरणारविन्दमिलिन्दायमानमानसेन तत्पौत्रेण श्रीनिवासदासेन प्रकाशितायां वेदान्तसिद्धान्तकौमुद्यामीश्वरपरिच्छेदस्तृतीयः ॥

---

(*b*) श्रीभाष्याद्यश्लोकव्याख्या.

ŚRĪBHĀṢYĀDYAŚLOKAVYĀKHYĀ.

Foll. 12*a*—16*a*. Foll. 16*b* and 17 are left blank.

A commentary on the first stanza of the Śrībhāṣya of Rāmānuja.

Complete.

**Beginning:**

अथ भूतव्रात इत्यत्र भूतसम्बन्धिनां व्रातो भूतव्रात इत्यर्थकल्पनं (विभक्तीनां) प्रकृत्यर्थेतरतत्समवायसम्बन्धबोधनासंभवादेव निरस्तम् । ननु समूहवाचकपदसमभिव्याहारे षष्ठी स्वप्रकृत्यर्थस्यैव सम्बन्धं बोधयति नाप्रकृत्यर्थस्येति नाग्रहः ; ब्राह्मणसभेत्यादौ प्रकृत्यर्थेनेव राजपरिषद्राजसेनेत्यादावप्रकृत्यर्थेन सम्बन्धस्य षष्ठ्या बोधनादिति चेन्न, तत्रापि प्रकृत्यर्थस्य राजादेरेव परिषदाद्यर्थेनान्वयाङ्गीकारेणादोषात् । परं त्वसौ न समुदायसमुदायिभावात्मकः, असंभवात् । किन्तु स्वस्वामिभावात्मकः, राजस्वामिकैषा परिषदिति तत्रानेकस्वामिकत्वस्य बाधात् ।

**End:**

एवं प्रसिद्धार्थपरतयैव सर्वनिर्वाहसंभवे अप्रसिद्धार्थकल्पनमन्याय्यम् । रक्षायोग्यसमुदायपरत्वे संभवति यत्र प्रविष्टानां शब्देन न व्यवहारो दृश्यते च तथाविधायोग्यसमुदायपरत्वं नाश्रयितुं युक्तम् । अतो यथोक्त एवार्थो युक्त इति दिक् ।

**Colophon:**

इति श्रीभाष्याद्यश्लोकव्याख्या ॥

R. No. **5131.**

Paper. 10¼ × 9½ inches. Foll. 56. Lines, 20 in a page Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Śrikumāran Nambūdirippād, Kaṭṭumaḍam-mana, Andattod, Malabar district.

लैङ्गप्रकाशः, लिङ्गपुराणव्याख्या.

LAIṄGAPRAKĀŚAḤ: COMMENTARY ON LIṄGAPURĀṆA.

Foll. 1*a*—55*a* Foll. 55*b*—56 are left blank.

A commentary on the Liṅgapurāṇa which work has been described under No. 2257 of the D.C.S. MSS., Vol. IV, Part I. By Yōgīśvara.

Contains the following Adhyāyas in disorder—65 (wants the beginning), 60, 67, 68, 71, 70, 69, 72, 73, 75, 77, 78, 84, 85, 87 and breaks off in the next Adhyāya.

**Beginning**:

. . . युत्तेजनात्तेजस्करः अतिथिरूपेणोपास्यत्वात् । कालानि नत्वा- . . . . . . . . . . . . तवेषोक्तोष्णीषधरणादूर्ध्वमूर्ध्वज्योतिर्मण्डलो- ष्णीषधारणात् गङ्ग . . . . स्नातशीर्ष . . . . ष्णीषीति नित्यसौम्य- त्वात् सुवक्रः पिङ्गत्वेनोत्थितः पादभूतात्प्रपचादूर्ध्वे उदेदिति वोदग्रः प्रपचादधःस्विदासीदिति विनतः विनतपाठे प्रपचा . . . . . . . . . . केशः परमगुरुत्वात् सुतीर्थः अघोरमूर्तित्वात् कृष्ण . . . . . . . . . रक्तसदानन्दात्मकत्वाद्वा कृष्णः । काद्यां जम्बुकरूपं दैन्यं(त्यं) हन्तुं स्वयमपि जम्बुकेश्वरो जा . . . सृगालरूपः सर्वैरर्थ्यत्वात्सर्वार्थः । सर्वस्य शिर स्थानीयत्वादनावृतरूपत्वाद्वा । मुण्डः . . . . . ग्राहकत्वात् स हि शुभङ्करः । सिंहव्याघ्राकृतिर्दैत्यौ हन्ता । सिंहेश्वरव्याघ्रेश्वरत्वेन . . . . सुगन्धत्वात् ।

* * * *

**Colophon:**

इति योगीश्वरोपज्ञे (श्री)मल्लैङ्गप्रकाशके ।

दण्डयुक्तशाखा . . . ध्यायः पञ्चषष्टिकः ॥

* * * *

**End:**

**Colophon:**

इति योगीश्वरोपज्ञे श्रीमल्लिङ्गप्रकाशके ।
पञ्चाशीतितमोऽध्यायः ध्यानयोगप्रपञ्चनम् ॥

ज्ञानयोगाध्यायोक्तचिन्मात्रशिवाद्वैतं समर्थयितुं सर्वप्रपञ्चमूलप्रकृति-वेद्यमाणगुणसिद्धिहेतुर्देवी शिवेनैकरसेनेत्यावाहनमन्त्रं प्रस्तौति—निशाम्येति।

* * * *

सर्वलोकात्मकवैश्वानरोपास्तेः संग्रहश्लोको यथा
स्वतेजस्स्वर्गमूर्धाहं विश्वरूपा . . . . . . . ।
पृथग्वर्मानिलप्राणो बहुळाकाशदेहवान् ॥
र . . स्ति प्रतिष्ठावयङ्घ्रिः प्रादेशमात्रकः ।
. . . भिर्विमानोऽहं ब्रह्मा वैश्वानरः स्वयम् ॥

अष्टधा आग्नेयवीतशक्त्यात्मना अग्निश्च जा . . . . . . . वेदा-श्चेति श्रुत्युक्ताष्टात्मना वा । अष्टधा अग्निर्हुतवाहनहुताशनकृष्णवर्त्मदेव सुमुखसन्निह.

---

R. No. 5132.

Paper. 10½ × 9½ inches. Foll. 194. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Hariharārājugāru, Chochinajagannāthapuram, Kudala, Ganjam district.

भक्तिभागवतम्.

BHAKTIBHĀGAVATAM.

Foll. 1a—193a. Foll. 193b and 194 are left blank.

This is a poem in 22 Sargas narrating the story of Śrīkṛṣṇa as found in the tenth Skandha of the Śrībhāgavata. By Jīvadēva. It is stated that the work was written at the request of king Vēṅkaṭa-Pratāparudra, son of Puruṣōttama of Kākatīya family. The poet had the title Kavidiṇḍima.

Complete.

**Beginning:**

श्रीशक्तिचेतोभवबीजभूतां तटित्प्रभां तां त्रिपुरीं भजामः ।
यतोऽभिजाता कवितालता सा पुन्नागमाश्रित्य फलानि सूते ॥

नमोऽस्तु तस्मै श्रुतिसारसाक्षिशिखासरोजाय विकस्वराय ।
यस्याखिलस्सौरभसंभ्रमेण निराकृतो विभ्रमगन्धभेदः ॥
लक्ष्मीपतेस्तत्पदपद्मपीठे यतः स्रवन्ती मकरन्दधारा ।
प्रसादमाला मुकुटे पुरारेः पयोनिधेः प्राथमिकी प्रियासीत् ॥
सभारतासाध्यसुपर्वसिन्धुः स भारताख्यानकविः समिन्धाम् ।
यद्भारतीसारतरप्रवाहैः पवित्रितं भारतवर्षमासीत् ॥
जयत्ययं भागवताम्बुराशिः पवित्रपूरः पुरुषोत्तमेन ।
रसे यदीये परिगाहमाना नानाविनोदं कवयो दधन्ते ॥

* * * *

विजृम्भतां सा गुणलोभनीया सूर्यान्वयक्ष्मापतिपद्ममाला ।
या पुण्डरीकाक्षमहालता च स्फुटान्तरालंकृतपुण्डरीका ॥
स तत्र जज्ञे कपिलेन्द्रनामा गजाधिपो दाशरथिर्विरक्तः ।
भूभृत्कबन्धैर्विविधाय बन्धं कीर्तिं परां प्राप रणाम्बुधौ यः ॥
ततो महीमण्डलसार्वभौमः पुरन्दरश्रीः पुरुषोत्तमोऽभूत् ।
रमासमाश्लेषसमानवाणीसमागमानन्दविनोददक्षः ॥
ततोऽभवद्बहुटकाकतीयः प्रतापरुद्रः स महीमहेन्द्रः ।
यस्य प्रतीपा युधि जम्भदम्भं दोस्स्तम्भदम्भोळिहता भजन्ते ॥
स एकदा भागवतावतंसो वेदान्तविद्यापुरुषावतारः ।
स्वच्छप्रभास्थानविशुद्धविद्वन्मुक्तावलीनायक इत्यवादीत् ॥
पुराणगम्भीरपयःपयोधेर्नवामृतं भागवतं प्रतीमः ।
स्कन्धं विशुद्धं दशमं ततोऽपि समुद्धृतं सारमुदाहरामः ॥
तस्मिन् गभीरार्थपयःप्रवाहे न बालकानामुचितः प्रवेशः ।
यतस्ततः कोमलकाव्यभङ्गीविशुद्धबन्धं कुरुत प्रबन्धम् ॥
ततो गुरुस्तस्य मतो बुधानां श्रीजीवदेवः कविपण्डितेन्द्रः ।
समुल्लसद्भागवतामरद्रुच्छायाश्रितः काव्यमिदं तनोति ॥
मुरारिपादार्चितपुण्डरीकं पुरारिकेशान्तमहाप्रसादः ।
नभोऽम्बुराशौ मिलदङ्कभङ्गं बिम्बं सुधांशोर्महनीयमास्ताम् ॥
स सोमकन्दो यदुवंशकाण्डः समेधतां जातसुपर्वसङ्गः ।
गोपीस्तनालङ्करणाय यस्मिन् कृष्णो मणिर्माणवको बभूव ॥

पुरा धरा दुर्मददानवानां भरार्दिता कैतवमानवानाम् ।
पुरारिचापं निजपूर्वगोपं सुरालयं सोपचयं जगाम ॥

**End:**

पीत्वा श्रुतिपुटैर्हरिलीलानल्पपद्यरससेचनहृद्यम् ।
जीवदेवकविनाशु निबद्धं भक्तिभागवतनामककाव्यम् ॥

अष्टौ हाटकचामराणि कनकच्छत्रं डमड्डिण्डिमं
योऽलब्ध प्रथितप्रतापनृपते रुद्राद्द्विजार्याश्वरात् ।
तस्येयं कृतिरुज्ज्वला नृपगुरोः श्रीजीवदेवाभिधा-
विख्यातेः कविडिण्डिमस्य सुधियामास्तां विनोदश्रिये ॥

**Colophon:**

इति श्रीमत्कविडिण्डिमगजराजगुरुश्रीजीवदेवाचार्यविरचिते भक्तिभागवते महाकाव्ये दिनकृत्यविनोदवर्णनं नाम द्वात्रिंशत्तमः सर्गः ॥

यद्विद्वज्जनशैलचित्तकुहरे दमाक्षीत्प्रतिध्वानव-
द्यवार्थस्फुटरत्नराशिरुदधिः काव्यालवालेष्वभूत् ।
सद्व्याचवदरजीवदेवकविना बद्धं प्रयत्नेन य-
च्चद्रुद्रः खलु भक्तिभागवतमित्याख्यातमत्रालिखत् ॥

इह भक्तिभागवतकाव्यवारिधौ
विबुधा मनोविमलमन्थभूभृतम् ।
विनिपात्य बुद्धिगुणघर्षणश्रमै-
रमृतानि भावनिवहान्नयन्तु ते ॥

---

## R. No. 5133.

Paper. 10¾ × 9½ inches. Foll. 48. Lines, 20 in a page. Dēvanāgrī. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdiri, Tritala, Malabar district.

पदार्थदीपिकाव्याख्या — न्यायप्रकाशः.

### PADĀRTHADĪPIKĀVYĀKHYĀ: NYĀYAPRAKĀŚAḤ.

A commentary on Koṇḍubhaṭṭa's Padārthadīpikā described under R. No. 74 ante. The commentary is called Nyāyaprakāśa. The

commentator is Gīrvāṇendra Yajvan, the third son of Nīlakaṇṭha Dīkṣita, who was a grandson of Accādīkṣita, the brother of Appayadīkṣita. It is said that the commentator composed a poem called Kārtikēyavijaya and his father wrote a commentary on Kaiyaṭa's Mahābhāṣyapradīpa, besides many other works.

Complete.

**Beginning:**

विश्वाधिकं विमलचिन्मयमिन्दुचूडं
प्रालेयशैलतनयादृतवामभागम् ।
तापिञ्छगुच्छमसृणच्छविकण्ठमूलं
देवं नमामि शमितत्रिपुरं गिरीशम् ॥
प्रसादेन गिरीशस्य गुरूणामप्यनुग्रहात् ।
पदार्थदीपिकाव्याख्यां रचयामि यथामति ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये कृतं स्वेष्टदेवतानमस्काररूपं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति—श्रीमदिति । सितासितमुपास्महे इत्यन्वयः । सितासितपदेन हरिहरात्मकं वस्तु प्रतिपाद्यते । इतिहासपुराणेषु बहुशो हरे शुद्धस्फटिकसङ्काशत्वस्य हरौ नीलमेघसङ्काशत्वस्य च वर्णनात् । न च हरिहरयोर्भेदस्य बहुप्रमाणसिद्धतया अभेदासंभवात् कथमेतदिति वाच्यम् ।

सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तै-
र्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञां
श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥
शिव एव हरिः साक्षाद्धरिरेव शिवः स्वयम् ।
यः पश्यत्यनयोर्भेदं स याति निरयं नरः ॥

* * * *

यद्यप्यात्मस्वरूपप्रज्ञाने पदार्थतत्त्वनिर्णयापेक्षा न, तथापीतरभिन्नप्रकारकात्मज्ञानस्येतरपदार्थज्ञानस्येतरपदार्थज्ञानाधीनत्वात् तथोक्तम्, तस्यैव संशयादिनिवर्तकतया मिथ्याज्ञानोन्मूलनक्षमत्वादिति भावः । अत एवात्मतत्त्वज्ञानमामनन्तीत्युक्तम् । अनेनैतद्ग्रन्थविवेचनीयपदार्थानां विषयत्वम्, ग्रन्थस्य पदार्थज्ञानद्वारा मुक्तिप्रयोजनकत्वम्, विषयग्रन्थयोः प्रतिपाद्य-

प्रतिपादकभावसम्बन्धः, प्रयोजनग्रन्थयोः प्रयोजनप्रयोजकपदार्थज्ञानजनकत्वं सम्बन्ध इति सुव्यक्तं प्रयोजनकायोऽधिकारीत्येदपि । तथा प्रमितीति ।

* * * *

**Colophon:**

इति प्रत्यक्षपरिच्छेदः ।

**End:**

पाञ्चरात्रनिष्ठानामवैदिकत्वं च तत्रैव प्रतिपादितम्—

बुद्धश्रावकनिर्गन्थाः पाञ्चरात्रविदो जनाः ।
कापालिकाः पाशुपताः पाषण्डा ये च तद्विधाः ॥
यस्याश्नन्ति हवींष्येते दुरात्मानस्तु तामसाः ।
न तस्य तद्भवेच्छ्राद्धं प्रेत्येह च न तत्फलम् ॥ इति ।

तस्माद्वैदिकैरीश्वराराधनं श्रुतिस्मृत्युक्तप्रकारेणैव कर्तव्यन्नान्यथेति सर्वं सुस्थम् ।

लोलम्बाः कुसुमेष्विवेह मधुनो बिन्दूनभिज्ञा जनाः
संगृह्णन्ति कणाद्गुणस्य कृतिषु प्रायः परेषामिति ।
व्याख्येयं विहिता कणो यदि गुणस्यात्रास्ति गृह्णन्तु ते
नैवं चेदियमप्यविश्रुतकृतिष्वेकस्तु किं चिन्तया ॥

**Colophon:**

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्वाहकश्रीमन्महाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्याचादीक्षितपौत्रस्य सर्वतन्त्रस्वतन्त्रस्य कैयटव्याख्यानशिवतत्त्वरहस्यनीलकण्ठविजयगङ्गावतरणनलचरितशिवलीलार्णवाद्यनेकप्रबन्धनिर्मातृनीलकण्ठदीक्षितस्य तृतीयनन्दनेन कार्तिकेयविजयकाव्यनिर्मात्रा गीर्वाणेन्द्रयज्वना विरचितो न्यायप्रकाशस्संपूर्णः ॥

कुण्डभट्टीयव्याख्या समाप्तिमगमत् ॥

The scribe adds—

पदार्थदीपिकाव्याख्यां गीर्वाणेन्द्रविनिर्मिताम् ।
शास्त्रालिखत्सुसभ्यानां शोधितव्या सतामसौ ॥

R. No. 5174.

Paper. 10½ × 9½ inches. Foll. 102. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippād, Nareri, Tritala post, Malabar district.

(a) सेतुबन्धव्याख्या—सेतुदीपरचना.
SĒTUBANDHAVYĀKHYĀ: SĒTUDĪPARACANĀ.

Foll. 1a—98a. Fol. 98b is left blank.

Similar to the work described under R. No. 2772 ante. By Dēvarāta alias Subrahmaṇya, who lived in the village Aravivara. This commentary is called Sētudīparacanā.

Contains the commentary on the Āśvāsas 1—4 (incomplete) and 7 and 8. The Āśvāsas 9—11 contain only a free rendering in Sanskrit.

**Beginning:**

णम। नमतावर्धिततुङ्गमपि सरि . . . . . . . . . . . . . . . नं नमत कीदृशम्? अवर्धिततुङ्गम् अवसा . . . . . . . . . . . . . . ब अर्थितत्वादिविशेषणपदैर्देवस्य मधुमथनस्यालोकसाधारणत . . . . . . . . . . . लङ्कारः। ह्रोत्तरत्वान्न सकारस्य गुरुत्वमपि। तत एव अप्पळहुअमपीरसहमित्यपपाठः। . . . . . . . . . . स्याभावात् अणोणअवत् विवक्षितुं चाशक्यत्वात्। इतस्समुन्नतं न किमप्यस्ति विज्ञेयमिति तुङ्गता क्रोडीकृता। सर्वसत्त्वतया विस्तारता। दुर्विज्ञेयमूलतया गभीरता। दुर्दिनतत्वतया सूक्ष्मता। सकलदृश्यस्वरूपतया प्रकटा देवस्येति परस्परपरिहारस्थितिधर्मप्रतिपादनावभासितेन विरोधालङ्कारेण वर्धनादिरहिततुङ्गत्वादिप्रतिपादनावभासितेन चोपक्रियमाणापि भावनेति संसृष्टिर्वालङ्कारः।

दनुजेन्द्ररुधिरलग्ने यस्य स्फुरति . . . . . . प्रभाविच्छर्दे।
व्याकुलीभवन्ति विवलयिता गलित इव स्तनांशुके महासुरलक्ष्मीः॥

*   *   *   *

**Colophon:**

केहादेशनिबन्धनारविवरग्रामेशशेषासन-
श्रीदासस्य तु सेतुदीपरचनान्वर्था च यस्याभिधा।

सुब्रह्मण्य इति स्वयं गिरिसुतानाथैकदासाद्वृता
साश्वासं प्रथमं तमेवमुदिता या देवरातादिति ॥

इति प्रथम आश्वासः ॥

**End:**

**Colophon:**

इति दशम आश्वासस्समाप्तः ॥

इति प्रतिकूलितचन्द्रे रावणं प्रति दूरोत्कण्ठितनिशाप्रवृत्तविरामे निशायाः प्रवृत्तो विरामो यस्य दूरत्वादुत्कण्ठितः । प्रार्थितो यस्मिन् तस्मिन् प्रवृतविरामाऽपि निशा ।

* * * *

॥ लक्षि ॥

लक्ष्यमाणविषादा अहृदयोन्मीलल्लोचनस्थितनयना ।
रामशिरो बद्धलक्ष्या अधाव्यत बाष्पेणास्या न रुध्यते दृष्टिः ॥

॥ तोतम् ॥

ततस्तद्दृष्ट्वा पुनर्मरणैकरसया बाष्पनिस्सारासम् ।
आपृच्छस्व मामिति कृतं त्रिजटागतलोचनया दीनं प्रलोकितम् ॥

---

(*b*) सेतुबन्धव्याख्या—रामदृष्टिः

SETUBANDHAVYĀKHYĀ : RĀMADṚṢṬIḤ.

Foll. 99*a*—102*b*.

Similar to the above. The commentary is called Ramadṛṣṭi and its author was a disciple of one Gōvinda.

Contains the first Āśvāsa incomplete

**Beginning:**

यत्नामद्युमणिध्वस्ततमाः पश्यान्त . . . ।
. . . . . . . . . जानकीजानिमेमि तम् ॥
निस्तुषा(ला)नन्दसन्दोहसंविदम्बरचन्द्रिका ।
वल्मीकप्रभवा कापि कृपा जयति पावनी ॥
यत्कारुण्याद्वयं तस्मिन् शिवे परिणताः पदे ।
आनन्दसीम्नि गोविन्दनाम्ने श्रीगुरवे नमः ॥

सेतोरपि सतां हृतोः पूरणानन्दवारिधेः ।
रामदृष्टिरिति ख्यातां व्याख्यां काव्यस्य कुर्महे ॥
ग्रन्थमत्सरिभि · · रमत्सरिभिरन्यथा ।
दृश्यतां तेन किं न स्यादेषा स्वात्मोपकारिणी ॥

तत्र तावत्सकलकविकुलतिलकल . . . लानिवासभूमिस्तत्रभवान् भगवान् प्रवरसेनापरपर्यायः परमेश्वरैश्वर्यसर्वस्वभूतपार्वतीस्तन्यपरमामृतसारस्वतसारपरिणामभूतः कश्चन् चिद्विशेषः प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनाद्यनर्घगुणगणसर्वस्वसमृद्धये सकललोकनिदानभूतस्य भगवतः परमात्मनो विवर्तभूतं महालक्ष्मीलीलापाङ्गरङ्गरङ्गविशेषाद्भुतविग्रहं नारायणापरपर्यायं सुरासुरनरतिर्यगादिसकलजगन्मङ्गलसर्वस्वं सर्वात्मनान्तः परामृशन् सहृदयानामपि तत्प्रवृत्त्यर्थं प्रणामापरपर्यायपरामर्शनं णमहेत्यादिनोपदिशति--णमहेत्यादि ।

नमतावर्जितनुङ्गमविनारितविस्तृतमनवनतगम्भीरम् ।
अप्रलघुकपरिश्लक्ष्णमज्ञातपरमार्थप्रकटं मधुमथनम् ॥

एवं भूतं मधुमथनं नमतेत्यन्वयः । कीदृग्भूतमित्याह ।

End:

अत्र हेतुः यः पुमानप्रतिमुक्तसुकृतः अप्रत्यर्पितोपकारः सोऽपि जगति जीवन्मृतः जीवन्नेव मृतो गण्यते । जीवितं रक्षताप्यनेन मृतिरेव लब्धेत्यर्थः । तस्माद्रामकृतोपकारप्रत्युपकाराय साहसं क्रियतामिति भावः ॥

---

R. No. **5135.**

Paper. 10½ × 9¼ inches. Foll 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambodirippad, Nareri, Malabar district.

(a) सीताराघवनाटकम्.

SĪTĀRĀGHAVANĀṬAKAM.

Foll. 1*a*—18*b*.

Same work as that described under No. 12721 of the D.C.S. MSS., Vol. XXI. By Rāmapāṇivāda, pupil of Bhaṭṭanārāyaṇa and an inhabitant of Maṅgala village in Malabar.

Contains the Aṅkas VI and VII.

**Beginning:**

(नेपथ्ये) ।

स्वागतमागन्तुकायाः ।

ततः प्रविशति वनदेवता ।

वन—सविस्मयमग्रतोऽवलोक्य,

उत्तप्तस्वर्णभित्तिस्फुटघटितमहेन्द्राश्मनो वेश्मपङ्क्ते-
रुद्द्योतैः पीननीलैस्तिरयवलस्तटिघनभ्रान्तिमभ्रे दिशन्ती ।
सव्रीडकिङ्किणीकध्वजपटपटलीवातधूतोद्धुसन्ध्या
लङ्का मे काममाक्ष्णोरियममरपुरप्रेक्षणेऽपि क्षिणोति ॥

(पुनर्नेपथ्ये) ।

स्वागतमागन्तुकायाः ।

वन—अनाकर्णितकेन ।

सर्वं दिङ्मुखचन्द्रकान्तिकलितक्रीडाचकोराङ्गना-
व्यामोहेषु गृहेषु चन्द्रमणयस्तद्वाष्पतोयाप्लुताः ।
दृश्यन्ते मणिवेदिकासु नितरां निष्पन्दमाना इव
व्यक्तं वक्ति भुजाविजृम्भितमियं लङ्केव लङ्कापतेः ॥

(नेपथ्ये) ।

स्वागतमागन्तुकायाः ।

वन—आकर्ण्य, अये को नु खल्वयमदृश्यमूर्तिमां प्रति समुदाचारयति ।

**End:**

तथापीदमस्तु भरतवाक्यम् ।

इष्टापूर्तैकतानो भवतु नियमतो भासुरो भूसुरौघो
दृष्ट्वा पुष्णातु पृथ्वीमुचितहुतहविस्संभृतौजा बिडौजाः ।
रक्षेदक्षीणधर्मा चतुरुदधितटीमेखलां भूतधात्रीं
पुण्यात्मा पद्मनाभप्रणिहितहृदयो वञ्चि(च्चि)मार्ताण्डवर्मा ॥

इति परिक्रम्य निष्क्रान्तास्सर्वे ॥

**Colophon:**

इति सप्तमो(षष्ठो)ङ्कः ॥

सीताराघवनाटकं संपूर्णम् ॥

सीताराघवनामनाटकमिदं श्रीभट्टनारायण-
श्रीपादाब्जनिषेविणा विरचितं केनापि नानारसम् ।
श्रीरामायणगौरवेण विदुषामेतत्प्रियंभावुकं
सर्वत्रापि रघुप्रवीरकृपया भूयात्प्रतीतं भुवि ॥
मङ्गलग्रामवास्तव्यरामपाणिवनिर्मितम् ।
मङ्गलाय चिरं भूयादेतन्नाटकमुत्तमम् ॥
सूर्यवंशसुधाम्बोधिवर्धनं मुग्धदर्शनम् ।
श्यामलं कोमलाकारं रामचन्द्रमुपास्महे ॥
जानकीवल्लभं वीरं मानशालिनमुत्तमम् ।
सचापशरदोर्दण्डं वन्देऽहं रघुनायकम् ॥

---

(*b*) सीताराघवनाटकस्थप्राकृतच्छाया·
SĪTĀRĀGHAVANĀṬAKASTHAPRĀKṚTACCHĀYĀ.

Foll. 186—265.

A Sanskrit rendering by Rāmapāṇivāda for the Prākṛt portions found in his Sītārāghavanāṭaka referred to above.

Complete.

**Beginning:**

सीताराघवनाम्नोऽस्य नाटकस्य यदन्तरे ।
जातं प्राकृतभाषाणां तस्य च्छाया विलिख्यते ॥

आर्ये, इयमस्मि । आर्य, यद्येवं तत्खलु सीताराघवं नाम नाटकं नायकरससारवेदिन्यामभिरूपब्राह्मणवरिष्ठभूयिष्ठायां गोष्ठ्यामभिनेतव्यम् । किञ्च धर्मरक्षणविचक्षणेन सर्वजनानुरञ्जनगुणसम्पन्नेन राज्ञा समभिनन्दनीयमिति मेऽभिप्रायः । तस्मात्तत्तादृशः कतमः प्रदेश आर्येण विचारितः । आर्य, यद्येवं स खलु नरेन्द्रो रामचन्द्र इव भगवतः पद्मनाभस्य कोऽपि कलावतार इति तर्कयामि । विश्वेषां मित्रतया सन्तापविशेषेण सलिलवाहेनावच्छादिते चन्द्रे विच्छायो भवति भुवनान्तः ।

अम्मो! एष महाराजदशरथो महादेव्या कौसल्यया सह किमपि मन्त्रयन्नन्तःपुराभ्यन्तरमधितिष्ठति ।

**End:**

किं पुनर्दीर्घविस्रवासज्वलनज्वालाप्रदीप्तचित्ताया दिष्ट्या रजनिचर पुरीचिराधिवासात् । सखि तव किमपि मलीमसत्वं यत् ज्वलनानिपतनेन तत्प्रशान्तं यथा किल जात्यसुवर्णपट्टैः । जयत्वार्यपुत्रः । जयतु भर्ता । भगवन् प्रणमामि । अनुगृहीतास्मि ।

**Colophon:**

इति सप्तमोङ्कः ।

अनुगृह्णातु चिरं मां नारायणभट्टपादपादरजः ।

यन्मम चेतसि सततं तिष्ठति जन्मापि सफलयति ॥

---

R. No. **5136.**

Paper. 10½ × 9½ inches. Foll. 246. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Durgam Subrahmanya Śâstrigâru, Kavali, Nellore district.

**तत्त्वचन्द्रिका.**

**TATTVACANDRIKÂ.**

Foll. 1*a*—244*b*. Foll. 245 and 246 are left blank.

Herein the author seeks to refute the Vêdântic views of Râmânuja and Śrîkhaṇṭha and to establish the Advaitic view of Śaṅkara. The author is Umâmahêśvara of Vôllâla family, a disciple of Akkaya Śâstrin. He also wrote a work called Virôdhavarûthinî (vide R. No. 4570).

The author says that the doctrine of Madhva is not directly refuted here, because it was condemned by previous writers in मध्वविध्वंसन and मध्वन्यकार.

Complete in 12 Ullâsas dealing with the following subjects :—

१. शास्त्रतात्पर्यनिरूपणम्.
२. भेदनिषूदनम्.
३. परकीयोपेतृस्वरूपखण्डनम्.
४. पराभिमतोपेयस्वरूपनिरासः.
५. पराभिमतोपायस्वरूपखण्डनम्.
६. जिज्ञासाधिकरणभङ्गः
७. द्वितीयाधिकरणभङ्गः
८. तृतीयाधिकरणभङ्गः.
९. चतुर्थषष्ठाधिकरणभङ्गः
१०. तदनन्यत्वाधिकरणभङ्गः.
११. द्वितीयिकाधिकरणभङ्गः.
१२. फलाध्यायविचारः

**Beginning :**

हस्ताभ्यां पुस्तकं शस्तं व्याख्यामुद्रां च बिभ्रतम् ।
जटाधरं तपोनिष्ठं मुक्तिकेशमुनिं भजे ॥
श्रेयांसि मम भूयांसि दत्तां किमपि दैवतम् ।
अर्धाङ्गमङ्गना यस्य शेखरः क्षणदाकरः ॥
हरलीलावताराय शङ्कराय परौजसे ।
कैवल्यकलनाकल्पतरवे गुरवे नमः ॥
गुरून् प्रद्राजितगुरून् नमाम्यक्कयशास्त्रिण ।
प्रविष्टो निगमान्ताब्धिर्यदनुग्रहनौकया ॥
उमामहेश्वराख्येन वेल्लालकुलजन्मना ।
क्रियते निर्गुणब्रह्ममीमांसातत्त्वचन्द्रिका ॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत ।
बिभेत्यल्पश्रुताद्वेद इति मन्वादयो जगुः ॥
सर्ववेदान्तवाक्यानामुपबृंहणसंमता ।
भगवत्पूज्यपादीयव्याकृतिः परिदृश्यते ॥
मध्वरामानुजादीनामुपबृंहणवैरिणाम् ।
श्रुत्यन्तव्याकृतिः सर्वा स्वमनीषैकमूलिका ॥
श्रुतिस्मृतिपुराणानि कल्पयित्वा स्वबुद्धितः ।
निर्व्यूढं दर्शनं स्वीयं मध्वेन प्रतिभावता ॥
रामानुजस्तु यतिराट् प्रसिद्धानां जगत्त्रये ।
शैवब्राह्मपुराणानां प्रमाणानामपि स्वतः ॥
वेदार्थप्रथनार्थानामप्रामाण्यं प्रकल्पयन् ।
वैष्णवानि पुराणानि व्याकुर्वंश्च स्वबुद्धितः ॥
तत्त्वं निरवहन् स्वीयं स्वकीयमतिवैभवात् ।
प्रकल्पयन्नसिद्धानि प्रसिद्धानि विनाशयन् ॥
निमील्य नेत्रे वेदानामुपबृंहणवर्त्मनि ।
सोत्कण्ठयैव श्रीकण्ठः श्रुत्यर्थं पर्यकल्पयन् ॥
तस्मादेतन्मतध्वस्त्यै साम्प्रतं प्रयतामहे ।
भाष्यं रामानुजस्यात्र श्रीकण्ठस्यापि दूष्यते ॥

मध्वविध्वंसने मध्वन्यक्कारे च महात्मभिः ।
मध्वदर्शनमामूलचूडं भस्मीकृतो यतः ॥
ततस्तद्दूषणायात्र सात्क्षान्नैव प्रयत्यते ।

* * * *

अथातो ब्रह्मजिज्ञासेत्यारभ्यानावृत्तिश्शब्दादित्येवमन्ते ब्रह्ममीमांसाशास्त्रे संशयः—किमिदं जीवब्रह्माभेदजगन्मिथ्यात्मपरम्? आहोस्वित्तद्भेदतत्सत्यत्वपरमिति। कुतस्संशयः? तत्तद्विरुद्धार्थानेकसूत्रदर्शनादिति ब्रूमः । किं तावत्प्राप्तम्? जीवब्रह्माभेदजगदसत्यत्वपरमेवेदं शास्त्रम् ।

* * * *

ननु रामानुजभाष्ये बोधायनवृत्त्यनुसारेण ब्रह्मसूत्राणि व्याख्यायन्त इत्युक्तम्; ततश्च तदीयं व्याख्यानमपि समूलत्वादुपादेयमेवेति चेन्न । बोधायनवृत्तेर्द्वैतपरत्वे प्रमाणाभावात् । तत्र चानाप्तत्वात्(च्च)दीयवचनमात्रेण वृत्तेः द्वैतपरत्वस्य निश्चेतुमशक्यत्वात् । किंच यदि वृत्तिः द्वैतपरा स्यात्तर्हि भाष्यकारैः प्रतिपदं वृत्तिर्दूष्येत । न हि दूष्यते । न हि तद्दूषणमन्तरेण स्वभाष्यं प्रतिष्ठापितं भवति । एकोनशतं भाष्याण्यनार्षाणि पृथ्वीधराभिनवगुप्तादिप्रणीतानि तत्कालविद्यमानकर्तृकाणि च्छिन्नानीति प्रसिद्धम् ।

* * * *

महाभाष्यं व्याचक्षाणो भगवान् भर्तृहरिरप्यद्वैतमेवाभ्युपगच्छति । यथोक्तं शब्दकौस्तुभे स्फोटवादान्ते—तदेवं पक्षभेदेनाविद्यैव वा ब्रह्मैव वा स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोट इति स्थितम् । आह च—

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते इति ॥

**End:**

तदेवं रामानुजश्रीकण्ठादिकृतब्रह्मसूत्रव्याख्यानस्य सद्भावपद्धिरसकलप्रमाणविरुद्धत्वेन प्रत्याख्येयत्वात् सकलवेदवेदोपबृंहणन्यायानुगृहीतस्य भगवत्पादीयविवरणस्यैवातिरमणीयत्वेन शरणीकरणीयत्वादथातो ब्रह्मजिज्ञासेत्यारभ्यानावृत्तिश्शब्दादित्येवमन्तं कृत्स्नं ब्रह्ममीमांसाशास्त्रं जीवब्रह्माभेदजगन्मिथ्यात्वपरमिति सिद्धम् ॥

**Colophon :**

इति श्रीवेल्लालकुलसंभवेनोमामहेश्वरेण विरचितायां तत्त्वचन्द्रिकायां फलाध्यायविचारो नाम द्वादश उल्लासः ।

---

R. No. **5137.**

Paper. 10½ × 9¼ inches. Foll. 44. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Paramēśvara Vāriyar Avargal, Kavalappara, Malabar district.

शृङ्गारसर्वस्वम्.

ŚṚṄGĀRASARVASVAM.

Foll. 1*a*—44*a*. Fol. 44*b* is left blank.

A drama of Bhāṇa kind by Anantanārāyaṇasūri of Bharadvājagōtra, disciple and sister's son of Varadarāja Śāstrin. The author was a resident of a village called Cōravana in the Pāṇḍya country and was a contemporary of Mānavikramarāja of Malabar.

Complete.

**Beginning :**

जयन्ति जगतां भीत्य . . . . . सम्पदः ।
विषयानन्दपारम्य . . र्थनिरङ्कुशः ॥

सूत्रधारः—

स्रस्तकचं मग्नकुचं श्लिष्टभुजं किंचिदुच्चलितनितम्बम् ।
उपरि रतं भुवि सुदृशां कलमणितं जयति कामसाम्राज्यम् ॥

इति पुष्पाञ्जलिं विकीर्य । पुरतो विलोक्य ।

मारिष इतस्तावत् ।

प्रविश्य पारिपार्श्वकः—भाव—अयमस्मि ।

सू—

इह खलु सकलकेरलमहीपालमौलिलालितपादुकस्य . . . . यसलिलनिधिपालस्य मा(नविक्रम)महीपालस्य महामा(घोत्सव)यात्रायां तस्य परिसरवर्ति . . . . श्चित्तविनोदनकुतुकैर्नानादेशवास्तव्योऽहमाहूयाज्ञप्तोऽस्मि । भो भरतकुलतिलक, शृङ्गाररसप्रधानरूपकाभिनयेनास्माकं चित्तवृत्तिमानन्दयेति । तस्मात्तादृशरूपकप्रयोगेण सामाजिकमनोरञ्जनं करिष्यामः ।

पारि—

भाव, सामाजिकमनांसि कस्य प्रयोगेण परितोषयामः ?

सू—

मम वशे शृङ्गारसर्वस्वं नाम भाणोऽस्ति । तेन सामाजिकमनस्तोषणं सुकरमेव ।

पारि—

हन्त स्मृतम् । रमणीयमेतद्रूपकम् । तत् केन निर्मितम् ?

सू—

अस्ति पाण्ड्यदेशालङ्कारभूतं चोरवनं नाम नगरम् । तत्रत्यः सर्वतन्त्रपारीणोऽनन्तनारायणो नाम महाकविः प्रतिसंवत्सरं महाराजमानविक्रमवैदुषीतरतमभावज्ञतागुणाकृष्टस्तद्दर्शनार्थमागच्छति ।

पारि—

स तु प्रख्यातकवनशक्तिर्मया ज्ञायत एव ।

सू—

स कदाचिदनागतः शृङ्गाररसप्रधानं रूपकं निर्मातव्यमिति मया प्रार्थितः शृङ्गारसर्वस्वं नाम भाणं निर्माय मे दत्तवान् ।

* * * *

इति प्रस्तावना ॥

ततः प्रविशति यथानिर्दिष्टवेषो रसिकतिलकः ।

रसि—

उबद्रसामृतरसेति पुनः पुनः पठित्वा परिक्रामति । अहो तस्याश्चम्पकलतिकया लावण्यसुधारसेषु निमग्नं मे मनो नेदानीमपि निवर्तते । यतः इन्द्रियाणां निवृत्तावपि न गोचरीभवन्ति विषयाः । तथा हि—

इदं नीलमिदं पीतमिति नोत्पद्यते प्रमा ।
इदं वपुस्तु मुक्तेस्तुल्यं भ्रमति केवलम् ॥

End:

सखायौ—किं ब्रूथ ?

भाव, किं ते भूयः प्रियमुपहराव इति ।

रसि—

किमन्यद्भवद्भ्यां प्रियसखाभ्यामितोऽपि प्रियमुपहर्तव्यम् । यद्युवाम्,

वसन्ततिलकादेनां वियोज्य तरुणीमणिम् ।
मया संयोज्य निस्तुल्यं सुखम(व्या)हतं किल ॥

(तथापीदमस्तु भरतवाक्यम् )—

उर्वीयं भवतूर्वरा सुखवती राजन्वती चानिशं
श्रीमान् विक्रमभूपतिर्विलसतु प्रत्यर्थिनां मूर्धसु ।
शृङ्गारैकरसा भवन्तु पुरुषाः कान्तासु सक्ता दृढं
सूक्तिश्चास्य कवेरियं कवयतां कर्णावतंसायताम् ॥

**Colophon:**

इति कौशिककुलतिलकषट्पद(षड्दर्शिनी)पारगवरदराजशास्त्रिचरणकरुणारससंवर्द्धितप्रज्ञाकन्दलेन तद्भागिनेयेन भरद्वाजकुलजलधिकौस्तुभेन अनन्तनारायणसूरिणा विरचितं शृङ्गारसर्वस्वं नाम भाणरूपकं समाप्तम् ॥

शैलाब्धीश्वर तावकीननगरीपर्यन्तभागार्पिता
लीलानिर्जितकर्णिकारकुसुमा दीपावली राजते ।
सन्त्यज्यामृतदीधितिं सुविमलं वक्त्रं तवासेवितुं
प्राप्ता तारपरम्परेति जगतामातन्वती विभ्रमम् ।'

---

R. No. **5138.**

Paper. 10½ × 9½ inches. Foll. 103. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Tippan Nambûdirippad, Ponnûrkotta-mana, Perumbavur, Travancore State.

**महाभास्करीयम्, गोविन्दभाष्यसहितम्.**

MAHĀBHĀSKARĪYAM WITH GŌVINDABHĀṢYA.

Foll. 1a—102. Foll. 102b and 103 are left blank.

The Mahābhāskarīya of Bhāskarācārya described under No. 13467 of the D.C.S. MSS., Vol. XXIV, followed by a commentary by Gōvindasvāmin.

Complete.

**Beginning:**

गावो यस्य क्षमायां ग्रहगतिविषयध्वान्तविध्वंसदक्षा
येनाप्युक्ते जितैषा भटमुखनिरता भाति वाग्रत्नमाला ।
यस्तेनाप्तो निबन्धः पृथुतरगणितं कर्मणां भास्करेण
व्याख्यानं तस्य किञ्चिद्गुरुचरणयुगप्राप्तमत्या करोमि ॥

तत्र तावद्विघ्नविनायकोपशमनपूर्वकत्वात् क्रियानिष्पत्तेस्तस्य च स्वेष्टदेवतानमस्काराधीनत्वादाचार्यार्यभटाभिमतग्रहकर्मणां निबन्धनं चिकीर्षुरयमाचार्यस्तदर्थमीश्वरप्रणिपातनं कृतवाननेन—

कलां बिभर्ति क्षणदाकरस्य यः
प्रकाशिताशां शिरसा गभस्तिभिः ।
नमोऽस्तु तस्मै सुरवन्दिताङ्घ्रये
समस्तविद्याप्रभवाय शम्भवे ॥ इति ।
जयन्ति भानोः कमलावबोधिनः
करा हिमांशोर्विनिताननत्विषः ।
ससूरितारः स्फुटदीर्घरश्मयो
धरासुतज्ञार्किसितत्विषः पुनः ॥ इति ॥

ग्रहांस्तौति । तत्स्तवनसामर्थ्यात्तत्सम्बन्ध्येव यत्किंचिदभिधीयत इत्यभिहितं भवति । अनेन पुनरार्यभटीयस्य माहात्म्यं तस्य च तदध्येतृश्रोतॄणां चाशिषां वक्ता दर्शयति—

तपोभिरासं स्फुटतन्त्रमात्मकं
चिरत्वमभ्येतु जगत्सु सद्गुणैः ।
चिरं च जीव्यासुरपेतकल्मषा
भटस्य शिष्या जितरागशत्रवः ॥ इति ॥

तत्प्रदर्शनात्तन्मूलीकृत्यैव ग्रहसम्बन्ध्यभिधीयत इत्यभिहितं भवति । अन्यथा ह्यनयोरानर्थक्यमापद्यते । तस्मादार्यभटाभिमतग्रहगत्युपायविवरणं करिष्याम इत्येतदर्थोदापन्नम् । तथा च सम्बन्धाभिधानप्रयोजनान्यप्युक्तानि भवन्ति । सम्बन्धस्तावदुपायोपेयलक्षणमभिधेयो ग्रहगतिस्तज्ज्ञानं प्रयोजनम् । तद्धि पुरुषार्थोपयोगि, शुभाशुभावगतेस्तत्पूर्वकत्वात् ।

**End:**

भास्करेण परिचिन्त्य ततो या मन्दबुद्धिपरिबोधसमर्थैः ।
सम्यगार्यभटकर्मनिबन्धस्पष्टवाक्यकरणैस्समवेतः ॥

इत्यनेनास्यागमपूर्वतां प्रदर्श्य,

विस्पष्टानेककरणे छेद्यके ग्रहणे रवेः ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥

इत्यनेन तन्त्रैकदेशस्तत्रनमुखेन सर्वमिदं तन्त्रं स्तूयते ।
आचार्यार्यभटः पितामह . . . . तन्त्रं सुसङ्क्षिप्तवान्
वृत्तिं विस्तरतोऽस्य मन्दमतये तेनाकरोद्भास्करः ।
तस्या अप्यतिदूरमेति सुधियामर्थस्त्विदानीमिति
व्याख्येयं लिखिता श्रुता गुरुमुखाद्गोविन्दनाम्ना मया ॥

**Colophon:**

इति भास्करीये(य) भाष्ये गोविन्दस्वामिकृते अष्टमोऽध्यायः ।
गोविन्देन कृता टीका गोविन्दस्वामिना मिता ।
समाप्ता भास्करीयस्य गुरुव्याख्या निबन्धने ॥

---

R. No. **5139.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 12 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Palayattu Valiya Accan, Chennamangalam, Parur, Travancore State.

रासोत्सवः.

RĀSŌTSAVAḤ.

A small poem describing the Rāsakrīḍā of Śrī-Kṛṣṇa as described by Vyāsa and others.

Complete.

**Beginning:**

आतुङ्गमस्तकमनस्तमितानुभाव-
मातङ्गमारहरमल्लिसरोजभाजाम् ।
मोदं करोतु शिवयोस्सुकृतैकमत्यं
मातङ्गभानुषवपुर्महितं महो वः ॥
प्रालेयशङ्खकुमुदस्फटिकावदातां
बालेन्दुमण्डितमनोज्ञकिरीटभाराम् ।
आलोकयामि मनसा वचसां सवित्रीं
नालीकयोनिवदनाम्बुजकेलिहंसीम् ॥
पारप्रयाणसुहृदः सकलागमानां
पापाम्बुराशिपरिशोषविधौ धुरीणाः ।
पायासुराधिहरणे भजतां प्रवीणाः
पादारविन्दतलपांसुकणा गुरूणाम् ॥

हस्तारविन्दयुगलीधृतचापबाणं
वृत्रारिरत्नशकलद्युतिमेचकाङ्गम् ।
धन्यं महः किमपि शङ्करपङ्कजाक्ष
पुण्यातिरेकपरिपाकमहं प्रपद्ये ॥

* * * *

प्राचेतसो विजयतां प्रथमः कवीनां
प्राच्यः कविः स च पराशरजो मुनीन्द्रः ।
अद्याप्यशृङ्खलवचोविसरा जगत्यां
मार्गं ययोरनुसरन्ति महाकवीन्द्राः ॥
भाग्येन केनचिदनर्गलमुज्जिहानै-
र्ये वर्णयन्ति वचनैरसतां चरित्रम् ।
माणिक्यजालममलं करसङ्गृहीतं
मन्दाः क्षिपन्ति ननु ते गहनान्धकूपे ॥
भूभारभूतदनुजक्षपणाय गूढं
गोपालधाम्नि वसतो मधुकैटभारेः ।
व्यासादिभिः कविभिरादृतमादरेण
रासोत्सवं परिमितैः कथयामि पद्यैः ॥
शब्दागमेषु सुलभो न परिश्रमोऽस्ति
विद्वत्प्रमोदजनको न गिरां विलासः ।
उद्वेलमन्तरुदिता सरसीरुहाक्षे
भक्तिः परं जनमिमं मुखरीकरोति ॥
नारीजनं रमयितुं धृतगोपवेषे
नारायणे मनसि कौतुकमादधाने ।
अभ्याजगाम शरदम्बुजवक्त्रलक्ष्य-
मल्पेतरं कमपि विभ्रममुद्वहन्ती ॥

End :

आभीरसुन्दरदृशामतिपुण्यभाजा-
मापूरयन्नभिमतान्यरविन्दनेत्रः ।
उन्निद्रचन्द्रसुषमासवमेवमेव
निन्ये गणं निखिलमेव शरन्निशानाम् ॥

विक्रीडितं व्रजवधूनिवहैरिदं य-
श्चक्रायुधस्य कथयत्यनुमोदते वा ।
भक्तस्य तस्य भगवत्पदपङ्कजान्ते
मुक्तिः करे ननु किमत्र विचारणीयम् ॥

**Colophon:**

इति रासोत्सवकाव्यं समाप्तम् ।

---

R. No. 5140.

Paper. 10½ × 8¼ inches. Foll. 8. Lines, 19 in a page. Dēvanāgari. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūḍalūr-mana, Tritala, Malabar district.

भाष्यभावप्रकाशिका.

BHĀṢYABHĀVAPRAKĀŚIKĀ.

A commentary on the Brahmasūtrabhāṣya of Śaṅkarācārya: by Citsukha. Vide R. No. 3020 ante for the further portion of this work.

Contains the Adhyāsabhāṣya incomplete.

**Beginning:**

यत्साक्षात्सच्चिदानन्दं प्रत्यगक्रियमद्वयम् ।
तन्नमामि नृसिंहस्य योगगम्यं परं पदम् ॥
ज्योतिर्यद्दक्षिणामूर्तिं व्यासं शङ्करशब्दितम् ।
ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदेडितम् ॥
भगवत्पादपादाब्जपांसवः पान्तु सन्ततम् ।
अपारासारसंसारसागरोत्तारसेतवः ॥
सम्प्रदायविदा मूर्तिरसङ्कल्प्याभिधीयते ।
मुनिना चित्सुखाख्येन भाव(ष्य)भावप्रकाशिका ॥

नानानिबन्धपदलब्धसदर्थमाना
सत्सम्प्रदायपदवीरनुवर्तमाना ।
वाचस्पतेरपि वचांसि विवर्तयन्ती
वागीश्वरीव विदुषां कृतिरिष्टदैषा ॥

स · · मात्मा ब्रह्मेत्यादिवाक्यप्रतिपन्नं जीवब्रह्मणोरेकत्वलक्षणं विषयं ब्रह्मविदाप्नोति परं तरति शोकमात्मविदित्यादिश्रुतिप्रतिपन्नं प्रयोजनं च

प्रथमसूत्रेण शास्त्रारम्भसिद्धयेऽर्थात्सूचयितुं प्रतिपादयितुं तत्प्रत्यनीकस्य बन्धस्याध्यासात्मकत्वं लक्षणसंभावनासद्भावप्रमाणैरिसाधयिषुः प्रथमन्ताव-दध्यासमाक्षिप्य युष्मदस्मदित्यादिना मिथ्येति भवितुं . . . मित्यन्तेन भाष्येणार्थाच्च सुतरामितरेतरभावानुपपत्तिरित्यन्तेन तत्त्वानुस्मरणलक्षणं मङ्गला-चरणं सम्पादयति—युष्मदस्मत्प्रत्ययगोचरयोरिति ।

**End:**

देहव्यतिरिक्तात्मज्ञाने बाधके विद्यमानेऽपि देहात्माध्यासस्यानुवृत्ति-रयुक्तेत्याशङ्क्य . . . . तदपरोक्षाध्यासपूर्वक एव शास्त्रीयोऽपि व्यवहार इत्याह—प्राक्त्विति ।

---

## R. No. 5141.

Paper. 10⅛ × 9½ inches. Foll. 23. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of the Raja of Punnathur, Kottapadi, Malabar district.

कपिञ्जलसंहिता.

KAPIÑJALASAMHITĀ.

Same work as that described under No. 5213 of the D.C.S. MSS., Vol. XI.

Contains the Adhyāyas 20, 19, 26, 27, 29, 30, 31 and 32.

For the beginning see under No. 5213 of the D.C.S. MSS., Vol. XI.

**End:**

इति तन्त्रान् समालोच्य सारमुद्धृत्य काश्यप ।
द्वात्रिंशच्च तथाध्यायं त्वत्सम्बन्धकुतूहलात् ॥
कपिञ्जलमिदं नाम संक्षेपेण यथाक्रमम् ।
मार्कण्डेयप्रसादेन मया प्रोक्तं द्विजोत्तम ॥
नाशिष्याय न भक्ताय नापुत्राय कदाचन ।
न दातव्यमिदं तन्त्रं रक्षणीयं सदा त्वया ॥
वासुदेवमिदं तन्त्रं स्मृत्वा गोप्यं द्विजोत्तम ।

काश्यपः—

कृतार्थोऽस्मि महाभाग कपिञ्जल महामुने ।
वैष्णवं सकलं तन्त्रं त्वत्प्रसादाच्छ्रुतं मया ॥
सर्वविद्यावरश्रेष्ठ सर्ववेदार्थकोविद ।

कपिञ्जल महाप्राज्ञ प्रणतोऽस्मि महामते ।
एवं वै काश्यपः स्तुत्वा प्रणम्य च कपिञ्जलम् ॥
ततस्तस्य द्विजश्रेष्ठः काश्यपो द्विजसत्तमः ।
अञ्जलिं शिरसा कृत्वा आश्रमं प्रति संययौ ॥

**Colophon:**

इति पाञ्चरात्रसंहितायां कपिञ्जलप्रोक्तायां पवित्रारोहणविधिर्नाम द्वात्रिंशोऽध्यायः ।

The scribe adds—

अच्युतेन लिखितमिदम् ।

---

R. No. **5142.**

Paper. 10½ × 9½ inches. Foll. 148. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippad, Kūḍalūr-mana, Tritala, Malabar district.

(a) रामायणव्याख्यानम्—अमृतकतकम्.

RĀMĀYAṆAVYĀKHYĀNAM: AMṚTAKATAKAM.

Same work as that described under No. 1890 of the D.C.S. MSS., Vol. IV, Part I.

Contains the first Sarga of the Bālakāṇḍa.

**Beginning:**

शुक्लाम्बरधरं (. . .) शान्तये ॥
कालहस्तीशमेकाम्रनाथं वेदपुरीश्वरम् ।
स्वमनःप्राणदेहान्तःस्थितांस्त्रीन् ब्रह्मणो भजे ॥
हैरण्यगर्भं यत्तेजः श्रीमजेशावतारितम् ।
चतुर्मुखचतुर्व्यूहं त्रिपदार्थं सदा भजे ॥
अम्बाम्यष्टाक्षरोल्लासत्र्यष्टश्लोकसहस्रकम् ।
महापीठात्मकाण्डं यत् तद्रामायणमाद्रिये ॥

असद्गतव्याकृतिपांसुपङ्किलं रामायणं तीर्थसमुद्धृतामृतम् ।
योगीन्द्रवाणीकतकाद्विपङ्किलं सर्वोपकारक्षममस्तु सर्वदा ॥

भो भो किमिदं रामायणं व्याख्येयम्? उत, न? यदि प्रयोजनं व्याख्येयम्। यदि व्याख्येयं प्रयोजनमप्यैहिकमामुष्मिकं वा स्यात् । न तावत्कृषि-

वाणिज्यासेवादिना धनधान्यादिवदैहिकं किञ्चित्प्रयोजनं रामायणादिपाठात्पश्यामः । नाप्यामुष्मिकं निरयाचितीर्षुः स्वर्गरुरुक्षुर्भवन् मुमुक्षुर्वा रामायणं पठेदिति श्रुतिः स्मृतिर्वास्ति । पारलौकिके चार्थे ते एव प्रमाणम् ।

* * * *

तपस्स्वाध्याय इति । ब्राह्मणान् तत्र श्रूयते तपो हि स्वाध्याय इतीति । स्वाध्यायः प्रायश्चित्ताध्ययनकालादिपरिहारादिनियमोपेततया स्वशाखाध्ययनम् । तस्मिन् निरतं तदभ्यासनिरत इति यावत् । अत्र हि तपश्च स्वाध्यायश्च तपस्स्वाध्यायौ तयोर्निरत इति द्वन्द्वः ।

**End:**

शूद्रो जनो द्विजदासोऽपि तदितरसर्वप्रजाभ्यो महत्त्वं श्रेष्ठत्वमीयात् देहान्तरे स्वोपरिवर्णप्राप्तिलक्षणं महत्त्वमीयात् ।

**Colophon:**

इति श्रीमद्रामायणे अमृतकतकटीकायां बालकाण्डे आद्यस्सर्गः ॥

---

(b) रामायणव्याख्या—विवेकतिलकम्.

RĀMĀYAṆAVYĀKHYĀ: VIVEKATILAKAM.

Foll. 29a—148a.

Same work as that described under R. No. 3499 ante, but with slightly different readings. By Utāla Varadarāja.

Contains from the 2nd Sarga of the Bālakāṇḍa to the end of the 24th Sarga of the Kiṣkindhākāṇḍa.

**Beginning:**

अथ द्वितीये—आपृष्ट्वा आपृच्छ्य । मुहूर्ते गते मुहूर्तेन गते, अपवर्गे तृतीयेति तृतीयार्थे द्वितीया छन्दसि । अकर्दममित्यादि । अत्र तीर्थमिति सजलस्तीर्णावतारप्रदेश उच्यते ॥

**Colophon:**

. . . . . कुलसंभवेन वरदराजेन विरचिते विवेकतिलकनाम्नि श्रीरामायणव्याख्याने श्रीमद्बालकाण्डव्याख्यानं समाप्तम् ।

**End:**

विचित्रवेषाप्सरसः आर्षः सन्धिः समासोवाऽस्तु । यद्वापीत्यादेरर्थात्परतः
आत्मेयमस्येति हि मां नहि त्वं न स्त्रीवचरस्यान्मनुजेन्द्रपुत्र ।
शास्त्रप्रयोगाद्विविधाच्च वेदात्मा ह्यनन्यः पुरुषस्य दाराः ॥

इत्येष पाठक्रमः । अस्य भ्रंशोऽपि विपर्यासश्च लेखकप्रमादकृतः । विहितं विधानं कृतं सुखं दुःखम् ।

**Colophon :**

इति श्रीरामायणव्याख्याने किष्किन्धाकाण्डे चतुर्विंशस्सर्गः ।

---

R. No. **5143.**

Paper. 10½ × 9½ inches. Foll. 19. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of the Zamindar of Chellapalli, Kistna district.

(*a*) लघुस्तोत्रम् , सवृत्ति.

LAGHUSTŌTRAM WITH VṚITTI.

Foll. 1*a*—17*b*.

The Laghustōtra described under No. 9624 of the D.C.S. MSS., Vol. XVIII, with a commentary thereon. The commentator's name is not given.

Complete.

**Beginning :**

केवलाक्षरशुद्ध्यर्थमर्थमात्रप्रतीतये ।
लघुस्तवे मया वृत्तिरुद्धृता ज्ञानतो न तु ॥

अत्र श्लोकः—

इ(ऐ)न्द्रस्येव शरासनस्य दधती मध्येललाटं प्रभां
शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वत ।
एषासौ त्रिपुरा हृदि द्युतिरिवोष्णांशोस्सदाङ्कस्थिता
छिन्द्यादस्सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥

अस्यायमन्वयः । अथाक्षरार्थकथनम्— एषासौ त्रिपुरा त्रिभिः पदैर्वाक्यैर्वलयमाणैरेकारप्रभृतिभिः अथवा पदैः स्थानैः ललाटशिरोहृदयरूपै-स्सहसा झटिति स्वबलेन वा वो युष्माकमघं पापं दारिद्र्यं मरणं वा छिन्द्यात् अपनयेत् । असौ पुरा एषा परा । इदानीं स्थानत्रये ध्यान-त्रयमाह । किं कुर्वन्ती ! मध्येललाटं ललाटस्य मध्ये ; पारे मध्ये षष्ठ्या वेत्यव्ययीभावः । भ्रूमध्ये ऐन्द्रस्येन्द्रसम्बन्धिनः शरासनस्य धनुषः प्रभामिव जगद्वश्यार्थमारक्तरूपं दधती अरुणीं तद्धनुर्धारयन्ती ।

**End :**

त्वदित्यादि । कीदृशेन मया त्वद्भक्त्या मुखरीकृतेन भवदुपास्तौ स्तोत्रकरणे संजायमानं विस्फुरदात्मानि विषये इदं दुर्निवारं लघुत्वं तारस्वतं स्फुरितं प्रतिभासमुल्लासिनं सञ्चिन्त्योरसि कृत्वेत्यर्थः । अपिशब्दो विस्मयार्थे ।

**Colophon :**

इति महाकविराजमकुटमणिना विरचितभारतीस्तोत्रस्य नाम्ना चिह्नितस्य लघुस्तवाभिधानस्य भाष्यं परिसमाप्तम् ॥

---

(*b*) सरस्वतीस्तोत्रम्.
SARASVATĪSTŌTRAM.

Foll. 17*b*—19*b*.

Similar to the work described under No. 11299 of the D.C.S. MSS., Vol. XIX.

Incomplete.

**Beginning :**

ललितपदक्रमरम्या रञ्जितभावा यथैव शैलूषी ।
मम जिह्वारङ्गतले नृत्यतु देवी सरस्वती नित्यम् ॥
अमलकमलाधिवासिनि मनसो वैमल्यदायिनि मनोज्ञे ।
सुन्दरगात्रि सुशीले तव चरणाम्भोरुहं नमामि सदा ॥
अबलात्मजा च दुर्गा कमला त्रिपुरेति भेदिता जगति ।
या सा त्वमेव वाचामीश्वरि सर्वात्मना प्रसीद मम ॥

**End :**

इन्द्राग्निसोमवरुणेशकुबेरवायु-
रक्षोयमाहिपविरिञ्चिदिगीश्वराणाम् ।
उत्तुङ्गमौलिमणिदीपितपद्मपादं
पद्मालयेऽस्तु मम चित्तसुखाय देवि ॥
वक्षःस्थलेन कुचमण्डलमुद्वहन्ती
बाहुद्वयेन कमलद्वयमुद्वहन्ती ।

वक्त्रच्छलेन शशिमण्डलमुद्वहन्ती
मूर्तिर्ममास्तु वरदाभयमुद्वहन्ती ॥
आनीलकेशमतिसुन्दरमायताक्ष-
मालोल . . . . . . . . . . ॥

---

R. No. **5144.**

Paper. 10¾ × 9¼ inches. Foll. 95. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Mōhanarāyaguru, Jalendrakota, Ganjam district.

वैष्णवप्रासादादिप्रतिष्ठाविधिः.
VAIṢṆAVAPRĀSĀDĀDIPRATIṢṬHĀVIDHIḤ.

Foll. 1*a*–95*b*. Fol. 96 is left blank.

A treatise on the ritualistic procedure to be observed in connexion with the construction and consecration of temples, etc., dedicated to the worship of god Viṣṇu: by Mōhanarāyaguru, son of Dāmōdara and Lakṣmī.

The work is also called Siddhāntadīpikā.

Complete.

**Beginning:**

अथ परिभाषा—

मानसोपचारेण यत्र पूजा विधीयते ।

लं पृथिवीतत्त्वात्मने गन्धः । हं आकाशतत्त्वात्मने पुष्पम् । यं वायुतत्त्वात्मने धूपम् । रं अग्नितत्त्वात्मने दीपम् । वं अमृततत्त्वात्मने नैवेद्यम् । समर्पयामीति सर्वत्र योजयेद्विदुषां पते । एवं सर्वत्र मानसोपचारः ।

ओङ्कारः पूर्वके नास्ति नमोऽन्ते नास्ति यत्र हि ।
तन्मन्त्रपूजा देवेषु योजयेद्देशिकोत्तमः ॥
त्यक्तं च यत्नकुर्वीत ज्ञात्वा पूर्वपरादिकम् ।
शातकुम्भेन स्नानं तु सहस्राक्षेण कारयेत् ॥
ब्रह्मघोषेण नेतव्यमिति यत्रास्ति लेखनम् ।
आशुदिशाशानोऽनुवाकैः पठ्यमानैर्नयेत्पुरः ॥
अशक्ते यजमाने तु उपचारं च षोडशम् ।
त्यक्त्वा पञ्चोपचारं तु कृत्वा कर्म समारभेत् ॥

पदानां सुगमज्ञानबोधाय च भिदा भवेत् ।
न कृतः सन्धिरत्रैव दोषो न स्यात्कदाचन ॥

इति परिभाषा ।

* * * *

गोस्वामिनं प्रचुरचम्पकनामधेयं
गोपालभट्टं प्रणिपत्य जीवम् ।
तद्ग्रन्थमालोक्य विलासभान्तं
सुसंमतं तं हरिभक्तिपूर्वम् ।

लिमिचरणनामा यः प्रपितामह उच्यते ।
तत्पुत्रो वत्स आख्यातः पुरोधोऽत्र ततः शृणु ।
बुद्धिमान् सर्वकार्यज्ञस्तत्पुत्रो मोहनाभिधः ॥
काश्यपान्वय एव च दाशशर्माभिधीयते ।
लोकानां हितकामेन प्रतिष्ठां कृष्णतोषिकाम् ॥
सिद्धान्तदीपिकानाम्नीं कुर्वे मुदाधिकाधिकः ।
कदाऽपि मनसाभाव्य विष्णोर्यत्परमं पदम् ॥

अथ वैष्णवप्रासादस्य भूपरीक्षणादिमूर्तिसहितध्वजान्तप्रतिष्ठाविधिः । तत्रादौ पुण्येऽहनि भूमिनिरूपणार्थम्,

आदौ भूमिं परीक्षेत पश्चाद्वास्तुप्रकल्पनम् ।

यथा—अरत्निमात्रे वै गर्तेऽनुलिप्तेऽमृतनामशरावस्थं बलिचतुष्टयं कृत्वा भूपरीक्षार्थं ज्वालयेत् । सर्वदिङ्मुखेषु दीप्तिं भ्रामयित्वा वर्णानामनु पूर्वशस्संज्ञाप्य खातं पूरयेत् । वृषगोकुलानां प्रिया काश्मीरामोदा सुवर्णा ग्राह्या । एवं यथाशास्त्रं भूमिं निरूप्य पुण्ये तिथौ सुनक्षत्रे यजमानानुकूले प्राकारसीमापर्यन्तं भूमिं परिगृह्णीत ।

**End:**

ततोऽच्छिद्रावधारणम् ।

अमुकसगोत्रेण श्रीमतामुकशर्मणा मया मद्यजमानकारिततदमुकमग-वैष्णवप्रासादस्य श्रीभगवद्धरिभक्तिविलासोक्तेन वैराग्यभक्तिप्रदेन विधिना प्रारम्भकपादादिध्वजान्तप्रतिष्ठाकर्मास्माभिर्यत्कृतं तत्फलमस्तु । अत्र यन्न्यूनं

यच्चातिरिक्तं यदन्यथा वा कृतं तत्सर्वं श्रीमन्नन्दतनयराधाप्रसादात् परिपूर्णमस्तु । अच्छिद्रमस्तु । शुभं भवतु । कर्माङ्गदशब्राह्मणभोजनमाचार्यादीनां भोजनं ब्राह्मणभोजनं च ।

**Colophon :**

इति समासेनैव वैष्णवमासादर्पणिष्ठा मोहनरायगुरुनाम्ना विदुषा रचिता ।

पिता दामोदरो यस्य माता लक्ष्मीरिति स्मृता ।
पुत्र(स्त)योर्मोहनश्च शास्त्रसिन्धौ सुपारगः ॥
रचिता तेन विदुषा वैष्णवानां श्रिये पुनः ।
गोलोकलोकनाथस्य प्रीतये इष्टिसातये ॥

---

R. No. **5145.**

Paper. 10½ × 9¼ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Īsvara Vāriyar Avargal, Kavalappara, Malabar district.

गोलदीपिकाविवृतिः.

GŌLADĪPIKĀVIVRTIḤ.

Foll. 1*a*—11*a*. Foll. 11*b* and 12 are left blank.

A gloss on the Gōladīpikā which is a work on Hindu astronomy. The author of the both Gōladīpikā and its gloss is Paramēśvara.

Complete.

**Beginning :**

अविदितगोळस्थितिभिर्मत्विषा तु न सुगम्येति ।
गोलस्य दीपिकाया विलिख्यते विवृतिरपि च मूलकृता ॥

अथ ऊर्ध्वमिति । वंशशलाकादिना निर्मितमिह वृत्तं तया विदध्यादित्यर्थः । चतुराशास्वस्तिकं पूर्वदक्षिणपश्चिमसौम्यपार्श्वेषु स्वस्तिकं यथा भवति तथा निदध्यात् । स्वरसाङ्कं रेखाणां षष्ट्या अङ्कितं घटिकामण्डलं घटिकाज्ञानार्थमङ्कविधिः । स्वरसाम्यङ्किते रेखाणां षष्ट्युत्तरशतत्रयेणाङ्कितमन्यमण्डलद्वयं त्रिंशांशकपरिज्ञानार्थं तयोरङ्कविधिस्तद्वद्रेखाणां षष्ट्युत्तरशतत्रयेणाङ्कितमन्यदपमण्डलाख्यं वृत्तमधऊर्ध्वाभ्यामधऊर्ध्वस्वस्तिकाभ्यामित्यर्थः

**End:**

यद्ययनान्तर्गतार्कात्प्रागेव याम्योत्तरगतिनिवृत्तिस्तदायनचलं धनं स्यात् । अन्यथा ऋणं स्यात् । एतदुक्त्या सिध्यति । अथ स्वाश्रितदेशे तत्काले शककालं च प्रदर्शयन्नुपसंहरति – समरेखाया इति ।

**Colophon:**

इति गोलदीपिकाविवृतिः समाप्ता ।

---

## R. No. 5146.

Paper. 10¼ × 9¼ inches. Foll. 43. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippad, Tritala, Malabar district.

### शिवविलासकाव्यम्.

### ŚIVAVILĀSAKĀVYAM.

A poem in eight Sargas describing story of Śiva: by Dāmōdara, a pupil of Rudranārāyaṇa.

Complete.

**Beginning:**

सलिलशिखिनभस्वत्सम्पदो या नभःश्री-
रिव रचयति लोके सौख्यदुःखप्रमोदान् ।
स्वयमविकृतिरेतैरिन्दुरेखान्तरङ्गै-
रिव तनुभिरनेका साऽवताद्देवता नः ॥

सन्तो नाम बहुश्रुता दधति चेन्निर्मत्सरं शेमुषी
नान्यत्प्रस्तुतदोषभेषजपदे जागर्ति तत्सेवनात् ।
तेभ्योऽयं घटितोऽञ्जलिर्यदनघा हीनाऽपि तैरीडिता
कामं स्याद्गुणगर्हिणी तदपि वाग्बन्ध्या च तद्गर्हिता ॥

स्फुरति मृगयाजाले सिंहाद्यलङ्घ्यतमे पुरः
स्वगुणकलया लूताप्येनत्तनोति यथा तथा ।
अलघु रघुवंशाद्यं पश्यन् विचित्सितकाव्यता-
महमपि दधे मन्दात्माहो विमोहमहात्मता ॥

अपि चापलमिदमुं विजानन्नजिहासुर्यदुपक्रमे तदर्थम् ।
विषयस्य गुणैर्निजं प्रबन्धं सुरभीकर्तुमनास्ततो जनोऽयम् ॥

विषयविहतिविश्लेषात्मनोर्भुक्तिमुक्त्यो-
र्गतिरुभयनिदानं भूतनाथे च भक्तेः ।
चरितमपि च शैवं वर्ण्यतेऽस्मिंस्तदङ्गं
तत इदमिह सास्थाः सन्तु सन्तो विदन्तः ॥
यत्रत्येन जगत्कृता यदुवृषास्सङ्क्षोपयन्त्यात्मनः
सानाथ्यं समराग्रराड्भुवनमास्ते संमताः काह्लैः ।
कृष्णो यत्स्तुतिहेतुरस्ति विदितं तत्केरलेष्वाततं
शैवं धाम सुधाम शैवलपुरं नामाश्रयः श्रेयसाम् ॥

* * * *

तस्मिन्नासीत्त्रिशस्ते त्रिजगति मतिमाञ्छेखरं केरलानां
दिक्चक्रे विक्रमाविष्कृतजयपटहः केरलो नाम राजा ।
यस्यास्त्रैर्भग्नशेषा रणभुवि विमुखाश्शात्रवो मुक्तशस्त्रा-
श्चक्रुः कान्तारकन्दोत्खननसहकरं शस्त्रमेवात्महस्ते ॥

**End:**

अथ शरदुपनत्यां साधु शैवालपुर्या-
स्सपदि नृपतिपुत्री पित्रनुज्ञावशेन ।
अगमदमलमन्यत्क्षेत्रमीशस्य भर्तो
कमितुरुदयपुर्यां ख्यातिमद्धासभूतम् ॥
तस्मिन् विस्मापनश्रीःश्रुतनिधिरवधिः श्रेयसामूर्जितानां
विश्वाधीशेन पत्या किल भवजलधिभ्रान्तधीर्विश्रमाय ।
प्रस्तौत्यध्यात्मविद्यापरिचयमधुना नित्यमुक्ता सती सा
कृत्याकृत्ये नियन्ता क इव चलज्जुषामीश्वरेच्छा गतीनाम् ॥
इति महितपदाब्जे रुद्रनारायणीये
मधुलिह इव वृत्तिं बिभ्रता चातकस्य ।
अलघु शिवविलासो नाम काव्यं बबन्धे
सुरभिभरतगोत्रीयेण दामोदरेण ॥

**Colophon:**

इति शिवविलासे अष्टमस्सर्गः ॥
समाप्तं चेदं शिवविलासकाव्यम् ॥

R. No. **5147.**

Paper. 10¼ × 9¼ inches. Foll. 22. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. K. V. Īśvara Variyar Avargaḷ, Kavalappara, Malabar district.

**धातुपाठकारिका.**

DHĀTUPĀṬHAKĀRIKĀ.

A metrical treatise on verbal roots in Sanskrit. The author, whose name is not given, says that he wrote this work with a view to summarise the portion dealing with the roots found in the Prakriyāsarvasva.

Incomplete.

**Beginning:**

शान्तमपि यत्स्वकीयैः कान्तिझरैर्ध्वान्तमान्तरं हन्ति ।
हन्त मम सिन्धुरास्यं हन्तु महस्तिमिरमन्तरायाख्यम् ॥
अकलङ्ककारुण्यरसावसेकाचिकित्सकीयैरचिकित्स्यमान्ध्यम् ।
लोकस्य या संशमयेद्गिरां तामेकां सवित्रीं जननीमुपासे ॥
यत्प्रत्ययाद्यद्दयितोरुनाम सुप्रत्ययादद्भुतरूपसिद्धम् ।
यस्येह नान्तं मुनयोऽपि जग्मुस्तं शब्दयोनिं सततं भजामः ॥

धूमक्रोडपतिश्शम्भुस्सोमः पुरुवनाधिपः ।
रामश्चन्द्रनदीनाथश्चामोदं प्रदिशन्तु मे ॥
गुरुपादाम्बुजध्यानपरिशोधितमानसः ।
कुरुते धातुपाठस्य कारिकां कोऽपि पण्डितः ॥
प्रक्रियापूर्वसर्वस्वधातुखण्डपयोनिधेः ।
सारमुद्धर्तुकामस्य सहायास्सन्तु मे बुधाः ॥
भ्वादयो लौकिकास्सौत्राः क्रियार्था धातवस्स्मृताः ।
साध्या पूर्वापरीभूतलक्ष्यावयविनी क्रिया ॥
परस्मैपदिनः केचिदात्मनेपदिनः परे ।
तथोभयपदार्हाश्च धातवस्सन्त्यनेकशः ॥

* * * *

भूसत्तायां परस्मैपद्युदात्तस्तेन सेडयम् ।
अकर्मको यथा प्राहुः प्रक्रियाकौमुदीकृतः ॥
सत्तासिद्धिसमृद्धिशान्तिशयनस्थानासने भासने
लज्जाजीवितरोदने च हसनोन्मत्ते प्रलापे क्रुधि ।

सन्तुष्टौ रुचिशोपद्दोषमरणस्पर्धाविहारेषु च
ज्ञातो धातुरकर्मकोभयमदोन्मादप्रमादेषु च ॥

**End :**

ःर्वति चर्व्वति मर्वति मव्वति कर्वति सकम्वतीति तथा ।
खर्वति खम्वति गर्वति गम्वति शर्विखर्विं च शम्वति वा ॥
सर्वति चर्वति चम्वति सर्विर्दुमशपि दन्त्यादिः ॥
णौ शम्व षम्व साम्व च सम्वन्धे दुमशपि सम्वगतौ ॥

---

R. No. **5148.**

Paper. 10¼ × 9¼ inches. Foll. 10. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1925-26 from a MS. of the Raja of Punnattūr, Kottapadi, Malabar district.

प्रतिज्ञायौगन्धरायणव्याख्या.

PRATIJÑĀYAUGANDHARĀYAṆAVYĀKHYĀ.

A commentary on the Pratijñāyaugandharāyaṇa, a drama attributed to Bhāsa, which work has been described under No. 12542 of the D.C.S. MSS., Vol. XXI.

Incomplete.

**Beginning :**

अथ शतानीकस्य सोमवंशप्रदीपस्य कौशाम्बीनगराधिपतेः मृगयावत्यां दारेषु उदयनो नाम तनयोऽभूत् । स पितुरनन्तरं राज्येऽभिषिक्तो यौगन्धरायणवसन्तकविष्णुत्रातरुमण्वकाख्यमन्त्रिसहितो महा पालयन् नागलोकानीतनीलकुवलयाख्यगजासक्तो युगन्धरसूनुभयादुपेत्य गजे नागलोकमेव गते दुःखितो नरपतिः गजग्रहणाय गजवनमतिगच्छन् नर्मदामधिगम्य वेणुवनं गतः ।

* * * *

भो देवउळपीठिआए मम मोदअमल्लअं णिक्खिविअ दाणिवणमासआणि गणिअ वन्धिअ पडिणिवुत्तो दाणि मोदअमल्लअं ण पेक्खामि ।

भो इति प्रमोदे भये चिन्तायां विषादे निरूपणे च वर्तते । अत्र चिन्तायां देवो राजा महासेनः, देवो मानुषरूपेण चरन्ति भुवि पार्थिवा

इति न्यायात् । कुलं निलयवंशयोः । पीठिका स्यादधिष्ठानं पीठिका मालिका स्मृतेति देवकुलपीठिकाशब्देन राजवंशालङ्कारभूता वासवदत्ता ध्वन्यते, प्रकरणादिवशात् ।

**End:**

यौगन्धरायणोऽभिमुखान्निष्क्रम्य स्ववेषसदृशं भाषते । एष राहुः चन्द्रं ग्रसते । विसृज विसृज । न चेत्तवाननं विदार्य मोचयामि । एष कश्चित् कु . . कु . र रक्षिन्ननेन परित्यक्तः अमुमारुह्य च गत्वा चतुष्पथे बलिं भक्षयिष्यन्ते । एके केचन ।

---

R. No. **5149.**

Paper. 10½ × 9¼ inches. Foll. 24. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Paramēśvara Vāriyar Avargal, Kavalappara, Malabar district.

अद्वैतरसमञ्जरी, परिमलव्याख्यासहिता.

ADVAITARASAMAÑJARĪ WITH THE COMMENTARY PARIMALA.

Foll. 1a - 22b. Foll. 23 and 24 are left blank.

Same work as that described under No. 4526 of the D.C.S. MSS., Vol. IX. The work under notice is followed by a commentary called Parimala.

The author Nallāsudhī, who has commented upon his own work, was the son of Bālacandradīkṣita of Kauśikagōtra and was a disciple of Paramaśivēndra and Sadāśivabrahman. The author completes his work Advaitarasamañjarī with an appreciatory stanza in the end, composed by one Vēdāntācārya.

Complete.

**Beginning:**

वन्दे कुञ्जरसारूप्यव्यञ्जकास्यमहं परम् ।
मन्मथारातिसंभूतं मङ्गलैकायनं महः ॥
भुवनाद्भुतानुभावं परमशिवेन्द्राभिधं भजामि गुरुम् ।
यदपाङ्गव्यापारः पुंसां संसारतारको भवति ॥
वेदान्तसूत्रवृत्तिप्रणयनसुव्यक्तपाण्डित्यम् ।
वन्देऽवधूतमार्गप्रवर्तकं श्रीसदाशिवं ब्रह्म ॥

या मया रचिता पद्यैरद्वैतरसमञ्जरी ।
विदुषां प्रीतये तस्या विवृतिः क्रियते मया ॥

प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय प्रचयगमनाय च प्रत्यूहनायकश्रीलम्बोदरानुस्मरणरूपं मङ्गलमाचरन्नेव स्वस्य चिकीर्षितग्रथनोपयोगिशास्त्रार्थप्रतिपत्तिं प्रार्थयते—

अद्वैतमेव परमार्थतया विवेक्तु-
मङ्गीकृतद्विपनराकृतिसन्निवेशः ।
अद्वैतगोचरमशेषविशेषमन्त-
राविष्करोतु वरदो मम विघ्नराजः ॥

अद्वैतं ब्रह्मात्मैक्यमेव परमार्थसत्यं द्वैतं तु नामरूपात्मना प्रतीयमानं जगन्मिथ्येत्येवं विविक्ततया प्रदर्शयितुमङ्गीकृतः अवयवीकृतः द्विपनराकृत्योः गजनराकारयोस्सन्निवेशस्संस्थानविशेषो येन स तथोक्तः । वरद इति साभिप्रायं विशेषणं प्रार्थनार्हत्वं सूचयति । एवंभूतो विघ्नराजः अद्वैतरसानुबन्धिसकलसम्प्रदायरहस्यं मम चित्ते प्रकटीकरोत्विति योजना ।

**End:**

परमानन्दयोगीन्द्रपूज्यपादाभ्यनुज्ञया ।
नल्लासुधीनिबद्धेयमद्वैतरसमञ्जरी ॥

अन्तर्मुखैः श्रीमद्वेदान्ताचार्यचरणैरुक्तं श्लोकमनुग्रहरूपं मत्वा ग्रन्थतो निबध्नाति—

भवरोगस्यौषधमिति पातुं कटूपनिषदमाबमसौ ।
विरचय्यामृतगुटिकां विरचयति नल्लाकविः करे सुधियाम् ॥

यथोदरव्यथादिरोगोपशामकत्वेन प्रतिपदोक्तस्यार्द्रकमरीच्याद्यौषधविशेषस्य प्रकृत्यात्यन्तकटुकत्वेन स्वरूपेणोपयोक्तुमशक्तस्यापि केनचित्पाकविशेषेण रसायनगुटिकाद्यात्मना स्वादुतया निष्पादितस्य तस्यैवाबालवृद्धं सुखोपयोज्यत्वमातन्वन् भिषगखिलाभिनन्द्यो भवति, एवमनाद्यनन्तनिरन्तरदुःखप्रवाहरूपसंसारमहारोगनिबर्हणत्वेन महौषधरूपस्य वेदान्तमुख्यतात्पर्यार्थस्य स्वतोऽतिगहनत्वेन कटुभूतस्याप्यमृतगुटिकात्मकैतद्ग्रन्थसन्दर्भगर्भितत्वेन करतलामलकवद्विस्पष्टतया विभाव्यत्वमापादयन्नेतद्ग्रन्थकर्ता नल्लाकविः कृतकृत्यो भवतीत्यर्थः ।

**Colophon :**

इति श्रीकौशिककुलजलनिधिचन्द्रश्रीबालचन्द्रदीक्षिततनूभवस्य परमहंसपरिव्राजकाचार्यपरमशिवेन्द्रपूज्यपादश्रीसदाशिवब्रह्मपूज्यपादानुग्रहभाजनस्य श्रीनल्लाकवेः कृतिषु सकृत्वाद्वैतरसमञ्जरीव्याख्या परिमलाख्या संपूर्णा ॥

---

### R. No. 5150.

Paper. 10½ × 9¼ inches. Foll. 30. Lines, 29 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of Śrīmān Raja Erlagadda Aṅkinīḍu Prasāda Bahadūr, Zamindar, Challapalli, Kistna district.

त्रिपुरसुन्दरीस्तोत्रम्, सव्याख्यानम्.

TRIPURASUNDARĪSTŌTRAM WITH COMMENTARY.

Foll. 1*a* – 30*a*. Fol. 30*b* is left blank.

The text is the same as that described under No. 10758 of the D.C.S. MSS., Vol. XIX. The commentary is by Nityananda, disciple of Vidyānandanātha. It is stated that the sage Durvāsas, the author of the text, is also called Krōdhabhaṭṭāraka.

Complete.

**Beginning :**

श्रीमद्विद्यानन्दनाथाङ्घ्रियुग्मं स्मृत्वा स्वान्तध्वान्तभानुप्रभावम् ।
सर्वोत्कृष्टं क्रोधभट्टारकोक्तं स्तोत्रं श्रीमत्सुन्दरीश्रीमहिम्नः ॥
पूर्वं कैश्चिद्व्याकृतं नेति भीतो गूढार्थत्वादल्पबुद्धिस्तथाऽपि ।
शिष्टैरिष्टैरीरितोऽहं गुरूक्त्या नित्यानन्दो (भक्ति)तो व्याकरोमि ॥
न शब्दशास्त्रनिष्णाता न न्यायनिपुणा मतिः ।
केवलं गुरुपादाब्जस्मृतिरत्र गतिप्रदा ॥
त्रैलोक्यवन्द्यं गिरिजाभिनन्द्यं विज्ञानगम्यं वरदं वरेण्यम् ।
विघ्नौघभङ्गाद्भुतकार्यसिद्ध्यै विघ्नेश्वरं विश्वगुरुं नमामि ॥
कुलारविन्दादकुलारविन्दं गत्वामृतौघैरनुसिच्यमानाम् ।
रसारविन्दानि निजारविन्दं पुनः प्रयातां प्रभजे परेशीम् ॥

इह खलु सकलागमाचार्यचक्रवर्ती शिव एवाम्बयागर्भसंभूतः क्रोधभट्टारकाख्यः दुर्वासा महामुनिः श्रीमहात्रिपुरसुन्दर्यास्तानुभावं महिम्नस्तोत्रं चिकीर्षुरादौ कूटत्रयभावनारूपं मङ्गलमाचरति — श्रीमातरिति ।

श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकीमहा-
सौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलम् ।
उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः
स्वान्ते मे स्फुरतु त्रिलोकनिलयं ज्योतिर्मयं वाङ्मयम् ॥

हे मातः ते वपुः मे स्वान्ते स्फुरतु । कथंभूतं वपुः ? त्रिलोकीसौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलम् । पुनः कीदृशम् ? उद्यद्भानुसहस्रनूतनजपापुष्पप्रभम् । पुनस्त्रिलोकनिलयज्योतिर्मयं वाङ्मयं चेत्यन्वयः। श्रीमातः हे श्रीजननि त्रिपुरे त्रितयमात्रस्वरूपे परात्परतरे सूक्ष्मात्सूक्ष्मतरे देवि दिव्यक्रीडारसपरे । त्रिलोकी त्रयाणां लोकानां समाहारस्तस्याः महासौन्दर्यमेवार्णवस्तन्मथनोद्भवायाः सुधायाः प्राचुर्यस्य वर्णः अत्युज्ज्वलन्तद्दित्यनेन वाग्भवकूटदेवताभावना प्रतिपादिता ।

**End:**

सदसदनुग्रहनिग्रहगृहीतमुनिविग्रहो भगवान् ।
सर्वासामुपनिषदां दूर्वासा जयति देशिकः प्रथमः ॥

सतामसतां चानुग्रहनिग्रहार्थं गृहीतो मुनिविग्रहो येन भगवान् महानुभावः सर्वासां चतुर्वेदोक्तानामुपनिषत्तत्त्वनिरूपकाणां जयति सर्वोत्कर्षेण विहरति । देशिकः प्रथमः आदिमाचार्यः ।

इति त्रिपुरश्रीमहिम्नः गुरूक्त्या यथाद्य कृतं प्रीतये सिद्धये न सतां साधकानां सुसिद्धेः सुधीरैश्चिरं लोकनीयं हृदा ।

---

R. No. **5151.**

Paper. 10⅜ × 9¼ inches. Foll. 8. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Tippan Nambūdirippad, Ponnurkottamana, Perumbavur, Travancore State.

(*a*) गोलसारः.
GŌLASĀRAḤ.

Foll. 1*a*—3*b*.

A small metrical treatise on astronomy specially dealing with the earth and other planets: by Kērala Nīlakaṇṭha (Gārgya).

Contains one to three Paricchēdas.

**Beginning:**

समघनवृत्ता भूमिस्स्वयैव शक्त्या धृता मृदादिमयी ।
ज्योतिर्गोलकमध्ये बिभर्ति विश्वं समन्ततो वस्तु ॥
द्रव्याणि गुरूणि यतः पतन्ति भूमौ समन्ततो नभसः ।
अध एव सर्वतो भूस्तस्मात्प्रतियोगिनी दिगूर्ध्वाख्या ॥
कतिपययोजनपरिमितमतस्समन्ताद्विहायसि विहाय ।
भ्रमति ह्यूर्ध्वं वायुः प्रवहाख्यो भ्रामयन् विहगान् ॥
तत्र भ्रमन्ति यत्र क्रमेण दृश्यानि भानि सर्वाणि ।
पार्श्वस्थे . वतारे निरक्षसंज्ञो भुवि प्रदेशस्सः ॥
घटिकामण्डलमाहुस्तत्र यदध ऊर्ध्वगं भ्रमद्वृत्तम् ।
अभितोऽपि च तद्भ्रमतां भवन्ति नाना ध्रुवा धुवृत्तानि ॥

• • • •

**Colophon:**

इति गार्ग्यकेरलनीलकण्ठविरचिते गोलसारे प्रथमः परिच्छेदः ।

**End:**

बहुकारणगतिकत्वात्तदेव नियता ग्रहा भगोलगताः ।
कतमेन चिदेवैषां ज्ञेयः कालस्तु तद्गतिः कालात् ॥
इत्यन्योन्याश्रयताप्यसकृत्क्रियया निराक्रियते ।
समसमयत्वात् प्रवहभ्रमणस्यानेन ते परिच्छेद्याः ॥
घटिकापक्रममण्डलयोगश्चलतीह पूर्वपश्चिमयोः ।
रवितमसोस्सूत्रेणोद्गच्छति चन्द्रोच्चतो भगोलोऽपि ॥

**Colophon:**

इति तृतीयः परिच्छेदः ॥

---

(6) सिद्धान्तदर्पणः.

SIDDHĀNTADARPAṆAḤ.

Foll 36—5a.

Similar to the above. By Kērala Nīlakaṇṭha (Gārgya).

Complete.

**Beginning :**

श्रीमद्दामोदरं नत्वा भगवन्तं रविं तथा ।
तत्प्रसादान्मया लब्धं ज्योतिश्चरितमुच्यते ॥
कोटिघ्नरदवेदाः प्राकल्पे सूर्यस्य पर्ययाः ।
भूदन्तरदवेषु नखाम . . विधोः क्षितेः ॥
खरेषु गोगुणाष्टाश्वाम्य . . . दृशरेन्दव ॥

* * * *

रवेः षष्टिगुणो भावि मत्यगीरयति ध्रुवः ।
भगोलमध्यवृत्तार्धे वायुगोलस्य मध्यतः ॥
अपक्रान्ते चतुर्विंशत्यंशैस्सौम्येतरागयोः ।
भांशिश्चलति तद्योगः प्राक्प्रतीच्योः पृथक् पृथक् ॥

**End :**

खहग्गोलगतिक्षेपबिम्बैर्देयं ग्रहादिकम् ।
तन्मध्यभुक्तिसाम्ये स्याद्रासकिर्भिन्नमार्गयोः ॥
विंशत्यानुष्टुभां स्पष्टं कृतं शास्त्रमिहाखिलम् ।
दशभिर्न्यायमार्गश्च संक्षेपादेव दर्शितः ॥

The scribe adds—

गार्ग्यकेरलसद्ग्रामनीलकण्ठेन निर्मितम् ।
सिद्धान्तदर्पणं शास्त्रमलिखच्चन्द्रशेखरः ॥
इष्टज्ययोश्च तत्कोट्योर्भेदवर्गैक्यतः पृथक् ।
द्विज्याघ्नाद्व्यंशवर्गाढ्यान्मूलं चावान्तरं भवेत् ॥

---

(c) गणितग्रन्थः.

GAṆITAGRANTHAḤ.

Foll. 5b—8a.
Similar to the above on astronomy.
Complete.

**Beginning :**

मदीयहृदयाकाशे चिदानन्दमयो गुरुः ।
उदेतु सततं सम्यगज्ञानतिमिरारुणः ॥

व्रातोनात्स्वमृदुस्फुटाद्भुजगणः क्षिप्ताग्न्यया ताडितः
क्षेपोऽन्त्यश्रुतिताडितस्तुहिनगोर्लिप्तिस्त्रिबाहतः ।
विक्षेपो वसनाहनः पदहृतो विक्षेपकोट्या हते
त्रिज्याते महज्यापमधनमृणं दिक्साम्यभेदे स्फुटः ॥

**End:**

द्वे तिस्रोऽर्धचतस्रः कलाश्चतस्रो दशाधिके द्वे च ।
स्फुटमानकला गुणिता व्यासार्धेन स्वकर्णहृताः ॥

अस्यार्थः । कुजस्य द्वे कले मध्यमबिम्बकलामानम् । बुधस्य तिस्रः कलाः । गुरोस्सार्धास्तिस्रः । शुक्रस्य चतस्रः कलाः । शनेः द्वे कले । दश विकलाश्च हि ता व्यासार्धहतास्स्वचतुर्थकर्णहृताद्भौमादीनां स्फुटबिम्बकलामात्मनि स्युः ।

---

R. No. **5152.**

Paper. 10½ × 9¼ inches. Foll. 140. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Trivikraman Nambūdirippād, Thennamangalam-mana, Valankad, Malabar district.

**अनुष्ठानपद्धतिः.**

**ANUṢṬHĀNAPADDHATIḤ.**

Foll. 1*a*—139*b*. Foll. 139*b*—140 are left blank.

On the worship of the images of various gods.

Complete.

**Beginning:**

विष्णुं शिवं शङ्करं नारायणं दुर्गां सुब्रह्मण्यं गणपतिं शास्तारं च पृथक् पृथक् नमस्कृत्य तेषां मन्त्रबिम्बे पूजां प्रासादशुद्ध्यादिकं कलशप्रकारमुत्सवं च लिखामि—

स्नात्वा पादौ प्रक्षाल्याचम्य प्रासादस्य द्वारि द्वास्थौ संवन्द्य, अन्तः प्रविश्य, देवस्य दक्षिणे उपविश्य, शिवादिश्रीगुरुभ्यो नमः, गं गणपतये नमः, गुं गुरुभ्यो नमः, गं गणपतये नमः इति मूर्धादिस्थानेषु संवन्द्य, स्वास्त्रेण करयोः तलपृष्ठपार्श्वेषु व्याप्य, तालत्रयदिग्बन्धनाग्निप्राकारान् विधाय, नाड्या वायुं विमुच्य, अमिति षड्वारमुक्त्वाऽऽपूर्य, द्वादशवारमुक्त्वा परिकुम्भ्य वायुमिडया विमुञ्चेत् ।

* * * * *

अथ प्रासादशुद्धिर्लिख्यते—

गुरुः स्नात्वाचम्य प्रासादस्याग्रभागे दक्षिणे उपविश्य, देहशुद्धिं शङ्खपूरणमात्माराधनं च कृत्वा, स्वस्तिके गणपतेः पीठं संपूज्य, बीजमन्त्रेणावाह्य, सकलीकृत्य संपूज्य, कदलीपक्वादिकं प्रभूतं संपाद्य निवेद्य, प्रसन्नपूजां विधाय, प्रसाद्य कर्मणो निर्विघ्नतां प्रार्थयेत् ।

**End :**

तत्र स्नानकाले पूर्वोक्तैः कलशैर्देवमभिषिच्य, देवं संपूज्य श्रीभूतबलिं कुर्यात् । अथ परस्मिन्नहनि वा शुद्धजलपूर्णकलशैः द्रव्यकलशैर्वा देवं संस्नाप्य संपूज्य श्रीभूतबलिं कुर्यात् । अथवा पूर्वोक्तप्रकारेण द्रव्यकलशैः देवमभिषिच्य संपूज्य श्रीभूतबलिं कुर्यात् ।

**Colophon :**

इत्यनुष्ठानपद्धतिः ।

---

R. No. 5153.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 210. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of the Raja of Punnattūr, Kottapadi, Malabar district.

**शैवागमनिबन्धनम्.**

**ŚAIVĀGAMANIBANDHANAM.**

Foll. 1*a*—210*a*. Fol. 210*b* is left blank.

A digest of Śaiva-Āgamas dealing with details connected with the worship of Śiva: by Murāribhaṭṭa.

Complete in the following 27 Paṭalas :—

१. अर्चनापटलः.
२. मन्त्रपटलः.
३. मन्त्रसाधनपटलः.
४. अग्निकार्यपटलः.
५. मुद्रापटलः.
६. आचार्यपूजापटलः.
७. दीक्षापटलः.
८. अध्वपटलः.
९. अभिषेकपटलः.
१०. मण्डलपटलः.
११. यागभूमिलक्षणविधिपटलः.
१२. वास्तुयागपटलः.
१३. प्रासादपटलः.
१४. लिङ्गपटलः.

१५. प्रतिमाविधिपटलः.
१६. लक्षणोद्धारणपटलः.
१७. मङ्गलाङ्कुरविधिपटलः.
१८. लिङ्गशुद्धिविधिपटलः.
१९. अधिवासपटलः.
२०. प्रतिष्ठाविधिपटलः.
२१. अङ्गप्रतिष्ठापटलः.
२२. जीर्णोद्धारपटलः.
२३. प्रायश्चित्तपटलः.
२४. उत्सवपटलः.
२५. तीर्थस्नानपटलः.
२६ स्नपनपटलः
२७. सहस्रकलशविधिपटलः.

**Beginning:**

नमस्कृत्य शिवं देवं देहिनां हितसाधनम् ।
शिवागमेषु यत्प्रोक्तं तन्त्रसारं वदाम्यहम् ॥
प्रयोगं मन्त्रसिद्धिं च मुदा दीक्षाभिषेचनम् ।
मण्डलानि च शैवानि प्रतिष्ठां जीर्णसंस्कृतिम् ॥
स्नपनानि च सर्वाणि शैवतत्त्वोक्तिपूर्वकम् ।
क्रियान्तरैश्च सर्वैश्च संहतानि समासतः ॥
साधकानां हितार्थाय तन्त्रानालोच्य सर्वतः ।
प्रवदामि ततः प्रातं स्नानमेवादितः क्रमात् ॥
सकृजप्तेन चास्त्रेण मृदमादाय बुद्धिमान् ।
मलस्नानं पुरा कृत्वा सकृजप्त्वा तु संहिताम् ॥
तामेव मृत्तिकां पूर्वमभिमन्त्र्य सकृत्सकृत् ।
भागत्रयं ततः कृत्वा पूर्वमस्त्रेण चालभेत् ॥
द्वितीयं ब्रह्मभिश्चैव शिवजप्तं तृतीयकम् ।
अस्त्रजप्तेन चानेन दिशाबन्धं तु कारयेत् ॥

* * * * *

एवं यः पूजयेन्नित्यं देवदेवं महेश्वरम् ।
भक्तो दृढव्रतश्शुद्धो भुक्तिमुक्तिमवाप्नुयात् ॥

**Colophon:**

इति शैवागमनिबन्धने अर्चनापटलः प्रथमः ॥

**End:**

विधेशैस्सप्तदशकान् सैरज्ञान्योमिति त्वचः ।
अघोरास्त्रेण शुद्धाम्भो हृदयेन नलाष्टिकम् ॥

अष्टकाभ्छिवगायत्र्या साविन्यान्यान्यथाक्रमम् ।
पूजयित्वार्चयित्वा च जयशब्दादिमङ्गलैः ॥
स्नापयेच्छिवकुम्भं च सर्वमन्त्रसमन्वितम् ।
व्योमव्यापिमनुस्मृत्य पूजयेच्च हृदा क्रमात् ॥
गन्धादिवस्त्रभूषाभिर्नैवेद्यैश्च विशेषतः ।
पुण्याहजयशब्दैश्च सर्वमङ्गलसंयुतम् ॥
दक्षिणान्नाद्यभूयिष्टं बलिदानैश्च पुष्कलैः ।
कर्तव्यं स्नपनं भक्त्या शिवस्यैवं फलार्थिभिः ॥

**Colophon :**

इति मुरारिभट्टीये शैवागमनिबन्धने सहस्रकलशाविधिपटलस्सप्तविंशः ॥

---

R. No. **5154.**

Paper. 10½ × 9½ inches. Foll. 70. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippād, Nareri, Tritala, Malabar district.

(*a*) प्रयोगविवेकसंग्रहः.

PRAYŌGAVIVĒKASAMGRAHAḤ.

Foll. 1*a*—20*b*.

Same work as that described under No. 1504 of the D.C.S. MSS., Vol. III; with different readings in the end. By Vararuci.

Complete.

**End :**

कटं कुर्वन्, पवमानः । विच् तृन् क्विप् करप् ल्युणिनि अच् उकारः । उङ् सूं किदा । पत्रमलङ्करिष्णुर्देवदत्तः । अलङ्करणशीलः अलङ्करणधर्मः । अलङ्करोति । अलं कृञित्यादिनिष्णुच् । शत्रोर्निराकरिष्णुः । कर्तृकर्मणोः कृतीति षष्ठी ।

**Colophon :**

इति कारकसंग्रहविवरणं समाप्तम् ।

---

(*b*) पर्यायपदावलिः.

PARYĀYAPADĀVALIḤ.

Fol. 21*a*.

Similar to the work described under No. 1733 of the D.C.S. MSS., Vol. III. By Vasudêva.

Breaks off in the ninth Paricchêda.

**Beginning:**

नमश्शिवाय कन्दर्पदर्पहारिदृगग्नये ।
गिरीन्द्रतनयायत्तमानसायेन्दुमौलये ॥
गोविन्दं गोपगोपीनां नन्दनं नन्दनन्दनम् ।
वृन्दारकमुनिव्रातैर्वन्द्यं वन्दामहे वयम् ॥
पूजितं विघ्नभेदेन शिवेनापि पुरद्विषा ।
सर्वसम्पत्करं देवं नमामि गणनायकम् ॥
प्रणम्य विदुषस्सर्वान् पदानां धातुजन्मनाम् ।
उच्यते वासुदेवेन पर्यायाणां पदावलिः ॥
प्रसिद्धानप्रसिद्धांश्च वैदिकान् लौकिकान् ब्रुवे ।
लट्प्रत्ययान्तान् पर्यायान् केवलांश्चोपसर्गजान् ॥
प्रत्याहारांश्च सूत्राणि प्रक्रियां बहुविस्तराम् ।
मुक्त्वा प्रयस्यतेऽस्माभिः पर्यायपदसंग्रहे ॥
विभक्त्यन्ताः पदाख्यास्स्युश्शब्दास्तेऽपि पुनर्द्विधा ।
सुबन्ताश्च तिङन्ताश्च सुबन्तास्तत्र षड्विधाः ॥

* * * *

**Colophon:**

इति वासुदेवविरचितायां पर्यायपदावल्यां प्रथमः परिच्छेदः ।

**End:**

अध्वरोगेषु सर्वेषु यावच्छीघ्रतमोऽथवा ।
गवां कृष्णातिकल्याणी गोषु कृष्णा गुणान्विता ॥
इति सप्त विभक्त्यर्थाः क्रमेणात्र प्रदर्शिताः ।
षड्विधेषु सुबन्तेषु ज्ञेय एषां प्रविस्तरः ॥

**Colophon:**

इति वासुदेवविरचितायां पर्यायपदावल्यामष्टमः परिच्छेदः ।

प्रकृतिप्रत्ययार्थश्च ज्ञेयस्सर्वपदेष्वपि ।
प्रकृतिः पूर्वभागस्स्यादन्त्यंशः प्रत्ययो मतः ॥

* * * *

कृत्प्रत्ययो कामदुघस्तथैव च पयोदुघः ।
अप्रत्ययान्तोऽपि विस्तरः प्रकरो भावः किः ॥ ?

---

(c) स्वरपरिभाषा.
SVAPARIBHAṢĀ.

Foll. 30*a*—42*a*.

Deals with the accents of words. Some of Pāṇini's Sūtras are explained herein.

Incomplete.

**Beginning:**

अथ स्वराः—

लोकवेदविभागेन स्वरसूत्रेषु वर्णनात् ।
लोकेऽपि स्युरुदात्ताद्यास्तया द्वयां प्रयोगतः ॥
छान्दसे खण्ड उच्यन्ते स्वरास्सर्वेऽपि तत्र तु ।
संज्ञायाः पूर्वमुक्तत्वात्परिभाषादि कथ्यते ॥

॥ अनुदात्तं पदमेकवर्जम् ॥

एकं वर्जयित्वा पदमनुदात्तं स्यात् ।

धातोरन्त उदात्तस्स्यादित्युक्ते स एवोदात्तः । अन्येऽनुदात्ताः । गोपायनश्च सुमनस्यमानाः । अन्येऽनुदात्ताः । गोपायतश्च सुमनस्यमानाः । अत्र सनाद्यन्ता धातव इति धातुसंज्ञायां आ . . स्यान्त उदात्ते सत्यन्ये अनुदात्ताः ।

**End:**

इराकविष्णुः । विष्णुर्चोपिमहान् । अनाद्यं विष्णुः चारु अविलिरिवर-स्तन्द्रालुः । शक्तोऽप्येवमाकुश्यते संज्ञायाम् । आक्रोशः ।

---

(d) धातुरत्नावळी.
DHATURATNĀVALI

Foll. 42*b*—69*b*. Fol. 70 is left blank.

A small metrical work dealing with the formation of verbs in Sanskrit. The author mentions two persons Nārāyaṇārya and Mātṛdattārya as his teachers.

Complete.

**Beginning :**

श्रीनारायणमिश्रश्रीगुरुचरणारविन्दयुगलमहम् ।
निःशेषविबुधपटलीशेखरितं शश्वदाश्रये मनसा ॥
वृकोदगद्यैरुदितेष्वनेकदिगाश्रिता ये खलु धातुसङ्घाः ।
गुरूक्तितस्तानखिलाननुग्राह्यारोपितप्रायमथ प्रथामः ॥
पदमपीह नितां णिचामप्येकं द्वे वा यथार्हमितरेषाम् ।
कथमपि लुगादेर्लोविल्याद्यप्यनुसरन् परं दैवम् ॥
भूसत्तायाननादिषु भवति विवाचनविमिश्रणावन्तात् ।
चौ भावयतीत्यथ यौ प्राप्तौ तङि भावयेत भवते भवति ॥

विवाचनं विवक्षीकरणम् ।

वेदे जनिस्तनयोरभिगाद्यं ञौ
गत्यामगात शपि शब्दगतस्य गायेत् ।
ज्यानौ जिनाति नियमोपनयव्रतादे-
शेषु ज्ययेत तङि शप्ययमादिमश्चि ॥

**End :**

क्षान्तौ शपि सहेत स्यात्तुसौ च श्यनि सह्यति ।
क्षान्तावेव सहेत् साहयेत साहयति प्रयम् ॥
पौषादिकस्तिहभीत्यर्थे ष्णिहोदसौ रुषादिरपि ।
चौ स्नेहने ष्णिहे द्वौ स्नेहयते स्नेहयदिति ॥

इति हलन्ताः ॥

इति श्रीमातृदत्तार्यकरुणाबलशालिना ।
बालेन रचिता सेयं धातुरत्नावली जयेत् ॥
शोधनाक्षमतमेन केनचित् बालकेन कुतुकाद्विगुम्फिताम् ।
धातुरत्नमहितावलीं बुधाः शोधयन्तु मतिशाणशीलनैः ॥
हंहो सुधीनिवह देशिकवाग्महाब्धि-
कल्पद्रुमादधिगतां गुरुदेवतुष्ट्या ।

भूयस्सुवृत्तिललितां समरूपधातु-
रत्नावलीं कलय कण्ठतटीलुठन्तीम् ॥
वस्तूनां यस्स्वसंज्ञायाः प्रवृत्तौ कारणं स्मृतः
स्वतलाद्यर्थबोध्यश्च प्रभाव इति सोदितः ॥

**Colophon:**

इति धातुरत्नावली समाप्ता ।

---

R. No. 5155.

Paper. 10¼ × 9¼ inches. Foll. 12. Lines, 20 in a page. Grantha Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Gōdavarma Raja of Chalur, Trichur.

मृन्नाथस्तोत्रम्.
MṚNNĀTHASTŌTRAM.

Foll. 1a—11a. Foll. 11b—12b are left blank.

In praise of god Mṛnnātha, a form of Viṣṇu, worshipped in a village in Malabar district.

Complete.

**Beginning:**

श्रीमत्समेतमृदधीश हर मुरारे
पादाम्बुजं विजयते परमाद्भुतं ते ।
यस्मिन् जना दृढतरात्मनि सन्धनेन
मुक्तिं प्रयान्ति सुनिरस्तसमस्तबन्धाः ॥
रूपाणि ते बहुविधानि विभो भवन्ती-
त्याहुः परापरविदो मुनयश्शुकाद्याः ।
तेष्वेकमप्यलमबोधहनाशयाना-
मस्मादृशां नयनयोरयनं न याति ॥

**End:**

ईदृग्विधा तव विभो तनुरैहिकस्य
पारत्रिकस्य च सुखस्य नृणां विधात्री ।
चेतः स्थितिं मम विधाय विधूय दुःखा-
न्यानन्दभारमधिकं विदधातु नित्यम् ॥

स्तोत्रं मया कृतमिदं प्रतिवासरं ये
सङ्कीर्तयन्ति कलयन्ति च कर्णयोर्ये ।
तेषां समेतमृदधीश भवत्प्रसादा-
देषां च सर्वमभिकाङ्क्षितमस्तु सिद्धम् ॥

**Colophon:**

श्रीगुरुमूर्त्त्यायस्तवरत्नमालाः ।

---

R. No. **5156.**

Paper. 10¼ × 9¼ inches. Foll. 48. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippaḍ, Kūḍalūr-mana, Nareri, Tritala, Malabar district.

(*a*) प्राकृतप्रकाशः

PRĀKṚTAPRAKĀŚAḤ.

Foll. 1*a*—4*b*.

Same work as that described under No. 1550 of the D.C.S. MSS., Vol. III. By Vararuci.

Wants a small portion in the beginning; otherwise complete.

---

(*b*) प्राकृतप्रकाशः, उदाहरणसहितः

PRĀKṚTAPRAKĀŚAḤ WITH UDĀHARAṆA.

Foll. 4*b*—48*b*.

Same work as the above and with Udāharaṇas. Kṛṣṇalīlāśuka explains herein the Sūtras of Vararuci, adds his own stanzas as examples and calls these stanzas as a single work 'Gōvindābhiṣēka" in eight chapters. This Gōvindābhiṣēka is the same as Śrīcihnakāvya described under R. No. 4156 ante.

Complete in eight Paricchēdas.

**Beginning:**

सिरिगणवइणोणमो ॥

समिद्धिस्सअळजअगा संसकाउ तेह्लोक्कप्पहववहू सुसङ्कसे ।
संनादविह्लसमिद्धिपुण्णपुण्णे रूढं तं पउरकलंकमुद्धरन्तोवि ॥

(छा) —

समृद्धं सर्वजगतां शब्दस्कन्दं त्रैलोक्यप्रभवप्रभुः शशाङ्कवंशे ।
संजातो विपुलसमृद्धिपुण्यपूर्णे रूढं तं प्रचुरकलङ्कमुद्धरन् ॥

* * * *

आदेरत इत्यधिकारसूत्रम् । अनेकाकारादिभूतस्याकारस्य ।

आसमृद्ध्यादिषु वा ॥

समृद्ध्यादिशब्देष्वादेरत आकारो विकल्पेन । अत्रोदाहृता समृद्ध्यादयः समृद्धिसदृक्षप्रसुप्तप्रसिद्धिप्रकटमनस्विन्यभिजातिप्रतिपत्प्रतिस्पर्धिशब्दाः ॥

यथा—

ईसपक्कफलवायअवे महावेडिसे विअणपल्लवे वणे ।
असिविण्णो अपावइङ्गळअ मिळसिद मुइंगिओ ॥

* * * *

**Colophon:**

इअ सिरिकण्हळीळासुअविरइए गोइंदाहिसेए पाइडकव्वे सिरिइंचे सरकज्जविळअणाम पढमो सग्गो ।

**End:**

हश्च सौ ॥

अदसो दकारस्य सौ परतो हत्वं त्रिष्वपि ।

पदस्य ॥

अधिकारसूत्रम् । चकारात् सचरतश्च ।

तुज्झे तुम्हे जाति ॥

यष्मत्पदस्य ।

वो च शति ॥

चकारात् तुज्झे तुम्हे च भवतः ।

इतएतुम्हेतुमएहि ॥

द्वयोरपि परतो युष्मदस्मदोः चत्वार एते स्युः ।

शेषं संस्कृतात् ॥

शेषं कृत्तद्धितसमासादि संस्कृताद्गम्यते ।

**Colophon:**

इअ गोअंदाहिसे सिरीकण्हळीळासअमुणिवरइए पाइडकव्वे सिरिदे णिवाइकज्जविळासिअं णाम अट्ठमो सग्गो ॥

## R. No. 5157.

Paper. $10\frac{1}{2} \times 9\frac{1}{4}$ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M R Ry. Śrīdharan Nambūdirippād, Kaladi-mana, Kottapadi, Malabar district.

यक्षिणीकल्पः.

YAKṢIṆĪKALPAḤ.

Foll. 1a—11b. Fol. 12 is left blank.

Similar to the work described under No. 8033 of the D.C.S. MSS., Vol XV.

Complete in eight Paṭalas as given below :—

१. सुरसुन्दरीसाधनविधिः.
२. मनोहारिणीसाधनविधिः.
३. कनकवतीसाधनविधिः.
४. कामेश्वरीविधिः.
५. रतिप्रियासाधनविधिः
६. पद्मिनीसाधनविधिः.
७. नटीदेवीसाधनविधिः.
८. अनुरागिणीसाधनविधिः.

**Beginning:**

अथा(तो)भीष्टफलदा भैरव्याः परिचारिकाः ।
यक्षिण्यो . . . वक्षोजा वक्ष्ये तासां प्रसाधनम् ॥
तारं मान्तं समुद्धृत्य चतुर्वर्गं . . . द्विजम् ।
अन्त्यान्त्यमाद्यश्चारूढं रान्ते सुन्दरिसंयुतम् ॥
ऊर्ध्वरे वह्निदयिता मनुरेकादशाक्षरम् ।
ओमागच्छ सुरसुन्दरि स्वाहा इति मन्त्रः ।"
भार्गवो मुनिरुद्दिष्टश्छन्दोऽनुष्टुप् प्रकीर्तितः ।
सुरसुन्दरी देवतेति कथिता यक्षिणी मनोः ॥

* * * *

**End:**

अर्थस्य कारणं साक्षाद्देवता गुरुयोगिनः ।
प्राप्तं प्रसादयच्चापि दर्शनं परवस्तुनः ॥
विश्वक्रमातुर्मन्त्राणां विनियोगं फलान्तरम् ।
एवं रहस्यमत्यन्तं कथितं मङ्गलाय नः ॥

**Colophon :**

इत्यष्टमहायक्षिणीकल्पे अनुरागिणीसाधनविधिर्नामाष्टमः पटलः ।
इति यक्षिणीकल्पस्समाप्तः ।

---

R. No. **5158.**

Paper. 10½ × 9½ inches. Foll. 52. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of the Raja of Punnattūr, Kottapadi, Malabar district.

(a) कालदीपः.

KĀLADĪPAḤ.

Foll. 1a—10b.

Similar to the work described under R. No. 969(a) ante. By Vāsudēva.

Complete.

**Beginning :**

वन्देऽम्बुजप्रभाक्षं माभूम्यां चारुतरं युतम् ।
लसन्नागे शुचौ सक्तमम्लानं क्षरवर्जितम् ॥
शु . . . . . . . . . . . . . . . . . ।
. . . . . . . . . . . . . . . . . . . ॥
. . . . . . . . . . . . . . . .
. . . . . विफलमपि कर्मैहिकफलम् ।
नृणां संस्कारादिष्वपरमनवेक्ष्योभयविधि
फले कालो यच्छेदिति निगदिताः कालविषयः ॥
विधीन् बहुविधानेतान् सन्धे . . . . . . ।
. . . . . . . . . . . . . . . . . . ॥
. . गते सहस्रांशौ दीपेनापि हि गम्यते ।
नक्षत्रतिथिवाराद्यास्तद्योगाश्च शुभाशुभाः ॥
कर्तृजन्मर्क्षसम्बन्धान्मासादिविषयश्च ये ।
दोषापवादा दोषाश्च जीवमौढ्योदयस्तथा ॥
विष्कम्भाद्या व्यतीपातो वैधृतिर्मद्दवेधिताः ।
अप्रकाशग्रहा दृष्टा धूमाद्या रश्मयस्तथा ॥

अर्काद्यधिष्ठितर्क्षेभ्यो ये दोषाः कण्टकादयः ।
षडशीतिमुखं शूलं शून्यान्यर्धोदयश्च ये ॥
चन्द्रकर्मोदयश्चापि प्रवक्ष्यन्ते समासतः ।
देशान्तरेषु योज्या ये योगस्तद्विद्भिरीरिताः ॥

**End:**

. . . दे प्रतिष्ठादि प्रश्नेष्वस्मिन् शुभे शुभे ।
मृगमीनौ विहङ्गाख्यौ आली कर्किंतरीसृपौ ॥
चापाच्च गोस . . . . . . . . . . . ।

मिथुनकुम्भास्तु न राशयः ।
पापाः शुष्का ग्रहास्सौम्या जलदा इति कीर्तिताः ।
अजा गोचापवातिष्वृनेष्वादौ नागां . . . ॥
. . . . . मीनेषु वराहान्त्यं विनाशदम् ।

**Colophon:**

इति शास्त्रं पुष्टज्ञानभानोर्मन्दचित्तागोचरत्वात् वासुदेवस्वामिनैव निर्मितोऽयं कालदीपः ॥

---

(b) कालदीपः, सव्याख्यः.

KALADIPAH WITH COMMENTARY.

Foll. 11*a* - 51*a*. Foll. 51*b*—52 are left blank.

Same work as the above and with a commentary by Śyāmalavāraṇarāja.

Breaks off in the fourth Khaṇḍa.

**Beginning:**

कौ(मोदकीनन्दक)शङ्खचक्रशार्ङ्गाभिरामं शतपत्रनेत्रम् ।
श्रीवत्सवक्षः शरणं महस्स्याज्ज्योतिर्जगत्पालनजागरूकम् ॥
सत्पात्रस्नेहदशादत्तोत्सा . . . . . . . . . . र्थः ।
श्यामलवारणराजस्स्फुटमुन्मीलयति कालदीपमिदम् ॥

अथ निःश्रेयसावाप्तिनिदानभूतस्याम्नायस्य—
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ . . . ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

शीक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ इति ।

ज्योतिषं चक्षुरिति वचनात् ।

मुखमर्धं शरीरस्य सर्वं वा मुखमुच्यते ।
तत्रापि नासिका श्रेष्ठा श्रेष्ठे तत्रापि चक्षुषी ॥

इत्यङ्गान्तरेभ्यश्च चक्षुषः श्रैष्ठ्यकीर्तनात् ।

शरदि राजन्यं वसन्ते ब्राह्मणोऽग्नि . . मुपनयीत, मासं प्रदोषे नाधीयीत ।

* * * *

त्रिवारो मुहूर्तसङ्क्रान्श्च करणं यो दिने दिने ।
जानाति कालपञ्चाङ्गं पापं तस्य न विद्यते ॥

इति पापनिर्हरणोपायत्वाच्च कालविधानसंग्रहमारिप्सुः ग्रन्थकार स्वांशतिथिवारा इत्यत्र तिथेर्वारस्ततोऽप्यृक्षमित्यत्रर्क्षस्याभिहितत्वं प्रदर्शयिष्यन् प्रथममेव तदवगमोपायं सूचयन्नभिमतदैवतमरविन्दलोचनमभिवन्दते—

वन्देऽम्बुजप्रभाक्षं माभूभ्यां चारुतरं युतम् ।
लसच्छाङ्गशुचौ सकमम्लानं क्षरवर्जितम् ॥ इति ।

अस्यार्थः । अम्बुजाक्षत्वात् लक्ष्मीभूमिसहितत्वाच्च चारुतरं शुभ्रोज्वलशेषभोगशालिनमखिलभुवनरक्षणधुरीणत्वे सत्यप्यविनाभूतश्रममक्षयं वन्द इति ।

* * * *

दिनं गणं च माहेन्द्रं स्त्रीदीर्घं योनिमेव च ।
राशिराश्यधिपो वश्यो रज्जुवेधस्तु ते दश ॥

अत्र दिनं तु जन्मादिजन्मसं . . . . ति ।

* * * *

**Colophon:**

इति श्यामलवारणस्य कृतौ कालदीपविवरणे प्रथमः खण्डः ।

**End:**

**Colophon:**

इति श्यामलवारणस्य कृतौ कालदीपस्य विवरणे तृतीयः खण्डस्समाप्तः ।

देवतास्थापनं वर्ज्यं गुर्वदृष्टे घटे रवौ ।

कुम्भस्थितेऽर्के गुरुनिरीक्षणरहिते सति देवतास्थापनं वर्जयेत् । गुरुनिरीक्षणे सति कुर्यादित्येव ॥

* * * *

अत्र मृगेत्यमाह मृगशीर्षं पौष्णाश्विन्यं रेवतीहस्ते रवौ शशधरे च मृगो . . . . . . . . . . . . . . . . राधाः पुष्यौ गुरौ भृगुसुतेऽपि च । पौष्णाश्विन्यं रोहिण्यन्तयार्कतनयेऽमृतसिद्धयोगाः । नन्दाशुभे ।

---

R. No. 5159.

Paper. 10½ × 9½ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of Śrīmān Rāja Erlagadda Ankinīdu Prasād Bahadūr, Zamindar, Challapalli.

शक्तिमीमांसा, सव्याख्या.

ŚAKTIMĪMĀṀSĀ WITH COMMENTARY.

Similar to the work described under R. No. 778 ante. By Gauḍapādamuni. The commentary was written by Vāsudēvaparabrahmapaṇḍita, son of Jānakī and Advaitabrahmapaṇḍita. The commentator says that he wrote this commentary when he was 27 years old. He adds that he wrote two other works, one was a poem written in his 22nd year and the other was Vyavahāradarpaṇa written when he was 24 years old. This work was written in the year Pramathin, corresponding to Kali year 4955.

Complete.

**Beginning:**

तिस्रः श्रीसवनारूढास्तिस्रस्त्रिगुणसंभवाः ।
उभयत्र स्थिता या सा देवता श्रेयसेऽस्तु नः ॥
श्रीदेवतास्वरूपात्कौण्डिन्यसगोत्रवर्धमन्वयिकात् ।
अद्वैतब्रह्मबुधाज्जानक्यामजनि यस्सोऽयम् ॥
वासुदेवपरब्रह्मा श्रीविद्योपासकाग्रणीः ।
व्याख्यातुं शक्तिमीमांसां प्रेरितः परमात्मना ॥
गौडपादमुनिनाथभाषितं सूत्रभूम्गुरुभावगर्भितम् ।
शास्त्रमेतदवलोक्य हृष्यतां भोगमोक्षयुगलं करे स्थितम् ॥

दीक्षितैर्महर्षिभिः पृष्टस्सकलपुरुषार्थसाधनं शक्तिमीमांसां भगवान् गौडपादः सूत्ररूपेणोवाच । तत्रारम्भसूत्रम्—

अथ शाक्तमन्त्रागमजिज्ञासा ॥ इति ।

अथशब्दो मङ्गलार्थः । यथा—अथ शब्दानुशासनम्, अथ योगानुशासनम्, अथातो दीक्षां व्याख्यास्याम इत्यादौ । उक्तं च—

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥ इति ॥

अथशब्दस्य तन्त्रान्तरेणार्थान्तरमपि वक्तव्यम् । तथाहि—सर्वेषु दर्शनेषु निगुह्येयं विद्येति तत्र मतिमान् दीक्षेत । तदिति दीक्षास्तिस्रः, शाक्ती शाम्भवी मान्त्री चेति । तत्र शाक्ती शक्तिप्रवेशनाच्छाम्भवी चरणविन्यासान्मान्त्री मन्त्रोपदिष्टा । सर्वाश्च कुर्यादिति परशुरामसूत्रेण या दीक्षा विहिता तत्संस्कृतत्वसिद्ध्यनन्तरमित्यर्थः । नान्यत्र संस्कृतो भृग्वङ्गिरसोऽधीयीतेति हरदत्तमिश्रधृतप्रमाणेन ह्वैतीयीकोपनयनरहितस्याथर्वणमन्त्रपठनाधिकाराभावबोधनादस्य शक्तिमीमांसाशास्त्रस्य मन्त्रमयत्वाच्च ।

**End :**

आरम्भाधिकरणमेकसूत्रात्मकमाविर्भावाधिकरणं पञ्चदशसूत्रात्मकमुपासनाधिकरणं सूत्रद्वयात्मकम् । फलाधिकरणमेकसूत्रात्मकम् । मन्त्राधिकरणं द्वात्रिंशत्सूत्रात्मकम् । चक्राधिकरणमष्टपञ्चाशत्सूत्रात्मकम् । षडधिकरणानि । सूत्राणि नवाधिकशतसङ्ख्याकानि शक्तिमीमांसा षडधिकरणात्मिकेति ।

महता गौडपादेन परशक्तिस्वरूपिणा ।
कृतैषा शक्तिमीमांसा सकलश्रुतिसंमता ॥
व्याख्यातैषा मयाऽद्वैतब्रह्मपण्डितिनादरात् ।
जानकेयेन विदुषा शतघण्टावधानिना ॥
षट्चत्वारिंशता न्यूनपञ्चसाहस्रसंमिते ।
कलिवर्षगणे याते प्रमाद्यब्दे कृते हि सा ॥
शतवेधिर्णाधरमनोहरकवितां व्यधिकविंशवर्षे यः ।
अवदत् बृन्दावन्यां स्वग्रामे कारुमूरौ च ॥

येन चतुर्विंशाब्दे रचितं व्यवहारदर्पणं विमलम् ।
तेन कृतेयं व्याख्या सप्ताधिकविंशवत्सरे कविना ।
वासुदेवपरब्रह्मविद्वत्कविविनिर्मिता ।
व्याख्येयं परमात्मेव सर्वलोकेषु पूज्यताम् ॥

**Colophon:**

इति श्रीजानकीजानेरद्वैतब्रह्मपण्डितेन्द्रस्यात्मजेन शतघण्टावधानकृता वासुदेवपरब्रह्मपण्डितेन विरचिता शक्तिमीमांसाव्याख्या संपूर्णा ।

---

## R. No. 5160.

Paper. 10¾ × 9½ inches. Foll. 43. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Īśvara Vāriyar Avargal, Kavalappara, via Shoranur, Malabar district.

### लीलावतीव्याख्या.
### LĪLĀVATĪVYĀKHYĀ.

Foll. 1a—42b. Fol. 43 is left blank.

Slightly different from the work described under R. No. 338 ante. By Paramēśvara, pupil of Rudra.

Complete.

**Beginning:**

लक्ष्मीभूविलसत्पार्श्वः सहस्रादित्यसंनिभः ।
ज्ञानमूर्तिरनाद्यन्तो हरिरिष्टं ददातु नः ॥
प्रणमामि गणेशानं पार्वत्या अङ्कसंस्थितम् ।
वागीश्वरीमपि तथा श्रीरुद्रं च कृपानिधिम् ॥
नीलायाः सागरस्यापि तीरस्थः परमेश्वरः ।
व्याख्यानमस्मै बालाय लीलावत्याः करोम्यहम् ॥

तत्र तावदाचार्यः इष्टदेवतास्तुतिपूर्वं चिकीर्षितमाह—प्रीतिमिति ।

**End:**

जातिर्गुणो गुणना वर्गश्च जातिगुणवर्गाः । अथवा योषिज्जातेर्गुणसमूहो जातिगुणवर्गः ॥

श्रीमद्रुद्रस्य शिष्येण लीलावत्याः कृता मया ।
परमेश्वरनाम्नैवं व्याख्यानं हरये नमः ॥

---

R No. **5161.**

Paper. 10¾ × 9¼ inches. Foll. 24. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Paramēśvara Vāriyar Avargal, Kavalappara, Malabar district.

निधिप्रदीपिका.

NIDHIPRADĪPIKĀ.

Foll. 1*a*—24*a*. Fol. 24*b* is left blank.

Explains how to find out hidden treasure and the characteristics of the persons who may be taken as assistants in that work. By Śrīkaṇṭha.

Contains the Paricchēdas two to four.

**Beginning :**

नमः फालेक्षणोद्यद्विज्वालाजटिलमौलये ।
त्रिपुरान्तगदध्वंसपण्डिताय पिनाकिने ॥
करङ्किणीमतं तन्त्रं सिद्धशाबरतन्त्रतः ।

अथ निधिकर्मणि सहाया वक्ष्यन्ते—

सर्वसत्त्वहितारशान्ता मदमात्सर्यवर्जिताः ।
प्रलम्बबाहवो गौरा निर्भया डम्भवर्जिताः ॥
मानिनः पद्मपत्राक्षाः कीर्तिमन्तोऽतिसात्विकाः ।
धार्मिकाश्शीलसम्पन्नाः कुलीना विभवान्विताः ॥
शूद्रा अपि सदाचारा मद्यमांसविवर्जिताः ।
सहायाः शोभना एते कथ्यन्ते मुनिनोदिताः ॥

* * * *

निधिस्थानानि कथ्यन्ते शम्भुप्रोक्तानि कानिचित् ।
जीर्णोद्यानतटाकेषु चण्डिकायतनेषु च ॥
श्मशानतीर्थसीमायां सिद्धस्थानेषु मण्टपे ।
तोरणे हस्तिशालायां वक्ररेखायुधाश्रये ॥

निषादानां गृहे पर्णशालायां शबरालये ।
व्याधानां च गृहे चैव ब्राह्मणानां तथालये ॥

* * * *

**Colophon:**

इति परमशैवागमाचार्यश्रीकण्ठविरचिते चतुरशीतिसिद्धशाबरमहारत्नसारोद्धृते वर्त्यञ्जननिषेकविधिर्नाम द्वितीयः परिच्छेदः ।

**End:**

खन्यमाने निधौ सर्वा निस्सरन्ति भयातुराः ॥
अवधेन विना तेभ्यो भयं स्यान्मन्त्रिणामपि ।
तस्मादौषधलेपेन पादलेपेन तान् जयेत् ॥
अर्कस्य करवीरस्य पनसस्य तु मूलिका ।
पिष्ट्वा पादप्रलेपेन दूरे गच्छन्ति पन्नगाः ॥

**Colophon:**

इति निध्यञ्जनप्रकारः ।

---

## R. No. 5162.

Paper. 10¼ × 9½ inches. Foll. 92. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Bhāgīrathi Tripāṭhi, Lalasasanam, Aska, Ganjam district.

मन्त्रकल्पतरुः.

MANTRAKALPATARUḤ.

Foll. 1*a*—92*a*. Fol. 92*b* is left blank.

Similar to the work described under R. No. 3283 ante. The work under notice is said to have been based on the essence of what is stated in सम्मोहनतन्त्र, भुवनाधिपतन्त्र, सर्वागमतन्त्र, प्रपञ्चसार, शक्तिसारसमुच्चय, शारदातिलक, etc.

By the son of Kapilēndra.

Contains the Bhuvanēśvarīpallava complete in 18 Stabakas.

**Beginning:**

पीताम्बरं करविराजितशङ्खचक्र-
कौमोदकीसरसिजं सरसीरुहस्यम् ।

विश्वम्भराम्बुधिसुतापरिरभ्यमाणं
नारायणं प्रणतकल्पतरुं भजामः ॥

यस्याः प्रभावमहिमा जलनिधिमुखमाशु नाभिदध्रे मे ।
विदधे वैरिव्यूहं विनिवार्यार्यां नमामि तां देवीम् ॥

यस्याः प्रभावमहिमा स्वचक्ररिपुमण्डलं भित्त्वा ।
साम्राज्यश्रियमचिरात्स्वसदृशे मामवालम्बयद्धर्षे ॥
स्वीयैरमात्यवर्गैर्भिन्नं विनिपात्य वैरिसङ्घातम् ।
सत्वसदाये समरे जयश्रियं मामवापयच्चाशु ॥
अन्तःपुराणि पुत्रं जतुगृहमध्ये निवेश्य संग्रामे ।
दीपितमतारयन्मामपरिक्षतमाशु तामहं वन्दे ॥
लक्षमशीतिसहस्राधिकमश्वानां च वारणव्यूहम् ।
अगणितपत्तिसमूहं देवलनृपतेर्बलं बलाद्धित्वा ॥
रत्नाश्वहेमवारणविचित्रवस्त्राण्यनेकयानानि ।
यस्याः प्रभावमहिमा कृष्णातीरे मम प्रादात् ॥
यस्याः प्रसादमहिमा प्रीतिप्रवणाच्च पञ्चगौडेन्द्रात् ।
चतुरङ्गयानरत्नं समुपाजहार स्फुरद्रत्नम् ॥
सचराचरस्य जगतो मूलप्रकृतिं पराम्बिकामाद्याम् ।
हरिहरविरिञ्चिदिनकरसुधाकराद्यैरुपास्यमानाङ्घ्रिम् ॥

* * * *

कपिलेन्द्रनन्दनोऽहं तदनुग्रहमात्रलब्धसाम्राज्यः ।
स्वयमनुभूय तदीयं माहात्म्यं शास्त्रतो विदित्वापि ॥
तस्या भक्तिविशेषं संवर्धयितुं च सर्वलोकानाम् ।
पूजादिकर्मसारं नित्यं नैमित्तिकं काम्यम् ॥
कलुषकुलं क्षालयितुं नत्या शिरसो मुखस्य संस्तुत्या ।
संपुटकरणात्करयोः पदयोः प्रत्युद्गमाद देव्याः ॥
कायस्य व्रतकृत्यै भावनया चेतसो न चिरात् ।
पूजादिकर्मयुक्तां पद्धतिमेतां करिष्यामि ॥
बहुविधमागमनिकरं विलोक्य बुद्ध्या परामृश्य ।
तद्भूरिभक्तिभावितचेतास्सारं समासतो वक्ष्ये ॥

मन्त्रोद्धारोत्पत्तिः प्रथमं माहात्म्यं मन्त्रवर्गस्य ।
मन्त्रोद्धारविभेदो न्यासविशेषोऽस्य मन्त्रस्य ॥
सर्षिच्छन्दोऽङ्गानि प्रतिमाया लक्षणं तदनु ।
मूर्तिविभेदात्तस्मात् साङ्गं दिव्यं पुरश्चरणम् ॥
अग्नेस्संस्कृतिरन्तर्यागात्तस्माद्बहिर्यागः ।
मुद्रातद्योगफलं कन्याभक्तिश्शिवार्चनं तस्मात् ॥
दीक्षाविधानकर्मस्वप्नपरीक्षाभिषेकश्च ।
कुण्डानि मण्टपोऽस्मान्मण्डलभेदस्तथा चक्रम् ॥
गुलिकाकर्म धरायाः साधनविधानमथ मर्दनं चैव ।
आदर्शसिद्धिविद्या करवालस्यापि साधनं तदनु ॥
वज्रस्याथ कपालस्योपायो नु कामस्य कर्माणि ।
मन्त्रविशेषविधानं तदनुचितस्य प्रयोगास्स्युः ॥
वश्याकर्षणविद्वेषणकर्मस्तम्भनाख्यं च ।
उच्चाटनमोहनके मारणकं द्रव्यपरिमाणम् ॥
तद्विनियोगविशेषो यक्षिण्यास्साधकं चैव ।
नित्यार्चनाभिधानं निर्वाणं चैव वक्ष्यतेऽत्र मया ॥
संमोहनाख्यतन्त्राद्भुवनाधिपनामकल्पाच्च ।
सर्वागमसाराख्यात्प्रपञ्चसारान्निबन्धाच्च ॥
शक्त्यास्सारसमुच्चयसंज्ञकाच्च शारदातिलकात् ।
उद्धृत्य सारभागं कथयिष्याम्यत्र संग्रहे क्रमशः ॥
कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
नानासत्त्वसमाकीर्णे नानादेवसमाकुले ॥
प्रणम्य विधिवद्देवं देवी वचनमब्रवीत् ॥

* * * *

लक्ष्मीबीजं प्रवक्ष्यामि सर्वसिद्धिकरं परम् ।
दक्षिणं कुण्डलं चैव मूर्धानं च समुद्धरेत् ॥
वामभ्रुवं तथोद्धृत्य वामपादं तथोद्धरेत् ।
बिन्दुनादसमायुक्तं मन्त्रमेतद्वरानने ।
लक्ष्मीबीजमिदं प्रोक्तं त्रिदशैरपि दुर्लभम् ॥

* * * *

**Colophon:**

इति श्रीमन्त्रकल्पतरौ शक्तिशाखायां भुवनेश्वरीपल्लवे प्रथमस्तबकः ।

**End:**

एतान् देवांश्च संपूज्य गन्धपुष्पादिभिः क्रमात् ।
धूपदीपादिकं दत्त्वा नैवेद्यं परिकल्पयेत् ॥
पूर्ववत्पूजयेद्देव्याः कोणद्वयसमन्विते ।
तथैवाचमनीयं तु दद्याच्चैव यथाविधि ॥
ताम्बूलादीन्यपि तथा यथाशक्त्या जपेन्मनुम् ।
स्तोत्रं जप्त्वा तथा ध्यात्वा दण्डवत्प्रणिपत्य च ॥
निवेदयित्वा चात्मानं मूलमन्त्रेण दापयेत् ।
ततो दक्षिणभागे च स्वगुरुं पूजयेद्बुधः ॥
नमस्कृत्य ततोऽनुज्ञां प्राप्य चात्मनि रोपयेत् ।
य एवं पूजयेन्नित्यं महतीं सिद्धिमाप्नुयात् ॥

**Colophon:**

इति श्रीमन्त्रकल्पतरौ शक्तिशाखायां भुवनेश्वरीपल्लवे अष्टादशस्तबकः ।

---

R. No. **5163.**

Paper. 10¾ × 9¼ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Palayattu Valiya Accan, Chennamangalam, Parur, Travancore State.

मदनकेतुचरितम्.

MADANAKĒTUCARITAM.

Foll. 1a—22b. Foll. 23 and 24 are left blank.

A small drama of the Prahasana kind dealing with the story of Madanakētu and Śṛṅgāramañjarī: by Rāmapāṇivāda of Maṅgalagrāma. Complete.

**Beginning:**

नाहं ते कुचकुम्भयोर्विरचये कस्तूरिकापत्रकं
किं यत्नेन यदाशु भस्मरजसा भूयोऽपि संदूष्यते ।

एवंवादिनि शैलराजदुहितुस्सासूयमालिङ्गने
सव्रीडं शशिशेखरे निपतितो नेत्राङ्कुरः पातु वः ॥

नान्द्यन्ते सूत्रधारः—

योगिनि वा भोगिनि वा रागिणि वा वित्तदे विरागिणि वा ।
साधारणप्रवृत्तिर्विदग्धगणिकाजनो जयति ॥

परिक्रम्य, नेपथ्याभिमुखमवलोक्य, कोऽत्र भोः ?

प्रविश्य पारिपार्श्वकः—आज्ञापयतु भावः ।

सू—मारिष, अपि शृणोषि मङ्गलग्रामवास्तव्येन रामपाणिवादेन विरचितं मदनकेतुचरितं नाम प्रहसनमस्मद्वशे वर्तत इति ।

पारि—भाव, अथ किम् ।

सू—तदद्य रङ्गनाथस्य भगवतो यात्राप्रसङ्गेन सङ्गतायामस्यां परिषदि प्रयुञ्जाना विज्ञानप्रपञ्चस्य पदवीमारोढुमभिलषामः । कुतः ।

मुक्ताजालैर्ललितघटितः प्रोल्लसन्नायकश्री-
स्तन्वङ्गीनां विलसतितरामङ्ग एवाङ्गहारः ।
अस्माकं तु प्रकृतिगहनैर्मुष्टिमुद्रापताका-
मुख्यैरङ्गैरुपचितवपू रङ्ग एवाङ्गहारः ॥

* * * *

अये सिंहलेश्वरस्य मदनकेतोर्देव्याश्शृङ्गारमञ्जर्याश्चेटी जयन्तिका इत एवागच्छति ।

प्रविश्य चेटी—जेदु भअवंतो ।

भिक्षुः—भद्रे जयन्तिके कुतस्तावदागम्यते ।

* * * *

(ततः प्रविशति राजा देवी विभवतश्च परिवारः) ।

सर्वे आसनोपवेशं रूपयन्ति ।

राजा—प्रिये शृङ्गारमञ्जरि,

राजानो मौलिमालाघटितकरपुटास्संभृतोपायनार्घा-
स्सार्थीभूय प्रपन्नाः प्रतिदिनमिह नः पादपीठे लुठन्ति ।
त्वं च त्रैलोक्यरत्नं हृदय रतिपते वर्तसे जागरूका
मन्ये पूर्वेऽपि सर्वे मम नयविभवैर्निह्नुता भूमिपालाः ॥

**End :**

तथापादमस्तु भरतवाक्यम्—

भूदेवाश्चतुरोऽपि चञ्चलधियामात्तश्रमानाश्रमा-
नश्रान्तं परिपालयन्तु विगिलत्संसारदुःखच्छिदः ।
राजानश्च महीमहीनविभवा रक्षन्तु लक्ष्मीपति-
क्रोडाधीशविशालदन्तशिखरक्रीडारसज्ञामिमाम् ॥

इति परिक्रम्य निष्क्रान्तास्सर्वे ।

**Colophon :**

इति मदनकेतुचरितं नाम प्रहसनमेकाङ्कं समाप्तम् ।

प्रहसनलक्षणलेशैरस्पृष्टं चेत्प्रहसनाभिधां लभताम् ।
नो चेत्पुनरन्यदिदं विनोदनं पाणिवादस्य ॥

---

R. No. **5164.**

Paper. 10½ × 9½ inches. Foll. 54. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Paramēśvara Vāriyar Avargal, Karakkāṭṭu Amsam, Kavalappara, Malabar district.

Fol. 54 is left blank.

विद्यामाधवीयम्.

VIDYĀMĀDHAVĪYAM.

Same work as that described under No. 13593 of the D.C.S. MSS., Vol. XXIV, wherein see for the beginning. By Vidyāmādhava. This work is also printed recently in the Mysore Sanskrit Series.

Complete.

**End :**

द्वादशजन्माष्टमगाः पुंसां दिननाथजीवशनिभौमाः ।
अर्थक्षयं विनाशं रोगाञ्जनयन्ति मरणभीतिं वा ॥

इत्थं समस्तजगतामशुभं शुभं च
सञ्जायते हि निखिलग्रहचारशक्त्या ।
पूजास्तुतिप्रणतिभिर्मुदिता ग्रहास्ते
कुर्वन्त्यनिष्टगतयोऽपि जनस्य लक्ष्मीम् ॥

गोकर्णाद्दक्षिणस्यां ककुभि परिमिते योजनानां चतुष्के
श्रीमान् श्रीकण्ठगुप्तो जयति गुणवतीसंज्ञितो ग्रामवर्यः ।

तस्मिन्नस्ति प्रभूतं युतमखिलगुणैरद्वितीयं द्वितीयं
स्थानं नीलालयाख्यं द्विजकुलपतिना वामदेवेन लब्धम् ॥

तत्र स्थाने तस्मिन् वसिष्ठगोत्रे महामुनिश्रेष्ठौ ।
जगति सुदर्शनतीर्थौ रत्नगिरिश्चेति (विश्रु)तौ जातौ ॥

ततस्तयोर्भ्रातृतनूजपुत्रो बभूव नारायणपूज्यपादः ।
निषेदतुर्यत्र विमुक्तवैरे चिराय लक्ष्मीश्च सरस्वती च ॥

संग्रामतो दक्षिणतस्समीपे पयोनिधे रोधसि मल्लिसंज्ञम् ।
निवेशयामास समृद्धियुक्तं स्वदेशमीशाहतभागधेयम् ॥

तस्यात्मजोऽभूद्भुवनप्रतीतो विद्यान्वितो माधवपण्डितेन्द्रः ।
महेश्वरं यो गुणवत्यधीशमुपास्य विद्यामखिलामवाप्नोत् ॥

वेदव्याकरणास्पदं कविमहाराजस्सतर्कस्मृति-
च्छन्दोलक्षणकाव्यनाटककलाविज्ञानसम्पन्निधिः ।
ज्योतिश्शास्त्रविदग्धमानिजनतादुर्गर्वसर्वङ्कषो
विद्यामाधवपण्डितो रचितवान् इदं मुहूर्तागमम् ॥

संज्ञाद्वयो दूषणलक्षणाख्यो दोषापवादो गुणलक्षणश्च ।
बलावबोधोऽथ निषेचनादि द्वितीयजन्माध्ययनादिकं च ॥
करग्रहो वास्तुनिवेशनादि परस्तु कुप्यामधिवासशंसी ।
देवप्रतिष्ठाय नृपाभिषेको यात्राविधानं प्रविकीर्णकामाः ॥

तारादिलक्षणाख्यः पुष्यग्रहरोचनादिफलसंज्ञाः ।
इति पञ्चदशाध्यायाः परिमितपद्याः क्रमेणोक्ताः ॥

इत्थं पञ्चदशाध्यायनिबद्धं जयति क्षितौ ।
मुहूर्तदर्शनं विद्यामाधवीयाह्वयं चिरम् ॥

* * * *

एतद्विद्यामाधवीयाभिधानं ज्योतिःशास्त्रं ये पठन्तीह मर्त्याः ।
विप्रास्तेषामीश्वरांशा ग्रहास्ते कुर्वन्त्वायुर्वित्तविज्ञानसौख्यम् ॥

वदन् प्रसूनं ग्रहचारशास्त्रं क्रमाख्यमाचार्यसमुद्भवं च ।
अध्याय एष त्रिगुणाष्टसङ्ख्यैः श्लोकैः कृतः पञ्चदशोऽत्र पूर्णः ॥

**Colophon:**

इति विद्यामाधवीये ज्योतिश्शास्त्रे पञ्चमोऽध्यायस्संपूर्णः ।

---

## R. No. 5165.

Paper. 10½ × 9½ inches. Foll. 80. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS of M.R.Ry. Bhāgīrathi Tripāṭhi, Lalasasanam, Aska, Ganjam district.

### पुरश्चरणदीपिका.
### PURAŚCARAṆADĪPIKĀ.

Explains how to perform Puraścaraṇas or the preliminary ceremonies to be observed before the commencement of the repetition of Mantras in general. By Candraśēkhara.

Complete in five Prakāśas.

**Beginning:**

इन्दीवरदलश्यामं पुण्डरीकनिभेक्षणम् ।
गोपीनां हृदयानन्दं तं वन्दे यदुनन्दनम् ॥
श्रीचन्द्रशेखरो विप्रस्सम्प्रदायक्रमान्वितः ।
ज्ञानाद्गुरुमतं ज्ञात्वा सद्गुरूणां मतं शुभम् ॥
सर्वमन्त्रानुसारेण मन्त्रिणां हितकाम्यया ।
तनोति सर्वमन्त्राणां पुरश्चरणदीपिकाम् ॥

अथ पुरश्चरणलक्षणम्—यथा मन्त्रयन्ति(न्त्र)प्रकाशे—

धर्मार्थकाममोक्षेषु शास्त्रमार्गेणयोजनम् ।
सिद्धि मन्त्रस्य च प्रोक्तं विनियोगादिलक्षणैः ॥
पुरश्चरणपूर्वो हि विनियोगो मनोर्मतः ।
स्मरणात्पूर्वमेवासौ पुरश्चरणसिद्धये ॥
पुरश्चरणकर्ता या पूर्वसेवा विधीयते ।
सैव स्यात्सर्वमन्त्राणां विनियोगोऽस्य संमतः ॥

वायवीयसंहितायाम्—

साधनं मूलमन्त्रस्य पुरश्चरणमुच्यते ।
पुरतश्चरणीयत्वाद्विनियोगोऽन्यकर्मणाम् ॥
पुरतो विनियोगत्वाच्चरणीयं तथोदितम् ॥

* * * *

**Colophon:**

इति पुरश्चरणदीपिकायां प्रथमः प्रकाशः ।

**End:**

जीवन्मुक्तो भवेन्मन्त्री सत्यं सत्यं मयोदितम् ॥
यत्र वा कुत्रचिद्देशे गन्तुं कामयते नरः ।
स्वर्गे वा भूतले मन्त्री पाताले वापि कौतुकात् ॥
तत्क्षणात्तत्रयात्येव सर्वसिद्धीश्वरो भवेत् ।
इत्येवं कथितं सम्यङ्मन्त्रसिद्धेस्तु लक्षणम् ॥
तदुपायं तदा ब्रह्मन् केवलं तव भक्तितः ।
अनेकमन्त्रसंयुक्तमनेकमुनिनिर्मितम् ॥
अतीव परितोषतो(त)स्त्वरितसिद्धिसन्दायिनी
मनीषितमनोः क्रमात् क्रमणिका मनोहारिणी ।
सदैव जगतीतले भवतु मामकीया पुनः
पुरश्चरणदीपिका सकलसाधकानां मुदे ॥

**Colophon:**

इति पुरश्चरणदीपिकायां पञ्चमः प्रकाशः ।

---

R. No. **5166.**

Paper. 10¼ × 9½ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Paramēśvara Vāriyar Avargaḷ, Karakkāṭṭu Amsam, Kavalappara, Malabar district.

Fol. 12*b* is left blank.

जलमानुषादितन्त्रम्.
JALAMĀNUṢĀDITANTRAM.

A collection of Tantras on the preparation of medicines.

Contains the following Tantras:—

| | |
|---|---|
| १. जलमानुषतन्त्रम्. | १५. गोधातन्त्रम्. |
| २. गजतन्त्रम्. | १६. कृष्णशुकतन्त्रम्. |
| ३. अश्वतन्त्रम्. | १७. वानरतन्त्रम्. |
| ४. खरतन्त्रम्. | १८. कृष्णमार्जारतन्त्रम्. |
| ५. उष्ट्रतन्त्रम्. | १९. गन्धमार्जारतन्त्रम्. |
| ६. अतन्त्रम्. | २०. नकुलीतन्त्रम्. |
| ७. महिषतन्त्रम्. | २१. ज्वरकारणम्. |
| ८. शार्दूलतन्त्रम्. | २२. मण्डूकतन्त्रम्. |
| ९. भल्लूकतन्त्रम्. | २३. छुछुन्दरितन्त्रम्. |
| १०. मृगधूर्ततन्त्रम्. | २४. Nil. |
| ११. वराहतन्त्रम्. | २५. सरटतन्त्रम्. |
| १२. कङ्कतन्त्रम्. | २६. आखुतन्त्रम्. |
| १३. वृकतन्त्रम्. | २७. कमठतन्त्रम्. |
| १४. शशकतन्त्रम्. | २८. चाषकतन्त्रम्. |

Incomplete.

**Beginning:**

जलमानुषमादाय सगृह्णीयाद्विचक्षणः ।
पेषयित्वाऽथ तन्मांसं तच्चूर्णं शिरसि क्षिपेत् ॥
तथा मृत्युवशं याति यदि त्राता पुरन्दरः ।
सप्ताहं(हा)न्म्रियते शत्रुस्सतापज्वरपीडितः ॥
तच्छल्यं तस्य वसया मर्दयित्वा तु लेपयेत् ।
करे सन्तप्तलोहे तु कारयेत्तोयवद्भवेत् ॥
तत्कर्परिकचूर्णेन मधुना योजयेद्दृशी ।
तिमिरं काशनिचयं पटलं च विनाशनम् ॥

**End:**

काकजिह्वा विषं चित्रं मर्दयेदात्मरेतसा ।
पाने पाने प्रदातव्यं मोहनं मरणान्तिकम् ॥

तत्पित्तं तत्र नेत्राभ्यां दशानां मधुना सह ।
मर्दयित्वाञ्जयेन्नेत्रे सर्वाञ्जनमनुत्तमम् ॥
उलूकं कर्पपक्षाङ्गपाणिभ्यां मर्दयेत्ततः ।
साध्यमाख्यं यथा तोये मन्त्रेणानेन साधकः ! ।
प्रायो विद्वेषणं सप्तदिनान्ते जायते ध्रुवम् ॥

---

R. No. 5167.

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Īśvara Vāriyar Avargal, Kavalappara, Malabar district.

भक्तिसंवर्धनशतकम्.

BHAKTISAṀVARDHANAŚATAKAM.

Foll. 1a—11b. Fol. 12 is left blank.
One hundred stanzas in praise of Viṣṇu: by Brahmadatta.
Complete.

**Beginning:**

जातं जातं खलु जगदहो चित्रमेतत्समस्तं
क्षीणं क्षीणं मुहुरपि परादृश्यते यत्प्रभावात् ।
तस्मै साक्षात् स्वरसपरमानन्दवीचीमयाय
ब्रह्मण्याय त्रिभुवनपते देव तुभ्यं नमोऽस्तु ॥
जीवात्मा यद्भ्रमति बहुशोऽप्यत्र संसारचक्रे
तत्त्वन्मायाविलसितमतः प्राञ्जलिः प्रार्थयेऽहम् ।
मा मा नाहं जगति भगवन् जन्म संपद्यते चेत्
कर्माभ्यर्हं भवतु भवनाधीश मानुष्यमेव ॥

**End:**

स्तोत्रं विष्णोरिति मृदुपदैस्सुप्रबन्धैश्शतेन
श्लोकैरेभिर्विरचितमिदं भक्तिसंवर्धनाख्यम् ।
भक्त्या युक्तः पठति खलु यः प्रातरुत्थाय नित्यं
प्राणापाये व्रजति हि हरेर्धाम निर्वाणनाम ॥
इदं स्तोत्रं पठेन्नित्यं यो नरः प्रातरुत्थितः ।
भक्तिसंवर्धनं नाम स याति परमं पदम् ॥

भक्तिसंवर्धनं नाम श्लोकानां शतकं मया ।
ब्रह्मदत्ताभिधानेन स्तोत्रं विष्णोर्विनिर्मितम् ॥

**Colophon:**

इति भक्तिसंवर्धनशतकं संपूर्णम् ।

---

R. No. 5168.

Paper. 10¾ × 9½ inches. Foll. 30. Lines, 10 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Palayattu Valiya Accan, Chennamangalam, Parur, Travancore State.

कनकलेखाकल्याणम्.

KANAKALĒKHĀKALYĀṆAM.

Foll. 1a—29b. Fol. 30 is left blank.

A drama in four Acts dealing with the story of the marriage of Kanakalēkhā, daughter of Vīravarman: by Vāmanabhaṭṭabāṇa of Śrīvatsagōtra.

Complete.

**Beginning:**

सौहित्यं विदधाति यस्सुमनसां शश्वत्कलानां निधि-
स्सर्वाशापरिपूरणक्षमकरो यो राजशब्दास्पदम् ।
ज्योत्स्नासंवलितः पुनः कुमुदिनीं यो रञ्जयत्यञ्जसा
भूया . . . मुदे समस्त . . . . माम . . . . ॥
. . . . . दायां . . . . . . . . . . ।
. . . . . . . . . . . . . . . . . . ।
. . . . . . . . . . . . . . पञ्चबाणः ॥

इति पुष्पा(ञ्जलिं विकीर्य) नेपथ्याभिमुखं परिवृत्य । मारिष इतस्तावत् । प्रविश्य पारिपार्श्वकः—भाव अयमस्मि ।

सू—मारिष, अद्य किमप्यभिनवं कनकलेखाकल्याणं नाम रूपकं द्रष्टुमभिलषति परिषदेषा ।

पारि—किमेवमभिनवं तद्रूपकमभिज्ञातसन्दर्भम् ।

सू—श्रूयताम्—

सन्ध्याताण्डवचण्डखण्डपरशुप्रेङ्खज्जटामण्डल-
लङ्गद्दिव्यधुनीतरङ्गपटलीपाण्डित्यपाटच्चराः ।
मन्दस्पन्दमरुत्प्ररोहविगलन्मन्दारमाध्वीरस-
स्रोतस्स्वादिमस . . दो यस्मिन् गिरां ग्रन्थयः ॥

* * * *

कञ्चुकी—मध्यमण्टपमधिवसति ।

मन्दा—तुमं पुण काँहि गच्छइ ।

कञ्चु—मनोजवनामानं दिव्यवंशसमुद्भवं तुरगं सज्जीकुरुष्वेति मन्दुरापालाय निवेदयितुं प्रेषितोऽस्मि ।

मन्दा—जुज्जइ ।

कञ्चुकी—त्वद्दर्शनोत्सुकं महाराजं विलोक्य सफलीकुरुष्व लोचने । इति निष्क्रान्तः ।

मन्दा—अहं . . . . . अस्सुअपुव्वमिअ दंसणको दह . . . सम् । इति निष्क्रान्ताः ।

मिश्रविष्कम्भः ॥

End :

राजा—

भगवन् भवदनुग्रहेण सर्वे मनोरथास्संपूर्णाः ।

तथाहि—

पुत्री संप्रति वीरवर्मनृपतेः पाणौ कृतेयं मया
प्राप्तो दिव्यगजो . . . . . . . . . . वैद्याधरम् ।
या विद्याधरचक्रवर्ति . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . मद्दे ॥

इदमस्तु भरतवाक्यम्—

पर्जन्योऽयं वृष्टिमिष्टां विधत्तां राजानः क्ष्मां पालयन्तामविघ्नम् ।
वाचां देवी वर्धतां सत्कवीनां तत्तोषाब्धौ सन्तु सन्तो निमग्नाः ॥

इति निष्क्रान्तास्सर्वे ॥

चतुर्थोऽङ्कस्समाप्तः ॥

**Colophon:**

इति श्रीमद्वत्सकुलतिलककविसार्वभौमषड्भाषावल्लभसाहित्यसाम्राज्यधुरन्धरश्रीवामनभट्टबाणविरचितं कनककलेखाकल्याणं नाम नाटकं समाप्तम् ।

---

R. No. 5169.

Paper. 10½ × 9½ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Tippan Nambūdirippād, Ponnūrkottamana, Perumbavur, Travancore State.

लिङ्गानुशासनम्, सवृत्ति.

LIṄGĀNUŚĀSANAM WITH VṚTTI.

Foll. 1*a*—15*b*. Fol. 16 is left blank.

Same work as that described under No. 1497 of the D.C.S. MSS., Vol. III; but with slight variations in the readings.

Almost complete.

**Beginning:**

समस्ता अपि भावास्ते समालम्ब्य यदासते ।
हृदि सारस्वतं ज्योतिः व्यक्तं तन्नः प्रकाशताम् ॥

अथ लिङ्गावतारं वर्तयिष्यामः—

। लिङ्गम् ।

अयमधिकारो द्रष्टव्यः । किमधिकुरुते ? लिङ्गम् । आशास्त्रपरिसमाप्तेः इत उत्तरं यद्वक्ष्यामः ।

। स्त्री ।

स्त्रीलिङ्गमित्यधिकृतं वेदितव्यम् ।

ऋकारान्तमातृदुहितृस्वसृयातृननान्दरः ।

ऋकारान्ता मातृदुहितृस्वसृयातृननान्दृ इत्येते शब्दाः स्त्रीलिङ्गा भवन्ति । इय माता, मातरं पश्य । एवं दुहिता स्वसा याता ननान्दा । ऋकारान्तग्रहणं किम् । द्विमातृको जरासन्धः, बहुमातृक इति मा भूत् । मात्रादिग्रहणं किम् । पिता, भ्राता, पितृ इत्यत्र मा भूत् । मात्रादिनियमात् तिसृचतस्रांरमसङ्ग इति चेन्न । स्त्रियामेव तिसृचतस्रोरादेशविधानात् ।

**End:**

। परवच्छिङ्गं च ।

शृङ्खलचटकवल्करविषाणाः । हरीतकटुकल्कभल्लातकामलकविभीतकाश्च ।
पल्लवः क्वचित् । सर्वस्य प्रायेण । द्वित्रिभ्यां तयश्च ।

**Colophon:**

इति लिङ्गविकारः समाप्तः ।

लिङ्गानुशासनं समाप्तम् ।

---

## R. No. 5170.

Paper. 13¾ × 9½ inches. Foll. 194. Lines, 29 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Nārāyaṇa Nambudirippād, Sabhāmaṭham, Kunnankulam, Cochin State.

न्यायलीलावतीविलासः.

NYĀYALĪLĀVATĪVILĀSAḤ.

Foll. 1a—194a. Fol. 194b is left blank.

A commentary on Vallabhācārya's Nyāyalīlāvatī: by Mahādēva.

Contains up to the end of Śabdanirūpaṇa.

**Beginning:**

शिरसि वहति वेदो गौरवाद्यच्च यच्च
स्फुरति मनसि योगोद्योगभाजां कथञ्चित् ।
त . . . . . . . . . . . . . . . .
. . . . . . . . . . जालहृतोस्मि ॥

नमामि विघ्नाधिपतिं . . . विमर्त्यसंपूर्णगजेन्द्रभावम् ।
अकुर्वतां स्वप्रणतिं नराणामिष्टस्य दिष्टान्तमिवासमाप्तेः ॥

सान्द्रोल्लसद्विशद . . . चन्द्रिकाभा-
भास्वद्विरिञ्चि . . . . . . . . . . ।
सा शारदा सदय . . . . . . .
. . वदातवदने पदमादधातु ॥

दुर्लभः खल्वपि . . वल्लभः प्रीतिवर्द्धनः ।
लीलावतीविलासोऽयं महादेवेन तन्यते ॥

अयमुदयनमुख्यग्रन्थमुद्रां विलोक्य
कियत इति हि मा गा भ्रातरस्मिन्नवज्ञाम् ।

. . . . . . . . . (सा)रमाहृत्य सर्वं
द्रुमकुसुमसमूहात्सञ्चितं केन तुल्यम् ॥
ग्रन्थव्याख्यातिरेकेण प्रायः किंचिन्न वोच्यते ।
करस्थेऽपि प्रमेयाब्धौ ग्रन्थविस्तरभीरुणा ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थमविगीतशिष्टाचारपरम्परामाप्तमिष्टदेवतानमस्कारमादौ करोति—नाथ इति। सृजति जनयति। किम्?। जगत्। इह जगच्छब्देन प्राणिवर्गो विवक्षितः। तदन्यत्र परमनिर्वृतेरसंभवात्। अथवा कार्यमात्रं जगच्छब्दार्थः। परमनिर्वृतिस्तु प्राणिविश्रामहेतुत्वात्संहृतिरिति व्याख्येयम्। तथा अवति रक्षति कथमेकपुत्रप्रीत्या प्रीतिशब्देन भगवतः स्थापकादृष्टोपगृहीतेच्छेवोच्यते। ततस्तदनन्तरं परमनिर्वृतिरात्यन्तिकी दुःखनिवृत्तिस्संहृतिर्वा तामादधाति, जगतीति विभक्तिपरिणामेन सम्बन्धनीयम्।

**End:**

अत एवेति। योग्यप्रतियोगिनिरूप्यो ह्यभावो नाधिकरणनिरूप्यः। अन्यथा आलोकाभावग्रहणप्रसङ्गादिति भावः। अथवा न वर्णक्रमः श्रोत्रगोचरः, किन्त्वनुमानादिने . . . प्रमाणान्तरेति। सूर्यक्रियाणां हि परस्पराभावसाहित्यं पौर्वापर्यतदवच्छिन्नकालयोगत्वं च। तदन्येषां तच्च कुतश्चिल्लिङ्गादवगम्यत इत्यर्थः ॥

**Colophon:**

इति न्यायलीलावतीविलासे शब्दनिरूपणम्।

---

R. No. **5171.**

Paper. 10½ × 9½ inches. Foll. 32. Lines, 20 in a page. Dêvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippād, Nareri, Tritala, Malabar district.

(a) काव्यप्रकाशटिप्पणम्.

KĀVYAPRAKĀŚAṬIPPAṆAM.

Foll. 1a—31b. Fol. 32 is left blank.

A gloss on Mammaṭa's Kāvyaprakāśa, which work has been described under Nos. 12816—12818 of the D.C.S. MSS., Vol. XXII. The commentator's name is not given.

Complete.

**Beginning:**

> कवेर्यथा कृतौ प्रायस्तथैव व्याकृतावपि ।
> व्याकर्तुरपि दोषास्युर्निनतार्थादयस्स्फुटम् ॥ १
> बलान् दोषान् समापाद्य समुन्मीलद्दुराग्रहाः ।
> व्याख्यानच्छद्मना मूलं दूषयन्त्येव केचन ॥

तथाहि—नियतिकृतेति। संग्रहं तद्विवरणं च व्याख्यातुमुद्यताः केचिन्निर्मितिनिर्माणमित्यनयोश्शब्दयोर्निर्मीयत इति निर्मितः निर्माणं व्युत्पद्यमानः प्रपञ्च इति कर्मसाधनमुपेत्य भावसाधनेन निहतार्थत्वमापादयन्ति। निहन्यते तु भावलक्षणेनार्थेन कर्मलक्षणोऽर्थः । भावलक्षणो हि प्रयोगे प्रसिद्धः। यथा अर्थमात्रेकमत्या सकलकलानिर्मिते निर्मलस्य निर्माणदक्षस्य समीहितेष्वित्यादि । कर्मसाधनस्य निर्मितिशब्दस्य प्रयोगः क्वचिदपि न दृश्यते । अतोऽप्रयुक्तं वेदमवाचकं वा असमर्थं वा। कविवाङ्निर्मितिरित्यत्र कविभारतीनिर्मितिरिति व्याख्यानेन प्रक्रमभङ्गो दोषः प्रदर्शितः । वाक्छब्देन भारती प्रति निर्दिश्यते इति खलु मतम् ।

**End:**

ऐकयं संबन्धि यदेकं स्वलक्षणं तत्कार्यं ऐकयधीरिति संबन्धः । ऐकयधिया प्रतिभासो विमर्शोऽर्थक्रिया चेति स्वीकृतम् ।

Foll. 18*a*—22*b* contain some stray stanzas dealing with the characteristics of Upamālaṅkāra.

---

(*b*) नाटकादिलक्षणम्.

NĀṬAKĀDILAKṢAṆAM.

Foll. 22*b*—31*b*.

Similar to the work described under No. 12900 of the D.C.S. MSS., Vol. XXII. The author, whose name is not given, says that he lived in the court of Rājarāja.

Complete.

**Beginning:**

> काव्याङ्गस्य चकासतश्चतुरया वाचा रसोद्द्योतकृत्सद्वृत्ते रुचितामिसन्धिमहितामर्थक्रियां बिभ्रतः ।
> अशास्यं बहुनाटकस्य सकले श्रीराजराजस्य तत्साक्षात्प्रेक्षणमङ्गलोत्सवसुखं धन्यो जनो विन्दति ॥

महाराजस्य श्रीनराम्भोधिराजस्य स्वामिनश्चरणसरसिजसेवां चिरतरमाचरितवतो विविधवाद्यमानैराधिविव्याधिभिर्विविधैः संबाधेन बाध्यमानस्य गृहमेवाध्यासीनस्य तामेव सेवां प्रति गाढमुत्कण्ठमानस्य साहित्यविद्योपजीविनः कस्यचिदियमुक्तिः—श्लाघ्याङ्गस्येति ।

* * * *

श्रीकण्ठादीनां श्रोतॄणां धनञ्जयादिग्रन्थैः प्रायो दुःसंपादं व्युत्पत्तिविशेषं संपादयितुकामा वयमशुभाश्रयजनासुरा (. . . .) शाङ्गिणोऽपि नाटकसंबन्धमधिकृत्य किमपि विलिखामः ।

**End :**

वृत्तिषु तदङ्गेषु तथावस्थार्थप्रकृतिसन्धितदङ्गसन्ध्यन्तरलास्याङ्गादिष्वन्येषु च रूपकसंबन्धेषु यथातथ्यं व्युत्पत्तिरनल्पेनापि यत्नेन दुर्लभा। अस्माभिः पुनरकृत्रिमया भक्त्या समाराधितानां श्रीमतां गुरूणां गरीयसा प्रसादेन कामपि व्युत्पत्तिं लब्धवद्भिः सूचनं कृतम् । अतः परं तु भिन्नरुचिर्हि लोकः, रुचीनां वैचित्र्यात् । विचित्ररूपाः खलु चित्तवृत्तयः । अण्णो अण्णस्स मणो, इत्याद्युक्तनयेन श्रोतृजनमनोवृत्तिभेदपरिशङ्किभिर्विरम्यते ।

> उद्यन्मनोरथमतीन्महिमानुयाता-
> नुत्सर्पिदर्पणहृदो विमतान्विधूय ।
> आनन्दवर्धनपराजितवोक्तिरेषा
> व्यक्तौ रसस्य नमयेदिह राजराजम् ।

इह च बहु . . उपमाप्रतिपादकत्वे बहुश्रुता न खलु विसंवादिनः । इतरे पुनरिमं जनं भट्टोद्भटकाव्यप्रकाशकारमङ्कुकदण्डिप्रमुखांश्चिरन्तनान् लक्षणकृतो बहून् महाकवीन् वंहीयसश्च लक्षणलक्ष्यग्रन्थविवरणकारिणः प्राज्ञान् प्रमाणयन्तः उपपत्तिपर्यालोचनपद्व्या संचरमाणं भाग्यमाननस्य श्रीराजराजसभाजनस्य समाजने जातुचिदपि निजाग्रप्रपितामहजहृततमभूपेकमवन्तुकामास्स्फुटमात्मनावमन्तव्यतापातमकल्पयन्तो यत्किंचन प्रलपेयुः । तत्र राज्ञामिव विदुषां चक्रवर्ती श्रीराजराजस्वामी स्वयं प्रमाणम् । श्रीकण्ठाद्यस्मद्गुरुभ्यो नमः ।

> अनेनैवमनेनैवमिति केषां विभीषिका ।
> राजिलोऽपि हि राज . . सुखी सुखसाधनैः ॥

## R. No. 5172.

Paper. 10½ × 9½ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. V. N. Nārāyana Nambūdiri, Vaidyamaṭham, Tritala, Malabar district.

### उपदेशसाहस्रीव्याख्या.
### UPADEŚASĀHASRĪVYĀKHYĀ.

Foll. 1*a*—49*b*. Fol. 50 is left blank.

A commentary on Śaṅkarācārya's Upadēśasāhasrī described under No. 4565 of the D.C.S. MSS., Vol. IX.

Breaks off in the 18th Prakaraṇa.

**Beginning:**

प्रणम्य कृष्णं प्रणतार्तिनाशनं गुरूनपि स्वान् परमात्मरूपिणः ।
मया सहस्रीविवृतिर्विधीयते कदाऽपि मन्दोऽपि कृती प्रसिद्धये ॥

सकलोपनिषदर्थसारसंग्राहिकामुपदेशसाहस्रीं गद्यपद्यात्मिकां प्रारभमाणो भगवान् भाष्यकारश्चिकीर्षितग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनपरिलब्धादृष्टसिद्धये च विशिष्टदेवतातत्त्वानुस्मरणपूर्वकं तन्नमस्काररूपमङ्गलाचरणं मुखतः संपादयन्नस्य शारीरप्रकरणस्य तदीयमेवानुबन्धजातं च सूचयति—चैतन्यमिति । परस्मै नमो वात्मनो देहान्तःस्थितीभावो भूयादित्युक्ते वैशेषिकादिदर्शनानुरोधेन ताटस्थ्ये परस्य शङ्किते चेतनमेव चैतन्यं कूटस्थः सुखिस्वरूपमिति ताटस्थ्यनिरासायोक्तम् । चेतनस्य मध्यमपरिमाणत्वमणुपरिमाणत्वं वेति दिगम्बरास्तत्सयूथ्याश्च निश्चिन्वन्ति । तान् प्रत्युक्तम्—सर्वगमिति । चेतनस्य सर्वगतस्यापि भिन्नत्वं सां . . . ह—सर्वमिति । सर्वात्मकस्यापि परस्यांशांशिभावादिना जीवात्मनो भेदोऽस्तीत्येकदेशीयाः । तत्राह्म्—सर्वभूतेति ।

* * * *

**Colophon:**

इति चैतन्यप्रकरणं प्रथमं समाप्तम् ।

**End:**

**Colophon:**

इत्युपदेशसाहस्रीव्याख्यायामात्मज्ञेयप्रकरणं सप्तदशं समाप्तम् ।

अथाष्टादशं प्रकरणम्—

पूर्वस्मिन् प्रकरणे ब्रह्मात्मविषयमपरोक्षज्ञानं मोक्षसाधनं वेदान्तेभ्यो भवतीत्युक्तम् । तदयुक्तम्, वेदान्तानां स्वर्गकामादिवाक्यवत् परोक्षज्ञानहेतुत्वात् । अपरोक्षज्ञानं तु प्रसंख्यानादेव सिध्यतीति केचित् ।

* * * *

नन्ववान्तरवाक्यार्थापरिज्ञानात्तदस्मीत्यप्रतिपत्तिः, न तु वाक्यासामर्थ्यात् । न हि पदार्थज्ञानादृते वाक्यार्थज्ञानमित्याशङ्क्याह—सकृदिति । योऽप्यवान्तरवाक्यात्तदर्थभूतं पदार्थं जानाति, सोऽपि सकृदुक्तं तत्त्वमसिवाक्य.

---

R. No. 5173.

Paper. 10¾ × 9¼ inches. Foll. 116. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Śrī Kumāran Nambūdirippad, Kattumadam-mana, Andathod, Malabar district.

रघुवंशव्याख्या.

RAGHUVAMŚAVYĀKHYĀ.

A commentary on Kālidāsa's Raghuvaṁśa, which work has been described under Nos. 11636–11679 of the D.C.S. MSS., Vol. XX: by Dakṣiṇāvartanātha.

Complete in 19 Sargas.

**Beginning:**

. . . . . . . . . . . . . भादसन्निभाः ।
यस्याः प्रसादादभवत्कालिदासः कवीश्वरः ॥

इह खलु विशिष्टाचारमनुद . . . . . . . . . . . . स्वेष्टदेवतानमस्कारं करोति—वागर्थाविति । पृची सम्पर्क इत्यस्मात् सम्पृक्तः । सम्पृक्तौ नित्यसम्बद्धौ । यद्यपि सम्बद्धशब्दः सम्बन्धमात्राभिधायी; तथाप्यत्र नित्यमेवाह, नित्यसम्बद्धयोर्वागर्थयोरुपमानत्वेनोपादानात् । वागर्थप्रतिपत्तये विशिष्टयोरशब्दार्थयोरुपलब्धये। शब्दस्य वैशिष्ट्यं विवक्षितार्थैकवाचकत्वम्; अर्थस्य तु परीक्षकहृदयाह्लादकत्वम् । तथा काव्योपदेशे—

शब्दार्थौ दोषरहितौ सगुणौ बन्धवर्तिनौ ।
काव्यं चारुतयात्यर्थमन्योन्यस्पर्द्धिनाविव ॥ इत्युक्तम् ।

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।
यथा दोषाकरः कामं मां निर्दहति निर्दयः ॥
अर्थस्सहृदयाह्लादकारी काव्ये प्रशस्यते ।
यथा निदाघो रजनी राजयक्ष्मा दुनोति माम् ॥ इति ।

अविघ्नेनापाये सिद्धे उपेयसिद्धिर्नैश्चित्येति मत्वा प्रबन्धाविघ्नपरिसमाप्तिरूपमुपमेयमप्रार्थयमानस्तदुपायभूतां वागर्थप्रतिपत्तिमेव कविः प्रार्थितवानित्यनुसन्धेयम् ।

**End:**

मुष्टिशब्दः पुंलिङ्गोऽप्यस्ति । अक्लीबे मुष्टिरस्त्रादाविति यादवप्रकाशः । अयमर्थः—प्रसवसमयाकाङ्क्षिणां प्रजानां वृद्धये अन्तर्गतं नभो बीजमुष्टि क्षितिरिव गर्भं दधाना हेमसिंहासनस्था अव्याहताज्ञा राज्ञी मौलैर्वृद्धसचिवैस्सार्धं भर्तृराज्यं विधिवदशिषदिति ।

**Colophon:**

इति दक्षिणावर्तनाथेन विरचितायां रघुवंशदीपिकायामेकोनविंशस्सर्गः समाप्तः ।

---

## R. No. 5174.

Paper. 10¼ × 9¼ inches. Foll. 61. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippād, Nareri, Tritala, Malabar district.

### श्रुतिसारसमुद्धरणम्, सव्याख्यानम्.

### ŚRUTISĀRASAMUDDHARAṆAM WITH COMMENTARY.

Foll. 1a—61a. Fol. 61b is left blank.

The text is the same as and the commentary similar to that described under R. No. 2518 ante. The commentator, whose name is not given here, salutes one Pūrṇātmakṛṣṇa.

Incomplete.

**Beginning:**

(व्या)—

तं वन्दे मुनिवर्यं तोटकवृत्तं चकार यः कृपया ।
प्रकरणमध्यात्मपरं प्रकटितपरमात्मतत्त्वमभ्यसताम् ॥

श्रीमत्पूर्णात्मकृष्णस्य पादपङ्कजपादुकाम् ।
प्रणम्य रचये व्याख्यां तोटकश्लोकगामिनीम् ॥

इह खलु निखिलोपनिषत्सारभूतं श्रुतिसारसमुद्धरणाख्यं प्रकरणमारभमाणस्तस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवताप्रणतिलक्षणं मङ्गलाचरणं मुखतः सम्पादयन्नस्य प्रकरणस्य शारीरकभाष्यार्थसंग्रहत्वेन तत्प्रकरणत्वात्तदीयमेव विषयप्रयोजनादिकं सूचयति—

(मू)—

त्रैलोक्यनाथहरिमीड्यमुदारसत्त्वं
शक्तेस्तनूजतनयं परमेष्ठिकल्पम् ।
जीमूतमुक्तविमलाम्बरचारुवर्णं
वासिष्ठमुग्रतपसं प्रणतोऽस्मि नित्यम् ॥

(व्या)—

अत्र त्रैलोक्यमित्याकाशादिप्रपञ्चो लक्ष्यते । तस्य त्रैलोक्यस्य आकाशादिप्रपञ्चस्य नाथः कारणं स्वाज्ञानप्रतिबिम्बितकूटस्थपरमात्मा त्रैलोक्यस्य कारणत्वान्नियन्तृत्वाच्च त्रैलोक्यनाथ इत्युच्यते । स चासौ हरिश्चेति कर्मधारयः । तं त्रैलोक्यनाथहरिं प्रणतोऽस्मि । तत्त्वमस्यादिवाक्यश्रवणजनितबुद्धिवृत्त्युपारूढः परमात्मा अविद्यां तत्कार्यं संसारं च हरति नाशयतीति हरिः । एतेनैतत्सिद्धम्—तत्त्वंपदार्थपरिशोधनपुरस्सरमहं ब्रह्मास्मीत्यखण्डैकरसवाक्यार्थज्ञानेनाज्ञाननिवृत्तौ सत्यां निरतिशयानन्दाविर्भावः प्रकरणस्य प्रयोजनमिति । तं हरिं विशिनष्टि—ईड्यं स्तुत्यं वेदान्तशास्त्रेणैव प्रतिपाद्यमित्यनन्यसाधारणतया विषयनिर्देशः । विषयनिर्देशेनैव वेदान्तशास्त्रस्य प्रतिपाद्यप्रतिपादकलक्षणः सम्बन्धोऽपि निर्दिष्टो भवति ।

---

R. No. **5175.**

**Paper.** 10½ × 9½ inches. Foll. 38. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Tippan Nambûdirippâd, Ponnûrkotta-mana, Perumbavur, Travancore State.

सिद्धान्तशेखरव्याख्या.

SIDDHĀNTAŚEKHARAVYĀKHYĀ.

A commentary on Śrīpati's Siddhāntaśekhara, which work has been described under No. 13506 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

**Beginning:**

एवं परिविषण्णवत्याद्यंशेषु चापेषु प्रथमद्वितीययोरर्धज्ययोः ज्ञातयोरितरानयनं पुनस्त्रैराशिकेनैव कार्यमिति पूर्वप्रदर्शितात् कर्मणोऽस्यैव लाघवम् । तत्र तु भुजाकोटिकर्णकल्पनया प्रत्येकं वर्गमूलपरिकर्मणि कार्यम् । अत्र पुनर्गुणहरणे एव कार्ये इति तत्त्रैराशिकप्रदर्शनायाह—

प्रथमाच्चापज्यार्धैरूनं खण्डितं द्वितीयार्धम् ।
तत्प्रथमज्यार्धांशैस्तैस्तैरूनानि शेषाणि ॥ इति ।

चापमेव ज्यार्धं चापज्यार्धं ज्यार्धेषु प्रथममेव हि चापतुल्यं स्यात् । यावच्चापसाम्यमेव हि ज्याच्छेदविधानन्यायेनोक्तमानतत्तदर्धचापज्यानयनं कार्यमित्याद्यस्यैव ज्यार्धस्य चापसाम्यं न पुनर्द्वितीयादीनामिति ।

**End:**

या पूर्वं चतुरश्रभुजाभूत् कथं पुनर्भूमिदक्षिणाग्रस्य सव्यभुजाधभिस्य चान्तरालान्तज्यातुल्यमित्यस्योत्तरं पूर्वमेव दत्तम् । तदाबाधायाः प्रथमवाक्योक्तत्रैराशिकेनानीतायास्तद्भुजायाश्च तुल्यत्वप्रतिपादनात् । दक्षिणबाधावर्गस्य लम्बवर्गस्य च योगमूलं प्रथमज्यातुल्यमिति च तत एव सिद्धम् । इति चतुर्थपादोपपत्तिः ।

---

R. No. **5176.**

Paper. $10\frac{1}{2} \times 9\frac{1}{4}$ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippad, Nareri, Tritala, Malabar district.

सिद्धान्तकल्पवल्लीव्याख्या—केसरावली.

SIDDHĀNTAKALPAVALLĪVYĀKHYĀ: KESARĀVALĪ.

Foll. 1*a*—27*b*.

A commentary by Sadāśivēndrasarasvatī on his Siddhāntakalpavalli, described under R. No. 3859(d) ante, and written with a view to easily understanding the systems of thought explained in Appayadīkṣita's Siddhāntalēśasaṅgraha.

The commentary with text is printed in the Vani Vilas Press, Srirangam.

Complete.

**Beginning :**

स्वाज्ञानेन विवर्तते त्रिभुवनाकारेण यस्सर्वतः
स्वस्मै यस्स्वयमेव चोपदिशति स्वं शिष्यगुर्वात्मना ।
स्वज्ञानेन च योऽद्वितीयसुखसद्बोधात्मना शिष्यते
तस्मै विस्मयनीयशक्तिनिधये कस्मै चिदस्मै नमः ॥

सिद्धान्तलेशसंग्रहाख्यग्रन्थे वर्णितानां मतानां सुखेनावधारणार्थं चिकीर्षितस्य सिद्धान्तकल्पवल्ल्याख्यस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय कृतमिष्टदेवतोपासनलक्षणं मङ्गलं ग्रन्थतो निबध्नाति—अङ्कुरितेति । अङ्कुरिता सञ्जाताङ्कुरा स्फुरन्ती बोधमुद्रिका यस्य तत्तथोक्तम् । अपसव्योपरिस्थितस्य सव्यपदमपसव्यस्य दक्षिणस्योरोरुपरि तिष्ठतीत्युपरिस्थं सव्यं वामं पादं पादो यस्य तत्तथोक्तम् । एतेन वीरासनासीनत्वमुक्तम् । वटभूरुहमूलवास्तव्यं, वटभूरुहस्य वटद्रुमस्य मूले वसतीति वास्तव्यम् । '(वसेस्तव्यत्क)र्तरि' इति तव्यप्रत्ययः । तदेकमव्यपदेश्यं श्रीदक्षिणामूर्तिरूपं वस्तु अनुस्मरामः ।

**End:**

मुक्तस्य सर्वमुक्तिपर्यन्तमीश्वरभावापत्तिरपि बद्धपुरुषान्तरदृष्ट्या । वस्तुतस्तु नरस्पृष्टेश्वरत्वादीनि धर्मिनिर्मृष्टनिखिलभेदप्रपञ्चनित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वितीयाखण्डैकरसब्रह्मात्मनाऽवस्थानमिति परमसिद्धान्तमाह—परमार्थतस्त्विति ।

**Colophon :**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमत्परमशिवेन्द्रसरस्वतीपदाब्जसेवापरायणेन श्रीमत्सदाशिवेन्द्रसरस्वत्या विरचितायां श्रीमद्वेदान्तसिद्धान्तकल्पवल्लीव्याख्यायां केसरावल्याख्यायां चतुर्थस्स्तबकः ॥

Foll. 27b—28b contain some miscellaneous passages on Pūjāviṣaya.

## R. No. 5177.

Paper. 10½ × 9¼ inches. Foll. 16. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippad, Nareri, Tritala, Malabar district.

तत्त्वचिन्तामणिव्याख्या—दर्पणः.

TATTVACINTĀMAṆIVYĀKHYĀ : DARPAṆAḤ.

Foll. 1a—15b. Fol. 16 is left blank.

Same work as that described under No. 4001 of the D.C.S. MSS., Vol. VIII, wherein see for the beginning. By Rājacūḍāmaṇidīkṣita.

Incomplete.

**End :**

नन्वेवं सत्तायाः पूर्वमनुभूतत्वेन कथं स्मृतिविषयत्वं स्मृतेरनुभवसमानतिलिङ्गित्वादिति चेन्न । सन् घट इति स्मृतिं प्रति अनुभवस्य हेतुतानिर्वाहकतया ऽनुभवविषयधर्मगोचरसंस्कारस्यानुभूततत्तास्मृतिजननसामग्री.

---

## R. No. 5178.

Paper. 10½ × 9¼ inches. Foll. 212. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of the Raja of Venkatagiri, Nellore district.

ब्रह्मयामलम्.

BRAHMAYĀMALAM.

Foll. 1a—210b. Foll. 211 to 212 are left blank.

Same work as that described under R. No. 2483 ante.

Incomplete.

---

## R. No. 5179.

Paper. 10½ × 9¼ inches. Foll. 164. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of the Zamindar of Chellapalli, Kistna district.

तन्त्रराजव्याख्या—मनोरमा.

TANTRARĀJAVYĀKHYĀ : MANŌRAMĀ.

Foll. 1a—163a. Foll. 163b and 164 are left blank.

This is the further portion of the work described under No. 5635 of the D.C.S. MSS., Vol. XII. By Prakāśānanda.

From the stanzas found at the end of the commentary, it is made out that Subhagānandanātha was the commentator on Paṭalas 1 to 22 and

his disciple Prakāśānanda on Paṭalas 23 to 36, i.e., the portion now described. It may be noted here that the colophons of Paṭalas 23 and 24 do not give the commentator's name, but entitle the commentary as Tattvaprakāśikā, while the colophons of Paṭalas 25 and 36 mention the commentator's name as Subhagānandanātha and entitle the commentary as Manōrama. The colophons of Paṭalas 26 to 35 give neither the commentator's name nor the title of the commentary.

Contains the commentary on Paṭalas 23 to 36.

The subjects dealt with in the various Paṭalas are given below:—

२३. वाराहीविद्याविधानम्.

२४. षोडशनित्याध्यानभेदप्रकाशनम्.

२५. षोडशनित्यामातृकाकालव्याप्तिप्रकाशनम्.

२६. षोडशनित्याव्याप्तिवैभवप्रकाशकमन्त्रव्याप्तिप्रकाशनम्.

२७. षोडशनित्यानां कालात्मकप्राणव्याप्त्यादिविधानप्रकाशनम्.

२८. षोडशनित्याकालतादात्म्यादिप्रकाशनम्.

२९. होमकुण्डादिप्रपञ्चप्रकाशनम्.

३०. वास्तुदेवताचक्रतत्पूजादिसूक्ष्म[1]परहोमविधानप्रकाशनम्.

३१. अरिमर्दनविधानप्रकाशनम्.

३२. सौख्यहोमविधानप्रकाशनम्.

३३. ललितायन्त्रप्रकाशनम्.

३४. सिद्धसारस्वतादिविद्याप्रकाशनम्

३५. नित्यानां स्वात्मत्ववासनातद्वीर्यस्वरूपभेदप्रस्ताराधिकरणं च स्वरूपप्रकाशनम्.

३६. देवतादेशिकशिष्यप्रपञ्चसारादीनां परमार्थस्वरूपप्रकाशनम्

**Beginning:**

षोडशनित्याङ्गभूताया वाराह्या विद्याविधानमुपदिशति—अथेत्यादि । पञ्चमीति । ब्राह्म्यादिषु पञ्चमत्वेनावस्थानात् पूर्वत्र तृतीयपटले साधनं विद्याया इति शेषः । अङ्गानि कृत्वेति पूजयेदित्युत्तरत्रान्वयः । सप्तभिः अधीतसप्तभिः हृदयं षडङ्गेन अष्टमादिभिः षड्भिश्शिरश्चतुर्दशादिभिः षड्भिः शिखां विंशादिभिर्दशभिः कवचं त्रिंशादिभिः सप्तभिर्नेत्रं सप्तत्रिंशादिभिस्सप्तभिरस्त्रमित्यर्थः । जातिभिर्नमःस्वाहेत्यादिभिरर्पितं यथा भवति तथा कृत्वेत्यन्वयः । त्रिकोणेत्यादि समन्वितं चक्रमित्यन्वयः । स्वनाम्नावाह्य ह्रीं वाराहीमावाहयामीति दशोत्तरशताक्षर्या तृतीयपटलोपदिष्टया । प्रिये इति देवीसम्बुद्धिः । सर्वमध्ये मध्यत्रिकोणमित्यर्थः । वामदक्षिणाग्र-

कोणतः देव्या इति शेषः । चण्डोचण्डेत्येकां स्वस्वनामभिरस्याः परिवार-शक्तीनामुक्तिर्नामभिश्चतुर्थ्यन्तैः पूजयेदिति सम्प्रदायः ।

* * * *

**Colophon:**

इति तत्त्वप्रकाशिकाख्यायां तन्त्रराजव्याख्यायां वाराहीविद्याविधानं नाम त्रयोविंशः पटलः ।

**End:**

तत्र परमेश्वरीति देवीतम्बुद्धिः । यत्परामर्शतोऽभावः ततोऽर्थविद इति शेषः । अनयोरैक्यमश्नुते । शिवशक्त्योरभेदस्वरूपो भवति । तच्छब्देन तन्त्रस्यानुभाव उच्यते । तुरवधारणे । कदाचन आपत्स्वपी-त्यर्थः । दम्भा . . . . . रायनश्छन्दानयशीलिने । प्रच्छन्नानयशीलिने चेति यावत् । नायाचते नास्तिकाय नायाचते नास्तिकाय चेति यावत् । विघाय अर्थार्थिमिति यावत् ।

* * * *

तत्र विधिवन्नित्यनैमित्तिकादिप्रोक्तक्रमात् स भजनपरः मदंशकः ।चित्स्वरूपः ईश्वर इति यावत् ।

**Colophon:**

इति षोडशनित्यातन्त्रेषु श्रीकादिमताख्यस्य परिपूर्णस्य तन्त्रस्य प्रपञ्चसारसिंहराजप्रकाशाभिधानेन सुभगानन्दनाथेन विरचितायां मनोरमाख्यायां व्याख्यायां देवतादेशिकशिष्यप्रपञ्चसारादीनां परमार्थस्वरूप-प्रकाशनपरं षट्त्रिंशपटलं परिपूर्णं परामृष्टम् ।

षट्त्रिंशे पटले ज्ञेयाः शिवत्व(शक्ति)मयेऽत्र च ।
अभ्यर्थसप्तषष्टिश्च व्याख्याग्रन्थाश्चतत्रयम् ॥
तन्त्रे प्रकरणेऽन्यत्र श्रीमत्कादिमताह्वये ।
गीतानां नवकं त्वेकत्रिंशता च . . . . ॥
भुक्तभूमानमार्ये . . . ग्रन्थे द्विसन्धिगाः ।
सप्त . . . . . क्षरसङ्ख्यया सहस्राणाम् ।
द्वादशकन्यून . . . शतैरितं यततः ॥
काश्मीरराजस्य गुरुः श्रीकण्ठेशो द्विजेश्वरः ।
दक्षिणापथपुण्यौघपरिणामान्मयोदितम् ॥

कदाचिदागतो द्रष्टु . . नेतुं सलीलया ।
तेनैवानुगृहीतोऽभू . . . मार्गं नृसिंहराट् ॥
तन्त्राण्यधीतवत्वा . नित्यानां तेन निर्मिता ।
व्याख्या मनोरमाभिख्याऽनेन कादिमतस्य तु ॥
सुभगानन्दनाथेन द्वाविंशपटलावधि ।
तदाज्ञयाऽवशिष्टानां पटलानां विनिर्मे . ॥
(चतु)र्दशानां तच्छिष्यः प्रकाशानन्ददेशिकः ।
तां सुन्दरवरहमाभूख्याख्यां सत्सम्प्रदायतः ॥
समाप्तेयं मनोरमाख्या व्याख्या ॥

---

R. No. **5180.**

Paper. 10½ × 9½ inches. Foll. 16. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Nārāyaṇa alias Kṛṣṇa Nambūdiri Vaidikan, Tekkattu-mana, Kumaranallūr, Malabar district.

ऐन्द्रगायत्रीमनुविधानम्.

AINDRAGĀYATTRĪMANUVIDHĀNAM.

Foll. 1*a*—15*a*. Foll. 15*b*—16 are left blank.

On the procedure to be adopted before reciting the Aindragāyattrī and on certain other details connected with it.

Incomplete.

**Beginning :**

अथ प्रवक्ष्यामि समासतोऽहमैन्द्रस्य गायत्रिमनोर्विधानम् ।
साङ्गं सजापं सहुतक्रमं च सेवारतानां सकलार्थसिध्यै ॥
यद्वेत्यादिको मन्त्रस्सुकक्षोऽस्य मुनिस्स्मृतः ।
छन्दो गायत्रमुद्दिष्टं देवता विबुधेश्वरः ॥
गुणभूताष्टभूताऽपि वर्णैर्जातिसमन्वितैः ।
पश्चाङ्गानि मनोर्वर्णैः कृत्वा वर्णैस्तनौ न्यसेत् ॥
कं श्रोत्रनयनघ्राणमुखदोःपादसन्धिषु ।
आधारहृन्मस्तकेषु मन्त्रार्णान् क्रमशो न्यसेत् ॥
* * * *
रविबिम्बसंस्थममराधिपतिं प्रविचिन्त्य नित्यममुमत्र मनुम् ।
जपतामथाष्टशतमाशु वशे भुवनं भवेत् किमुत मर्त्यजनः ॥

**End:**

भास्वन्मण्डलमध्यगः श्रुतिमयस्ताक्ष्योऽखिलैर्वन्दितः
पक्षोद्भूतमरुत्प्रकम्पितगिरिव्रातोरुतुण्डो महान् ।
दोर्दण्डैः कनकप्रभैर्दशशतैः पीयूषपूर्णान् घटान्
भोगीन्द्रासुहरप्रदीपनिचयान् बिभ्रत्करैः पातु वः ॥

---

R. No. 5181.

Paper. 10¼ × 9¼ inches. Foll. 6. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Aila Vijjhala Anantapadmanābhayyagāru, Kōḍūru, Nellore district.

सिद्धजीवनतन्त्रम्.

SIDDHAJĪVANATANTRAM.

Foll. 1*a*—5*b*. Fol. 6 is left blank.

On the procedure for the attainment of various kinds of Siddhis or supernatural powers.

Contains the Paṭalas one to three.

**Beginning:**

अम्बिकालोलनाथाय शम्बरान्तकवैरिणे ।
श्रीजनार्तिविनाशाय श्रीगिरीशाय मङ्गलम् ॥
कदाचिद्गिरिजा देवी कैलासगिरिकन्दरे ।
शिवं शिवप्रदं धीरमिदं वचनमब्रवीत् ॥

पार्वत्युवाच—

श्रीकण्ठ शिव चिद्रूप चिन्तितार्थप्रदायक ।
नराणां कार्यसिद्धिस्तु केन वा जायते कलौ ॥

ईश्वर उवाच—

साधु साधु महाप्राज्ञे शृणु पर्वतनन्दने(न्दिनि) ।
गुह्याद्गुह्यतरं देवि कार्यसिद्धिस्तु भूतले ॥
कृते चाष्टाङ्गयोगेन साधयन्ति तपोधनाः ।
त्रेतायां चैव देवेशि योगैरेव षडङ्गकैः ॥

* * * *

पारदं चैव पाषाणभेदानन्यांस्तु दारुणान् ।
साधयेन्मन्त्रयोगेन कायसिद्धिर्भवेद्ध्रुवम् ॥
कायसिद्धिस्तु देवेशि करोति निगमं कलौ ।
योगाभ्यासात्कुलेशानि स्थिरकायो भयं न हि ॥
तत्तदेव कुलेशानि मूलिकासिद्धिरेव च ।
पर्यायेण भवेत्सिद्धं योगमष्टाङ्गमादरात् ॥
सद्यः कलौ मन्त्रयोगं योगदं च क्रमात्कलौ ।
येन केनाप्युपायेन योगं सायुज्यसाधकम् ॥

* * * *

**Colophon:**

इति योगसारागमे सिद्धजीवनतन्त्रे प्रथमः पटलः ॥

**End:**

तदारभ्य तु देवेशि मन्त्रं मे चेतनारतः ।
मूलिकाचूर्णमनघे सर्वसिद्धिप्रदं कलौ ॥
त्रिसप्तमथ वा देवि मन्त्रितं भक्षयेन्नरः ।
चिन्तितां सिद्धिमाप्नोति ग्रन्थोक्तविधितः कुरु ॥

**Colophon:**

इति योगसारागमे सिद्धजीवनतन्त्रे तृतीयः पटलः ॥

---

R. No. **5182.**

Paper. 10¾ × 9¼ inches. Foll. 19. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Kūdalūr Nārāyaṇa Nambūdirippād, Tritala, Malabar district.

**मेघसन्देशव्याख्या.**

MĒGHASANDĒŚAVYĀKHYĀ.

Foll. 1a—9a. Foll. 9b—10 are left blank.

A commentary on Kālidāsa's Mēghasandēśa described under No. 11869 of the D.C.S. MSS., Vol. XX. The commentator's name is not known.

Incomplete.

**Beginning:**

गणपतिरभिमतमनिशं दिशतु महान् मह्यमसुसमासहितम् ।*
हरिहरमदनवराहाः सेवन्ते यं सदैव सहदयिताः ॥

अह्नाय जह्नुतनयेव मदीयमुच्चै-
राद्या निरस्यतु तमस्ततिरक्षणाना(राणा)म् ।
नानाचराचरविधानमिषेण यस्या
व्याख्यां विचक्षणमतिर्विदधाति वेधाः ॥

क्रियते मेघव्याख्या नादृश्या न च गता विमानपथम् ।
अथ च विबुधोपभोग्या सुमनोरमणीयमद्भुता जयति ॥

निबन्धनानि सन्तीति नाविधानं निबन्धनम् ।
न ह्यनल्पेषु वृक्षेषु न कल्पक(म)कल्पयन् ॥

अत्र खलु कविरतिशक्ति कामिनामत्यन्तहेयां प्रतिपादयितुं देवेयेन-रपि कस्यचित् अतिसक्त्या विरहासहस्याचेतनविषया दूतीकरणादिप्रयासाः प्रादुरासन्नित्येवमर्थप्रतिपादकं प्रबन्धमारभमाणः पीठिकां तावदारचयति—कश्चिदिति । ननु ग्रन्थारम्भे मङ्गलाचरणं कुर्वन्तो दृश्यन्ते कवयः । किमत्र तदनपेक्षं प्रस्तूयते ? उच्यते—अत्राप्यविघ्नपरिसमापनादिकार्यदर्शनादनुमान-सिद्धमेवं मङ्गलाचरणम् । ग्रन्थनिवेशनमेव केवलं न कृतम् । तच्चावश्य-कर्तव्यत्वद्योतनायैव क्रियते, न तु चिकीर्षितशेषतया । इतरथापि . . त्वसिद्धेः । कश्चित्तु ग्रन्थानिवेशलिप्सया कश्चिदित्येतावतैव जीवपरमात्मनो-रैक्याभिधानरूपमङ्गलाचरणमातिष्ठते । तत्तावदीदृशेष्वद्वैतासंबद्धेषु प्रबन्धेषु सकलरूपस्यैव कर्तुं योग्यत्वा(त्वा)द्रियामहे । चित्पदस्य च जीवाभिधायित्व-मदृष्टचरम् । तस्माद्ग्रन्थानिवेशं विना देवताविषयमनोवाक्कायव्यापारसद्भाव एवात्रास्थेयः ।

**End:**

सोऽनिलस्त्वत्प्रेरणे स्वशक्तिमखिलां विनियोक्ष्यति । अकृतार्थश्च भविष्यति । स्वयमेवाशक्यारम्भी चेत्यवज्ञातश्च भविष्यतीति ध्वन्यते । नन्वसौ मम मित्रमेव, अतस्तस्य मदवज्ञा न संभवतीत्यत्राह—रिक्त इति । सर्व इति । सर्वस्य.

R. No. 5183.

Paper. 10½ × 9½ inches. Foll. 40. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippad, Tritala, Malabar district.

विवेकमार्तण्डः.

VIVĒKAMĀRTAṆḌAḤ.

Foll. 1a—39a. Foll. 39b and 40 are left blank.

A metrical exposition on the greatness of the discriminative knowledge of the self as explained in the Vēdānta and the means of getting it. The author of the work is Viśvarūpadēva, son of Śataguṇācārya of Parāśara family. The fourth chapter of this work is described under No. 683 in the Bikaner Library Catalogue and the statement made therein that the whole work treats of astrology is apparently erroneous.

Complete in six chapters as given below :—

१. विवेकमहिमप्रबोधः.
२. मोहनिग्रहप्रबोधः.
३. संकल्पविकल्पच्छेदप्रबोधः.
४. कालविज्ञानप्रबोधः.
५. योगविज्ञानप्रबोधः.
६. योगसाधनप्रबोधः.

**Beginning :**

व्याप्तं जगत्त्रयं येन बहिरन्तरमायया ।
योगगम्यं तमात्मानं वन्दे दुःखहरं परम् ॥
हा मित्रं मम हा कलत्रमुचितं हा मे धनं हा गृहं
हा पुत्रो मम हा पिता मम गुरुः क्षेत्रादिकं हा मम ।
इत्थं हा ममतानुबद्धमखिलं विश्वं सदेवासुरं
यन्मायार्णवमग्नमस्ति सततं तस्मै नमो विष्णवे ॥
या काचित्प्रकृतिः परा गुणमयी माया महामोहिनी
कामक्रोधविबोधलोभजननी बीजं जगज्जन्मनः ।
क्षुब्धं मुग्धमिदं निबद्धमतुलं द्वन्द्वं समस्तं यया
वन्देऽहं भवभावभूरिविभवभ्रंशाय कामेश्वरीम् ॥

* * * *

धन्यास्त एव कवयो ये मोहनिशात्ययं समासाद्य ।
हृदये विरागचरिते पश्यन्त्युदितं विवेकार्कम् ॥

मददावानलदग्धे रविकरनिकरे विवेकजलदो यः ।
विदितः स एव नूनं सुकविः . भेतमारका बन्धे ।
यद्गुणत्रयबन्धानां नराणां बन्धकारणम् ॥
तत्कार्यं कः कृती कुर्यात्सततं भेतमारणम् ।
बध्नाति सद्विरामोघं यस्तु मोक्षाय देहिनाम् ।
पादा(प्रसाद)यति पीयूषं मृतानां जीवनाय सः ॥
दन्तहीनो यथा बालो हृष्टो वक्तुमपेक्षते ।
योगिनां वल्लभं शास्त्रं कर्तुमिच्छाम्यहं तथा ॥
सद्गुणैः सरसैर्वृत्तैर्मुक्तैर्मु(मौक्ति)कैरिव ।
ग्रन्थनं तत्करिष्यामि यन्मुक्ताकर्णभूषणम् ।
यानि वस्तूनि संसारे ग(र)लानीव देहिनाम् ।
तानीह दूषयिष्यामि क्षन्तव्यं तन्मनीषिभिः ॥
हे दुर्वारविषादविभ्रमरते रे शोकतृष्णाप्रिये
रेऽहङ्कार समार . . . . . रे(?)रे लोभदम्भादयः
त्यक्त्वा योगिनमेव मूढहृदयं दुर्गं प्रयाताधुना
नो चेन्नाशमुपागता हि यमिनां जातो विवेकोदयः ॥

**End:**

निरातङ्के निरालम्बे निराभासे निरामये ।
योगी योगविधानेन परे ब्रह्मणि लीयते ॥
दुग्धे क्षीरं घृते सर्पिरग्नौ वह्निरिवाञ्जसा ।
तन्मयत्वं व्रजत्येव योगी लीनः परे पदे ॥
भवभयवनवह्निं मुक्तिसोपानमार्गं
प्रकटितपरमार्थज्ञानगुह्यं च गुह्यम् ।
सकृदपि पठतीमं यः शृणोति प्रबन्धं
स भवति भुवि भव्यं भाजनं भुक्तिमुक्त्योः ॥

**Colophon:**

इति शतगुणाचार्यतनयश्रीविश्वरूपदेवविरचिते विवेकमार्तण्डे योगसाधनं नाम षष्ठः प्रबोधः ।

श्रीमत्पराशरकुले महति प्रसूतो
योऽयं कृती शतगुणो गुणिनां वरिष्ठः ।
तस्यात्मजोऽकृत रजन्विपुराधिवासः
ग्रन्थं शुभाय भविनां भुवि विश्वरूपः ॥

कृतं मया चित्तविनोदनार्थं विमोक्षशास्त्रं च मुदे गुरूणाम् ।
विवेकसंपत्तिकरं नराणां विवेकमार्ताण्डमितो वदन्ति ॥
अजानता यत्किल शास्त्रमार्गं ग्रन्थो मयाकारि नवप्रबाधः ।
विवेकभानुः सुमतो नराणां क्षन्तव्यमस्मात्कविभिः समस्तम् ॥
आराध्य यन्मत्र पदारविन्दं भक्तिप्रभावाद्वयमेतदासीत् ।
एकं मया श्लाघ्ययशः कवीनामाधिस्तथान्या महती यतीनाम् ॥

प्रसरति हृदि तावद्घोरसर्पप्रभाव-
प्रभवगरलजालं कालमेनांह्रि पुंसाम् ।
श्रवणकुहरसंस्था गर्भभूषा विभूषा
न विशति कृतिरेषा विश्वरूपस्य यावत् ॥

---

R. No. **5184.**

Paper. 10¼ × 9¼ inches. Foll. 54. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Paramēśvara Nambūdiri, Tayyūr-mana, Malabar district.

**सारसंग्रहः.**

SĀRSAṄGRAHAḤ.

Foll. 1*a*—53*a*. Foll. 53*b* and 54 are left blank.

On the procedure for the worship of Śiva in temples as summarized apparently from various Śaivāgamas.

Wants the beginning in the 1st Paṭala and breaks off in the 11th Paṭala.

**Beginning:**

. . . नया पात्रे तु होम . . समागतः ।
आद्यशेषमयां शेषमपामार्गरसैर्युतम् ॥

मन्त्रयेदस्त्रमन्त्रेण . . . ष्टोत्तरं ततः ।
कृणुष्वेत्यादिभिः प्रोक्ष्य विकिरेद्यवसर्षपैः ॥
तालत्रयादिकं कुर्यादग्निप्राकारमेव च ।
पुनरष्टशतं जप्त्वा चक्रं श्वभ्रं च पूजयेत् ॥
तमेवैशेऽग्निमाधाय स्थण्डिले व्रीहितण्डुलैः ।
तत्पूर्वे स्थण्डिले क्लृप्ते वस्त्रास्तीर्णे घटं न्यसेत् ॥

* * * *

**Colophon:**

इति सारसंग्रहे प्रथमः पटलः ॥

**End and Colophon:**

इति सारसंग्रहे दशमः पटलः ॥

अथ स्नानं प्रवक्ष्यामि देवदेवस्य शूलिनः ।
स्थापितस्य चतुर्थेऽह्नि कुर्यात् स्नानं यथाविधि ॥
शक्त्या सप्तदशद्रव्यैः स्नानं देवस्य कल्पयेत् ।
पदानि वक्ष्ये द्रव्याणि मन्त्रान् स्नानक्रमांस्तथा ॥

* * * *

एकादशपुटे क्षेत्रे नवानां नवकं नयेत् ।
पूर्ववत्पूरणं स्नानं शतेनाष्टोत्तरेण वा ॥
द्रव्यैरमीभिर्मन्त्रैस्तु पदमात्रं निगद्यते ।
मध्ये च नवकं दिक्षु कोणे षोडशकं तथा ॥
त्रयोदशपुटे क्षेत्रे पदान्येवं प्रकल्पयेत् ।
क्षेत्रे साज्यपुटे वीथी लुम्पेत्पञ्चपुटान्तरे ॥
मध्यखण्डेन नवकमष्टपत्रं समालिखेत् ।
कृत्वैकं तु पदान्येवं द्विशतैर्वा नवोत्तरैः ॥

---

## R. No. 5185.

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Tippan Nambadirippad of Ponnurkotta-mana, Perumbavur, Travancore State.

(a) लघुकालार्पणम्.

LAGHUKĀLĀRPAṆAM.

Foll. 1a—26a.

A metrical work on astronomy.

Complete in eight Adhyāyas.

**Beginning :**

मायामाश्रित्य सृष्ट्वा जगदिदमखिलं स्वप्रवत्स्वस्वरूपे
तस्मिन्नाविश्य यस्तन्नियमयति पुनः कर्तृकर्मादिभेदैः ।
ज्योतिर्भिः पुण्यपापोत्थितफलपिशुनैः क्षेत्रकालादिक्लृप्त्या
कालात्मा क्रीडतीत्थं श्रुतिशिरसि गतं तं मुकुन्दं नमामि ॥
आचार्यवदनाम्भोजपीयूषध्यास्वादनान्मम ।
उद्भ्रान्ता चेतसो वाणी सतां तुष्ट्यै भवेदियम् ॥
गुरुपादाम्बुजरजःपुञ्जालङ्कृतमौलिना ।
स्वबोधपरिशुद्ध्यर्थं यत्किञ्चिदिह लिख्यते ॥
कायेन वाचा मनसा यद्यत्कर्म करोम्यहम् ।
समर्पयामि तत्सर्वं हरये कालरूपिणे ॥
गजाननं च वाग्देवीं ब्रह्माद्यांस्त्वा गुरूनपि ।
लघुकालार्पणं वक्ष्ये मन्दबुद्धिहिताय च ॥
मेषादिसङ्क्रमोद्भूतो ध्रुवगणोऽब्दध्रुवाभिधः ।
मेषादिगतमासानामिष्टसङ्ख्यां न गाहताम् ॥
विन्यस्य तस्यां प्रक्षेप्याः सङ्ख्या वर्णोदिता इमाः ।
पुत्रस्वमातृसंसक्तक्षणश्रयेति ताः क्रमात् ॥
वर्तमानस्य मासस्य क्षिप्त्वा गतदिनानि च ।
ध्रुवाहर्गणयुक्तोऽसौ कल्यादिः स्यादहर्गणः ॥

* * *

**Colophon :**

इति लघुकालार्पणे प्रथमोऽध्यायः ॥

**End :**

कृष्णरामकथा येहलोकेऽभीष्टप्रदा नृणाम् ।
तयोः कालात्मनोस्तद्वत्क्षेत्रसङ्ख्यादिजाः कथाः ॥

मायामाश्रित्य सृष्ट्वा जगदिदमखिलं स्वप्नवत्स्वस्वरूपे
तस्मिन्नाविश्य यस्तन्नियमयति नरः कर्तृकर्मादिभेदैः ।
ज्योतिर्भिः पुण्यपापोत्थितफलपिशुनैः क्षेत्रकालादिक्लृप्त्या
कालात्मा क्रीडतीत्थं श्रुतिशिरसि गतं तं मुकुन्दं नमामि ॥

**Colophon:**

इति लघुतरकालार्पणे चन्द्रच्छायोदयास्तमयशृङ्गोन्नतिविषयोऽष्टमोऽध्यायः समाप्तः ।

---

(b) चन्द्रच्छायागणितम्, सव्याख्यानम्.

CANDRACCHĀYĀGAṆITAM WITH COMMENTARY.

Foll. 26a—35b. Fol. 37 is left blank.

A metrical work on astronomy especially dealing with the movements of the moon and sun: by Gārgya. The text is followed by a commentary by the same author as that of the text.

Complete.

**Beginning:**

जन्मस्थितिविहतयः स्युर्जगतो यस्मात्प्रणम्य तद्ब्रह्म ।
चन्द्रच्छायागणितं कर्त्रा व्याख्यायतेऽस्य गार्ग्येण ॥

सूर्येन्दुतुङ्गपातौ च तदानीमयनांशकान् ।
तद्देशाक्षं च निर्णीय गण्यतां शशिनः प्रभा ॥ इति ।

तत्र सूर्येन्दुस्मरणेन मङ्गलाचरणमपि कृतम् । अस्याभिप्रायः—सूर्येन्दुतुङ्गपातमध्यमध्रुवानहर्गणविशिष्टायनचलनं तद्गुणकारहारपरिधींश्च स्वदेशाक्षदेशान्तरं च गोलवित् परीक्षकगुरूपदेशतोऽवगम्य मध्यममानीय स्फुटीकृत्य चन्द्रच्छाया वक्ष्यमाणप्रकारेण गण्यतामिति ।

छायागणनस्य गोलयुक्तिसिद्धत्वाचदेवेह सुसूक्ष्मं वक्ष्यते । गुणहरयोः स्थौल्यान्मध्यमानां कालान्तरेषु स्थूलतासंभवात् तत्तत्कालभवैः परीक्षकैरेव ध्रुवा निबध्याः । स्वागाद्भिन्नेत्यनेन विक्षेपतत्कोट्योरानयनमुच्यते—

स्वागाद्भिन्नान्त्यकर्णाप्ता दोर्ज्याक्षेपो विधोर्वहेः ।
सौम्यो याम्योऽथ तत्कोटिस्त्रिज्यावर्गसत्पदम् ॥

**End:**

प्रत्यक्कपाले तु क्षेप्याः । अथैभिर्नतप्राणैः पूर्वं छायावाक्यानीतनतप्राणान् वियोज्य तदन्तरप्राणगतीः पूर्वोज्ञातद्वयोः संस्कृत्य ततो विक्षेपाचक्रमादिकं नीत्वा पुनस्तत्सिद्धायाः स्वकर्णाग्रहीनायास्त्रिज्याहननादिकं कर्मासकृत् कुर्यात् । कथम्? तथा पूर्वोक्तवदेव । किमर्थं तदसकृत्क्रियते? रवीन्दुभ्यां सिद्धयोः कालयोर्द्वयोः साम्यसिद्ध्यर्थम् ।

---

R. No. **5186.**

Paper. 10½ × 9½ inches. Foll. 11. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Nambiyattan Bhaṭṭadirippād, Avūr-mana, Oorakam, Cochin State.

(*a*) मोक्षोदयः.

MŌKṢŌDAYAḤ.

Foll. 1*a*—4*a*.

A small work in Anuṣṭubh stanzas explaining the means for getting final release from bondage.

Complete.

**Beginning:**

अथाचारं प्रवक्ष्यामि समासेन यथाश्रुतम् ।
मन्त्रजापी विनां येन न सिद्धिं समवाप्नुयात् ॥
मोक्षायैव प्रवर्तेत विजानन् पुरुषः सदा ।
स्मरन् गर्भनिवासादिदुःखजातं सुदुःसहम् ॥
अपारासारसंसारपारावारैकतारकः ।
गुरुः शास्त्रं च तद्वीमानुपतिष्ठेत्तयोर्वचः ॥
इदमुक्तं चाभियुक्तैस्तदेतत्संप्रदश्यते ।
एकस्तावद्गुरुमोक्षादनुष्ठानाच्छनैः शनैः ॥
जन्मना जन्मभिर्वापि सिद्धिदः समुदाहृतः ॥

**End:**

वर्णाश्रमसदाचारं तथापि न परित्यजेत् ।
श्रेयोर्थी पुरुषो विद्वान्दुस्तरेऽप्यतिसङ्कटे ॥

आचरन्नेवमनिशं भक्तिमान् यो हरौ गुरौ ।
अतन्द्रितो जपेत् ध्यायेत्सम्यग् ज्ञानं लभेत सः ॥
ज्ञानात्कर्मसु नष्टेषु भोगादारम्भकेष्वपि ।
पुनरारम्भकाभावाज्ज्ञानी कैवल्यमाप्नुयात् ॥

**Colophon:**

इति मोक्षोदयः समाप्तः ।

---

(b) कृष्णस्तुतिः.

KṚṢṆASTUTIḤ.

Foll. 4a—5b. Fol. 6 is left blank.
In praise of Lord Kṛṣṇa.
Complete.

**Beginning:**

सृजद्रक्षत्संहरद्यद्विश्वमात्मनि मायया ।
तद्ब्रह्म दद्याद्ब्रह्मास्मीत्यनुभूतिमयीं धियम् ॥
श्रीमत्यां द्वार्वत्यामासीनं कल्पपादपाधस्तात् ।
मणिमण्टपान्तरब्जे विद्याश्रयमाश्रये परं धाम ॥
ह्रीमत्या रतिमत्या रुक्मिण्या सत्यभामया चापि ।
ऊरुस्थितयोपासे श्लिष्टमविद्याश्रयमहं धाम ॥
क्लींकारात्मकमूर्तिः स्फूर्तिः सत्ता च सकलस्य ।
मयि महोऽञ्जननीलं सच्चित्सुखरूपमनिशमाशासे ॥

**End:**

मन्त्राक्षरारब्धमुखार्णपद्यां तद्ध्यानवाच्यनकटोक्तिहृद्याम् ।
मन्त्रार्णमालां दधतोऽनवद्यां यतो लभेरन् परमात्मविद्याम् ॥
व्रजरमणीरमणीयकटाक्षभ्रमरघटारभटीपरिशोभि ।
कपटशिशोरशिवप्रतिघातं मुखनवतामरसं मम कुर्यात् ॥

**Colophon:**

इति ध्यानपद्धतिः समाप्ता ।
श्रीमत्यां द्वारवत्यां नवकनकमये भूतले रत्नद्यो-
र्मध्ये कल्पद्रुमाधो विविधमणिलसन्मण्टपे सन्निविष्टम् ।

चक्रं शङ्खं च वेणुं नलिनमथ गदां योगमुद्रां दधानं
वन्दे संसिच्यमानं मणिमयकलशैर्वल्लभाभिर्मुकुन्दम् ॥

Fol. 5*b* contains Aṣṭākṣaridhyānaślōka.

---

R. No. **5187**.

Paper. 10½ × 9½ inches. Foll. 10. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippad, Nareri, Tritala, Malabar district.

(*a*) हस्तामलकश्लोकाः.

HASTĀMALAKAŚLŌKĀḤ.

Fol. 1.

Same work as that described under No. 4779 of the D.C.S. MSS., Vol. IX.

Complete in 12 stanzas.

---

(*b*) हस्तामलकश्लोकव्याख्या.

HASTĀMALAKAŚLŌKAVYĀKHYĀ.

Foll. 1*b*—10*a*. Fol. 10*b* is left blank.

A commentary on the above work: by Ānandaprakāśabhaṭṭāraka.

Complete.

**Beginning:**

जगन्मायया यत्र जन्मादिधर्मैर्नरीनार्ति रज्ज्वां भुजङ्गादिवत्तम् ।
सदानन्दबोधं यदुश्रेष्ठमेकं नतोऽस्म्यच्युतं सर्वधीसाक्षिभूतम् ॥

समधिगतसकलतत्त्वः सकलपरमयतिजननमितचरणकमलयुगलः सकलमुमुक्षुजनानुग्रहैकरसकृततनुपरिग्रहः परमकृपालुहृदयो दृढतरनिशिततर्ककुलिशप्रशमितसुगतविवसनादिसकलदुस्तर्कदुर्दान्ततार्किकपक्षो भगवान् भगवत्पादमुनिवरोऽवनितले किल चरन् समस्तश्रुतिमस्तकप्रशस्तनिरस्तसमस्तदुःखनिरतिशयसुखप्रदब्रह्मात्मैकत्वविद्याभिजनसकलवेदान्तवाक्योपकरणभूतन्यायकलापप्रदर्शकशारीरकभाष्यप्रभृत्यनेकग्रन्थविस्तरं विरच्य तत्संप्रदायचिकीर्षया कदाचित् षट्कर्मनिरतसहस्रत्रयपरिगणितद्विजवरपरिग्रहे श्रीवल्ल्याख्याविख्यातग्रामवरे विद्याविनयसंपन्नस्य कस्यचिद् द्विजवरस्य सुतत्वेनाविर्भूतचरमदेहं

वामदेववज्जन्मान्तरानुष्ठितशमदमश्रवणमनननिदिध्यासनादिसाधनमुपजातसहज-सम्यग्ज्ञानसंपन्नमुपरतबाह्यवागादिव्यापृतिं स्वजनैर्मूकत्वेन बहिष्कृतं कीदृशोऽयमिति व्याकुलहृदयेन पित्रोपदर्शितं शशिसदृशवदनमतिप्रसन्नदृष्टिं कंचित् वटुमवलोक्य कस्त्वमिति पर्यपृच्छत् । स च पृष्टो वटुरिहानुचितं दुस्तर्कपदमित्यवलोक्य त्वरमाणहृदयो निमित्तमित्यादिद्वादशभिः श्लोकैः स्वानुभववदन्येषामप्यनुभवो भूयादिति परमकृपया यथावदात्मानमाचचक्षे ।

* * * *

निवृत्ताज्ञानतत्कार्यानर्थनिरतिशयानन्दापरोक्षस्वरूपं तदेव प्रयोजनम् । एतैर्यथोक्ताधिकार्यादिभिर्विशिष्टाधिकारिविषयसंबन्धप्रयोजनवन्तस्तावदिमे हस्तामलकाख्या श्लोका यथाशक्ति गुरौ भक्तिमात्रप्रेरितेन मया मन्दमतिमुमुक्षुव्युत्पादनाय व्याख्यायन्ते । तत्राद्यश्लोकेन प्रत्यगात्मनोऽन्तःकरणबहिष्करणादिप्रवृत्तिनिमित्तत्वकथनेन ततो व्यतिरेकमुपपाद्य निरुपाधिकनित्यचैतन्यस्वरूपं चोक्त्वा परमात्मत्वं प्रदर्शयति—निमित्तमिति । अत्राहमात्मेति संबन्धः ।

**End :**

इह संसारमण्डले विष्णो हे व्यापनशील सकलस्थिरचरशरीरेषु नित्यशुद्धमुक्तसत्यस्वभावः प्रत्यगात्मैक एवेति श्रुतिस्मृतियुक्तिबलात् प्रतिपादितं स्मरेत्यभिप्रायः ।

विज्ञायैव परात्मबोधविषयं दार्ढ्यं शिशोर्वाक्यतो
न स्थातुं त्वयि योग्य इति तत्पित्रे कथित्वा वचः ।
स्वीकृत्यैव च तं स्वकीयपरिषन्मध्ये प्रविश्यामुतः
पृथ्वीं सोऽपि ततश्चार भगवत्पादाह्वयो नो गुरुः ॥
यद्वाग्वज्रनिपातभग्नमतयो भीता निरस्तोत्तरा
याताः क्वापि कुतर्किता यतिजनाः शान्त्यादिसंपद्युताः ।
यत्पादाब्जरजः समेत्य सुतरां जातस्तु निर्वाणभाक्
तान्वन्देऽहमनर्घकीर्तिभगवत्पादैकशिष्यान् मुनीन् ॥
व्याख्याता श्रीमदानन्दप्रकाशमुनिना त्विमे ।
हस्तामलकवच्छ्लोका हस्तामलकसंज्ञिताः ॥

**Colophon :**

इति श्रीमदानन्दप्रकाशभट्टारकप्रणीता हस्तामलकटीका समाप्ता ॥

## R. No. **5188.**

Paper. 10¼ × 9½ inches. Foll. 44. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Trivikraman Nambūdirippad, Tennamangalam-mana, Valiyankad, Malabar district.

धर्मशास्त्रविषयः.

DHARMAŚĀSTRAVIṢAYAḤ

Foll. 1*a*–43*a*. Foll. 43*b* and 44 are left blank.

Treats of the following subjects and also purports to prove that the customs observed in Malabar are justifiable and not opposed in any way to the Dharmaśātras.

Incomplete.

Deals with the following subjects :—

१. धर्मपदार्थविचारः.
२. अधर्मपदार्थविचारः.
३. तत्प्रमाणविचारः.
४. वर्णोत्पत्तिविचारः.
५. वर्णधर्मविचारः.
६. ब्रह्मचारिधर्मविचारः.
७. स्नातगृहस्थयोर्धर्मविचारः.
८. वानप्रस्थधर्मविचारः
९. सन्यासिधर्मविचारः.
१०. ऐकाश्रम्यविचारः.
११. समुच्चयपक्षविचारः.
१२. विकल्पपक्षविचारः.
१३. अनाश्रमिविचारः.
१४. कन्याकन्ययोर्विचारः.
१५. दारपदार्थविचारः.
१६. साधारणस्त्रीविचारः.
१७. ब्राह्मणभेदविचारः.
१८. क्षत्रियभेदविचारः.
१९. शूद्रभेदविचारः.
२०. सङ्करजातिविचारः.
२१. ब्रह्मचर्यकालनिवृत्तिविचारः.
२२. स्नातकविचारः.
२३. विवाहविचारः.
२४. विवाहकालविचारः.
२५. कन्याविवाहकालविचारः.
२६. पुत्रभेदविचारः.

Complete.

**Beginning :**

कर्मजन्योऽभ्युदयनिःश्रेयसहेतुरपूर्वाख्य आत्मगुणो धर्मः । अत एव धर्मः क्षरति कीर्तनादित्युक्तम् । धर्मस्त्वनुष्ठित इत्यादिव्यवहारात् तज्जनकक्रियायामपि धर्मशब्दप्रयोगः । स च धर्मः स्थूलः सूक्ष्मश्चेति द्विविधः । अत एव पराशरस्मृतौ—

धर्मस्य निर्णयं प्रापि सूक्ष्मं स्थूलं च विस्तरात् ।

इत्युक्तम् । तत्र सन्ध्यावन्दनादिः स्थूलः । द्रौपदीविवाहादिः सूक्ष्मः । स च लक्ष्यैकचक्षुष्कैः व्यासादिभिरेव ज्ञायते न तु लक्षणैकचक्षुष्कैरस्मदादिभिरिति बोध्यम् ।

सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च ।
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥
इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ॥
प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् ।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च च ॥

इत्येतैर्मनुवचनैः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च द्विविधो धर्म उक्तः । केरलदेशे तु आढ्यैः निवृत्तिलक्षण एव धर्मोऽनुष्ठीयते । स च परमेश्वरेण सनकादिभ्य उपदिष्टः ; प्रवृत्तिलक्षणस्तु प्रजापतिभ्य इति बोध्यम् ।

**End:**

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥
कालेऽदाता पिता वाच्यो वाच्यश्चानुपयन् पतिः ।
मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता ॥

इत्यादिमनुवचनेन पितरि मृते पुत्राणामेव मातृसंरक्षणकर्तृत्वं, निवृत्तेरबीजम् । मातुर्जीवति वेच्छतीति गौतमस्मृत्या पितुरिच्छायां सत्यां तस्मिन् जीवत्यपि विभाग उक्तः । इच्छायां सत्यामपि रजसि मातुरनिवृत्तिरेव । माताप्यंशहारिणीति पक्षेऽपि पुत्राणामेव तत्संरक्षणकर्तृत्वं, तदभावे सपिण्डादीनाम् । न कदापि स्त्रीणां स्वातन्त्र्यम् । अत एव बालया वा युवत्या वेत्यादि चरितार्थम् ।

---

R. No. 5189.

Paper. 10⅛ × 9¼ inches. Foll. 8. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Narayana Nambūdirippad, Pūmalli-mana, Chalasseri, Malabar district.

(a) एकादशीमाहात्म्यम्.

EKĀDAŚĪMĀHĀTMYAM.

Foll. 1a—3b.

Similar to the work described under No. 8255 of the D.C.S. MSS., Vol. XVI.

Complete.

**Beginning :**

यस्मिन् काले समभ्यर्च्य शीघ्रं तुष्यति केशवः ।
तमहं संप्रवक्ष्यामि शृणु राजन् समाहितः ॥
उपोष्यैकादशीं पुण्यां द्वादश्यां भक्तिसंयुतः ।
योऽर्चयेद्विधिवद्विष्णुं स वै विष्णुप्रियो भवेत् ॥
श्रुत्वैतद्वचनं तस्य भक्तिनम्रा . . . . ।
अम्बरीषोऽब्रवीद्भूयो वसिष्ठं जपतां वरम् ॥
एकादशी कथं . . . . ष्या सर्वपावनी ।
कथं वाराध्यते विष्णुर्द्वादश्यां तद्वदस्व मे ॥
ततस्तं प्रणतं प्राह वसिष्ठो वाग्विदां वरः ।
नमस्कृत्य हृषीकेशं ब्रह्मणोक्तं यथा पुरा ॥
शृणु राजन् यथोपोष्या पुण्या ह्येकादशी तिथिः ।
आराधनविधिश्चापि विष्णोरद्भुतकर्मणः ॥
एकादश्यां सिते पक्षे कृष्णे वा विधिपूर्वकम् ।
उपोष्याभ्यर्चयेद्देवं . . . तत्फलं भवेत् ॥

**End :**

उपोष्ये हि तिथौ तत्र विष्णुप्रीणनतत्परैः ।
लुप्यते द्वादशी चैव तत्रैवं विधिरुच्यते ।
उपोष्य हि तिथौ तत्र विष्णुप्रीणनतत्परैः ॥
पारणं च त्रयोदश्यां द्वादशद्वादशीफलम् ।
अन्य . . . . राजन् द्वादश द्वादशीं हुनेत् ॥
एवं जप्त्वा विधानेन . . . . . . . . रेत् ।
अम्बरीषस्तु तच्छ्रुत्वा वसिष्ठाद्व्रतमुत्तमम् ॥
चकार . . . . . यथा तन्मे निशामय ॥

**Colophon :**

एकादशीमाहात्म्यं संपूर्णम् ।

(b) कामप्राभृतकम्.

KĀMAPRĀBHṚTAKAM.

Foll. 4a—7a. Fol. 7b is left blank.

Same work as that described under R. No. 2727 ante. By Kēśava. Incomplete.

---

## R. No. 5190.

Paper. 10¾ × 9¾ inches. Foll. 38. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Kṛṣṇa Vāriyar, Nelinnattūr Vāriyam, Shoranore, Malabar district.

कंसवधः.

KAṀSAVADHAḤ.

Foll. 1a—37a. Foll. 37b and 38 are left blank.

A poem in Prakṛt describing the story that led to the destruction of Kaṁsa by Śrī-Kṛṣṇa: by Rāmapāṇivāda.

Complete in four Sargas.

**Beginning:**

सिरीअ णाहो सिहिपिञ्छसेअरं सिणिद्धगोपीणअणंचलंचिअम् ।
सअं जसोआतणअत्तणं गओ विहू विहूसावइ गोववाडिअम् ॥

श्रियो नाथः शिखिपिञ्छशेखरं स्निग्धगोपीनयनाञ्चलाञ्चितम् ।
स्वयं यशोदातनयत्वं गतो विभुर्विभूषयद्गोपवाटिकाम् ॥

कहं खु से कंसवहं सुहावहं सुहं व गॆह्णेद वळे सहीअणा ।
सआ गुरूणं चळणे समस्सिओ भणामि जं भत्तिगुणेण णोण्णिओ ॥

कथां खल्वस्य कंसवधं सुखावहं सुधामिव गृह्णीत वले सुधीजनाः ।
सदा गुरूणां चरणौ समाश्रितो भणामि यां भक्तिगुणेन नुन्नः ॥

अहेक्कदा चंकमिरो वअंगणे दिणंतगोदोहणवाउडंगणे ।
महग्गओ सोहिसरंतमग्गओ गदग्गओ दक्खइ णंदिणीसुअं ॥

अथैकदा चङ्क्रमणशीलो व्रजाङ्गणे दिनान्तगोदोहनव्यापृताङ्गने ।
महाग्रजः सोऽभिसरन्तमग्रतो गदाग्रजोऽद्राक्षीन्नन्दिनीसुतम् ॥

**End:**

इअ मुदिअमणाणं ताणमासीहि ताहे
सरसमअसिरीहिं चन्दसूरा व सूरा ।
समहिअमहिरामं रामकहा पसण्णा
सअळजणमणोग्गं ळंभिआ कंवि ळच्छि ॥
इति मुदितमनसोस्तयोराशीभिस्ताव-
च्छरत्समयश्रीभिश्चन्द्रसूर्याविव शूरौ ।
समधिकमभिरामां रामकथा प्रसन्नौ
सकलजनमनोज्ञां लम्भितौ कामपि लक्ष्मीम् ॥

**Colophon:**

इअ रामपाणिवाअकए कंसवहे चउत्थो सग्गो ॥

समत्तमिणं कव्वं ॥

---

R. No. **5191.**

Paper. 10¾ × 9½ inches. Foll. 6. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Tippan Nambūdirippad, Ponnūrkotta-mana, Travancore State.

**प्रकीर्णसंग्रहः.**

**PRAKĪRṆASAṄGRAHAḤ.**

Foll. 1*a*—5*b*. Fol. 6 is left blank.

A compilation of details required for the preparation of Hindu calendars.

Complete in three Adhyāyas.

**Beginning:**

"यैरंशकैस्सर्वगुहाशयस्य विष्णोस्सदा व्योमनि सञ्चरद्भिः ।
विदन्ति कालस्य शुभाशुभत्वं कुर्वन्तु ते मङ्गलमाश्रितानाम् ॥
कोलम्बवर्षागतवत्सरान्ते ये ते सभास्थानयुताश्शकाब्दाः ।
चर . . लाब्धास्तु कलेर्गताब्दाः प्रज्ञाङ्गनोनाः प्रभवादयस्युः ॥
शकाब्दशास्त्रार्थवधात्तिथीशैराप्तं दिनाद्यं कलिनाशपुण्यैः ।
गुर्वक्षराद्यैस्सहितं सुतष्टं विवस्वतस्सङ्क्रमणं ध्रुवं स्यात् ॥

लोकादिवाक्यानि युतध्रुवाणि देशान्तरोक्तैरसुभिर्नयन्नैः ।
हीनानि भानोर्वृषभादिराशिसङ्क्रान्तिकाला रविवासराद्याः ॥

* * * *

**Colophon :**

इति प्रकीर्णप्रकाशे प्रथमोऽध्यायः ।

**End :**

दिनरात्रिप्रमाणघ्नास्तत्तद्गुलिकनाडिकाः ।
नागभक्तास्स्फुटास्ताभिर्लग्नवत्तत्स्फुटं नयेत् ॥

कुर्याल्लिप्तासु भेदं चरमपि तपने सायनांशे हि रात्रौ
षड्भाढ्ये चास्य भागे क्षिपतु गतघटीः षड्गुणाः काललग्नम् ।
तस्मिन् कालाख्यलग्ने मुहुरपि चरलिप्तासु भेदौ च कुर्या-
द्व्यस्तं तत्राविशिष्टे तदयनरहितं केवलं स्याद्धिलग्नम् ॥

**Colophon :**

इति प्रकीर्णसंग्रहे तृतीयोऽध्यायः ॥

---

## R. No. 5192.

Paper. 10½ × 9½ inches. Foll. 16. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Tippan Nambūdirippād, Ponnūrkotta-mana, Travancore State.

### गोलदीपिका.

### GŌLADĪPIKĀ.

Foll. 1a—16a. Fol. 16b is left blank.

Similar to the work described under R. No. 5151 ante. By Paramēśvara.

Complete in four Adhyāyas dealing with the following subjects :—

१. गोलनिबन्धनविधिः.
२. ग्रहचरनिरूपणम्.
३. भूम्यादिचिन्तनम्.
४. Nil.

**Beginning:**

वन्दे किशोरं पार्वत्या अङ्कसंस्थं गजाननम् ।
स्तन्यपानरतं कल्पद्रुमस्याधो विनायकम् ।
नीलायास्सौम्यतीरेऽब्धेः कूलस्थः परमेश्वरः ।
सङ्क्षेपाद्गोलसंस्थानं वक्ति बालाय भार्गवः ॥
अत्र ऊर्ध्वयाम्यसौम्यगमिह वृत्तं दक्षिणोत्तराख्यं स्यात् ।
तन्मध्येऽप्यथ ऊर्ध्वं वृत्तं पूर्वापरं तु घटिकाख्यम् ॥
बहिरनयोस्तिर्यक् स्याच्चतुराशास्स्वस्तिकं परं वृत्तम् ।
विषुवत्संज्ञितमेतत्त्रितयं खरसाङ्कमत्र घटिकाख्यम् ।
खरसाम्यङ्कमिहान्यत् द्वितयं तद्वत्पुनः परावृत्तम् ।
पूर्वापरस्वस्तिकगमथ ऊर्ध्वाभ्यां च सौम्यदक्षिणयोः ॥
जिनभागे वर्ध्यापाद्यमाख्यं दक्षिणोत्तरे वृत्ते ।
घटिकाख्योभयपार्श्वेऽभीष्टकान्त्यन्तरे ततस्तद्वत् ॥

**End:**

यस्मिन् काले तस्मिन् काले हि गतिनिवृत्तिरर्कस्य ।
ऋणमथवा धनमिति च प्रकल्प्यते तद्धि गणकयुक्तिविदा ।
समरेखायाः पश्चादष्टादशयोजनान्तरे ग्रामे ।
स्वरकृतषट्तुल्लिताक्षे वसता शाकेऽक्षषड्त्रिचन्द्रमिते ॥
परमेश्वरनाम्नेयं वदनभुवा गोलदीपिका रचिता ।
तिष्ठतु गणकवराणां द्विजमुख्यानां गदालये सुचिरम् ॥

**Colophon:**

इति गोलदीपिकायां चतुर्थोऽध्यायः ॥

---

R. No. **5193.**

Paper. 10¼ × 9¼ inches. Foll. 78. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Śrī-Kumāran Nambūdirippād, Kaṭṭumadam-mana, Andathod, Malabar district.

क्रियाकाण्डक्रमावलिः.

KRIYĀKĀṆḌAKRAMĀVALIḤ.

Foll. 1*a*—75*b*. Fol. 76 is left blank.

On the details of procedure to be observed in connexion with the worship of god Śiva: by Sōmaśambhu.

Contains the following subjects :—

१. नित्यार्चनविधिक्रमः.
२. पवित्रकविधिः.
३. दामपर्वविधिः.
४. प्रायश्चित्तविधिः.
५. सामान्यदीक्षा.
६. विशेषदीक्षा.
७. निर्वाणदीक्षा.
८. प्रतिष्ठा.
९. विद्याविशोधनम्.
१०. शान्तिविधिः.
११. दीक्षानिर्वाणम्.
१२. आचार्यदीक्षा.
१३. कृतश्राद्धादि.
१४. आचार्यलक्षणम्.
१५. शिष्यलक्षणम्.

**Beginning:**

विश्वबोधविधातारं विश्वविज्ञानविग्रहम् ।
विश्वरूपं परं नत्वा विश्वेशं शिवमव्ययम् ॥
वक्ष्ये . . . . . . . . . . . . . . ।
. . . त्यादिकं वक्ष्ये क्रमबोधविवृद्धये ॥
प्रातरुत्थाय सञ्चिन्त्य शिवाय शिवमक्षरम् ।
उत्सृजेन्मलमूत्रादि गत्वा देशं यथोचितम् ॥
उत्तराभिमुखो मौनी दिवा सन्ध्यासु सर्वदा ।
दक्षिणाभिमुखो रात्रौ नासाप्रव्यग्रलोचनः ॥
छन्नमूर्धैकचित्तस्तु तृणच्छन्नमहीतले ।
दक्षकर्णोपवीती च द्विजातीनामसंमुखः ॥
ततस्तृणैरयज्ञाङ्गैर्मृज्याल्लोष्टेन वा गुदम् ।
न तु गोमयपाषाणैर्दात्(रु)भिश्च कदाचन ॥
विशुद्धां मृदमादाय तां निधाय जलान्तिके ।
तया सान्तरया पश्चात् पयोभिश्शौचमाचरेत् ॥

* * * *

पुनस्सुप्त्वा त(स)मुत्थाय प्रातस्सञ्चिन्त्य शङ्करम् ।
यथोद्दिष्टं क्रियाकाण्डं सर्वं प्रत्यहमाचरेत् ॥

परोपकारशीलेन श्रीमता सोमशम्भुना ।
क्रियाकाण्डक्रमावल्यां कृतो नित्यविधिक्रमः ॥

**End:**

**Colophon:**

इति सूक्ष्मतन्त्रे आचार्यलक्षणपटलः ।

* * * *

तस्यैवानुग्रहेणैव कुर्यादोत्रान्तरेण वा ।
विद्या[वि]हीनोऽपि तन्मन्त्रैः कुर्याद्वा पूर्वमागतः ॥
पितुश्च करणं यत्स्यात्तस्य पुत्रेण तत्कृतम् ।
पुत्राभावे तु दौहित्रस्तदभावे . . . . ।
. . . . . . . . . कुर्याद्भिन्नक्रियां चिरात् ॥
स्पष्टकाले च एवं स्याद्विस्पष्टे देवताक्षया ।
एवमेव प्रकारेण . . . . . . . . . ।
. . . . . . . . . राजराष्ट्रविनाशनम् ॥
ग्रामादीनां विनाशाय कर्तृनाशो न संशयः ।
शिष्यादेर्लक्षणं प्रोक्तं . . . . . . . . . ॥

**Colophon:**

इति शिष्यादिलक्षणपटलः ॥

---

## R. No. 5194.

Paper. 10¼ × 9¼ inches. Foll. 36. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Kūḍalūr Nārāyaṇa Nambūdirippād, Nareri, Tritala, Malabar district.

करणपद्धतिः, केरलभाषासहिता.

KARAṆAPADDHATIḤ WITH MALAYALAM MEANING.

Same work as that described under R. No. 1310 ante and with meaning in Malayalam.

Breaks off in the seventh Adhyaya.

**End:**

एकद्व्यादिसङ्ख्याघ्नत्रिज्यावर्गनयांशवः ।
धनमूलं हि चापज्या स्वसङ्ख्यानाविलिप्तकम् ॥

ത്രിജ്യാവൎഗ്ഗത്തെ വെച്ചു ഒന്നു രണ്ടു മൂന്നു തുടങ്ങിയുള്ള സംഖ്യകളെക്കൊണ്ടു ഗുണിച്ചു പത്തിൽ ഹരിച്ചു ഫലത്തെ എല്ലാം ചെയ്യുന്നതിൽ ഇഷ്ടസംഖ്യയെ വിലിപ്തയിൽ കളഞ്ഞാൽ ഗ്രഹണാദികളാകുന്നു തുടങ്ങിയുള്ള ചാപജ്യാവാകുന്നതു. ഇതി കരണപദ്ധതിവ്യാഖ്യായാം ഷഷ്ഠോദ്ധ്യായഃ സമാപ്തഃ.

अथ सप्तमोऽध्यायः ।

भानोर्गानं विधोः स्थानं स्फुटवृत्तकलास्सदा ।
वन्द्यो दिव्यो गुणी कृष्णस्तनुर्मानी कलाधरः ॥
स्थानं दानं तपो मान्यं भानुः प्राज्ञो यमस्समः ।
धनी लोको धनं दानं धीमान् परिधिलिप्तिकाः ॥
मन्दशीघ्रकमात्केन्द्रस्योजयुग्मपदादिगाः ।
पृथगेकैकपादोक्ता असुरैरपवर्तिताः ॥

ആദിത്യന്നു ഗാനം. ചന്ദ്രന്നു സ്ഥാനം ഇവ എല്ലായ്പോഴും സ്ഫുടങ്ങളായിരിക്കുന്ന വൃത്തകലകളാകുന്നതു. ഇവ അസുരനെക്കൊണ്ടു അപവൎത്തിക്കപ്പെട്ടിരിക്കുന്നു. കുജാദികളുടെ മന്ദകേന്ദ്രത്തിന്റെയും ശീഘ്രകേന്ദ്രത്തിന്റെയും ക്രമത്താലെ ഓജപദാദിയെയും യുഗ്മപദാദിയെയും ഗമിച്ചിരിക്കുന്ന വൃത്തകലകൾ ഓരോന്നുക്കു വെവ്വേറെ ഒരൊ പാദംകൊണ്ടു (ഓജപദാദിയെയും യുഗ്മപദാദിയെയും ഗമിച്ചിരിക്കുന്ന വൃത്തകലകൾ ഒരൊന്നുക്കു വെവ്വേറെ ഒരു പാദംകൊണ്ടു) ചൊല്ലപ്പെട്ടിരിക്കുന്നു. ഇവയും അസുരനെക്കൊണ്ടു അപവൎത്തിക്കപ്പെട്ടിരിക്കുന്നവ, വന്ദ്യ, എന്നും ദിവ്യ എന്നും കേന്ദ്രങ്ങളുടെ ഓജയുഗ്മപദാദികളിൽ സ്ഫുടങ്ങളായിരിക്കുന്നു എന്നും മന്ദകേന്ദ്രത്തിന്റെ ഓജപദാദിയിങ്കലും യുഗ്മപദാദിയിങ്കലും സ്ഫുടങ്ങളാകുന്നു. ഗുണി എന്നും കൃഷ്ണ എന്നും ശീഘ്രകേന്ദ്രത്തിന്റെ ഓജപദാദിയിങ്കലും യുഗ്മപദാദിയിങ്കലും സ്ഫുടങ്ങളാകുന്നു. ഇവ്വണ്ണം.

---

R. No. **5195.**

Paper. 10¾ × 9¼ inches. Foll. 114. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Śrī-Kumārar Nambūdirippad, Kaṭṭumadam-mana, Andathod, Malabar district.

**चातुर्मास्यव्रतकल्पवल्ली.**

CĀTURMĀSYAVRATAKALPAVALLĪ.

Foll. 1*a*—118*a*. Foll. 118*b* and 114 are left blank.

Same work as that described under No. 8807 of the D.C.S. MSS., Vol. XVI. By Virūpākṣa, son of Gaṅgāmba and Rāyaparya and Minister of Harihara, King of Vijayanagar.

Deals with the following subjects:—

| | |
|---|---|
| १. नानास्नानव्रतानि. | ५. प्रतिपदादितिथिव्रतानि. |
| २. देवपूजाव्रतानि. | ६. वारव्रतानि. |
| ३. कृच्छ्रव्रतानि. | ७. स्वर्णादिदानव्रतानि. |
| ४. वस्तुवर्जनव्रतानि. | ८. अन्नदानव्रतानि. |

**Beginning:**

शुण्डाकृष्टमुमाकुचाद्बहु पयः पीत्वा गजास्यश्शिशुः
सन्तुष्टः सुतमेतदन्यकुचकरस्कन्दाननेष्वर्पयन् ।
दुग्धं मुग्ध पिबानुज क्षुधमितस्तं भीतिहार्दोद्वदन्
हर्षं वर्षयति स्वमातृमनसि स्वस्तिप्रदः सोऽस्तु वः ॥

आरादुद्धतदुग्धमञ्जुलहरीनिष्यन्दमन्दोत्पत-
द्बिन्दुव्रातयुतं च तारकवियच्छायं तदीयं वपुः ।
मुक्ताभिर्विरलाभिरञ्चितमिवाभातीन्द्रनीलस्थलं
श्रेयः क्षीरसमुद्रमध्यशयनो विष्णुश्च पुष्णातु वः ॥

* * * *

प्रत्यर्थिक्षोणिपालप्रणतिपराशिरःश्रेणिमाणिक्यरोचिः-
पालीव्यालीढपादो हरिहरधरणीजानिरस्ति प्रशस्तः ।
यद्धाटीघोटकानां कुवलयवलयोद्धूतधूलीवितानै-
राचान्तो वीचिमाली तदरिवरवधूबाष्पपूरैरपूरि ॥

काशं वीतं प्रकाशं कलयति कुरुते कुन्दमौज्ज्वल्यमन्दं
फेनं लीनं विधत्ते रचयति रुचिभिः . . . . . . . ।
(कै)लासं हीनभासं हसति निजरुचा स्पर्धमा . . . .
हारं दूरं निरुन्धे हरिहरनृपतेरुज्ज्वलः कीर्तिपूरः ॥

भारद्वाजमुनेः पदस्य तपसामस्ति प्रशस्य . .
. . . . . . . . रस्तमहिमा जातः प्रतीतो गुणैः ।

तस्माद्रा(त्क्षी)रनिधेरिवेन्दुरजनि श्रीरायपार्यः कृती

. . . . . . . . . . . . . . . . . . . . . . . . ॥

* * * *

श्रीमद्रायपमन्त्रिणः सुरतरून्यक्कारभाविश्रियो
दूरध्वस्तजनार्तयः कृतदिशाविस्फूर्तयः कीर्तयः ।
हाराळीलसितं हराट्टहसितं (कुन्दा)वलीभासितं
हैरम्बं दशनं हरेश्च शयनं हास्यास्पदं कुर्वते ॥

गङ्गाम्बायामभूत्तस्य स्कन्दवद्द्रावयन् परान् ।
विरूपाक्षमहामात्यो विरूपाक्षपदार्चकः ॥

भोगे सुत्रामकल्पः सकलगुणनिधिः श्रीविरूपाक्षनामा
विद्यानां पारदृश्वा विमलमतिबु(बु)धश्रेणिनिर्व्याजबन्धुः ।
दुर्जातः पारिजातस्तृणकवलमुखी कामधेनुः प्रवृत्ता
यत्पाणित्यागशीलिन्यभवदनुदिनं सोऽपि कर्णोऽधमर्णः ॥

धाटीदक्षस्वघोटीखुरपुटपटलीपाटितक्ष्मातलोद्य-
द्धूलीपालीकरालीकृतसकलदिशोद्वीक्षणक्षीणबुद्धीन् ।
भ्रान्त्यान् स्वं धाम हित्वा सभयमभिमुखं प्रस्थितान् दिग्विभाजान्
शत्रूनत्रायतायं कति कथय कृती श्रीविरूपाक्षवर्यः ॥

शेषाय स्पृहयन्ति तद्गुणगणान् वक्तुं विपश्चिज्जनाः
तद्दानग्रहणेषु भूसुरगणास्ते कार्तवीर्याय च ।
द्रष्टुं यन्मुखचन्द्रमण्डलमये पौराः पुनर्वज्रिणे
सोऽयं रायपनन्दनो विजयते श्रीमान् विरूपेक्षणः ॥

तुलापुरुषमुख्यानि दानानि कृतवान् विभुः ।
महाराजव्रतादीनि व्रतान्यपि महान्ति यः ॥

तस्माद्विरूपाक्षविभोः (प्रसादा)देषाविरासीत् व्रतकल्पवल्ली ।
ऋषिप्ररूढा तु वनप्रवृद्धा मोदप्रदा चागमसङ्गमेव ॥
तस्यां चतुर्मास्युपलक्षितायामादौ मुरारेः शयनं पयोधौ ।
स्वापस्य हेतुं शयनीतिथेश्च प्रशंसनं बोधनवासरश्च ॥

ततो दोषव्रताभावे व्रतवैकल्यदूषणम् ।
प्रायश्चित्तं व्रते भङ्गे कालांश्च नियमकर्म ॥

* * * *

मार्कण्डेय उवाच—

अथ स्वपिति घर्मान्ते देवदेवो जनार्दनः ।

लक्ष्मीसहायः सततं शेषपर्यङ्कमाश्रितः ॥

एकादश्यामषाढस्य शुक्लपक्षे जनार्दनम् ।

देवाश्च तुष्टयश्चैव स्तुवन्ति दिनपञ्चकम् ॥

**End:**

ब्रह्मकैवर्ते—

एवं व्रतानि पुण्यानि जन्मदुःखहराणि च ।

हरिमुद्दिश्य चीर्णानि . . . . प्रदानि च ॥

भविष्योत्तरे—

एवमादिव्रतैः पार्थ तेषामायाति तोषितः ।

केशवः क्लेशहा कृष्णः कंसकेशिनिषूदनः ॥

प्रबुद्धेऽस्मिन् प्रवर्तन्ते क्रियाः सर्वाश्शुभोदयाः ।

विवाहव्रत . . . . . . . . . . . . ।

संस्कारदीक्षणं यज्ञ . . . . . . . . . ॥

यज्ञो गृहप्रवेशश्च प्रतिष्ठा देवभूभृताम् ।

**Colophon:**

इति श्रीराजाधिराजराजपरमेश्वरश्रीवीरहरिहरमहाराजस्य महामात्येन श्रीरायपार्यतनयेन श्रीविरूपाक्षेण विरचितायां चातुर्मास्यव्रतकल्पवल्ल्यामन्नदान व्रतानि ।

---

R. No. **5196.**

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 26. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of Nīlakaṇṭha Nambūdirippad, Kaṇṇūr-mana, Ottapalam, Malabar district.

लिङ्गप्रतिष्ठाविवरणम्.

LIṄGAPRATIṢṬHĀVIVARAṆAM.

A commentary on a certain work which deals in 21 chapters with the procedure to be adopted in consecrating Śivaliṅgas for purposes of worship. The name of the text is not known.

Complete.

**Beginning:**

बुद्धेरित्यादि। यत्तत्वं यस्य तत्त्वं वास्तवं रूपम् आत्मभुवः ब्रह्मणः बुद्धेरभूमिमविषयमाहुः बुधाः पण्डिताः। तर्हि कथं सङ्गृह्यते इत्यत आह—भेदो यस्येति। यस्य शिवस्य भेदः बहुधा लक्ष्यते इन्द्रचन्द्रादिघटपटादिरूपेण वा। न च स भेदो वास्तव इत्याह—औपाधिक इति। उपाधिभेदाद्भेदः न स्वभावतः इत्यर्थः। तस्मै नम इति लिङ्गप्रतिष्ठाविधौ या याः क्रियाः आगमेषु विहितास्तास्ता सङ्क्षिप्य वदामीत्यनेन सङ्क्षेपोक्तिः। प्रयोज . . . . . . . . कः। आर्यावर्तेति।

हिमवद्विन्ध्ययोरन्तर्यः प्राग्विनशनादपि।
प्रत्यगेव प्रयागा(च्च मध्यदेशः प्रकीर्तितः)।
(आसमुद्रा)त्तु वै पूर्वादासमुद्रात्तु पश्चिमात् ॥

* * * *

आचार्ययजमानावात्मरूपौ, मन्त्रतन्त्रावन्तरात्मरूपौ। तैरुपेय ईश्वरः परमात्मेति तेषां भेदाभावः। शर्वाय गायत्र्यात्मने नमः इत्यादयो मन्त्राः मूर्तिपेषु आचार्ये मूलमन्त्रश्च.

**Colophon:**

इति प्रथमः।

**End:**

क्षुद्रमन्त्रैः प्रयुक्ते व्यभिचरणविधौ सन्मन्त्रैरेवाभिचारकर्मप्रयुक्ते वा पाषण्डिमन्त्रैः क्षपणकमन्त्रैः दूर्वामध्वाज्यक्षीरयुक्तो हालहलो मकारः। ओं क्ष्मीं पशु हुं फट् हं वौ षट्, पूर्णाहुतौ नवात्ममन्त्रं विरूपाक्षः, अघोरः शिवपुरं चाक्रिमाकुलं कोट्टु मण्टपं च तटाकं च पकुलं भवत्रा तस्य पितामहः।

**Colophon:**

इत्येकविंशतिः। समाप्तमिदं विवरणम्।

---

### R. No. 5197.

Paper. 10½ × 9¼ inches. Foll. 42. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of Pāliyam Library, Chennamangalam, Parūr, Travancore State.

पञ्चप्रश्नतन्त्रम्.

## PAÑCAPRAŚNATANTRAM.

Foll. 1*a*—41*a*. Foll. 41*b* and 42 are left blank.

Forms a part of the Pāñcarātrāgama. Herein the divine sage Nārada requests Nārāyaṇa to teach him the procedure on the worship of goddess Lakṣmī in her five forms and Nārāyaṇa teaches him accordingly.

Contains the following 10 Paṭalas :—

१. आराधनपटलः.
२. मन्त्रोच्चारणपटलः.
३. सर्वमङ्गलार्चनापटलः.
४. मन्त्रोद्धारपटलः.
५. पूजानिकायपटलः.
६. मण्डलपटलः.
७. दीक्षापटलः.
८. स्नपनपटलः.
९. अधिवासनपटलः.
१०. प्रतिष्ठापटलः.

Complete.

**Beginning :**

कैलासशिखरे रम्ये गन्धमादनसंज्ञिते ।
गङ्गातोयसमाकीर्णे देवगन्धर्वसेविते ॥
सुगन्धकुसुमास्तीर्णे शुद्धस्फटिकसप्रभे ।
दुष्टैः परिवृते देशे शिष्टैश्च परिसेविते ॥
तपस्यभिरतं देवं बदरीनिलयं प्रभुम् ।
वासुदेवं महायोगिं शङ्खचक्रगदाधरम् ॥
पुण्डरीकाक्षमक्लिष्टं सर्वस्य जगतः पतिम् ।
द्रष्टुं भक्त्या जगन्नाथमागतो भगवानजः ॥

* * * *

तस्मिन्नवसरे किंचिद्देवकार्यमुपस्थितम् ।
शत्रुश्च भूत्वा ज्ञात्वा वै ब्रह्मणे स न्यवेदयत् ॥
पितामहेन तत्सर्वं कथितं देवसन्निधौ ।
श्रुत्वा देवोऽपि तत्सर्वं तूष्णीं क्षणमुपस्थितः ॥
अनन्तरं महच्छब्दः सर्वत्र समजायत ।
शब्दानन्तरमाकाशे तेजःपुञ्जमदृश्यत ॥
दुर्निरीक्ष्यं दुराधर्षम . . न्तं मुहुर्मुहुः ।
आगते तु समीपे वै तस्मिंस्तेजसि कांचन ॥

* * * *

तेज एतन्मदीयं तु शक्तिमेषां . . . . ।
प्रकृतिश्शार्वरी माया लक्ष्मी दुर्गाऽथ मङ्गला ॥
क्लृप्तिश्चेति सदा पानं . . . . . वर्तिनी ।
अस्याः स्वरूपं विप्रेन्द्र न जानन्ति सुरासुराः ॥

* * * *

नारदः—

लक्ष्मीं दुर्गां च देवेश श्रुतवांश्च महाजनान् ।
मङ्गलाख्येन नाम्ना वै न श्रुता भूतभावन ॥
तस्याः स्वरूपभेदं च वर्णरूपायुधानि च ।
पूजां तस्याः समाख्याहि प्रतिष्ठां च मम प्रभो ॥

**Colophon:**

इति पञ्चप्रश्ने प्रथमः पटलः ।

अथातः संप्रवक्ष्यामि मङ्गलाराधनं मम ।
विधिस्नानं पुरा कृत्वा देव्यागारं विशेत् सुधीः ॥

**End:**

आवाहयेत्तदा देवीं मूलबिम्बे स्वयं गुरुः ।
सकलीकृत्य दत्वार्घ्यमर्चयेद्विधिपूर्वकम् ।
चतुर्विधं निवेद्याहं क्षन्तव्यमिति चोच्चरेत् ॥
निर्गत्य च बलिद्रव्या . . . . . . . . ।
. भूते स्नपनं कुर्यात्पूर्वस्मिन् मण्डले . . ॥
(ब्राह्मणान्) भोजयेत्पश्चाद्यथाविभवविस्तरम् ।
एवं नारायणीं भक्त्या यस्तु संस्थापयेद्भुवि ॥
न तस्य दुर्लभं भूमौ स्वर्गे स्यान्नास्ति दुर्लभम् ।
मल्लोके दुर्लभं नास्ति किं पुनः कथयामि ते ॥

**Colophon:**

इति पञ्चप्रश्ने गुह्यतन्त्रे प्रतिष्ठापटलो दशमः ।

R. No. 5198.

Paper. 10½ × 9¾ inches. Foll. 16. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Nīlakaṇṭha Nambūdirippād, Kaṇṇūr-mana, Ottapalam, Malabar district.

दुर्गामन्त्रकल्पः.

DURGĀMANTRAKALPAḤ.

Similar to the work described under No. 7875 of the D.C.S. MSS., Vol. XV.

Incomplete.

**Beginning:**

जपध्यानरतं शान्तं पिप्पलादं महामुनिम् ।
काश्यपः परिपप्रच्छ लोकानां हितकाम्यया ॥
भगवन् वेदसाराणामाश्रयाणां महामते ।
गुह्यानां पञ्चदुर्गाणां विनियोगः कथं भवेत् ॥
आद्यस्य वेदसारस्य सारासारतरस्य हि ।
जातवेदस इत्यस्य मन्त्रस्य च विशेषतः ॥
इति पृष्टः प्रभूतात्मा तं प्रत्याह महामुनिः ।

पिप्पलाद उवाच—

शृणु सर्वं यथातथ्यं सर्वं लोकहिताय वै ।
पञ्चानां मन्त्रसाराणां पुरश्चरणसिद्धये ॥
जप्त्वायुतं समीकुर्यादभिषेकं तथा हुतम् ।
जपाद्दशांशं बीजेन तर्पयेच्च विशेषतः ।
अथ कर्माणि कुर्वीत मन्त्रसारैस्तु पञ्चभिः ॥
व्यस्तैर्वापि समस्तैर्वा गुरुशास्त्रोपदेशतः ।
जपमात्रेण विप्राणां सर्वं संसाधयन्त्यमी ॥

**End:**

साध्यलेखनमुपलक्षणम् । साधककल्पस्यापि हरशरकालमायाः ह्रीं श्रीं क्लींङ्काराः तैरावृतपूर्वो तं शक्तिबीजं तत्र ह्रींबीजेन पञ्चधावृत्तेनैका वृत्तिः । पुनस्तदन्तराल एव श्रींबीजेन तथैव तदन्तराले क्लींबीजेन वह्निगेहद्वन्द्वा श्रीप्राप्तमायाति । षट्कोणस्यावशिष्टांशे ईकारलेखनमुक्तम् । प्रतिविवरेति, षट्कोणान्तरालेष्वित्यर्थः । वह्निरिति ।

R. No. 5199.

Paper. 10⅝ × 9¼ inches. Foll. 78. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Nilakaṇṭhan Nambūdirippad, Kaṇṇūr-mana, Ottapalam, Malabar district.

मन्त्रसारः

MANTRASĀRAḤ.

Foll. 1a—78a. Fol. 78b is left blank.

Gives the details connected with the repetition of some of the Mantras addressed to various deities. As instructed to his pupil Śaṅkara of Muktisthala, by Dāmōdara, son of Nīlakaṇṭha and pupil of Śrīkaṇṭha.

Breaks off in the 14th Paṭala.

The Paṭalas deal with the following Mantras:—

१. सरस्वतीमन्त्रः.
२. धन्वन्तरिमन्त्रः.
३. ऐन्द्रमन्त्रः.
४. इन्द्राणीमन्त्रः.
५. पार्वतीस्वयंवरमन्त्रः.
६. अश्वारूढमन्त्रः.
७. वीरभद्रमन्त्रः.
८. हनुमन्मन्त्रः.
९. वैदिकयन्त्रमन्त्रः.
१०. तान्त्रिकयन्त्रमन्त्रः.
११. पक्षिदुर्गामन्त्रः.
१२. वाराहीमन्त्रः.
१३. कार्तवीर्यार्जुनमन्त्रः.
१४. कुक्षिमन्त्रः (incomplete).

**Beginning:**

महितमुक्तितलालयमिष्टदं महिषमूर्ध्नि लसत्पदपङ्कजम् ।
मनसि मे मधुसूदनसोदरं वसतु वाम महेश्वरजीवितम् ॥

अथैकदा सुखासीनं ध्यायन्तं ब्रह्म शाश्वतम् ।
कृतहोमार्चनाजापस्वाध्यायाद्यखिलक्रियम् ॥

भस्मोद्धूलितसर्वाङ्गं त्रिपुण्ड्रोज्ज्वलमस्तकम् ।
अक्षमालाकर्णोत्तंसग्रैवेयवलयादिकम् ॥

शुक्लमाल्याम्बरधरं शुक्लयज्ञोपवीतिनम् ।
पीयूषासारवर्षिण्या कारुण्यार्द्रार्द्रया दृशा ॥

आध्यात्मिकादिदुःखार्तं कारुण्यादखिलं जगत् ।
आह्लादयन्तं भक्तानामभीष्टार्थसुरद्रुमम् ॥

वक्त्रेन्दुबिम्बविगलत्स्मितज्योत्स्नाङ्कुरैः करैः ।
शिष्याबोधामयध्वान्तं विघ्नन्तं मुहुर्मुहुः ॥
अवतीर्णं मुनेर्वंशे भारद्वाजस्य धीमतः ।
नाम्ना दामोदर इति प्रसिद्धं तपसां निधिम् ॥
नीलकण्ठात्मजं साक्षान्नीलकण्ठमिवापरम् ।
कुण्डालयस्थश्रीकण्ठपादाब्जैकपरायणम् ॥
उपागम्य गुरुं शिष्यः कृतपादादिवन्दनः ।
मुक्तिस्थलग्रामलसद्गेहे राजकुलाभिधे ॥
जातो महिषमर्दिन्याः समीपे विप्रसङ्कुले ।
वसिष्ठवंशजो नाम्ना शङ्करोऽतिप्रियो गुरोः ॥
इदमाह वचो धीमान् विनयावनतो वशी ।
साङ्गो वेदस्त्वयाप्रोक्तः शास्त्राणि विविधानि च ॥
बहुमार्गविभिन्नानि तथागमशतानि च ।
अधुना श्रोतुमिच्छामि मन्त्रान् गुह्यतमानपि ॥
स्वैः स्वैर्विधानैः सहितान् प्रयोगैश्च पृथग्विधैः ।
वैदिकांस्तान्त्रिकांश्चैव ब्रूहि मे ब्रह्मसत्तम ॥
एवमुक्तो गुरुः प्रीतस्तमुवाच स्मयन्निव ।
साधु वत्स त्वया प्रश्नः कृतो लोकहितार्थिना ॥
इतः पूर्वं मया प्रोक्तं सुगोप्यत्वान्न कस्य चित् ।
तथाप्याप्ततरस्त्वात्ते कथयामि यथाश्रुतम् ॥
अथ वदामि गिरामधिदेवतामनुवरानसमासस(?)विस्तरम् ।
अखिललोकहिताय विधानतो जगदबोधतमोमिहिरोदयान् ॥
तत्र च लिपिरूपमनोर्ब्रह्मा मुनिरीरितश्च गायत्री ।
छन्दः सरस्वती स्याच्छितमतिभिर्देवता समुद्दिष्टा ॥
स्वराणां क्लीबहीनानां ह्रस्वदीर्घान्तरस्थितैः ।
जातियुक्तैः कादिवर्गैरङ्गषट्कमुदाहृतम् ॥

* * * *

Colophon:

इति श्रीमन्त्रसारे प्रथमः पटलः ।

**End:**

आकृष्य हस्ते पतितं जुहुयादेधितेऽनले ।
एवं कृते समुत्पन्ना कृत्वा दीप्ताद्धुताशनात् ॥
भक्षयेदचिराच्छत्रुमीश्वरेणापि रक्षितम् ।
पुनरग्नौ विशन्त्येषा कर्तारमभिकाङ्क्षिणी ॥
एवंविधानि कर्माणि यः कुर्यान्मन्त्रवित्तमः ।
स जपेदात्मरक्षायै मन्त्रं त्रैयम्बकादिकम् ॥
शताक्षरं महामन्त्रं सावित्रं च ततो जपेत् ।
जपेदेकादशं रुद्रमथ मृत्युञ्जयादिकान् ॥

**Colophon:**

इति त्रैष्टुभकल्पः समाप्तः ।

---

## R. No. 5200.

Paper. 10⅛ × 9¼ inches. Foll. 130. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Nīlakaṇṭhan Nambūdirippaḍ, Kaṇṇūr-mana, Ottapalam, Malabar district.

### विषनारायणीयम्.
### VIṢANĀRĀYAṆĪYAM.

Foll. 1a—129a. Foll. 129b to 130 are left blank.

Same work as that described under R. No. 4167 ante. By Nārāyaṇa.

Complete.

---

## R. No. 5201.

Paper. 10¼ × 9¼ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Nīlakaṇṭhan Nambūdirippaḍ, Kaṇṇūr-mana, Ottapalam, Malabar district.

### शृङ्गारमञ्जरीभाणः.
### ŚṚṄGĀRAMAÑJARĪBHĀṆAḤ.

Foll. 1a—20a. Fol. 20b is left blank.

A drama of the Bhāṇa kind describing the love between Śṛṅgāra-mañjarī and Śṛṅgāraśēkhara: by Ratikara. The drama was intended

to be staged on the occasion of the festival of god Rāma worshipped in a certain place on the bank of the river Nīla.

Incomplete.

**Beginning:**

कल्याणं भवता तनोतु शिवयोः शय्याथ सा कौसुमी
लज्जावीतमनोभुवा गिरिजया रोमाञ्चसञ्छन्नया ।
दूराक्षिप्तदुकूलयाशु शमितेऽप्युद्दीप्तदीपे विभो-
श्चूडाचन्द्रहृताशया विशरणं यालिङ्गिता केवलम् ॥

अपि च—

मानाद्व्यावृत्तनिद्रारसमुपगतया स्वप्नसन्दृष्टभात-
ङ्गाक्रान्तौ जातभीत्या श्रमजलप्लुतया चापि सन्तापवत्या ।
आवीतस्वप्नया द्रागतिकरुणमये पाहि पाहीति चोक्त्वा
गाढाश्लिष्टो भवान्या बहलपुलकितः पातु वो वामदेवः॥

(नान्द्यन्ते) सूत्रधारः— अलमतिप्रपञ्चेन । (नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् ।

(प्रविश्य) नटी— अय्य इअह्मि ! आणवेदु अय्यो । आर्य इयमस्मि । आज्ञापयत्वार्यः ।

सू— अद्याहमखिलमुनिजनमानसैकराजहंसस्य पुण्यजनषण्डखण्डनोद्दण्डदोर्दण्डमांसलस्तम्भावष्टम्भनत्रिभुवनभवनैकनूतनवितानितरलायितकीर्तिपूरस्य नीलापगानिलयवर्यवास्तव्यस्य भगवतो जानकीरमणस्य यात्रायां सरसकाव्यचामीकरनिकषोपलमतल्लिकया समादिष्टोऽस्मि परिषदा । ययेदानीमभिनवेषु तेषु तेषु प्रेक्षकदर्शनेषु सातत्येनावव . . ने चिरन्तनतया विशीर्णमस्माकं कौतुकमभिनवभाणरत्नप्रयोगप्र(पञ्चेन) नूतनीक्रियतां भवतेति । ममाप्ययमेवाभिलाषः । तथाहि—

अस्ति हि स्वप्रबन्धेन सर्वेषां मनसो रतिम् ।
करोतीति भुवि ख्यातो नाम्ना रतिकरः कविः ॥

* * * *

ततश्चावश्यमेव मदनोपद्रष्टायास्त्रिभुवनकार्मणक्रियायास्तस्याश्च श्रृङ्गारमञ्जर्या भावोऽवगन्तव्यः । अन्यथा खलु न शक्यते पूरयितुमभिलाषं

प्रियसुहृदः श्रृङ्गारशेखरस्य। तदिदानीं तत्प्रतिपत्तये तस्या एव प्रियसखी तावदुपसर्पणीया कौमुदिका। सा चेदानीं कुतो द्रष्टव्या भवेत्?

अन्यार्थसिद्धये सद्भिः क्वचिद्गन्तव्यमध्वना।
नीचैरप्ययते नापि परार्थव्यसनी जनः॥

**End:**

स एव चानुकूल्येन दर्शयन्निखिलं जगत् ।
यत्किंचित्कारितां चास्य कुर्वन्मद उदाहृतः ॥
अहो धन्योऽस्मि सुकृती सम्पदः सन्ति मेऽखिलाः ।
इति स्मेरमुखो नित्यं नरो भवति विस्मितः ॥

**End:**

सितनीलसमायोगः कपोत इति संज्ञितः ।
सितपीतसमायोगः पाण्डुवर्णः प्रकीर्तितः ॥
सितरक्तसमायोगात्पद्मवर्णः प्रकीर्तितः ।
पीतनीलसमायोगाद्धरितो नाम जायते ॥
पीतरक्तसमायोगाद्गौरवर्णः प्रकीर्तितः ।
नीलरक्तसमायोगात्कषायो नाम जायते ॥

**Colophon:**

इति भावविवेकः समाप्तः ॥

हृत्कुर्वदाभरणसंहतिहेतिशालि
शङ्खान्तरस्रुतसुधारसमौलिरत्नम् ।
वाचालवीचिनिचयाकुलितावतंस-
माशान्तहालहलमस्तु मुदे महो वः ॥

---

R. No. **5203.**

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 125. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Śrī-Kumaran Nambūdirippād, Kaṭṭmaḍa-mana, Andathod, Malabar district.

तत्त्वप्रदीपिकाव्याख्या—भावद्योतनिका.

TATTVAPRADĪPIKĀVYĀKHYĀ : BHĀVADYŌTANIKĀ.

Similar to the work described under R. No. 3897 ante. By Sukhaprakāśamuni, disciple of Citsukhamuni. The commentary is called Bhāvadyōtanikā.

Complete in four Paricchēdas.

**Beginning :**

स्वात्मावबोधविभवद्रुतमोहनिद्रं
विद्रावितद्वयकथं वितथादपे(तम्) ।
. . . . . . . . . . . . . . . .
. . . ना नरहरिं तमिमं नमामः ॥
कन्दर्पदर्पभिदुरं छिदुरं प्ररूढ-
मोहान्धकासुरतनोर्भिदुरं यथावत् ।
सर्वस्य सङ्ग . . . . . . . . . .
. . . . . मनिशं गिरिशं नताः स्मः ॥
दूषणश . . . निबारणा . . तत्त्वप्रदीपिकाख्यायाः ।
भावद्योतनिकेयं क्रियते मुनिना सुखप्रकाशेन ॥

प्रकरणस्याविघ्नेन परिसमाप्तये प्रचयगमनाय चाविगीतशिष्टाचारप्राप्ततया कृतमिष्टदेवानुस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति—स्तम्भाभ्यन्तरेति । स्तम्भस्याभ्यन्तरं तत्र गर्भभावः गूढ . . . तु गृहाभ्यन्तरावस्थितदेवदत्तवत् प्रकटभावेन गर्भभावेनात्यन्ताभ्यन्तरावस्थितत्वं वा विधीयते । मुकुल . . . . . . . . . . . . वैयर्थ्याशङ्का शङ्कनीया । तेन गर्भभावेन निगदव्याख्यातं . . . . . वैभवं विभुत्वं यस्य स तथोक्तः । निगदव्याख्यातत्वस्य शब्दधर्मस्यार्थे समर्पणात् । स यः कार्यः ।

* * * *

एवं कृतमङ्गलाचरणं प्रधानाप्रधान . . . . निर्दिश्य प्रकरणारम्भं प्रतिजानीते—विप्रतिपत्तीति । विप्रतिपत्तीनां व्रात एव ध्वान्तं तत्त्वप्रतिपत्तिविरोधित्वात् . . . . . तथा प्रतीतया जीवस्य तत्त्वं पारमार्थिकं रूपं निरतिशयानन्दं निरस्तानर्थव्रातं ब्रह्म . . . . . . . . . अत्र च प्रत्यक्त्वप्रतिपत्तिः प्रधानप्रयोजनं पुरुषार्थत्वात् विप्रतिपत्तिनिरोधस्तु तदर्थत्वेनाप्रधानं प्रयोजनमिति विभागः । जीवस्य ब्रह्म . . . . पत्तिः प्रयोजनमिति सूचयता जीवब्रह्मणोरेकत्वलक्षणो विषयो . . . पि सूचितः । इदमत्र तात्पर्यम्—यद्यपि वेदान्तवाक्यान्येव प्रत्यक्त्वप्रमितिकरणानि, तथापि विप्रतिपत्तिसमुत्था संभावना विपरीतभावनालक्षणप्रतिबन्धविध्वंसितया करणोपकारकत्वादस्त्य . . . णस्यापि तत्प्रतिपत्तिशेषताकरणेतिकर्तव्यतयोरेकप्रयोजनत्वादिति ।

**End:**

स्थितप्रज्ञादिलक्षणानां साधकविशेषविषयत्वमुक्तं विघटयति—न चेति । उक्तविशेषणानां

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥

इत्याद्युक्तानाम् । रसाभिलाषश्रुतिरपि तत्र प्रमाणमित्याह—यदेति । सर्वकामनिवृत्तिपुरःसरमत्र शरीरेऽवस्थितस्यैव मुक्तिप्रतिपादनमुपपन्नं स्यादित्यर्थः ।

श्रीचित्सुखाख्यमुनिपुङ्गवगीर्विलासान्
वाचस्पतिः परमिह क्षमते विवेक्तुम् ।
सोऽहं मुनीन्द्रनिरवग्रहसूक्तिपङ्क्ति-
गङ्गावगाहनकरः स्वगिरः पुनामि ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचित्सुखमुनिपूज्यपादशिष्यसुखप्रकाशमुनिविरचितायां तत्त्वप्रदीपिकाव्याख्यायां भावद्योतनिकायां चतुर्थः परिच्छेदः ।

---

R. No. **5204**.

Paper. 10½ × 9¼ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1925–26 from a MS. of Pāliyam Library, Chennamangalam, Parur, Travancore State.

तरुणभूषणभाणः
TARUṆABHŪṢAṆABHĀṆAḤ.

Foll. 1*a*—25*a*. Foll. 25*b*—26 are left blank.

A small drama belonging to the Bhāṇa kind describing the love between Madanamañjari and Madanaśēkhara: by Śaṭhakōpakavi, son of Śrīnivāsa of Śrīvatsagōtra.

Incomplete.

**Beginning:**

लक्ष्म्याः कुङ्कुमपङ्केन लिखितः कुचसीमनि ।
पत्राङ्कुरो मुकुन्दस्य पातु नः करकौशलम् ॥

अपिच—

रत्यानुरूप रतिकेलिमशेषयूनां
तत्ताद्दशं महमहर्निशमादधानः ।
प्रेमाहतैश्च मिथुनैर्विदितप्रभावो
मीनध्वजो विजयते जगदेकवीरः ॥

नान्द्यन्ते सूत्रधारः—

सभा भरतसिद्धान्तपरिशीलनदेशिका ।
सादरा विदुषामेषा प्रतिपालयतीव नः ॥

इत्युपसृत्य साञ्जलिबन्धम् ।

स्वेदाम्भःकणशोभमाननिटिलं व्यालोलनेत्राम्बुजं
निर्यद्भूरिसुधाधरं समुदयद्रोमाञ्चगण्डस्थलम् ।
कण्ठान्तर्विलसत्कपो(त)निनदं व्यत्यस्तहारं चल-
द्वक्षोजं नतमध्यमस्तु सुदृशां वीरायितं वो मुदे ॥

इति पुष्पाञ्जलिं विकीर्य ।

अद्य खलु सुरासुरमकुटतटघटितमणिकिरणनिकरनीराजितचरणराजीवस्य, मध्यमभुवनभाग्यपरिणामरूपस्य, भक्तजनपरित्राणजागरूकस्य, श्रुतिसीमन्तमुक्तामणेः, नारदादिवरयोगिगीयमानदिव्यापदानस्य, वर्षासमयसमुन्मिषदम्बुदकदम्बकडम्बरोन्मथनचतुरनिजदेहदीधितेरैलानगरनिवासरसिकस्य, सिन्धुभूवल्लभस्य भगवतः श्रीनिवासस्याभिनवोत्सवसेवार्थं नानादेशादागता ह्यमी सकलकलाविदः सभासदः । एवं हि—

अभ्यस्तकामनिगमान्तपथप्रवीणाः
सर्वेऽपि साङ्गपरिशीलितनाट्यविद्याः ।
शृङ्गारसाररसिका रमणीयरूपाः
सभ्या विभान्ति नवयौवनभूषिताङ्गाः ॥

तत्केनाप्यभिनवेन रूपकेण सामाजिकानां मनांसि सन्तोषयिष्यामि । (इति ध्यानं नाटयन्, सस्मरणानन्दम् )

अस्ति खलु श्रीवत्सगोत्रसंभवस्य श्रीनिवासनाम्नो गुरोः सूनुः शठकोपनामा कविः । स किल—

साहित्यमार्गकुतुकी सरलः कवीन्द्रो
बालोऽप्युदारमतिरात्मगुरुप्रसादात् ।
तत्ताढगद्भुततमं सरसं बभाण
भाणं नवं तरुणभूषणनामधेयम् ॥

तदेव रूपकमभिनीय सामाजिकानुपतिष्ठे इति परिक्रामन् सानन्दम् ।

कूजत्कोकिलमञ्जुनादमुखरस्सङ्क्रान्तविष्णूत्सवः
कालोऽयं वयमेव नाट्यचतुराः सभ्या रसज्ञा इमे ।
विख्यातः कविरस्य सूक्तिरपि सा संश्लाघनीयाखिलै-
स्तत्सर्वं चिरभाग्यसञ्चयभरो ह्येवं विवृत्तोऽद्य नः ॥

* * * *

(नेपथ्ये)

भो भो भरतकुलभूषण साधु सम्यगुक्तम् । यदहमिव कलावतीदुहितरि विलासवल्यामयमपि निजवनितायामत्यन्तासक्तचित्तो मधुकरः ।

* * * *

ततः प्रविशति सचिन्तो मदनशेखरः ।

तप्ता दीर्घतपस्तया दिविचरादासाद्य यद्वक्त्रतां
लावण्यामृतपूरितो विजयते श्रीमानपङ्को विधुः ।
मूर्तिश्चित्तभुवो जयश्रियमिव त्रैलोक्यसंमोहनीं
कर्णान्तायतलोचनामनुकलं तां चिन्तयामि प्रियाम् ॥

**End :**

सर्वेऽपि—किं ब्रूय, साधुदर्शिनीयमार्यस्य शेमुषीति । भवतु साधयामः । मदनमञ्जरीमवलोक्य । अयि सुन्दरि पश्चादागमिष्यामि । इति परिक्रम्यादूरतो दृष्टिं दत्वा साश्चर्यम् ।

आरुह्य तुङ्गतुरगान् पतगेन्द्रवेगा-
नावर्तचङ्क्रमविधीनपि शिक्षयन्तः ।
खेलन्ति केचन गृहीतपवित्रवेषाः
स्वैरं पुरः पुरपथेषु तुरङ्गिमुख्याः ॥

विशिखान्तरं प्रविश्यावलोक्य ।

वेत्रोल्लसत्करतला कटिलम्बपंटी
प्रालम्बिशङ्खमणिभूषणकण्ठदेशा ।

---

R. No. 5205.

Paper. 10½ × 9½ inches. Foll. 71. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of Pāliyam Library, Chennamangalam, Parur, Travancore State.

भागवतव्याख्या —कृष्णपदी.

BHĀGAVATAVYĀKHYĀ : KṚṢṆAPADĪ.

Foll. 1a—70b. Fol. 71 is left blank.

Same commentary as that described under R. No. 2769 ante. The commentator is Rāghavānandamuni, disciple of Kṛṣṇānandapūjyapāda.

Contains the Adhyayas 1—13 in the 12th Skandha.

**Beginning :**

तरुणा करुणा काचिदरुणाधरपल्करा ।
चरणानतये नः स्याद्वरुणाहृतसत्करा ॥
निरोधो द्वादशस्कन्धे त्रयोदशभिरीरितः ।
निरोधो नाम सृष्टानां संहारः स चतुर्विधः ॥
नैमित्तिकप्राकृतिकौ ब्रह्मणोऽन्ते दिनायुषः ।
नित्यः प्रतिक्षणं मुक्तिरात्यन्तिक इति स्मृतः ।
त्रिभिरत्र कलेर्दोषैर्निमित्तं वर्ण्यते लये ।
चतुर्विधो लयस्तुर्येणाथ विश्वलयावधिः ॥
विष्णोः स्वरूपमुद्दिष्टं पञ्चमेनाखिलात्मनः ।
षष्ठेन तज्ज्ञानफलं परीक्षिन्मोक्षगामिना ॥
अध्यायाभ्यन्तरे द्वाभ्यां प्रमाणं तत्र चिन्तितम् ।
अवान्तरनिरोधस्य त्रिभिश्चिन्ता कृता ततः ॥
ज्ञानाङ्गध्यानतस्थानसिद्ध्येऽथ परात्मनः ।
एकेन गदितं मूर्तेस्तत्त्वमर्कस्य च क्रमात् ॥

पुराणस्यार्थसंक्षेपो भेदश्चान्येन दर्शितः ।
प्रतिपत्तिसुखायास्य श्रोतॄणां स्तुतये तथा ॥
आद्यत्रये कलेरत्र क्रमवृद्धिः प्रकाश्यते ।
अध्यायेऽस्मिंस्तु भूपेषु दोषावेशः कलेर्मलात् ॥

इह प्रथमस्कन्धे विशिष्टाधिकारिविषयप्रयोजनवत्त्वादिदं शास्त्रमारम्भणीयमिति प्रतिज्ञाय द्वितीयेनात्रासंभावना मा भूदिति श्रवणविधिरूपस्य प्रमाणस्योपन्यासः कृतः । पुनः सर्गादिद्वारेण सगुणं निर्गुणं चाश्रयं शब्दलक्ष्यं ब्रह्म प्रतिपादयद्भिस्तृतीयादिसप्तमान्तैः स्कन्धैराद्यस्य मनोः स्वायम्भुवस्य वंशविस्तारो निरूपितः । अष्टमेनावशिष्टानां स्वरूपवंशादिकं संगृहीतम् । नवमादिभिस्त्रिभिः सप्तमस्य मनोर्वैवस्वतस्य सन्ततिरूपौ सूर्यसोमवंशौ तयोः श्रीरामकृष्णावतारौ च वर्णितौ । संप्रति चतुर्दशमन्वन्तरावस्थानकालीनं निरोधं विवक्षुर्मुनिर्नवमे कुरुकुलोद्भवस्य बृहद्रथस्य वंशवर्णनसमये यदुक्तं बृहद्रथाद्या भूपाला भाव्याः साहस्रवत्सरमिति, तत्प्रथयति—योऽन्त्य इत्यादिना । विश्वजिद्यद्रिपुञ्जय इति नवमे दर्शनात् विश्वजितः पुत्रो रिपुञ्जय एव पुरञ्जयः । बृहद्रथो जरासन्धस्य पिता, तस्य वंशे भवो बार्हद्रथोऽन्त्यः । तद्वंशविश्रान्तिभूमिः भविष्यत्कलिकालीनः । हे कुरुश्रेष्ठ यः पुरञ्जयो नाम भविष्यस्तत्राप्यन्त्यो बार्हद्रथः बृहद्रथवंश्यो राजा तस्यामात्यः शुनको नाम क्षत्रियाभासः स्वामिनं हत्वात्मजं स्वपुत्रं प्रद्योतसंज्ञं राजानं कर्ता करिष्यति ।

**End :**

अथ परमगुरुं व्यासं नमति—नम इति । साक्षिणे शुकपरीक्षित्संवादे साक्षित्वेन स्थिताय तस्मै भगवते ते नमः। इदं पुराणं, क्रियया अस्य प्रणयनेन हेतुना तस्मै शुकाख्याय व्याचचक्षे उपदिदेश । स्वगुरुं नमति—योगीन्द्रायेति ; विष्णुरातं परीक्षितममूमुचत् मोचयामास ।

शिवः शिवेत्यच्युत इन्दिरेति सरोजभूर्वागधिदेवतेति ।
सर्वं जगत् स्थास्नु चरिष्णु चेति ध्यातेऽद्वये आत्मनि कृष्ण आसे ॥
अष्टादशदशत्रिंशत्यधिका नवविंशतिः ।
षड्विंशतिर्दश नव पञ्चभिर्विंशतिस्त्रिभिः ॥
चतुर्भिश्चाथ नवतिरेकत्रिंशत् त्रयोदश ।
इति भागवतव्याख्या एकत्रिंशाच्छतत्रयम् ॥

अहो भागवताम्भोधिरहो रसमहो रसः ।
मां स्वधामानयत्पूर्णे वेदव्यासः कृती हरिः ॥

महाबलेशस्य वियच्छिखस्य जटागलत्स्वस्तटिनीझरौघाः ।
इतस्ततो यत्र हि वारिधाराः कुल्याः कुलोत्थाः प्रसरन्ति देशे ॥

पतञ्जलित्वे सति नागराजे नाङ्गीकृतत्वादुरुमङ्गलेन ।
वदन्ति यन्नागपुरं मनुष्यास्तत्रावतीर्य द्विजवर्यगेहे ॥

जन्म द्वितीयं विधिवत्प्रपन्नो यजूंषि सामानि गुरोर्गृहीत्वा ।
स्नात्वा विवाहात्पर एव गत्वा वैराग्यतो ह्याश्रममन्तिमं यः ॥

आनन्दपूज्योज्ज्वलकृष्णनामा मुनिर्मुनीन्द्रैः सह पद्मनाभम् ।
चित्ते निधायाखिललोकमूलं देशं तदाह्निस्फुरितं प्रपेदे ॥

येनाथ सेतुर्जनकात्मजायाः शोकापहोऽध्यैक्षि च पद्मनाभः ।
शिवामृताख्यात्परहंसमुख्याच्छ्रुतश्च येनाखिलवेदसारः ॥

अन्तेऽभिषिक्तः परहंसराज्ये यश्चात्र तेनैव मुनीश्वरेण ।
यश्चानुजग्राह वृषाद्रिनाथस्याङ्के निषण्णः स्वसुखं जनेभ्यः ॥

स्वपादपद्मं समुपाश्रितेभ्यो वाचाखिलाम्नायशिरोऽर्थभूतम् ।
श्रीरङ्गशायीति मुकुन्दनाम्नि ख्यातेऽकरोद्यश्च परां समाधिम् ॥

तत्पादपद्मभ्रमरेण सेयं श्रीराघवानन्दमुनीश्वरेण ।
श्रीमन्निलातीरसमुद्भवेन तुर्याश्रमं मृत्युभयार्दितेन ॥

गोविन्दमात्मन्यधिगम्य साक्षादुक्तिप्रभेदैरविगोगभेदैः ।
तत्प्रीतिकामेन कृता चिराय जीयात्कृतिः कृष्णपदी पृथिव्याम् ॥

अकृत्रिमचमत्क्रियामधुरकाव्यवर्योचिते
यथाविधि विधिस्फुरत्समयवृत्तसर्वोचिते ।
अमानुषपराक्रमे निरुपमाननीतिक्रमे
निसर्गरुचिराकृतौ निखिलधर्मरक्षाकृतौ ॥

विचित्रविभवाश्रिते विपिनवद्गृहे संश्रिते
वियद्दखिलाकरे विततकीर्तिरत्नाकरे ।
समस्तरिपुसङ्करे समरलब्धलक्ष्मीकरे
समस्तमुनिशङ्करे हृदि कृतात्मभूशङ्करे ॥

विवेकनिकषोपले वहति राघवे कालभ-
मघोन्यलघुविक्रमैरवनिचक्ररक्षाधुराम् ।
अकुण्ठमतिमैहिरादृपृथगात्तवैकुण्ठतः
सती कृतिरियं मुनेरजनि राघवानन्दतः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णानन्दपूज्यपादशिष्यस्य श्रीमद्राघवानन्दमुनेः कृतौ श्रीभागवतव्याख्यायां श्रीकृष्णपद्यां द्वादशस्कन्धे त्रयोदशोऽध्यायः ।

---

R. No. **5206.**

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 258. Lines, 29 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Tātadēśikācaryar, Villiyambakkam, Chingleput district.

**श्रुतप्रकाशिकासंग्रहः.**

**ŚRUTAPRAKĀŚIKASANGRAHAḤ.**

Foll. *1a—257b*. Fol. 258 is left blank.

Same work as that described under R. No. 1600 ante, wherein see for the beginning. By Śrīnivāsasūri, son of Tātadēśika.

Contains from the second Adhyāya to the end of the work.

**End:**

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥

स्वेच्छा वा कर्म वा भगवत्सङ्कल्पो वा त्रयमेव पुनरावृत्तिहेतुतया संभावितम् । तत्र स्वेच्छाकर्मभ्यामावृत्तिशङ्कां परिहरति—न चेति । तदर्थारम्भाद्यसंभवादिति । कर्म विद्यमानं चेत्सजातीयकर्मान्तरारम्भरुचिरूपवासनामुपजनय्य तद्द्वारा कर्मान्तरं कारयति । कर्मणः सवासनस्य विनष्टत्वात् कर्मान्तरासंभवात् न कर्म पुनरावृत्तिहेतुः अनवधिकातिशयानन्दभगवदनुभवैकतानस्य नान्यापेक्षेति न स्वयं स्वपुनरावृत्तिहेतुरित्यर्थः । इति सर्वं समञ्जसमिति । सर्वशब्देन भेदश्रुत्यभेदश्रुतिघटकश्रुतिगुणादिविधिनिषेधश्रुतिभगवत्कृपास्वातन्त्र्यादिपरवाक्यप्रत्यक्षादीन्यभिप्रेत्य तेषामिति शब्दः । अखिलभुवनेत्यादि भाष्योक्ताशेषार्थपरामर्शिसर्वशब्देनानुदाहृतश्रुतिस्मृतीतिहासपुराणवचांसि

तदनुग्रहतर्कजातं च विवक्षितम् । तेषामाम्नायादीनां सामञ्जस्यं दृष्टम् । उक्तार्थबाधकत्वेन ये प्रमाणतर्काः परैः प्रयुक्तास्तेषां सर्वेषां परिहारोऽस्त्येव । एतदनन्तर्भूतार्थो नास्ति । तस्मादुक्तप्रकारेण बाधकप्रमाणतर्कपरिहारश्चानुसन्धेय इत्यभिप्रायेणेति सर्वं समञ्जसमित्युक्तम् ।

**Colophon :**

इति श्रीशैलपूर्णकुलतिलकावतारतातदेशिकसूनुना श्रीनिवाससूरिणा संगृहीते श्रुतप्रकाशिकासंग्रहे चतुर्थस्याध्यायस्य चतुर्थः पादः ।

---

## R No. 5207.

Paper. 10½ × 8½ inches. Foll 18. Lines, 20 in a page. Telugu. Good.

Transcribed in 1925–26 from a MS. of Pāliyam Library, Chennamangalam, Parur, Travancore State.

तालप्रस्तारः.

TĀLAPRASTĀRAḤ.

Similar to the text described under No. 12990 of the D.C.S. MSS., Vol. XXII.

Incomplete.

**Beginning :**

यामिवानुहरन् प्रीत्या चूडाचन्द्रोऽपि नृत्यति ।
सा वः सायं प्रकुंतस्य त्रायतां ताण्डवक्रिया ॥
गीतं वाद्यं तथा नृत्तं त्रयं ताले प्रतिष्ठितम् ।
तालमूलानि गेयानि ताले सर्वं प्रतिष्ठितम् ॥
तालहीनानि गेयानि मन्त्रहीना यथाहुतेः ।
तालस्तल प्रतिष्ठायामिति धातोर्घञि स्मृतः ॥
तकारात्ताण्डवं प्रोक्तं लकाराल्लास्यमित्यतः ।
शिवशक्त्यात्मकस्तालः प्रतिष्ठा गेयवस्तुनः ॥
शक्तितालः करे वामे शिवतालस्तु दक्षिणे ।
ग्रहीतव्यो भवेत्तस्य भेदाश्चत्वार ईरिताः ॥

* * * * *

अथ चतुरङ्गप्रस्तारमाह—

द्रुतस्य संभवे . . द्रुतं दक्षिणतो न्यसेत् ।
तस्यासत्त्वे गुरुं न्यस्येत्तस्यासत्त्वे लघुं न्यसेत् ॥
सर्वस्याश्चापि मात्राया वामतोऽल्पेन पूरणम् ।
न्यस्तावयवयोपरि न्यासो दक्षिणेन विधीयते ॥
वामभागात्समारभ्य तालघट्टनमुच्यते ।
दक्षिणाद्वामतो न्यास इति प्रस्तारसंस्थितिः ॥

**End:**

लघुस्थाने तु तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत् ।
वर्णान् वृत्तभवान् सैकानौत्तराधर्यतः स्थितान् ॥
एकादिक्रमशश्चैतानुपर्युपरि योजयेत् ।
उपान्त्यतो निवर्तेत त्यजन्नेकैकमूर्ध्वतः ॥
उपर्याद्याद्गुरोरेवमेकद्व्यादिलगक्रिया ।
लगक्रियाङ्कसन्दोहे भवेत् . . . . . . ॥

द्रुतमेरुः.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | 1 |
| | | | | | 1 | 1 | 7 |
| | | | 1 | 1 | 5 | 6 | 20 |
| | 1 | 1 | 3 | 4 | 9 | 14 | 25 |
| 1 | 1 | 2 | 2 | 5 | 4 | 10 | 7 |

लघुमेरुः.

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | | | | | | | 1 | 5 |
| | | | | | 1 | 4 | 10 | 20 |
| | | | 1 | 3 | 6 | 10 | 18 | 33 |
| | 1 | 2 | 3 | 4 | 7 | 12 | 21 | 34 |
| 1 | 1 | 1 | 2 | 3 | 5 | 7 | 10 | 10 |

---

## R. No. 5208.

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 132. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1925-26 from a MS. of Pâliyam Library, Chennamangalam, Parur, Travancore State.

अर्थशास्त्रव्याख्या—जयमङ्गला.

**ARTHAŚĀSTRAVYĀKHYĀ : JAYAMAṄGALĀ.**

A commentary on the Arthaśāstra of Kauṭilya. The commentary is called Jayamaṅgalā. The name of the commentator is not given.

Contains up to the end of the first Adhyāya of the third Adhikaraṇa.

**Beginning :**

पूर्वमतानि यथेदं संगृह्यैकं चकार कौटिल्यः ।
टीकान्तराणि दृष्ट्वा सव्याख्यानं समुद्धृत्य ॥
क्रियते तथा मयापि त्यक्त्वा च ग्रन्थविस्तरं पूर्णा ।
बालहिता टीकेयं दुर्ज्ञेयं यद्धितत्स्य सर्वमिदम् ॥

प्रेक्षावतां पूज्यपूजनात् सर्वारम्भा अविघ्नितप्रसरा भवन्तीति मन्यमान आह—नमः शुक्रबृहस्पतिभ्यामिति । पूज्याश्च वक्तृप्रयोक्तृत्वैश्वर्ययोगात् त्रिविधाः । तत्र ये शास्त्राणां वक्तारस्ते तच्छास्त्रव्यवहारिभिः पूज्यन्ते । ये शास्त्रार्थानां प्रयोक्तारस्ते तन्त्रानुवर्तिभिः पूज्यन्ते । ये चाणिमाद्यैश्वर्ययुक्तास्ते दृष्टादृष्टार्थानुग्राहिणो देवा अत्यन्तं पूज्यन्ते । अनयोश्च त्रितयमपि पूजनीयत्वनिमित्तमस्ति । तत्र कृत्स्नशास्त्रप्रणयनाद्वक्तारौ देवासुराणां च सन्धिविग्रहप्रयोगात् प्रयोक्तारौ ऐश्वर्ययोगाच्च देवौ इति मन्यमान इह कौटिल्यस्तावेव नमस्कृतवान् । नमश्शब्दयोगाच्चतुर्थी । नमःशब्दश्च मानसीं भक्तिमनुमापयति । पाद्यादीनां साधनानां बाह्यां पूजां प्रदर्शयति । अत्रानडुतो द्वन्द्व इति नानङ्, पुनर्द्वन्द्वग्रहणात् निर्दिष्टानामेवेति स्थितेः । यथा सूर्याचन्द्रमसोरिति चन्द्रसूर्ययोरिति च व्यवहारौ । ततश्च शुक्रशब्दस्याल्पाच्तरत्वात् पूर्वनिपातः । शास्त्रारम्भे प्रयोजनमाह—पृथिव्या इति । अन्यथानुक्तप्रयोजने प्रेक्षावतामप्रवृत्तेः ।

* * * *

अर्थशास्त्राणीति । अर्थो येन लोके वर्तेत तदर्थशास्त्रमिति । यद्येवं वार्ताशास्त्रं तत्, न नीतिशास्त्रम्; यस्मात् भूमिहिरण्यधान्यपशुभाण्डोपस्करादीत्यर्थः अथुत इति कृत्वा तेन नीतिशास्त्राणीति वक्तव्यम् । सत्यम्; प्राधान्यादेवमुक्तम् । यतो भूम्यादीनामर्थानां पूर्वः पूर्वः प्रधानमर्थः । प्रधानं च मनुष्यवती भूमिः, सर्वकर्मणां योनित्वात् । वक्ष्यति च—तत्र युक्तौ मनुष्याणां वृत्तिरर्थान्मनुष्यवती भूमिरित्यर्थः । तस्या

मनुष्यवत्या भूमेः पृथिव्या लाभपालनोपायभूतं शास्त्रमर्थशास्त्रमिति । वृत्तिरर्थ इति, वर्तनहेतुत्वात् । पूर्वाचार्यैरिति । पूर्वग्रहणं प्रकर्षार्थत्वात् बृहस्पत्याद्युपसंग्रहार्थम् । आचार्यैरिति; न यैः कैश्चित् प्रस्थापितानि प्रवर्तितानि । प्रायश इति प्रतिषेधार्थम् । अनेन सामान्येनार्थशास्त्रस्य प्रयोजनमुक्तम् ।

* * * *

**Colophon:**

इति शास्त्रसमुद्देशो नाम प्रथमं प्रकरणम् ।

* * * *

इत्यात्मरक्षितमष्टादशं प्रकरणमेकविंशोऽध्यायः ;

समाप्तं च कौटिलीयार्थशास्त्रव्याख्यानटीकायां जयमङ्गलायां विनयाधिकारिकं प्रथममधिकरणम् ।

**End:**

वादिप्रतिवादिनोः पक्षयोरनुपूर्वकः प्रश्नः आर्जवं वा यस्य संभावितं हेतुः पूर्वानुशये तस्मादनेनैवाह सर्वाभावे शपथश्चार्थस्य गन्धो निर्णयस्य पूर्वं निबद्धस्योत्तरेण वचनेन व्याघाते साक्षिवक्तव्यस्वालादीयामुद्देशो चारुहस्ताच निष्पाते आरक्षिभ्योऽपक्रमणे देहव्यः । (?) पराजयः परिच्छेत्तव्यः एवंकारिणो भङ्ग इति ।

**Colophon:**

इति प्रथमं प्रकरणम् । प्रथमश्चाध्यायः ।

---

R. No. **5209**.

Paper. $10\frac{1}{4} \times 9\frac{1}{2}$ inches. Foll. 28. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1925-26 from a MS. of Paliyam Library, Chennamangalam, Parur, Travancore State.

प्राकृतप्रकाशः, वृत्तिसहितः.

PRĀKṚTAPRAKĀŚAḤ WITH VṚTTI.

Foll. 1a—27b. Fol. 28 is left blank.

Similar to the work described under No. 1551 of the D.C.S. MSS., Vol. III By Rāmapāṇivāda.

Complete in eight Paricchēdas.

**Beginning:**

सुकृतिभिरेव गृहीतो बहुविधरूपावतारगम्भीरः ।
जयति स भगवान् विष्णुः प्राकृतशास्त्रप्रपञ्च इव ॥
प्रणिपत्य विघ्नराजं श्रीगुरुपादान् मुनि . . वाणीम् ।
शङ्करमद्रिसुतां च प्राकृतवृत्तिर्मया क्रियते ॥

तत्रादौ लिपिविन्यासस‍ङ्केतः प्रदर्श्यते—

बिन्दुर्विधीयते योऽत्र यश्च स्वाभाविकस्तयोः ।
विन्यासो लिपिषु ज्ञेयस्ताभ्यां पूर्वस्य मूर्धनि ॥

ताभ्यां विधीयमानस्वाभाविकाभ्यां बिन्दुभ्यां पूर्वो यो वर्णस्तस्य मूर्धनि तयोर्बिन्द्वोर्विन्यासः । विधीयमानो यथा—दंसणं, फंसुणं । स्वाभाविको यथा कंसो हंसो ।

अनुस्वारस्त्वशास्त्रीयः परस्य द्वित्वसूचकः ।
अन्तयोः पूर्वपरयोरन्तराले विलिख्यते ॥

अस्मिन् शास्त्रे विहितत्वाभावादशास्त्रीयः । यथा—पे०खइ, भि०खइ । अथ सूत्राण्युदाह्रियन्ते—

आदेरतः । आदेरित्ययमापरिच्छेदपरिसमाप्तेरधिक्रियते । अत इति तु अदातो यथादिष्विति सूत्रात् प्राचीनेष्वधिकारः । इत ऊर्ध्वं येऽनुक्रमिष्यन्ते ते आदेरस्य वेदितव्याः । वक्ष्यति लोपोरण्ये इति अरण्यईणम् ।

**End:**

शेषस्संस्कृतात् । कृत्तद्धितसमासादिलक्षणा ये शब्दास्ते शेषशब्देनाभिहिताः । येषामत्र प्रतिपदं न लक्षणमुक्तं तेषां संस्कृतशब्देभ्य एव व्युत्पत्तिः । किन्तु होढः पोवः टोडः नोणः अत ओत्सावित्यादिसामान्यलक्षणविशिष्टाः संस्कृतप्रकृतयश्शब्दा वेदितव्याः । यथा वढइ, कुविओ, पाढवं माहवो केसवो इत्यादि ।

प्राकृतलक्षणमेतत्प्रायेणोक्तं प्रयोगमनुसृत्य ।
अपरमपभ्रंशा(?)र्लक्षणमन्यत्र विज्ञेयम् ॥

**Colophon:**

इति रामपाणिवादकृतायां प्राकृतवृत्तावष्टमः परिच्छेदस्समाप्तः ॥

R. No. 5210.

Paper. 10¾ × 9¼ inches. Foll. 70. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. V. N. Nārāyaṇa Nambūdiri, Vaidya-maṭham, Tritala, Malabar district.

वसन्तचन्द्रोदयम्.

VASANTACANDRŌDAYAM.

Foll. 1*a*—69*a*. Foll, 69*b*—70 are left blank.

A work on the preparation of various medicines. It is stated to have been summarized from bigger treatises, such as Mañjarī, etc.

Contains the first 12 Adhyāyas dealing with the following subjects:—

१. मानकल्पनम्.
२. पुटनिर्णयः.
३. वर्तिकामूषयन्त्रलक्षणम्.
४. नानाद्रव्यवर्गविधिः.
५. नानाद्रव्यशुद्धिः.
६. भस्मसिन्दूरादिविधिः.
७. रससंग्रहः.
८. दिव्यगुटिकाकथनम्.
९. केशरञ्जनकथनम्.
१०. वीर्यस्तम्भादिबालग्रहनिवारणम्.
११. कालज्ञानच्छायापुरुषलक्षणकथनम्.
१२. प्रसिद्धरसगुटिकासंग्रहः.

**Beginning:**

देवं धन्वन्तरिं विप्रमात्रेयादिचिकित्सकान् ।
नमस्करोमि पूर्वाणं ग्रन्थस्यास्य समाप्तये ॥
मञ्जर्यादिषु संप्रोक्ता चिकित्सा बहुविस्तरा ।
तस्माच्चिकित्साज्ञानं तु लोका नानुभवन्ति हि ॥
तेभ्यः संगृह्य विधिवद्बालानां बोधितुं सुखम् ।
वसन्तेन्दूदयं नाम ग्रन्थं कुर्मो रसात्मकम् ॥

तत्रादौ मागधपरिभाषा निरूप्यते—

मागधपरिभाषा—

न मानेन विना युक्तिः द्रव्याणां जायते क्वचित् ।
अथ प्रयोगकार्यार्थं मानमत्रोच्यते मया ॥
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः ।
त्रसरेणोस्तु पर्यायो नाम्ना वागीशि गद्यते ॥

जालान्तरगतैस्सूर्यकरैर्वंशी विलोक्यते ।
षड्विंशिभिर्मरीचिस्स्यात्ताभिः षड्भिश्च राजिका ॥
तिसृभी राजिकाभिस्तु माषको हेमधान्यकौ ।
माषैश्चतुर्भिः शाणस्स्याद्धरेणु(रणं) स निगद्यते ॥

* * * *

यदौषधं तु प्रथमं यस्य रोगस्य गद्यते ।
नाम्ना स एव योगो हि कथ्यतेऽत्र विनिश्चयः ॥

**Colophon:**

इति वसन्तचन्द्रोदये मानकल्पनं नाम प्रथमोऽध्यायः ।

**End:**

वैडूर्यं गर्दभमणिं पिचुकं विषमूषकाम् ।
हिमवद्गिरिसंभूतां सोमराजिं पुनर्नवाम् ॥
तथा द्रोणं महाद्रोणं मानसीं सर्पजं मणिम् ।
विषाणि विषशान्त्यर्थं वीर्यवन्ति च धारयेत् ॥
छत्री जर्झरपाणिश्च चरेद्रात्रौ विशेषतः ।
तच्छायाशब्दवित्रस्ताः प्रणश्यन्ति भुजङ्गमाः ॥

**Colophon:**

इति वसन्तचन्द्रोदये प्रसिद्धरसघुटिकासंग्रहो नाम द्वादशोऽध्यायः ।

---

## R. No. 5211.

Paper. 10½ × 9¼ inches. Foll. 218. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925–26 from a MS. of M.R.Ry. Nārāyaṇan alias Kṛṣṇa Nambūdiri Vaidikan, Tekettu-mana, Kumaranallur, Malabar district.

### बोधायनश्रौतप्रयोगवृत्तिः—प्रयोगतरणिः.

### BŌDHĀYANAŚRAUTAPRAYŌGAVṚTTIḤ: PRAYOGA-TARAṆIḤ.

On the ritualistic procedure relating to various sacrifices performed in accordance with the rules laid down by Bōdhāyana. The author is Nārāyaṇa, disciple of Śaṅkara and Vāsudēva.

Complete.

**Beginning :**

श्रीकैलासे शुकाद्यैर्दिशवकरवटमूले निषण्णो निषेव्यः
कृत्वारौ वामपादं क्रिसलयमृदुलं दक्षिणे दक्षवीरैः ।
बिभ्राणो दोर्भिरक्षस्त्रजममृतघटं पुस्तकं ज्ञानमुद्रां
भूयाद्भूत्यै च मुक्त्यै मम रजतनिभो दक्षिणामूर्तिशम्भुः ॥

अक्षमालागदाचक्रशङ्खोद्भासितपाणये ।
नमस्सङ्गमनाथाय वासुदेवाय वेधसे ॥

श्रीमन्तं जगतां नाथं प्रणम्य मधुसूदनम् ।
प्रयोगं सौमिकं वक्ष्ये बोधायनमतेन हि ॥

अग्निष्टोमेन यक्ष्यमाणो ब्राह्मणः पूर्वमेव तत्साधनानि संपादयेत् । साङ्गकृष्णाजिनमनुपयुक्तं गुरूपयुक्तं वा कृष्णविषाणं त्रिवलीर्वा पञ्चवलीर्वा शाण्या रज्वा वा परा शरमयी मेखलाऽपि दर्भरचिता योक्त्रं च शरमयं त्रिवृद्द्वयमप्येकतः पाशं दर्भपुञ्जिलानि बहूनि नवनीतमञ्जनं चतस्त्रश्शरेषिका औदुम्बरं दण्डं यजमानसंमितं कुन्तकुरीरविमलपर्यन्तजालं तन्तुनिर्मितमौदुम्बरश्शङ्कुस्तन्तुवि . . तः पञ्चाशद्धस्तयुगानि पशुवृतशतप्रस्थदर्भभारचतुष्कं पालाशसमिधश्च तथा काश्मर्यः वैकङ्कत्यश्चौदुम्बर्यश्च समिधः ।

* * * *

एवं सम्पाद्य प्रयोगारम्भं कुर्यात् । ऐन्द्राग्नं पुनरुत्सृष्टमालभेत, य आतृतीयात्पुरुषात् सोमं न पिबेत् आश्विनं धूम्रं ललाममालभेत । यो दुर्ब्राह्मणः सोमं पिपासेदिति न्यायमनुसृत्य दीक्षेत । मेषादिस्थे भानौ यो यो मासो गतश्चान्द्रस्स स चैत्रादिर्ज्ञेयो यत् द्वितीयोऽधिमासस्स्याच्चैत्रवैशाखयोरन्यतरमासे पूर्वपक्षे देवनक्षत्रे दीक्षेत ।

* * * *

अस्मिन् प्रयोगतरणौ बहुपक्षदोषा
नोदाहृता गुरुत(र)त्वभयादमुष्य ।
एकं मतं समवलम्ब्य च यागसिद्धेः
द्वैधादिभिस्समवगच्छतु पक्षभेदात् ॥
नारायणेन शशिखण्डकृताङ्कनेन
नारायणाङ्घ्रिसरसीरुहतत्परेण ।

एष(षा) प्रयोगतरणी रचिता य . .
यज्ञेश्वराङ्किमलप्रणयप्रसादात् ॥

**Colophon :**

इति प्रयोगतरणिर्नाम प्रयोगवृत्तिस्समाप्ता ।

देवदत्तशर्माहमाग्नीध्रकर्मत्वागच्छामि योजयतु मा भवान् महन्मेवोच वायुर्देवो दैवोग्नीत् समेग्नीदग्नीदाग्नीध्रस्त्वावृणे वायुर्देवो दैवोग्नीत् सतेग्नित्तेनानुमतं कर्मैवाहं करिष्यामि ।

**End :**

पूर्ववृत्त्यनुसारेण यथामति निरूपिताः ।
चिते . . वसन्तेग्निष्टोमादौ विद्यते विधिः ॥
दुष्करा तत्र सेव्येव कालापूर्तेस्तु नादृता ।
अतिरात्रादयस्त्वेते विद्यन्तेऽनग्निका अपि ॥
तदापि तत्प्रयोगस्तु पृथक् पूर्वं निरूपितः ।
आधानप्रमुखन्त्वेतत्कर्मजातं निरूपितम् ॥
मन्मानसे चिरं तिष्ठन्महद्भ्य(श्च) नमो नमः ।
गुरूत्तमौ शङ्करवासुदेवौ महत्तमौ ब्रह्मनिष्णातचित्तौ ।
सन्मार्गदीपौ जगतोऽभियुक्तौ मच्चित्तदोषं सकलं हरेताम् ॥

---

R. No. **5212.**

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 12. Lines, 22 in a page. Grantha. Good.

Transcribed in 1925-26 from a MS. of M.R.Ry. Śrī-Kumāran Nambūdirippad, Kaṭṭumaḍam-mana, Andathod, Malabar district.

**शतद्वयी.**

ŚATADVAYĪ.

Foll. 1a—11a. Foll. 11b—12 are left blank.

A work in 200 stanzas on the details connected with the ceremonies intended for Vīra-Śaivas.

Complete.

**Beginning :**

निर्वाणद्वयबीजाय नमस्सोमाय शम्भवे ।
अथ सङ्गृह्यते बीजं द्वयं दीक्षाप्रतिष्ठयोः ॥

सपाशनयविश्लेषं शिवत्वं व्यज्यते यया ।
क्रिया सा कथ्यते दीक्षा भक्तिवैराग्यलक्षणा ॥
तस्मात् ज्ञानं च भक्तिं च वैराग्यमिति चात्मनः ।
दीक्षितस्यैव चिह्नानि पशोस्त्वेतानि नाञ्जसा ॥
किञ्चिज्ज्ञो मलिनो भिन्नः कर्ता भोक्ता[च] स्वकर्मणाम् ।
शरीरी विभजन्नित्यस्संस्कार्यस्सेश्वरः पशुः ॥
पाशा अपि त्रयो ज्ञेया मलं माया च कर्म च ।
मलं चाशुद्धिरज्ञानं तच्चैतन्यनिरोधकम् ॥
माया कलादि क्ष्म्यन्ता तद्भवा तत्त्वसंहतिः ॥

* * * *

विसर्गाद्या अकारान्ता वर्णाः षोडश कीर्तिताः ।
भवत्येको गुणश्शब्दकारणानां[तु] सदाशिवः ॥
इत्यध्वानं विचिन्त्यातः षडध्वाष्टावर्नि पराम् ।
ध्यात्वा शक्तिं तमूर्ध्वं च भावयेत्परमं पदम् ॥
अत्र दीक्षोपयुक्तानां क्रमेणैव षडध्वनाम् ।
वृत्तया . समुद्देशः कथ्यतेऽत्र विभागशः ॥

**End:**

एकाशीतिपदे वास्तोः मध्ये नवपदे विधिः ।
षट्पदा . मरीचिश्च विवस्वादि(न्मि)त्रभूधराः ॥
अ(आ)पवत्सो(थ) सविता साविन्नी चैन्द्रतज्जयौ ।
रुद्रदासकोद्धि विपदास्याः वन्दिकापरे ॥ ?
एतद्बीजद्वयं दीक्षामतिष्ठालकयोर्द्वयोः ।
संप्राह्य देशिकैः काले तन्निष्पत्तिसमीहयः ॥
इत्याहरन्नन्यशतद्वयीं स श्रीसोमभूभृद्गुरुरागमेभ्यः ।
काले झटित्येकश . रक्षितं तन्वीय श्रीवरुणाभिधानः ॥
सूत्रैस्सप्तदशात्मकैरुभयतो गौरीललामाद्वयं
मध्ये वेदपदैर्विदिक्षु च ततः पद्मं तया विन्यसेत् ।
लिङ्गं पद्मसरोजकण्ठकमलं पीठं चतुर्दिक्पदैः
वाचा वीरविधैः क्रमादथ लता कोणेषु द्व्यैः पदैः ॥

R. No. **5213.**

Paper. 10¼ × 9¼ inches. Foll. 32. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1925-26 from a Library MS.

भूवराहविजयम्.

BHŪVARĀHAVIJAYAM.

Same work as that described under No. 11619 of the D.C.S. MSS., Vol. XX. By Vīravalli Śrīnivāsakavi.

Contains the Sargas 1 to 8; but wants a portion in the middle of the 8th Sarga.

---

R. No. **5214.**

Paper. 10¼ × 9¼ inches. Foll. 48. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1925-26 from a MS. in the Library.

शृङ्गारसप्तशती.

ŚṚṄGĀRASAPTAŚATĪ.

Same work as that described under No. 11989 of the D.C.S. MSS., Vol. XX.

Contains the Śatakas 3 to 7; wants four stanzas in the beginning of the 3rd Śataka.

---

R. No. **5215.**

Paper. 10¼ × 9¼ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Restored in 1925-26 from a Library MS.

रुक्मिणीपरिणयम्.

RUKMIṆĪPARIṆAYAM.

Same work as that described under No. 11715 of the D.C.S. MSS., Vol. XX. By Cakrakavi, son of Lōkanātha and Ammā and the younger brother of Patañjali and Rāmacandra.

Breaks off in the fourth Sarga.

R. No. **5216.**

Paper. 10½ × 9½ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1925-26 from a Library MS.

**कविसञ्जीवनी.**

KAVISAÑJĪVANĪ.

Foll. 1a—19a Foll. 19b—20 are left blank.

Restored from the work described under No. 12006 of the D.C.S. MSS., Vol. XX. By Śrīnivāsa.

Breaks off in the second Stabaka.

---

R. No. **5217.**

Palm-leaf. 15¾ × 1 inches. Foll. 113. Lines, 6 in a page. Grantha. Good.

Purchased in 1926-27 from M.R.Ry Dāsarathi Ayyaṅgar, South Gopalasamudram street, Mannargudi, Tanjore district.

**गीतगोविन्दम्, साहित्यरत्नमालाव्याख्यासहितम्.**

GĪTAGŌVINDAM WITH THE COMMENTARY SĀHITYA-RATNAMĀLĀ.

Foll. 1a—112a. Fol. 112b is left blank.

Same text as that described under No. 11937 of the D.C.S. MSS., Vol. XX, and with the commentary called Sāhityaratnamālā. The commentator is Śēṣakamalākara, son of Bālāmbā and Mōghanādāri.

Complete.

**Beginning:**

तव करकमलस्थां स्फाटिकीमक्षमालां
नखकिरणविभिन्नां दाडिमीबीजबुद्ध्या ।
अनुकलमनुकर्षन् येन कीरो निरुद्धः
स भवतु मम भूत्यै वाणि ते मन्दहासः ॥

प्रतिबिम्बं निजं दृष्ट्वा कुचे मातुरिभाननम् ।
स्तन्ये मन्दादरं वीक्ष्य स्मेरं स्मरहरं श्रये ॥

जडताङ्कुरचर्वणातिवेगाबलदोर्दं श्रुतिहेषितोषितम् ।
नतमानसमन्दुरास्पदं तं कुहनाश्वं कलयामहे वयम् ॥

लिखन् गण्डाभोगे धरणिसुदृशः पत्रलतिकां
वलद्वक्त्रां तत्र प्रतिफलितगात्रां जलधिजाम् ।
निरीक्ष्योद्यत्स्वेदप्रसरपुलकोद्भेदसुभग-
स्खलत्पाणिः प्रीणन् मधुरिपुरुभे ते विजयते ॥
पदवाक्यप्रमाणेषु प्रतिवादिविनोदिनम् ।
पितरं मेघनादारिं बालाम्बां च नमाम्यहम् ॥
श्रीगीतगोविन्दसमुद्भवानि सद्भावरत्नानि रसैकसूत्रे ।
ग्रश्नाति शेषः कमलाकरोऽयं परीक्षतां तानि विदग्धमण्डली ॥

इह खलु जयदेवो नाम कविः शृङ्गाराधिदेवताभूतलोकोत्तरगुण-पुरुषोत्तमचरितवर्णनानुरूपं सर्वरसातिशायि शृङ्गाररसप्रधानं गीतगोविन्दाभिधानं प्रबन्धं विदधानः ग्रन्थप्रतिपाद्यं वस्तूपक्षिपन्नेव तन्निर्देशरूपं मङ्गलमाचरति—

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥

राधामाधवयोः राधा . . . . . . . . . . . . . . . . . यमुनायाः कालिन्द्याः कूले तीरे प्रत्यध्वकुञ्जद्रुमं प्रतिमार्गलतागृहवृक्षे रहःकेलयोऽभिसारसंभोगक्रीडा जयन्ति सर्वोत्कर्षेण वर्तन्त इत्यर्थः । राधामाधवयोरिति प्रयुञ्जानेन शृङ्गारितयान्येभ्यो हरेर्लीलावतारेभ्यो वामनादिभ्योऽनेकनायिकावर्जनचातुर्येण दाशरथिरामादप्यतिशयं सूचयता कविना "विप्रलम्भेन संभोगो भूयसीं पुष्टिमर्हति । कषायिते हि वस्त्रादौ भूयान् रागोऽनुषज्यते" इति न्यायानुरोधेन सपरिकरेर्ष्यामानानन्तरसंभोगोऽत्र काव्ये प्राधान्येन प्रतिपाद्यत इति ध्वनितम् । यमुनाकूल इति च सैकतवेदिकाकन्दुकखेलनादिप्रसङ्गेन सञ्जातप्रथमावलोकनेनाङ्कुरितस्य वृन्दावनगवादिचारणलीलासमयवादितवेणुनिनादाकर्णनकौतुकसव्याजमन्दहसितावर्जितभावानुबन्धद्वितीयदर्शनेन पल्लवितस्य कुमारिकाजनोचितगौरीव्रताङ्गमज्जनार्थकलिन्दतनयावतरणसमयसमायातकृष्णहततीरस्थापिताम्बरकृतयाचनापदेशनर्मालापपूर्वकं

जलनिपीडितवसनतया सर्वाङ्गीणलावण्यविलोकनेन कुसुमितस्यानुरागस्य दुर्विषहविरहसन्तप्ततया क्वचिदपि स्थातुमशक्नुवत्यास्तीरवानीरकुञ्जकुसुमशयनमानीताया राधायाः क्वापि निर्वृतिमलभमानस्य प्रथमतदवलोकनादिसुभगप्रदर्शनेनात्मानं विनोदयितुमागतस्य च कृष्णस्य विदग्धसखीविरचितप्रथमसमागमस्यापि सम्पादकतया उभयोरपि कालिन्दीरोधसि स्पृहणीयतमत्वं प्रत्यध्वकुञ्जद्रुममिति च कोपेन क्वापि निलीनायां राधायां कचिन्मार्गे हंसपदपङ्क्तौ तच्चरणविन्यासधिया लतागृहशालिनमुपेत्य पुनः प्रतिनिवृत्य तदनवलोकनेन सा क्व गतेति विचारयतः कचिन्कोकिलानिनदं तदालापमाकलय्य सर्वतः कुञ्जमहीरुहान् विचिन्वतस्तदलाभकृतानवहनरुदितहसितप्रलपितविविधापलस्य माधवस्य राधाया अपि विरहकातरतया कचिदपि स्थातुमपारयन्त्याः सर्वेऽपि कुञ्जमहीरुहो उद्वेगका आसन् । अत एव मिलितयोस्तयोरनिरमणीयत्वेनैकैकमपि गातुमशक्नुवतोस्सङ्केतवसतिचिह्नभूता अभूवन्निति । रहःकेलयो जयन्तीत्यनेन च चौर्यरतं हि कामिनामत्यन्तोत्कण्ठाविनोदस्थानं रागिणां च नातः परं किमप्युत्कर्षाधायकमिति व्यज्यते ।

* * * *

हे धृतमीनशरीर जय, जयस्य ते कालः प्राप्तः । प्रशंसार्थमत्वर्थीयवप्रत्ययान्तेन केशवशब्देन कुटिलकुन्तलादिपदाभिरूप्यं वदता मत्स्यादिस्वरूपं न स्वाभाविकमिति व्यज्यते । धृतं लीलयाङ्गीकृतम्, न तु कर्मवशप्राप्तम् । कुतो न तथेत्यत आह—जगदीशेति ।

End:

निजपरिज्ञानभगवत्प्रसादनिरूपणव्याजेन ग्रन्थस्य सर्वोपयोगितां प्रतिपादयन् . . . . . . . .

यद्गान्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
यच्छृङ्गारविवेकतत्त्वमपि यत्काव्येषु लीलायितम् ।
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः
सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः ॥

स्पष्टम् ।

यन्निस्त्यैर्वचनैर्विरिञ्चिगिरिजाप्राणेशमुख्यैर्मुहु-
र्नानाकारविचारसारचतुरैर्नाद्यापि निश्चीयते ।
तद्भावैर्नयदेवकाव्यघटितैस्सत्सूरिसंशोधिते-
राद्यं वस्तु चकास्तु चेतसि परं सारस्यसीमाजुषः ॥

स्पष्टमेतत् ।

मतिप्रसूना गहनार्थशास्त्रैः संवर्धिता सूक्तिकुमारिकेयम् ।
. . . . . . . . . . . . . सन्तं पतिं प्राप्य यशः प्रसूताम् ॥

**Colophon:**

इति श्रीशेषकमलाकरविरचितायां श्रीगीतगोविन्दव्याख्यायां साहित्य-रत्नमालायां द्वादशस्सर्गः ।

Fol. 113*a* contains some songs. Fol. 113*b* is left blank.

---

## R. No. 5218.

Palm-leaf. 15½ × 1½ inches. Foll. 158. Lines, 8 in a page. Grantha. Good.

Purchased in 1926–27 from M.R.Ry. Dāsarathi Ayyaṅgār, South Gopalasamudram street, Mannargudi, Tanjore district.

लक्ष्मीतन्त्रम्.

**LAKṢMĪTANTRAM.**

Same work as that described under No. 5356 of the D.C.S. MSS., Vol. XI, wherein see for the beginning.

Complete in 1—57 Adhyāyas.

**End:**

अनिन्दकश्च शास्त्राणां परापरविधानवित् ।
आस्तिकः श्रद्दधानश्च लक्ष्मीलक्ष्मीपतिप्रियः ॥
क्रियायज्ञविभागज्ञस्तन्त्रान्तरविधानवित् ।
साङ्ख्ययोगविधानज्ञस्सर्वशास्त्रार्थतत्त्ववित् ॥
वेदवेदाङ्गतत्त्वज्ञो वेत्ता पशुपतेर्मतम् ।
ऊहापोहविधानज्ञो मानतर्कपदार्थवित् ॥

स्वाध्याध्यात्मिकशास्त्रार्थतत्त्वकथ्यतुर्वरैः ॥
ओंनमो वासुदेवाय तस्मै श्रीर्यस्य सा प्रिया ॥
ओंनमो विष्णुपत्न्यै च यस्या नारायणः प्रियः ।
नमो नित्यानवद्याय जगतस्सर्वहेतवे ।
ज्ञानाय निस्तरङ्गाय लक्ष्मीनारायणात्मने ॥

**Colophon:**

इति श्रीपाञ्चरात्रसारे लक्ष्मीतन्त्रोत्तरे रहस्यशास्त्रार्थसारो नाम सप्त-पञ्चाशोऽध्यायः ॥

---

R. No. **5219.**

Śrītāla. 8 × 2 inches. Foll. 40. Lines, 11 in a page. Grantha. Good.

Purchased in 1926–27 from M.R.Ry. Dāśarathi Ayyaṅgār, South Gopalasamudram street, Mannargudi, Tanjore district.

**पाद्मतन्त्रम्.**

**PĀDMATANTRAM.**

Same work as that described under No. 5293 of the D.C.S. MSS., Vol. XI.

Contains 12 Adhyāyas of the Jñānapāda, and 5 Adhyāyas of the Yōgapāda.

---

R. No. **5220.**

Palm-leaf. 15½ × 1 inches. Foll. 49. Lines, 6 in a page. Grantha. Good.

Purchased in 1926–27 from M.R.Ry. Dāśarathi Ayyaṅgār, South Gopalasamudram street, Mannargudi, Tanjore district.

(*a*) **वृत्तरत्नाकरव्याख्या—मतिमञ्जरी.**

**VṚTTARATNĀKARAVYĀKHYĀ: MATIMAÑJARĪ.**

Foll. 1*a*—17*a*. Fol. 17*b* is left blank.

Same work as that described under No. 1792 of the D.C.S. MSS., Vol. III. By Nṛsiṁhayajvan.

Incomplete.

---

(*b*) **वृत्तरत्नाकरव्याख्या—दीपिका.**

**VṚTTRATNĀKARAVYĀKHYĀ: DĪPIKĀ.**

Foll. 18*a*—26*b*.

Similar to the work described under No. 1792 of the D.C.S. MSS., Vol. II. By the son of Dēvarāja.

Complete.

**Beginning :**

सन्तः कुरुत दृढतरां भक्तिं प्रयताः प्रसादकृतदीक्षे ।
करिगिरिशिखरनिवासे देवे श्रीवल्लभे तस्मिन् ॥
पूज्ये पिङ्गलनागे प्रणतिं कुरुत प्रकृष्टगुणयोगे ।
छन्दस्सूत्रसुधा सा यस्मिन्नभवन्महोदधिसमाह्वे ॥
जीयात् कैतवमुनिरपि कवये विदुषां प्रियं छन्दः ।
व्यचिनोदतिगम्भीरं यश्छन्दोज्ञेभ्य उत्तमं बोधम् ॥
कुर्मः प्रणतिमहरहर्विदुषां वेदाङ्गविवरणपराणाम् ।
वाल्मीकिसंमितानां पादाम्भोजे तु देवराजानाम् ॥
पठिता स्मृतिषु यदाभूत् गार्ग्यो वंशेन देवराजेति ।
तस्यात्मजेन रचिता व्याख्येयं दीपिका नाम ॥
क्वाहं क्वच गम्भीरं छन्दश्शास्त्रं तथापि विवरिष्ये ।
लीलास्वस्तिकमतिवस्तनुते सत्ताहशं वृत्तम् ॥

इह केदारः प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं सप्रयोजनमाशिषं सूचयित्वा स्वात्मानं प्रकटयन् वस्तु निर्दिशति—सुखेति श्लोकत्रयेण । सन्तानं परम्परा, तस्य सुखेन सिद्धिः सुखसन्तानसिद्धिः, तदर्थं सुखसन्तानसिद्धिमभिलष्य । पारम्पर्यक्रमेणाविच्छित्तय इत्यर्थः । छन्दोविचितेः प्रकृतिगम्भीरतया प्रवेष्टुमशक्यत्वात्तद्विमुखीकृतेषु विद्वत्सु लोके छन्दःशिक्षाविच्छित्तौ सत्यां तन्निवर्तय इति यावत् । गौरीविनायकोपेतमित्यत्र विनायकग्रहणेन प्रत्यूहनिवृत्तिर्दर्शिता । लोकशङ्करमित्यनेनाशीस्सूचिता ॥

**End :**

वंशेऽभूदिति । वेदतन्त्रावबोद्धा वेदानां तन्त्रस्य प्रस्तारस्य च बोद्धा वेदतन्त्रावबोद्धा । वन्ध्येकपुत्रः केदारः तेनेदं वृत्तरत्नाकराख्यम् ।

छन्दश्शास्त्रमिदं पुरा त्रिनयनाल्लेभे गुहो नन्दत-
स्तस्मात्प्राप सनत्कुमारकमुनिस्तस्मात्सुराणां गुरुः ।

तस्माद्देवपतिस्ततः फणिपतिस्तस्माद्गुरुः पिङ्गल-

स्तच्छिष्यैर्बहुभिर्महात्मभिरयो भूमौ प्रतिष्ठापितम् ॥

---

(c) वृत्तरत्नाकरव्याख्या— धीशोधिनी.

VṚTTARATNĀKARAVYĀKHYĀ : DHĪŚODHINĪ.

Foll. 27*a*—49*a*. Fol. 49*b* is left blank.

Same work as that described under No. 1794 of the D.C.S. MSS., Vol. III.

Complete.

---

R. No. 5221.

Palm-leaf (Śrītāla). 17½ × 1½ inches. Foll. 83. Lines, 15 in a page. Grantha. Good.

Purchased in 1926–27 from M.R.Ry. Daśarathi Ayyaṅgār, South Gopalasamudram street, Mannargudi, Tanjore district.

(a) विषयवाक्यदीपिका.

VIṢAYAVĀKYADĪPIKĀ.

Foll. 1*a*—67*b*.

Same work as that described under Nos. 5001, 5002 of the D.C.S. MSS., Vol. X. By Raṅgarāmānujasvāmin.

Complete.

---

(b) रहस्यमञ्जरी.

RAHASYAMAÑJARĪ.

Foll. 68*a*—73*a*.

Explains some of the doctrines of Śrī-Vaiṣṇava religion. By Praṇatārtihara, son of Varadārya.

**Beginning :**

सौम्यजामातृयोगीन्द्ररहस्यामृतवर्षिणी ।

रहस्यमञ्जरी रम्या राजते नितरां भुवि ॥

अन्तर्बहिश्चेतिश्रुत्या ह्यणोरन्तर्विभोर्बहिः ।

विष्णोः श्रुता या व्याप्तिश्च . . . . . . . . ॥

अणोरणीयान्महतो महीयानिति विस्तरात् ।

समवायः कथं वा स्यादेकत्रैव विरुद्धयोः ॥

विरुद्धयोस्समावेश एकाधिकरणे यदि ।

भेदाभेदावपि तथा स्यातां ब्रह्मण्यजा(चितौ) ॥

. . . . . कथने को दोष इति चेन्न तत् ।
विरुद्धघटनाशक्त्या विरोधपरिहारवत् ॥
विरुद्धघटनाशक्तिर्न भेदाभेदवादिभिः ।
अङ्गीकृता तयो . . तदाभिश्शक्तिरीरितः ॥
स्वरूपतोऽपि . . . . . . . स्वरूपतः ।
विरुद्धघटनाशक्त्या विरोधोऽप्यत्र दृश्यते ॥

**End:**

पराङ्कुशमुनीन्द्रादिसूक्तिभाष्यविरोधतः ।
सौम्यजामातृयोगीन्द्रसम्प्रदायप्रवर्तकैः ॥
सर्वज्ञैस्सर्वविद्भिश्च सर्वशास्त्रार्थपारगैः ।
काणादतन्त्रवत्पूर्वपक्षत्वेनाप्यनादरात् ॥
अस्माभिरपि संस्पृश्यमित्यस्माभिर्विभाव्यते ।
श्रीकौशिकाधीशवरप्रदार्थलब्धात्मनाम्नेन नतार्तिहन्त्रा ।
भाग्येन सम्यग् लिखिता रहस्यमञ्जर्यसौ सर्वसुहृत्सुभोज्या ॥
भेदस्स्वामिकृपाफलान्यगतिषु श्रीव्याप्त्युपायत्वयो-
स्तद्वात्सल्यदयानिरुक्तिवचसो न्यासे च तत्कर्तरि ।
धर्मत्यागविरोधयोस्स्वविहिते न्यासाङ्गहेतुत्वयोः
प्रायश्चित्तविधौ तदीयभजनेऽणुव्याप्तिकैवल्ययोः ॥

The scribe adds—

विकार्यब्दे तुलामासि श्रीरहस्यार्थमञ्जरी ।
लिखिता वेङ्कटार्येण चम्पकारण्यवासिना ॥

---

(c) कारणमालाशतकक्ष्या.
KĀRAṆAMĀLĀŚATAKAKṢYĀ.

Foll. 73b—83a. Fol. 83b is left blank.

A treatise containing 100 arguments in support of the view that god Nārāyaṇa is the one Supreme Brahman and that the deities referred to under different names in scriptural texts do really denote god Nārāyaṇa only.

Complete.

**Beginning:**

यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। जन्माद्यस्य यत इति श्रुतिसूत्राभ्यां जगदुदयविभवलयलीललक्षणविलक्षणविचक्षणं वस्त्वभिहितम्। तदेव सदेव सोम्येदमग्र आसीत्। एकमेवाद्वितीयं ब्रह्मेति शाखान्तरे सच्छब्देनाभिहितमवगम्यते। तदेव ब्रह्म वा इदमग्र आसीदिति शाखान्तरेण ब्रह्मशब्देनाभिहितम्। तदेव आत्मा वा इदमेक एवाग्र आसीदिति शाखान्तरे आत्मशब्देनाभिहितम्। एवञ्च नामरूपधर्मविशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनात् शाखान्तरे कर्मभेदस्स्यादिति द्वितीयचतुर्थपादान्ताधिकरणे शाखान्तरे किमग्निहोत्रादिकं भिद्यते किं वा सर्वशाखासु एकमेवेति संशय्य विशेषपुनःश्रुतिलक्षणादभ्यासाददूरत्वलक्षणात् प्रकरणात् क्वचिदैन्द्राग्नमेकादशकपालं क्वचित् द्वादशकपालमिति गुणाच्च कर्मभेद इति पूर्वपक्षं प्राप्य पुनःश्रुत्या हि कर्म विधेयमित्येतत् सिद्धमिति विधिवशात्सु भेदो विहितस्य विधानायोगादेवमसन्निधावपि परिहृत्यमानात्।

* * * *

शिवशब्दस्य मङ्गलादिसाधारणतया विशेषसमर्पकत्वायोगेन तस्यापि शिवशब्दस्य सदादिशब्दतुल्यतया पूर्वन्यायेन नारायण एव पर्यवसन्नतया श्रुतिसूत्रोदितजगदुदयविभवलयकारणत्वलक्षणपरब्रह्मलक्षणस्य न देवतान्तरातिव्याप्तिशङ्केति प्रथमा कक्ष्या।

**End:**

तत्रैव सदाशिवादिशब्दानां पर्यवसानमिति न शिवे (कारणवाक्यपर्यवसानमिति नव) नवतिः। हरिरोमिति सामानाधिकरण्येन प्रणववाच्यत्वे भगवतस्सिद्धे यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः इति श्रुत्या उपक्रमोपसंहारस्थप्रणवयोरेकवाक्यत्वे वैश्वानरन्यायेन तन्मध्यगतानां देवतान्तरवाचकानां शब्दानां लक्षणया भगवद्वाचकत्वे सिद्धे सदादिपदानां तत्रैव पर्यवसानमिति न देवतान्तरे ब्रह्मलक्षणातिव्याप्तिशङ्केति कल्याणः पन्थाः।

The scribe adds—

विकार्यब्दे तुलामासि श्रीमत्कारणमालिका।
वेङ्कटार्येण लिखिता जीयतां चक्रवर्तिना॥

R. No. **5222.**

Palm-leaf. 16½ × 1 inches. Foll. 74. Lines, 8 in a page. Grantha. Injured.

Purchased in 1926–27 from .R.Ry. Dāśarathi Ayyaṅgār, South Gopalasamudram street, Mannargudi, Tanjore district.

(*a*) दक्षिणद्वारकामाहात्म्यम्.

DAKṢIṆADVĀRAKĀMĀHĀTMYAM.

Foll. 1*a*—62*b*.

Same work as that described under R. No. 520(*b*) ante.

Complete.

---

(*b*) पाद्मपुराणम् (उत्तरखण्डः).

PĀDMAPURĀṆAM (UTTARAKHAṆḌAḤ).

Foll. 63*a*—74*b*.

Contains the 29th Adhyāya complete and breaks off in the 30th Adhyāya.

Same work as that described under No. 2129 of the D.C.S. MSS., Vol. IV, Part I.

---

R. No. **5223.**

Palm-leaf. 17 × 1 inches. Foll. 25. Lines, 5 in a page. Grantha. Much injured.

Purchased in 1926–27 from M.R.Ry. Dāśarathi Ayyaṅgār, South Gopalasamudram street, Mannargudi, Tanjore district.

बाणासुरविजयम्.

BĀṆĀSURAVIJAYAM.

A drama having for its plot the conquest of Bāṇāsura by Lord Kṛṣṇa and the marriage of Uṣā, the daughter of Bāṇāsura, with Aniruddha, grandson of Lord Kṛṣṇa: by Vāmanabhaṭṭabāṇa.

Complete in five Aṅkas.

**Beginning:**

. . . . . . . . . . . . . वक्षः स्थलं द्योतयन्

वेणुक्वाणविजृम्भणैर्विरचयन् विश्वस्य कर्णोत्सवम् ।

कुर्वन् कामपि निर्वृतिं दिविषदा . . . . . . .

. . . . . . . . . . . . . . गोपालकग्रामणीः ॥

अपिच—

मौर्वीभूतविभूषणं त्रिजगदाधारं दधत्कार्मुकं
पाथोराशिनिषङ्गशायिनमिषु . . . . . . . . ।
. . . . . . . . . . . . . . . वासौ पुराणां त्रयी
मङ्गालेपनमाततान महते देवाय तस्मै नमः ॥

नान्द्यन्ते सूत्रधारः—नेपथ्याभिमुखमवलोक्य . . . . . . . . . . . .

पारिपार्श्वकः—भाव अयमस्मि ।

सू—मारिष अद्य बाणासुरविजयं नाम किमप्यभिनवं रूपकं . . .
. . . . . . . . . . . . . . . . ये ।

पारि—किमेतद्रूपकं परिषदनुरञ्जनक्षमम् ।

सू—किमुच्यते परिषदनुरञ्जनक्षममिति । शृणु—

. . . . . . . . . . . . . . . . .
. . . . . भवती रचना यदीया ।
सङ्कथ्यते सकलरञ्जनकानि यस्मिन्
शृङ्गारवीरभरितं महतां चरित्रम् ॥

स तत्पुनस्तादृश . . . . . . . . . . . . . .

पारि—यद्येवं तस्य पुनरभिनवानवद्यप्रबन्धस्य प्रणेतारं क्रमविधानतोऽवगन्तुमभिलषति मे हृदयम् ।

. . . . . . . . पा कविपुङ्गवाना-
मग्रेसरो जगति वामनभट्टबाणः ।
वाग्देवता स्वयमुपेत्य यदीयवक्त्रे
सारस्वतं किमपि मन्त्रपदं . . . ॥

. . . . . . . दृष्यते जगति ।

गद्ये पटीयान् भुवि भट्टबाणः पद्ये पटीयान् किल कालिदासः ।
गद्ये च पद्ये च परं पटीयान् . . . . . . . . . . . . ॥

. . . . : . . यते विलम्बः ।

सू—नेपथ्याभिमुखं परिवृत्य, अये अस्मदुद्योगात् प्रागेव बाणासुरमन्त्रिणः कुम्भाण्डस्य . . . . . . . . . . . . . . . वयमपि अनन्तरकरणीयाय सज्जीभवावः । इति निष्क्रान्तः ॥

॥ प्रस्तावना ॥

**End:**

कृष्णः—भगवत्प्रसादात्सर्वं संपन्नमेव ।

तथा च—

दर्पस्य प्रशमेन बाणदनुजश्शान्ते पथि स्थापितो
भूभारोऽपि निराकृतो दनुभुवां स्वान्तेन दुष्टात्मनाम् ।
बध्वा सार्धमयं मया पुनरसौ पौत्रस्समासादितः
किं वान्यत्पुनरर्थनीयमियति प्राप्ते तवानुग्रहे ॥

तथापीदमस्तु भरतवाक्यम् ।

चरतु निगमवाचा मानसं चोदितेऽर्थे
परिहरतु च रागद्वेषदोषानुषङ्गम् ।
भवविपिनविहारात् देहिनां मोहभाजां
त्वयि च मयि च भक्तिर्वर्ततां भेदशून्या ॥

इति निष्क्रान्तास्सर्वे ॥

पञ्चमोऽङ्कः ॥

समाप्तमिदं बाणासुरविजयं नाटकम् ॥

---

## R. No. **5224.**

Palm-leaf. 17 × 1 inches. Foll. 34. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1926-27 from M.R.Ry. Dāsarathi Ayyaṅgar, South Gopalasamudram street, Mannargudi, Tanjore district.

(a) अर्थपञ्चकनाटकम्.

ARTHAPAÑCAKANĀṬAKAM.

Foll. 1a—13b.

Same work as that described under No. 12494 of the D.C.S. MSS., Vol. XXI; but with the following additional stanzas after the colophon. Complete.

विशेषकार्यप्रतिसर्यमाणप्रकोष्ठविन्यस्तवराङ्गदेन ।
करेण मुग्धेन चिराय शौरिमाँ याचमानं शरणं वृणेऽहम् ॥

वरवरमुनिभृत्यैर्वन्द्यमानेन विद्व-
न्निकरसमभिनन्द्यज्ञानमुद्राभिधानम् ।
कृतममितगुणेन श्रीफणीन्द्रादिरामा-
नुजगुरुकृतिनेष्टं नाटकं पश्यतेस्तु ॥

---

(*b*) कुहनाभैक्षवम्.
KUHANĀBHAIKṢAVAM.

Foll. 14*a*—26*b*.

A kind of drama in one Act called technically Prahasana. Herein a Sannyasin is represented as having fallen in love with a lady in the possession of a Muhammadan named Ahmed Khan and got her through the help of a disciple. The author is Tirumalanātha, son of Bommakanṭi Gaṅgadhara.

Complete.

**Beginning :**

देवानाममृतप्रदानसमये संप्राप्तकान्ताकृति-
र्लीलाचङ्क्रमवल्गितस्तनभरो भास्वद्विभूषावलिः ।
सान्तर्हासवचःप्रपञ्चचतुरस्निग्धालसालोकनैः
पश्यन्नासववञ्चितासुरगणो नारायणः पातु नः ॥

नान्द्यन्ते सूत्रधारः—समन्तादवलोक्य, अहो निरङ्कुशा हि वसन्तलक्ष्मीः । तथाहि—

मधुकरमधुरारावैर्मदकलकलकण्ठमञ्जुलालापैः ।
प्रविकचरसालपालीपरिमलसुभगैश्च पूरितं भुवनम् ॥

अपिच—

प्रविकासे पद्मानां प्रतिवनपरिफुल्लपुष्पपालीनाम् ।
बहुविधपरिमलभारानन्दमिहायान्ति मलयपवमानाः ॥

(परिक्रम्य, नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् ।
(प्रविश्य) नटी—अय्य इयम्हि ।

सू—आर्ये राजशेखरललामभूतस्य भगवतो गोपीनाथस्य वसन्तोत्सवदर्शनागतया विदुष्या परिषदा बोम्मकण्ठिगङ्गाधरसुतस्य तिरुमलनाथस्य कृतिं कुहनाभिक्षवं नाम प्रहसनमभिनेतव्यमित्यादिष्टोऽस्मि ।

नटी—जुज्जइ एव्व । संपदं उण संति . . . मिभआळेदुओ विअ ।

सू—कथमिव ।

नटी—अय्य सुणाहि । जाणासि खु तुमं वि तुह जामातुणो सहावं ।

सू—जानाम्येव मूर्खोऽयमिति । ततः किम् ।

* * * *

ततः प्रविशति दामोदरः—साधु २. आकर्ण्यावलोक्य साधु २, मधुरोऽयं मधुमास इति श्लोकं पठित्वा । सत्यमेतत् । यतः—

पूर्वेद्युरस्मद्गुरोर्गोपिकारमणस्य नमस्कारार्थं गतस्तत्र ललितकुसुमसुकुमारां लास्यचतुरां चन्द्ररेखामिव चन्द्रलेखां विलोकयन् रन्ध्रान्वेषिणो मन्मथस्य शरनिकरजर्जरीकृतहृदयस्तदारभ्य सात्त्विकोदयपारम्पर्यवशादुज्झितलज्ज उन्मत्तो वर्तते । य एषः—

तस्याः स्मरन् जपमिषेण निमील्य नेत्रे
न्यासच्छलेन करयुग्ममितस्ततोऽपि ।
प्रासार्य तद्वनपयोधरहेमकुम्भ-
संस्पर्शनाभिनयमातनुतेऽन्तरिक्षे ॥

किंचायं पञ्चबाणज्वरार्तः—

आर्द्रं काषायमाधत्ते मस्तकन्यस्तचन्दनः ।
वापीं त्रिषवणस्नानव्याजेन प्रतिगाहते ॥

अपि च अहमप्यनेन गुरुणा समादिष्टोऽस्मि, भद्र भवता स्वस्वखिलभिक्षूणां मध्ये विश्वसनीयशिष्योऽस्मि । तेन तुभ्यमानियमभावात् ब्रवीमि । यद्यहं चातुर्मास्यशतं जीवनीयः मठोऽपि वर्धनीयश्चेदद्यैव चन्द्ररेखायाः समागमं संपादयेति । मया च सङ्गमनाय महाराजच्छत्रधारिणः अहंमदखानतुरुष्कस्य वशे वर्तमानायास्तस्याः सङ्घटनं कर्तुमशक्यमिति निवारितेन तेन मठगतसर्वस्वव्ययेनापि ममाभिलषितं संपादयेति सनिर्बन्धं सत्वरं प्रार्थितोऽस्मि ।

**End:**

मि—भद्र सर्वत्राप्यस्खलितबुद्धिर्महस्खलु प्रियं करोषि ।

द्वा—किं ते भूयः प्रियमुपहरामि ।

मि—किमतः परं प्रियमस्ति ?

अतिसन्धाय तरसा तुरुष्कसरघव्रजम् ।
सच्छिष्येण त्वया यस्मान्मधुधारा ममार्पिता ॥

तथापीदमस्तु भरतवाक्यम्—

काले सन्तु समन्ततोऽपि जलदा धारालधारामुचो
धात्रीयं चतुरर्णवीवलयिनी सस्यातिशस्या भवेत् ।
कुर्वन्तु द्विजसत्तमा दिविषदामिष्टैरभीष्टैः प्रियं
कान्तासंमितया गिरा कृतविदो दीव्यन्तु भव्या बुधाः ॥

इति निष्क्रान्तास्सर्वे ।

**Colophon:**

समाप्तमिदं कुहनाभैक्षवनाम प्रहसनरूपकम् ॥

इति वोम्मकण्टिगङ्गाधरसुततिरुमलनायकृतौ कुहनाभैक्षवं समाप्तम् ॥

---

(c) उन्मत्तराघवम्.

UNMATTARĀGHAVAM.

Foll. 27*a*—34*a*. Fol. 34*b* is left blank.

Same work as that described under R. No. 3873(*b*) ante. By Bhāskara.

Complete.

---

R. No. **5225.**

Palm-leaf. 15¾ × 1⅝ inches. Foll. 74. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1926–27 from M.R.Ry. Dāśarathi Ayyaṅgār, South Gopalasamudram street, Mannargudi, Tanjore district.

अलङ्कारसर्वस्वम्.

ALAṄKĀRASARVASVAM.

A treatise on poetics: by Dēvarakoṇḍa Aubalārya Kṛṣṇa.

Complete.

**Beginning :**

सत्यानन्दं परित्राणं नित्यमब्जादिधारिणम् ।
स्तुत्यं बुधैः पयोजाक्षं नित्यं गोपालकं भजे ॥
कृतं देवरकोण्डौभलार्यकृष्णबुधेन यत् ।
तदलङ्कारसर्वस्वमाचन्द्रार्कं प्रवर्तताम् ॥
श्रीगोपालस्य देवस्य यशो भूषयितुं कृता ।
कृष्णधीरकृतिस्सेयं स्वयं तेन विहष्यते ॥
सूक्तैव प्रतिपाद्यमहिम्ना प्रबन्धमहत्ता—
कवेरल्पापि वाग्वृत्तिर्विद्वत्कर्णावतंसति ।
नायको यदि वर्ण्येत लोकोत्तरगुणोत्तरः ॥
पूर्वशास्त्रानुसारेण कतिचित्कथिता इमे ।
एते गोपालदेवस्य गुणा वाचामगोचराः ॥

अथादौ तावत् कतिचित्कृतिनायकगुणविशेषा उच्यन्ते—

महाकुलीनतौज्ज्वल्यं माहाभाग्यमुदारता ।
तेजस्विता विदग्धत्वं धार्मिकत्वादयो गुणाः ॥

तेषां स्वरूपं निरूप्यते ।

आद्यो यथा—

महाकुलीनता नाम कुले महति संभवः ॥

* * * *

तत्र भेदा उच्यन्ते—

उदात्त उद्धतश्चैव ललितश्शान्त इत्यपि ।
धीरपूर्वा इमे पूर्वैश्चत्वारो नायकास्स्मृताः ॥

धीरोदात्तधीरोद्धतधीरशान्तधीरललितश्चेत्येते सर्वरससाधारणाश्चत्वारो नायकाः ।

आद्यो यथा—

महासत्त्वोऽतिगम्भीरः कृपावानविकत्थनः ।
मायावी सुलभक्रोधस्स धीरोद्धत उच्यते ॥

रामजामदग्न्यादयः ।

धीरललितः—

निश्चिन्तो धीरललितः कलासक्तो विवेकवान् ।
सचिवन्यस्तसाम्राज्यभारस्सुखपरायणः ॥

वत्सराजाग्निवर्णादयः ॥

**End:**

प्रत्यक्षमनुमानं चोपमानं शब्द इत्यपि ।
ततोऽर्थापत्तिरनुपलब्धिस्तदनु संभवः ॥
ऐतिह्यमित्यलङ्कारा ज्ञेयाः पञ्चदशाधिकाः ॥

विज्ञेयाश्शतसङ्ख्यकाः ॥

**Colophon:**

इति देवरकोण्डोमलार्यकृष्णार्यविरचितमलङ्कारसर्वस्वं समाप्तम् ॥

---

R. No. **5226.**

Palm-leaf. 16 × 1 inches. Foll. 37. Lines, 5 in a page. Grantha. Slightly injured.

Purchased in 1926-27 from M.R.Ry. Dāśarathi Ayyangār, South Gopalasamudram street, Mannargudi, Tanjore district.

रससर्वस्वचम्पूः.

RASASARVASVACAMPŪḤ.

A work in prose and verse, descriptive of the customs and manners of the different countries in India. The work is in the form of contrary opinions expressed by sages Viśvāmitra and Vasiṣṭha, on being consulted by Indra as to which country is the best. By Śrīrāmacandramakhin, son of Kēśavadīkṣita and grandson of Patañjalimakhin who was the son of Kēśavamakhin.

Incomplete.

**Beginning:**

. . मरन्दकल्लोलहल्लोहसितगल्लयः ।
लीलया मण्डितं चित्ते मम मोदकलीलया ॥
नलिनसहोदर . . . . कुतुकसंपदामयनम् ।
करुणालयमरुणाभं प्रणम मनः शम्भुभाग्यपरिणामम् ॥
शृङ्गाररससर्वस्वशृङ्गारितभुजान्तरम् ।
भजन्तशयनं तेजश्चिरन्तनमुपास्महे ॥

यद्वक्त्राम्बुजरङ्गसीमनि परं षड्दर्शनी नर्तकी
नृत्तान्यातनुते दृशो धवलिता यत्कीर्तिविस्फूर्तिभिः ।
यद्दैनन्दिनहव्यदानविधिभिर्जातास्सुरास्तुन्दिला
भूमावस्ति समस्तवादितिलकः श्रीरामनामाध्वरी ॥

वाणी कौशिकमल्लिकोदरपुटीनिर्गत्वनिर्यन्मधु-
(स्रोतो)वीचिसहोदरी विजयते वाचैव मोचाकरी ।
कण्ठे कालजटाकलापविलुठद्गङ्गातरङ्गार्भटी
स्निग्धा यस्य स तस्य केशवमखी पुत्रोऽजनिष्टात्मजः ॥

विख्यातौ भ्रातरौ यस्य देहादिव विनिर्गतौ ।
आधानादीश्वरमखी राजचूडामणिर्मखी ॥

तस्यासंस्तनयाः पञ्च सञ्चारिण इवागमाः ।
तेषां मध्ये महातेजाः पतञ्जलिमखीश्वरः ॥

ततोऽजनि बुधोत्तंसः श्रीमान् केशवदीक्षितः ।
यस्य कीर्तिसुधाम्भोधौ दिग्भित्तिर्लोकमण्टपः ॥

. . . . . यज्वसतां सततं गुरूणां
पादारविन्दपरिचिन्तनवीततन्द्रः ।
श्रीरामचन्द्रमखिराडिति सर्वलोकै-
(र्यः) केरलाभरणनिर्मितिसादरोऽस्मि ॥

न तान् मन्ये येषां कुकवनमहादावदहन-
प्रसर्पे . . . प्रलयमुपयात्येव भुवनम् ।
निगुम्भो यद्वाचां स जयतु विरिञ्चाननपुटी-
नटद्वाणीपाणिस्फुरितमणिवीणाध्वनिसुखः ॥

मर्माणि कृन्तति शनैरपहन्ति मेधा-
मन्यादृशं मनसि वैकृतमादधाति ।
प्रायेण दुष्कविवचःश्रवणं बुधानां
प्राचीनजन्मकविदुष्कृतदुर्विपाकः ॥

वन्ध्ये वृक्षे फलमिव मयि वास वाचं भवानि
प्राच्ये दृष्टा भवसि सकलज्ञन्यसन्धेय लोके ।

प्राज्ञो भूपो न हि न हि पुनर्नैव विद्वा . . .
स्त्वद्दत्तां मे मणितिमनघां त्वत्पदाब्जेऽर्पयामि ॥

* * * *

शास्त्रेषु सत्स्वपि कलास्वपि तादृशीषु
काव्ये स्थितं मम मनः कृपयाम्बिकायाः ।
वाल्मीकितापसवरश्च पराशरस्य
भाग्यं मुनिश्च भुवनेषु कथं प्रसिद्धौ ॥

अस्मिन्नय विवादो विधिरयमिति च प्रत्ययो नास्ति येषां
शब्दव्युत्पत्त्यभावादपि सकलजने . . . यां भजन्ते ।
उच्चैर्घोषेण मूढेऽप्यनुचितमतयस्तन्वते ये तु पूजां
तेषामग्रे प्रबन्ध . . . . . . . . किन्नु कुर्यात्कवीन्द्रः ॥

न रसो न गुणो न चार्थपोषो मृदुता वा न हि मामके प्रबन्धे ।
सरसा रचना . . . . शैस्सरसानां हृदये पदं दधातु ॥

कतमो देशो रम्यः कस्याचारो मनोहरो महताम् ।
इति वादिनि देवपतौ सङ्घर्षोऽभूद्वसिष्ठगाधिजयोः ॥

वसिष्ठः—

देव पाकशासन कोसलगौडीयकामरूपघूर्जरकुन्तलनेपालादिनानादेशा स्समीचीनाचारा . . . . . मानाः ।

इन्द्रः—

भगवन् गाधिनन्दन किमत्रभवतां भवतां मतम् ।

विश्वा—

उक्ताचारानुष्ठाने . . न समीचीनस्वधर्मानुष्ठाने सर्वस्यापि सर्वो देशस्समीचीन एव । तदभावे काश्यपि समीचीना न मता । तदुक्तम्, अत एव—

अशनं वसनं वासः काश्यां येषाममार्गतः ।
कीकटेन समा काशी गङ्गाप्यङ्गारवाहिनी ॥

**End:**

म—

भुवि जनिमतां नृणां कदाचिदुत्सवेन भाव्यमिति परिणयोत्सवे नाव्यते। काचिन्निषादी तनयं प्रसूते कश्चिन्निषादस्तु कषायपायीति तद्वत् परिणेतुः किं नैकं प्रयोजनम् । अत एव तदुक्तोद्देश्यताभावात् स्त्रीणां साधारणता ।

म—

भगवन् स्वदारव्यतिरिक्तत्वं परत्वमिति ।

---

## R. No. 5227.

Palm-leaf. 19½ × 1½ inches. Foll. 46. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1926-27 from M.R.Ry. Dāśarathi Ayyangār, South Gopalasamudram street, Mannargudi, Tanjore district.

रहस्यत्रयकारिकावली.

RAHASYATRAYAKĀRIKĀVALĪ.

A treatise in verse explaining the three Rahasyas of the Śrī-Vaiṣṇavas and based on the Rahasyatrayasāra of Vēdāntadēśika.

Incomplete.

**Beginning:**

श्रीरहस्यत्रयीसारदिव्यसारस्वतामृतम् ।
. . . क्तिरपां राशेरासीत्तं शरणं श्रये ॥
. . . . . . . स्तस्य हृदि मङ्गलदीपिका ।
वितन्यते देशिकानां प्रसादात्कारिकावली ॥
गुरुपङ्क्तौ परा भक्तिर्देववद्यस्य विद्यते ।
स एवाधिकरोत्यत्र सारशास्त्रे न चेतरः ॥
तादृशी भक्तिरप्येषु सिध्येत्स्वाभाविकैर्गुणैः ।
निर्दोषैर्विदितैरेव परेषामुपकारकैः ॥
अतो हेयप्रतिभटस्वाभाविकमहागुणा ।
वर्ण्यते सारशास्त्रादौ साध्वी गुरुपरम्परा ॥
साक्षाद्देवो जगन्नाथः कृत्वा मर्त्यमयीं तनुम् ।
मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना ॥

साक्षान्नारायणो देव इति पाठान्तरं पुनः ।
संहितान्तरसन्दृष्टं श्रीसूक्तौ व्यक्तमीक्ष्यते ।
सर्ववेदान्तसारार्थतत्त्वयाथार्थ्यबोधना ॥
ईश्वरशक्तिविशेषेण विना नैवोपपद्यते ।
स्वाभाविकेन भगवत्कारुण्येन विना कथम् ॥
केवलेन मनुष्येण शक्यं संसृतिमोचनम् ।

* * * *

यत्नतः श्रीशठरिपुप्रभृतिष्वनुकम्पया ।
अनुप्रविश्य भाषाभिर्निगमान्तोपबृंहणम् ॥
सर्वाधिकारयोगस्य भाषया तत्त्वनिर्णयः ।
लोकोपकारकस्तुल्यस्सूरिष्वेषु दशस्वपि ॥
वकुलाभरणस्त्वत्र श्रीमन्नाथमुनेर्मुखात् ।
शारीरकादिसच्छास्त्रप्रवक्ताभूत् कृपानिधिः ॥
ईदृग्विधोपदेशादप्यागमान्तविरोधिना ।
निर्मूलनं प्रबन्धेऽपि शिष्यते तत एव तु ॥

* * * *

श्रीमान् वेङ्कटनाथार्य इत्ययं चात्मनो मनुः ।
प्रदत्तो वेङ्कटेशेन तोण्डमान्चक्रवर्तिने ॥
अस्य देशिकवर्यस्याप्यतिदेवातिमानुषम् ।
अपारं दिव्यचरितं विश्रुतं विमतेष्वपि ॥
तस्माच्छ्रीवेङ्कटेशस्य वेदान्ताचार्यसंज्ञया ।
विभवाविर्भावभेद इति सत्त्वस्थसंमतः ॥
श्रीभाष्यकारसिद्धान्तं कृतादिवदनाकुलम् ।
कर्तुकामेन गुरुणा वेदान्ताचार्यकं यतः ॥
श्रीरहस्यत्रयीसारो गीतोपनिषदां समः ।
विभाव्यते सद्भिरेतत्सप्रमाणोपपत्तिकम् ।
अथैवमपि संसारिचेतनेभ्योऽपवर्गदम् ।
वेदान्तशास्त्रमित्येत . . श्चन्द्राहते . . ॥
कर्मचक्रानुसारेण त्रिवर्गरुचयो जनाः ।
अपवर्गे पुमर्थेऽपि भवन्त्येव पराङ्मुखाः ॥

हरेर्योगविभूत्यंशे नित्यताभिमता यथा ।
लीलाविभूतिनित्यत्वमप्येवमिति च श्रुतम् ॥
नैतदेवं सतीत्येवं वेदान्तो निखिलोऽपि च ।
अप्रमाणं भवेत्तच्चेत् कृत्स्नस्यापि न तत्कृतः ॥

End:

इति द्वयाख्यमन्त्रस्य भाष्यकारोपदर्शितः ।
खण्डयोरपि (संप्रोक्तः) परमार्थो महात्मनाम् ॥
विशदज्ञानहीनोऽपि सकृदुच्चारिते क्षणात् ।
कृतकृत्यः कृतार्थश्च भवत्येव न संशयः ॥
इदं शरणमज्ञाना(मिदमेव विजानताम्) ।
इदं तितीर्षतां पारमिदमानन्त्यमिच्छताम् ॥
सदा हिततमं नान्यदपि बोधतमं द्वयात् ।
इति श्रीभाष्यकारादिदर्शितोऽयं महापथः ॥

---

## R. No. 5228.

Palm-leaf (Śrītāla). 14 × 1 inches. Foll. 151. Lines, 7 in a page. Malayalam. Much injured.

Purchased in 1926-27 from M.R.Ry. V. B. Maṇikka Mudaliyar, Shoranur.

माधवीया धातुवृत्तिः

MĀDHAVĪYĀ DHĀTUVṚTTIḤ.

Same work as that described under R. No. 1483 ante. By Mādhava. Contains up to the end of the first group of roots called Bhvādi.

---

## R. No. 5229.

Śrītāla. 6 × 1 inches. Foll. 161. Lines, 6 in a page. Malayalam. Good.

Purchased in 1926-27 from M.R.Ry. V. B. Maṇikka Mudaliyar, Shoranur.

शृङ्गाररससर्वस्वम्.

ŚṚṄGĀRARASASARVASVAM.

Same work as that described under R. No. 5137 ante. By Anantanārāyaṇa.

Complete.

---

## R. No. 5230.

Śrītāla. 15 × 2 inches. Foll. 61. Lines, 10 in a page. Malayalam. Slightly injured.

Purchased in 1926-27 from M.R.Ry. V. B. Māṇikka Mudaliyār, Shoranur.

### मालतीमाधवव्याख्या.
### MĀLATĪMĀDHAVAVYĀKHYĀ.

Foll. 1a—44b.

Same commentary as that described under R. Nos. 2888 and 3071 ante. By Pūrṇasarasvatī.

Wants the beginning in the first Aṅka and breaks off in the third Aṅka.

Foll. 45—61 contain some songs in Malayalam.

---

## R. No. 5231.

Śrītāla. 16 × 2 inches. Foll. 96. Lines, 8 in a page. Malayalam. Good.

Purchased in 1926-27 from M.R.Ry. V. B. Māṇikka Mudaliyār, Shoranur.

### (a) जातकपारिजातः.
### JĀTAKAPĀRIJĀTAḤ.

Foll. 1a—58b.

Same work as that described under R. No. 1592 ante. By Vaidyanātha, son of Vēṅkaṭādri.

Breaks off in the 11th Adhyāya.

---

### (b) लीलावती, सव्याख्या.
### LĪLĀVATĪ WITH COMMENTARY.

Foll. 59a—95a. Fol. 96 is left blank.

Same text as that described under No. 13477 and with the same commentary as that described under R. No. 388 ante. By Paramēśvara, disciple of Rudra.

Complete.

## R. No. **5232.**

Śritāla. $13\frac{1}{4} \times 2$ inches. Foll. 10. Lines, 11 in a page. Malayalam. Good.

Purchased in 1926–27 from M.R.Ry. V. B. Māṇikka Mudaliyār, Shoranur.

### शिशुपालवधव्याख्यानम्—सारसंग्रहणम्.

### ŚIŚUPĀLAVADHAVYĀKHYĀNAM : SĀRASAṀGRAHAṆAM.

Same work as that described under No. 11812 of the D.C.S. MSS., Vol. XX. By Dēvarāja.

Contains the first Sarga incomplete.

---

## R. No. **5233.**

Śritāla. $13\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 142. Lines, 10 in a page. Malayalam. Good.

Purchased in 1926–27 from M.R.Ry. V. B. Māṇikka Mudaliyār, Shoranur.

### बृहज्जातकम्, सव्याख्यानम्.

### BṚHAJJĀTAKAM WITH COMMENTARY.

Same text with the same commentary as those described under R. Nos. 2806 and 3455 ante, wherein see for the beginning.

Complete.

**End :**

(मू.)—

आदित्यदासतनयस्तदवाप्तबोधः
कापिष्कलः सवितृलब्धवरप्रसादः ।
आवन्तिको मुनिमतान्यवलोक्य सम्य-
ग्घोरां वराहमिहिरो रुचिरांचकार ॥ इति ॥

(व्या)—वराहमिहिरोऽहं मुनिमतानि सम्यगवलोक्य रुचिरां होरां चकारेत्यन्वयः । मुनिमतानि गर्गवसिष्ठपराशरादीनां मतानि सम्यगवलोक्य, सम्यक्छब्दादर्थवस्तात्पर्यतश्चावलोक्य, लोकार्थज्ञानार्थान् विज्ञायेति यावत् । ग्रहणधारणोहापोहार्थविज्ञानतत्त्वज्ञानगुणयुक्तया बुद्ध्या यथावदवधार्येत्यर्थः । रुचिरां रुचिप्रदां श्रोतॄणां रुचिप्रदामित्यर्थः । होरां गणितजातक-

शाखाख्यस्कन्धत्रयात्मकस्य ज्योतिश्शास्त्रस्य सारभूतं निषेकादिशाव- परिणामान्तकालाधिकरणं नानाविधफलप्रदर्शनपरं जातकशास्त्रं चकार कृतवानस्मि । कीदृश इत्याह—आदित्यदासतनयः आदित्यदासाख्यस्य कार्तान्तिकोत्तमस्य तनयः । अनेन विशेषणेन संप्रदायशुद्धिरुक्ता । तदेव दर्शयति—तदवाप्तबोध इति ।

* * * *

(मू.)—

राशिप्रभेदो ग्रहयोनिभेदो वियोनिजन्माथ निषेककालः ।
जन्माथ सद्यो मरणं तथायुर्दशाविपाकोऽष्टकवर्गसंज्ञा ॥
कर्माजीवो राजयोगाः खयोगाश्चान्द्रा योगाः द्विग्रहाद्याश्च योगाः ।
प्रव्रज्यातो राशिशीलं च दृष्टिर्भावस्तस्मादाश्रयोऽथ प्रकीर्णः ॥
नेष्टा योगा जातकं भामिनीनां निर्याणं स्यान्नष्टजन्मा दृगाणः ।
अध्यायानां विंशतिः पञ्चयुक्ता चत्वार्युक्तान्यत्र वृत्तं शतानि ॥

इति ।

(व्या)—प्रथमो राशिप्रभेदः, द्वितीयो ग्रहयोनिभेदः, तृतीयो वियोनि जन्म, चतुर्थो निषेककालः, पञ्चमो जन्म, षष्ठस्सद्यो मरणं, सप्तममायुर्दायः, अष्टमो दशाफलानि, नवमोऽष्टकवर्गः । कर्माजीव इति दशमः कर्माजीवः, एका- दशः राजयोगः, द्वादशः खयोगः, त्रयोदशश्चान्द्रयोगः, चतुर्दशो द्विग्रहादि- योगः, पञ्चदशः प्रव्रज्यायोगः, षोडशः राशिशीलानि, सप्तदशो ग्रहदृष्टिः, अष्टादशो भावफलम्, एकोनविंश आश्रययोगः, विंशः प्रकीर्णः । नेष्टा- योगमिति । एकविंशोऽनिष्टयोगः, द्वाविंशस्स्त्रीजातकम्, त्रयोविंशो निर्याणम्, चतुर्विंशो नष्टजातकम्, पञ्चविंशो द्रेकाणफलम्, षड्विंशो- ऽध्यायक्रमप्रदर्शनपरोऽध्यायः ।

**Colophon:**

होराविवरणं समाप्तम् ॥

---

R. No. **5234**.

Śritāla. $8\frac{1}{10}$ × 1 inches. Foll. 66. Lines, 5 in a page. Malayalam Good.

Purchased in 1926-27 from M.R.Ry. V. B. Māṇikka Mudaliyār, Shoranur.

करणपद्धतिः, केरलभाष्यासहिता.

KARAṆAPADDHATIḤ WITH MALAYALAM MEANING.

Same as that described under R. No. 1310 ante, wherein see for the beginning.

Complete in four Adhyāyas.

**End :**

हत्वा परस्परमथो युगचान्द्रमासं
द्विघ्नार्कपातभगणैक्यमपीह लब्धैः ।
हाराञ्नयेत् पुनरमी धरणीदिनघ्नाः
स्युश्चान्द्रमासविहता ग्रहणोक्तहाराः ॥
नीत्वा मध्यार्कचन्द्रौ फणिनमपि दृशा मध्यपर्वान्तकाले
पातो नाकेन्दुलिप्ता लुनभगगुणिताश्चकलिप्ता विभक्ताः ।
तावत्स्थानेन हत्वा लुनभर्मविहते शिष्टनो भूदिनघ्ना-
श्चान्द्रैर्मासैरवाप्तं त्यजतु दिनगणात् स्वोपरागोक्तखण्डः ॥

**Colophon :**

इति करणपद्धतौ चतुर्थोऽध्यायः ॥

---

R. No. 5235.

Śrītāla. 9 × 1¼ inches. Foll. 48. Lines, 12 in a page. Malayalam. Slightly injured.

Purchased in 1926–27 from M.R.Ry. V. B. Maṇikka Mudaliyār, Shoranur.

(a) प्रश्नार्या.

PRAŚNĀRYĀ

Foll. 1a—3b.

Same work as that described under R. No. 931(e) ante. By Bhaṭṭōtpala.

Wants the beginning.

---

(b) जातकसारः.

JĀTAKASĀRAḤ.

Foll. 3b—48b.

Similar to the work described under No. 13712 of the D.C.S. MSS., Vol. XXIV.

Contains the Adhyāyas 1 to 3 complete, and the fourth incomplete.

**Beginning:**

प्रश्ने पापयुतेन्दुरष्टमरिपौ मृत्युप्रदश्चौतगौ
रुद्धाहे निधनारिगस्य निधनारिस्थश्च भौमस्तयोः ।
नीचारातिगृहे मदाष्टमगता मृत्युं खगा लग्नगाः
रोगं पुत्रगता वधूं वितनया वन्ध्यां तु वा कुर्वते ॥
धर्मस्थाश्च सुहृद्गृहे शुभकरा लाभानुजारिस्थिताः
सौम्यासौम्यसमन्विते यदि मदे जाया पुनर्भूर्भवेत् ।
भौमांशे भृगुजे सितस्य तु कुजे जारान्विता स्त्री भवेत्
मन्दज्ञौ चरभे मदे बतिपातिः षण्णां प्रवासी तु वा ॥

• • • •

**Colophon:**

इति जातकसारे भावचिन्ताध्यायः प्रथमः ॥

**End:**

**Colophon:**

इति जातकसारे विवाहानुकूलचिन्ताध्यायस्तृतीयः ।
इन्दोर्वेश्मनि धीस्स्थे सौरे बहुपुत्रभाग्यसंयुक्तः ।
भौमे शशिवेश्मस्थे द्वितीयपाणिग्रहे सुतं विद्यात् ॥

• • • •

क्षितिजसितज्ञचन्द्रमपि सौम्यसितावनिजाः
सुरगुरुसौरिमन्दगुरवेश्चग्रहांशकपाः ।
कुजमनुजगुरुज्ञशुक्रभागाः पवनसमीरणको . . मेंयाः ।
अयुजि युजि तु ते विपर्ययस्थाः शशिभवना झष . . . . . ॥

---

R. No. 5236.

Śrītāla. 9 × 1 inches. Foll. 19. Lines, 7 in a page. Malayalam. Good.

Purchased in 1926–27 from M.R.Ry. V. B. Māṇikka Mudaliyar, Shoranur.

कालदीपकम्, केरलव्याख्यासहितम्.

KĀLADĪPAKAM WITH MALAYALAM COMMENTARY.

Foll. 1*a*—19*a*. Fol. 19*b* is left blank.

An astrological treatise dealing with the ascertainment of the proper time and auspicious days for performing various religious rites and duties. The work is followed by a commentary in the Malayalam language.

Wants the beginning and end.

**Beginning :**[*]

घेनुक्रमण एष स्यादरर्णात्मकहारकः ॥ इति ॥

ധ്രുവസംസ്കാരം പറയുന്നുവാൻ—

कोलम्बकालस्सर्वार्थयुक्तस्स्याच्छकवत्सरः ।
जयवाक्योनुशाकन्ने शास्त्रार्थे तस्समैर्हते ॥
गुर्वक्षरात्कागुकाब्दे सुस्पष्टे सङ्कमध्रुवः ।
कोलम्बन्तरळाङ्गाब्दं वीजगत्नुपराहतम् ॥
स्थूलक्रियो नु विभजेच्चत्सर्वैर्विपुवः कलिः ॥
कल्यब्दाच्छङ्कुकैरामाद्राश्यादिध्रुवसंभवात् ।
ततो युद्धो नु राजन्यैरयनाचलनं भवेत ॥
प्रौढस्त्रिगुणसङ्ख्या वा द्विगुणास्स्युस्शुभाङ्गताः ।
लिप्ता नृन्नाधिपैयुक्तो दृक्पक्षेऽयनसिद्धये ॥

**End :**

परहितशशिनि चिराब्धे हक्सिद्धौ कुलविशेषशिवलोकः ।
कन्याङ्गपनयनाभ्यामृणं धनं यावन्मिथुननयनाभ्याम् ॥
अर्के पिता मातुलतांश्च मामका पुष्येतु मु . नत्र तेषु माता ।
पिता नथा मातुलनाशनं च पूराडमातापितृमातुलस्तान् ॥

---

## R. No. 5237.

Śritāla. 7 × 1½ inches. Foll. 85. Lines, 6 in a page. Malayalam. Much injured.

Purchased in 1926–27 from M.R.Ry. V. B. Mānikka Mudaliyar, Shoranur.

**रामायणभारतकथासंग्रहः.**

**RĀMAYAṆABHĀRATAKATHĀSAMGRAHAH.**

A summary in verse of the story of the Rāmāyana and Mahābhārata, each stanza being composed so as to give double meaning.

Wants the beginning and end.

**Beginning:**

. . . रत्नचित्रेण मृगरूपेण रक्षसा ।
हृतदारस्सह भ्रात्रा पत्नी . . . . . . ॥
. . . . लशिम्वरे सुग्रीवं वानराधिपम् ।
तेन तस्याभवत्सख्यं सुग्रीवेण . . . . ॥
. . . . . . . राज्यस्सुग्रीवि प्रत्ययादयम् ।
स राज्यं प्राप्य सुग्रीवस्सीता . . . . . . ।
. . . प्रेषयामास शतशोऽथ सहस्रशः ॥
ततो वानरकोटीभिस्सह . . . . . . ।
. . . सुमहाबाहो प्रस्थितो दक्षिणां दिशम् ॥
ततः प्रवृत्तिं सीताया रावणस्य निवेशने ।

**End:**

स्वैरं वने चरसि मय्यपराध्यति त्वं
नेता भवन्तमरिमित्रममित्रमाहुः ।
येन त्वया पवनसारथिना भवित्रा
. . . . . . लमवर्तत कृष्णवर्त्मा ॥
हन्न प्रविश्य वसतिः . . . . . .
मत्वा तृणाय मम दण्डधरस्य दण्डम् ।
आलम्बते गलितमंशुकमाधुनानो
मालागुणैस्स्तनतटानि घनस्तनीनाम् ॥
परिचुम्बितपल्लवाधरं रभसालिङ्गनवेपथूत्करः ।
चरितं चरतः . . . . . . . . . . . . . . . . . ॥

* * * *

---

R. No. **5238.**

Śrītāla. 7¾ × 1¼ inches. Foll. 79. Lines, 6 in a page. Malayalam. Good.

Purchased in 1926-27 from M.R.Ry. V. B. Manikka Mudaliyar, Shoranur.

प्रायश्चित्तसुधानिधिः.

PRĀYAŚCITTASUDHĀNIDHIḤ.

Same work as that described under Nos. 3490 and 3491 of the D.C.S. MSS., Vol. VII. By Sayana.

Complete.

---

## R. No. 5239.

Palm leaf. 13 × 1½ inches. Foll. 70. Lines, 11 in a page. Grantha. Slightly injured.

Presented in 1926–27 by M.R.Ry. V. M. Gōpālakṛṣṇamācāryar, Triplicane.

वरवरमुनिचम्पूः.

VARAVARAMUNICAMPŪḤ.

A treatise in prose and verse describing the leading incidents in the life of Varavaramuni also known as Maṇavāḷamāmuni, a well-known Vaiṣṇava teacher held in great esteem by the Teṅgalai Śrī-Vaiṣṇavas. The work is also called Vēdāntabhūṣaṇacampū. The author Vakulābharaṇasūri was the son of Śaṭhakōpārya of Ātrēyagōtra and was the disciple of Varadaguru of Vādhūlagōtra.

Complete.

**Beginning:**

श्रीमान् पूर्णस्थितेशो दिशतु करुणया तुन्दिलं मङ्गलं वो
लक्ष्मीवक्षोजराजन्मृगमदमकरीमुद्रिकालङ्क्यवक्षाः ।
तत्ताहग्भक्तिभाराच्छठरिपुमुनिवाग्जाह्नवीमूलपादो
दान्तैर्घोत्तंसदान्तप्रमुखनतजनप्रार्थनापारिजातः ॥
श्रेयः श्रीर्वो विधत्तां भ्रुकुटिपटसमाशेषलोकाधिराजा
निष्प्रत्यूहं नतानां विपुलतरचतुर्भेद्रमन्दारशाखा ।
वाणीदाक्षायणीन्द्राण्यनिमिषतरुणीपाणिशोणाब्जपूज्या
वेलातीतानुकम्पा त्रिजगति कुरुकावल्लिदेवी प्रतीता ॥
कस्मैचनाहं महसे नमस्यां करोमि हृद्याय हि सूक्तवत्याः ।
यत्सेवनाद्देहभृतां द्रवन्ति पत्यर्थिभूतानि तमांसि सद्यः ॥

*  *  *  *

ख्यातश्रीवत्सवंशाम्बुधिहिमकिरणो वारिराशिर्गुणानां
श्रुत्यन्तासक्तहृद्देङ्कटवरदगुरुर्विश्रुतो यस्त्रिलोक्याम् ।

तस्य प्राचीनपुण्यप्रचयजलनिधिप्रौढसन्तानशाखी
वेदान्तद्वन्द्वदीपो वरदगुरुवरो भातु सत्ताप्रदो मे ॥
पूतात्रिगोत्रजननः कुरुकाधिवासी

सत्तालाभाय लेभे कुमतिपवनमोध्वस्तजीवात्मपङ्क्ते-
र्नक्षत्रे विष्णुदैवे सवितरि च तुलां सादरं सेवमाने ॥

निस्सीमतेजसममुं निखिलाभिनन्द्यं
स्वार्थस्य कृष्णगुरुमौलिरलङ्करकार ।
श्रीलोकदेशिक इति प्रथितेन नाम्ना
स्वात्मानमार्य इव बोधविलोचनेन ॥

* * * *

अगस्त्यहरिदलङ्कृतिरप्यनपायमहोदयोत्तरा ताम्रोपकण्ठाप्यर्जुनोपकण्ठा प्रकाशाजिरक्तसत्प्रकारावलिकनदाकारातिरुचिरपतङ्गा दलितघनरेखा जठरगलितशिशिरकरका कुरुकाभिधाना राजधानी ।

* * * *

तत्र खलु—

कौण्डिन्यान्वयपीनपुण्ड्रकवनीमुक्ताफलप्रोज्ज्वलो
विद्यासन्ततिवाहिनीजलनिधिर्विस्तीर्णचारित्रकः ।
कीर्तिस्तोमकजातिमाल्यकलितक्ष्मामण्डलीमण्डनः
श्रीमान् धीप्रशयाभिधो गुरुमणिर्भेजे निवासोत्सवम् ॥

एतस्मै पटुचेतसे गुणमहारत्नौघपाथोधये
श्रीमान् रम्यवरेशदेशिकवरः शिक्कलकदारस्थितिः ।
लेभे कौतुकतामवेलमुपमां दत्वा स्वकीयात्मजां
जीमूतो गिरये वितीर्य जलदाभिख्यामिवाम्भस्ततिम् ॥

* * * *

आरूढे तत्र भानौ भवुककृतितुलां भद्रमूले च मूले
नक्षत्रे पक्ष्मलाक्षी रुचिरशयवधूस्सा समज्ञान्विषद्या ।
प्रासूत स्फीतदुग्धप्रतिभटमहसा कामरूपं कुमारं
प्राची सन्ध्याब्जबन्धुं हरिदमृतरुचिं ब्रह्मबोधं त्रयीव ॥

* * * *

फणिपतिफणमणिमयूखपरिवेष्टितस्य भगवतो रङ्गधुरन्धरस्य प्राचीनगुरुभारतीभूषणायमानेनाभिरामवराधीश इति प्रसिद्धभूम्ना नाम्ना भाष्यकार इव भासुरवचोभरणे वेदान्ते भट्टनाथसूरिरिव भवुकमालाकलापेन

भगवन्तं परकालकविरिव प्राकारनिकरेण रङ्गनगरं कमलनयन इव कस्तूरि-कामकरेण कमलास्तनं वसन्त इव व्याकोचस्तवकव्रातेन पारिजातं चण्ड-भानुरिव मयूखमण्डलेन पुण्डरीकं तं सतं मण्डनमाततान ।

* * * *

**Colophon :**

इति श्रीमद्यतीन्द्रप्रवणप्रभावभद्रदीपे चम्पूप्रबन्धे तृतीयस्तबकः ॥

**End :**

न काव्ये नो तर्के न हि भुजगभूपालवचने
न वा मीमांसायां न च मधुरशारीरकपथे ।
मया चिन्ता लब्धा तदपि कृपया श्रीवरमुनिः
कृतिं चक्रे स्थित्वा मम च हृदि विज्ञानजलधिः ॥

श्रीवत्सचिह्नाय सहस्रकल्पस्तस्मै नमस्यामि दयाम्बुधयेऽहम् ।
यत्सन्निधानस्थितिमात्रभाजा मया कृतोऽयं वरयोगिचम्पूः ॥
सुधीजना यच्चरणाम्बुजानि प्रणम्य बद्धाञ्जलिरेष याचे ।
दोषेषु जाग्रत्स्वपि मेऽत्रवाण्यामायासमुद्दीक्ष्य मुदाद्रियध्वम् ॥

जयति यतिसार्वभौमप्रवणः पर्याययोगीन्द्रः ।
जीयात्तद्गुणदीपश्चम्पूश्चाशेषदेशकालेषु ॥

**Colophon :**

इति श्रीमद्वाधूलकुलतिलकवरदगुरुचरणसरसिजषट्चरणेन श्रीमदात्रि-वंशमुक्ताफलशठारिपुगुरुतनुजेन श्रीवकुलाभरणसूरिणा विरचिते श्रीमद्यतीन्द्र-प्रवणप्रभावभद्रदीपे वेदान्तभूषणापरनामधेये चम्पूप्रबन्धे अष्टमः स्तबकः ॥

नानार्थप्रतिपादने परिवृढश्चम्पूप्रबन्धो महान्
मन्दारे वरयोगिवैभवसुधापाथोनिधेर्जन्मभूः ।
विख्यातो जगति व्यपेतविहतिर्विद्योततं ह्यष्टम-
स्तस्यायं स्तबकस्तनोतु विबुधप्रज्ञावतंसोज्ज्वलाम् ॥
यतीन्द्रप्रवणाचार्यचम्पुवाणीरसोत्तराः ।
उत्तरा एव विदुषां श्रीमन्तो भान्ति वैदिकाः ॥

R. No. **5240.**

Paper. 10¼ × 9¼ inches. Foll. 344. Lines, 20 in a page. *Grantha. Good.

Transcribed in 1926–27 from a MS. of Naduvil Maṭham, Trichur. Bound in two volumes.

मन्त्रकल्पः.

MANTRAKALPAH

४५. प्राणाग्निहोत्रप्रपञ्चयागौ
४६. षड्गुणितयन्त्रम्
४७. आवरणपूजा
४८. षडध्वविधानम्
४९. दक्षिणामूर्तिकल्पः
५०. पञ्चाक्षरीकल्पः
५१. पञ्चब्रह्मस्वरूपम्

**Beginning :**

. . . . . . . . . . काम्यकर्मसु तामसाः ।
. . . क्रूरकार्येषु प्रयोक्तव्या विपश्चिता ॥
स्वनामसदृशाकाराः प्रायो जिह्वा हविर्भुजः ।
मन्त्री हविर्न्यसेद्वह्नौ व . . . . . . . ॥

. . . . . . . . पूर्णाय शिरसे स्वाहा । ओं उत्तिष्ठ पुरुषाय शिखायै वौषट् । ओं धूमव्यापिने कवचाय हुम् । ओं सप्तजिह्वान्वनेत्राय वौषट् । ओं धनुर्धराय अस्त्राय फट् । अथाष्टकान् विन्यसेत् । कटिपार्श्वांसकेषु च प्रादक्षिण्येन अग्नये जातवेदसे अग्नये सप्तजिह्वाय अग्नये हव्यवाहनाय, अग्नये अश्वोदरजाय अग्नये वैश्वानराय अग्नये कौमारतेजसे अग्नये . . . . अग्नये देवमुखाय एतांस्तारादिनमोऽन्तान् न्यसेत् । मध्ये च कोणषट्के च जिह्वाभिर्यजेत् । केसरेष्वङ्गमन्त्रैः दलेष्वष्टमूर्तिभिः । ततः अग्निमेव ध्यात्वानेन मध्ये यजेत् । अग्नये वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा ।

**End:**

सद्योजातं महादेवं गन्धतन्मात्ररूपिणम् ।
भूतधान्य प्रशंसन्ति सर्वतत्त्वार्थवेदिनः ॥
आकाशात्मकमीशानमादिदेवं मुनीश्वराः ।
परमेण माहात्म्येन संयुक्तं . . . . ॥
. . . . . . . देवं परमं परमात्मकम् ।
समस्तलोकव्यापित्वात्प्रथितं सूरयो विदुः ॥
अत्युज्झिततया ख्यातमप्येनं दहरात्मताम् ।
तथा यन्ति महात्मानं वेदवाक्यार्थवेदिनः ॥
तोयात्मकं महादेव वामदेवं मनोरमम् ।

## R. No. 5241.

Paper. 10½ × 9¼ inches. Foll. 152. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Gōvindakavirāju of Pudamari, Ganjam district.

ज्योतिषतत्त्वकौमुदी.

JYŌTIṢATATTVAKAUMUDI.

Foll. 1*a*—151*b*. Fol. 152 is left blank.

An astrological treatise dealing with the following subjects: by Śrīnivāsamiśrātmaja.

| | |
|---|---|
| १. राश्यादिनिर्णयः. | ६. तन्वादिभावफलनिरूपणम्. |
| २. ग्रहबलादिनिर्णयः. | ७. स्त्रीजातकप्रकाशः. |
| ३. चन्द्रतारविशुद्धिः. | ८. नष्टयोगनिरूपणम्. |
| ४. वारादिनिर्णयः. | ९. राजयोगप्रकाशः. |
| ५. विवाहादिनिर्णयः. | १०. राजचिह्नादिलक्षणम्. |

Breaks off in the tenth Prakāśa.

**Beginning:**

त्रिलोकसर्जनारक्षासंहारख्यातकीर्तये ।
अभीष्टपूर्तये तस्मै दक्षिणामूर्तये नमः ॥

देवीं भजामि करपङ्कजराजमान-
पाशाङ्कुशाभयवरां वरदां वरेण्याम् ।
पादप्रणम्रसकलेप्सितकल्पवल्लीं
लोकेश्वरीं समुदिताब्जसमानभासाम् ॥

श्रीनीलाचलकन्दरोदरगतं निर्निद्रनीलोत्पल-
प्रेक्षं दैत्यगजेन्द्रदर्पदलनं स्वर्वासिपद्माननम् ।
शक्त्या चञ्चलया परीतममलं पक्षीशसन्मण्टपं
तं वन्दे हृतपारिजातमजरं चक्रायुधं माधवम् ॥

अभ्रान्तसन्ततशिवाचलतुङ्गशृङ्ग-
संपाटनक्षणविचक्षणदन्तकोटिः ।
दुर्विघ्नशैलदलनक्रममूलहेतुः
कार्यं मतङ्गजमुखस्सुखमातनोतु ॥

ग्रन्थमाहात्म्यम्—राजमार्ताण्डे—

यच्छास्त्रं सविता चकार विपुलं स्कन्धैस्त्रिभिर्ज्योतिषां
तस्योच्छित्तिभयात्पुनः कलियुगे संश्रित्य यो भूतलम् ।
भूयस्स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-
दित्थं संप्रवदन्ति योगकुशलास्तस्मै नमो भास्वते ॥

महामुनीन्द्रैर्बहुतत्त्वदर्शिभिर्वराहमुख्यै रचितानेनकधा ।
प्रबन्धसारान् समवेक्ष्य सन्ततं करोम्यहं ज्योतिषतत्त्वकौमुदीम् ॥

ज्योतिश्शास्त्रकर्तॄनाह—

प्रजापतिर्भास्करश्च व्यासो गर्गपराशरः ।
वसिष्ठो नारदश्चैव हारीतश्च्यवनो भृगुः ॥
माण्डव्यः कश्यपश्चैव भार्गवश्च बृहस्पतिः ।
इत्यादिमुनयस्सर्वे ज्योतिश्शास्त्रप्रवर्तकाः ॥

अथ ज्योतिश्शास्त्राचार्यानाह—

मयश्च यवनो विष्णुगुप्तः क्षेमकरस्तथा ।
कृष्णादित्यस्सिद्धिसेनो विवाहस्सत्य एव च ॥
जीवशर्मा ब्रह्मषण्डो मणित्थः श्रीपतिस्तथा ।
आर्यभट्टः श्रीनिवासः कामभट्टस्तथैव च ॥
कल्याणवर्मभोजश्च भास्कराचार्य एव च ।
अर्कतसिंह इत्याद्याः ज्योतिश्शास्त्रविशारदाः ॥

* * * *

राशिनक्षत्रव्यवस्थामाह—

सप्तविंशतिभिर्ज्योतिश्चक्रं स्तिमितवायुगम् ।
तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः ॥
अश्विनीमघमूलादौ मेषसिंहशरादयः ।
विषमर्क्षान्निवर्तन्ते पादवृद्ध्या यथोत्तरम् ॥

ज्योतिश्चक्रमाह—

ब्रह्माण्डमध्ये परिधिर्व्योमकक्ष्या विधीयते ।
तन्मध्ये भ्रमणं भानां क्रमशोऽर्ध्वक्रमादधः ॥

मन्दा(ङ्गिरस) . . . भूपुत्रसूर्यशुक्रेन्दुजेन्दवः ।
परिभ्रमन्त्यधोर्ध्वस्थास्सिद्धविद्याधरा घनाः ॥

कालचरस्याङ्गविभागमाह बृहज्जातके—

कालाङ्गानि वराङ्गमाननमुरोहृत्क्रोडवासोभृतो
बस्तिव्यञ्जनमूरुजानुयुगलं जङ्घे ततोऽङ्घ्रिद्वयम् ।
मेषाश्विप्रथमा नवर्क्षचरणाश्चक्रास्थिता राशयो
राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थसंप्रत्यये ॥

एकार्थसंप्रत्यये नक्षत्रपर्यायमाह—

नक्षत्रमृक्षं भं तारं तारकाप्युडुवेति नक्षत्रनामानि ।

पुनः पृथक् पृथक् वक्ष्यते—

अश्वयुक् अश्विनी, घोटकपर्यायः इत्यश्विनीनक्षत्रनामानि ॥

* * * *

अथ स्फुटस्योपकारिभूताङ्कनामान्याह—

एकः भूमिपर्यायः रूपम् , एतान्येकाङ्कनामानि । द्वितीयः दस्रः नेत्रपर्यायः युग्मं युगलं युगं यमलः पक्षः चन्द्रपर्यायः यमपर्यायः हस्तः बाहुः द्विः दोः द्वयं अश्वि अश्विनीकुमारपर्यायः ।

* * * *

**Colophon :**

इति श्रीनिवासमिश्रात्मजविरचितायां ज्योतिषतत्त्वकौमुद्यां राश्यादिनिर्णयो नाम प्रथमप्रकाशः ।

**End :**

**Colophon :**

इति श्रीनिवासमिश्रात्मजविरचितायां ज्योतिषतत्त्वकौमुद्यां राजयोगनिरूपणं नाम नवमः प्रकाशः ।

अथ राजचिह्नादिलक्षणं वक्ष्यते—

प्रसूतिकाले प्रबला यदि स्युर्नृपालयोगाः पुरुषस्य यस्य ।
सद्राजचिह्नानि पदे तदीये भवन्ति वा पाणितलेऽमलानि ॥

* * * *

शशकलक्षणमाह—

पर्यङ्कशङ्खहलशस्त्रकरेण माला
वीणोपमा यदि करे चरणे च रेखा ।
वर्षाणि सप्ततिमितानि करोति चायुः
पीत्यान्तकं क्षितिपतिः कथितो मुनीन्द्रैः ॥

---

R. No. **5242**.

Paper. 10¾ × 9¾ inches. Foll. 40. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926-27 from a MS of M.R.Ry. Paramēśvaran Nambiyār, Tiyanūr-mana, Vaniyankulam, Malabar district.

**पञ्चप्रश्नतन्त्रम्.**

PAÑCAPRAŚNATANTRAM.

A treatise on the worship of the goddess Śakti and other details connected with it.

Contains the Paṭalas 1—10 complete, and the 11th incomplete.

Deals with the following subjects :—

१. जपोद्घातः.
२. मन्त्रोद्धारः.
३ पूजाक्रमः.
४. मन्त्रोद्धारः.
५. पूजापटलः.
६. मण्डलपटलः.
७ दीक्षापटलः.
८. प्रतिष्ठाविधिः.
९. अधिवासपटलः.
१०. प्रतिष्ठापटलः.
११. Do.

**Beginning :**

हिमाद्रिशिखरे रम्ये गन्धमादन . . . ।
. . तोयसमाकीर्णे शुद्धस्फटिकसप्रभे ॥
दुष्टैः परिहृते देशे शिष्टैश्च परिषेविते ।
तपस्यभिरतं देवं बदरीनिलयं प्रभुम् ॥
वासुदेवं महायोगिं शङ्खचक्रगदाधरम् ।
पुण्डरीकाक्षमक्लिष्टं सर्वस्य जगतः पतिम् ॥
द्रष्टुं भक्त्या जगन्नाथमागतो भगवानजः ॥

रुद्रः शक्रोऽथ वसवो रवयश्च महाप्रभाः ।
चन्द्रो मरुद्गणास्साध्यास्सर्वे च मुनिसत्तमाः ॥

* * * *

तस्मिन्नेव तु काले वै नारदो भगवानृषिः ।
विद्युत्प्रभस्त्रिकालज्ञस्सर्वशास्त्रार्थतत्त्ववित् ॥

* * * *

भगवान्—

शृणु नारद किन्त्वेतं केयं किं वा प्रयोजनम् ।
किंनामा किंपरा चेति तत्सर्वं कथयामि ते ॥
तेज एतन्मदीयं तु शक्तिरेषा ममैव तु ।
प्रकृतिः शर्वरी माया लक्ष्मी दुर्गा च मङ्गला ।
सूक्तिश्चेति सदा वत्स नावमान्या हि नारद ॥
सुरकार्यरता नित्यं (नित्यं) मच्चित्तवर्तिनी ।
हरिस्सरूपं विप्रेन्द्र न जानन्ति सुरासुराः ॥
मच्चित्ता मत्परा नित्यं मय्येव सततं स्थिता ।
अतो मयि स्थितां मायां देवाद्या नैव जानते ॥
अतो मया स्मृता देवी आगता कार्यहेतुना ।
देवतानां हितार्थाय प्रतिज्ञानन्तरं गता ॥

* * * *

नारदः—

लक्ष्मीं दुर्गां च देवेश श्रुतवांश्च महात्मना ।
मङ्गलाख्येन नाम्ना वै न श्रुता भूतभावनः ॥
तस्याः स्वरूपभेदांश्च वर्णरूपायुधानि च ।
पूजां तस्यास्समाख्याहि प्रतिष्ठान्तां वद प्रभो ॥

**Colophon :**

इति पञ्चप्रश्ने दुर्गातन्त्रे प्रथमः पटलः ।

**End :**

**Colophon :**

इति पञ्चप्रश्ने गुह्यतन्त्रे (दशमः पटलः) ।

एतां तु . . . . . . . . . . . . . . . . |
. . . . . . . . . . . . . . . द्धिहेतवः ॥
एतत्प्रसूता विप्रेन्द्र प्रति . . . . . . |
षट्कोण संयुतं वापि देवीलक्षणसंयुताम् |
सर्वाभरणसंयुक्तां . . . . . . . . साम् ॥

* * * *

अक्षिणी रक्तवर्णेन केसराणि यथा पुनः |
क . . . . . . . . . . . . . . . . च ॥
अथवा शूलमालिख्य पूरयेदञ्जसा पुनः |
यथारुचि . . . . . . . . . . . . . ॥

---

R. No. **5243.**

Paper. 10¼ × 9¼ inches. Foll. 156. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926-27 from a MS. of Śrīmān Kṛṣṇaprabharāja, Padamari, Ganjam district.

**साधनदीपिका.**

SĀDHANADĪPIKĀ.

Foll. 1a—156a. Fol. 156b is left blank.

Similar to the work described under R. No. 3041 ante. By Nārāyaṇabhaṭṭa.

Contains 1 to 7 Prakāśas.

**Beginning:**

श्रीकृष्णं परमानन्दं सच्चिदानन्दरूपिणम् |
वन्दे गुरुं कृपासिन्धुं वैष्णवाचारसिद्धये ॥
सदाचाराविरोधेन मन्त्रशास्त्रानुसारतः |
साधनस्य हि भावस्य दीपिकेयं प्रतन्यते ॥
शङ्करं शङ्करं नत्वा सर्वशास्त्रार्थवेदिनम् |
सेविनं सर्वधर्माणां कान्यकुब्जकुलोद्भवम् ॥
वक्ष्ये प्रकाशये तस्मिन् गुरुशिष्यादिलक्षणम् |
दीक्षां विना भगवतो भक्तिर्न स्यात्कथंचन ॥

भक्तेस्तु पुरुषार्थत्वं शास्त्रविद्भिर्निरूपितम् ।*
सा च लभ्या गुरोरेव नान्यथा दृश्यते क्वचित् ।
कृपा यस्य भवेत्पुंसः कृष्णस्यामिततेजसः ।
तस्यैवाचार्यसङ्गस्स्यात्साध्यसाधनभेदकृत् ॥

तत्र भगवद्भक्तौ गुरूपसत्तिः कारणमन्वयव्यतिरेकाभ्यां तत्रान्वयः । श्रुत्याम्—मातृमान् पितृमानाचार्यवान् पुरुषो वेद, परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । श्रीभारतेऽपि—

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥

* * * *

अथ गुरुलक्षणं शारदायाम्—

मातृतः पितृतः शुद्धः शुद्धभावो जितेन्द्रियः ।
सर्वागमानां सारज्ञः सर्वशास्त्रार्थतत्त्ववित् ॥
परोपकारनिरतो जपपूजादितत्परः ।
अमोघवचनश्शान्तो वेदवेदार्थपारगः ॥

रामार्चनदीपिकायाम्—

शान्तो दान्तः कुलीनश्च विनीतश्शुद्धवेषवान् ।
शुद्धाचारस्सुप्रतिष्ठश्शुचिर्दक्षस्सुबुद्धिमान् ॥

* * * *

अथ गुरुकृत्यम्—

गुरुस्तु शोधयेन्मन्त्रं राजयोगावधि क्रमात् ।
सिद्धि(द्ध)स्तु हीयते मन्त्रः मद्रिश्शास्त्रानुसारगैः(?) ॥
राजयोगश्च सर्वैर्हि चक्रैस्सिद्धो मनुस्स्मृतः ।
चक्रभेदास्तु विज्ञेया आगमान्तरसेवनात् ॥

* * * *

वास्तुपूजा शारदोक्ता ज्ञातव्या । चतुःषष्टिकोष्ठकं कृत्वा तन्मध्ये रेखाद्वयं दत्वा मध्यकोष्ठचतुष्टये ब्रह्माणं पूर्वकोष्ठचतुष्टये अथर्वणं दक्षिण-

चतुष्टये विवस्वन्तं प्रतीच्यां कोष्ठचतुष्टये मन्युं ततोऽन्तरे महीधरं पूजयेत् इत्यादि । मण्टपविकल्पस्तु शारदायाम्—

* * * *

**Colophon:**

इति श्रीनारायणभट्टविरचितायां साधनदीपिकायां गुरूपसत्तिलक्षणः प्रथमः प्रकाशः ।

**End:**

पाद्मे—

दशहस्तेन दण्डेन त्रिंशद्दण्डा निवर्तकम् ।
दशशतान्येव गोचर्म ब्राह्मं गोचर्म चक्षते ॥
सवृषं गोसहस्रं तु यत्र तिष्ठत्यपण्डितः ।
बालवत्सप्रसूतानां तद्गोचर्म इति स्मृतम् ॥
जीवनार्थं हतं जीवं जीवनार्थं हतं व्रतम् ।
अहो(मशेष)मन्नं तु भुक्त्वा चान्द्रायणं चरेत् ॥
स्पृष्ट्वा मठपतिर्वेश्यां सवासा जलमाविशेत् ।
शुक्लाष्टमी कृष्णचतुर्दशी च दर्शोऽथ राका रविसंक्रमश्च ।

इति पद्मपर्व ।

**Colophon:**

इति श्रीनारायणभट्टविरचितायां साधनदीपिकायां सप्तमः प्रकाशः समाप्तः ॥

---

R. No. 5244.

Paper. 10½ × 9¼ inches. Foll. 148. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Sudarśana Udgātā, Tilōttamādēvipura, Dharakote, Ganjam district.

**लीलावती, सर्वबोधिनीव्याख्यासहिता.**

**LĪLĀVATĪ WITH THE COMMENTARY SARVABŌDHINĪ.**

The text is the same as and the commentary is different from that described under R. No. 338 ante. The commentary is by Mahāpātra Śrīdhara, son of Nitāma and Gauri.

Complete.

**Beginning:**

भक्तानुग्रहकाम्यया निजतनौ रागातिरेकं दध-
द्विघ्नध्वान्तनितान्तशान्तिकरणे सूर्यायमाणस्थितिः ।
बिभ्राणो रदनाक्षसूत्रपरशून् हस्ताम्बुजैर्मोदकं
कामं पूरयतु प्रकाममखिलं विघ्नेश्वरो मे सदा ॥
शितीतररुचिं सर्वजडत्वध्वंसकारिणीम् ।
सर्वामरार्चितपदामहं वन्दे सरस्वतीम् ॥
गुरुपादप्रसादेन श्रीधरेण द्विजन्मना ।
पाटीगणितटीकेयं क्रियते सर्वबोधिनी ॥

अथ तत्रभवान् भास्कराचार्यः ग्रहसिद्धान्तानुसारिणं ग्रहगणितं चिकीर्षुस्तदुपयोगित्वेन पाटीगणितं आरभमाणोऽभीष्टदेवतानमस्काररूपं मङ्गलमादावारचयति—

(मू.)—

प्रीतिं भक्तजनस्य यो वितनुते विघ्नं विनिघ्नन् स्मृत-
स्तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम् ।
पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम् ॥

(व्या)—यः स्मृतस्सन् भक्तजनस्य विघ्नं विनिघ्नन् नाशयन् प्रीतिं हर्षं वितनुते तं वृन्दारकाणां वृन्देन देवसमूहेन वन्दिते पदे यस्य तम् । मातङ्गस्य गजस्याननमिवाननं यस्य तं गणेशं नत्वा जन्यजनकयोरभेदोपचारात् मतङ्गशब्दोऽत्र गजे वर्तते । चतुराणां प्रीतिप्रदां संक्षिप्तैरविस्तीर्णैरक्षरैः कोमलानि अमलानि च यानि तैः प्रस्फुटां सुबोधाम् । अनेन पूर्वश्रीधराद्युक्तपाटीगणितेभ्योऽस्य वैशिष्ट्यं दर्शितम् ।

* * * *

अथोदाहरणरचनार्थं वराटकसुवर्णादीनां मानमाह—

(मू.)—

वराटकानां दशकद्वयं यत्सा काकिणी ताश्च पणश्चतस्रः ।
ते षोडश द्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः ॥

(व्या)—इह शास्त्रे वराटकानां कपर्दादीनां यद्दशकद्वयं विंशतिः सा काकिणी उपगम्या ज्ञेया । ताः काकिण्यः चतस्रः पणो ज्ञेयः, ते पणाः षोडश द्रम्मो ज्ञेयः, द्रम्मैः षोडशभिः निष्को ज्ञेयः ।

**End:**

श्रीमन्नीलगिरेरुदग्दलपुरे विप्रेन्द्रचूडामणिः
पूज्ये कौत्सकुले गजेश्वरगुरुर्गोदावराख्योऽभवत् ।
ज्येष्ठे मास्यपि येन मन्त्रविभवात्कर्णाटराड्विग्रहे
श्रीरुद्रक्षितिपाज्ञया किल नदी गोदावरी वर्धिता ॥
पर्यङ्के बहुरत्नहैमकलशे संस्थाप्य यं मङ्गलैः
वासोभूषणगन्धमाल्यवसुभिः संपूज्य नत्वा मुहुः ।
दिव्यं हैमचतुर्मृगेन्द्ररचितं सत्स्वर्णकुम्भोज्ज्वलं
मेघाडम्बरनामकं गजपतिश्छत्रं ददार स्वयम् ॥
विद्याषट्त्रयवेदिनो मखशतैः पूतस्य तस्यान्वये
कश्चिद्दैववीदां वरोऽजनि महापात्रो निभाख्यः कविः ।
गौर्यां मातरि हन्त तेन जनितः प्रीतिप्रदश्चैव सतां
पाटीं गणितकीमटीकनवरां विद्वद्वरः श्रीधरः ॥
टीका विज्ञजनानन्ददायिनी सर्वबोधिनी ।
जयतु व्यक्तगणितान्वयन्यायक्रमोज्ज्वला ॥
पाटीटीका गणेशप्रमुखकृतिवरैर्निर्मितास्सन्ति यास्ता
गूढप्रौढोक्तियुक्तिप्रकरगुरुतया सूक्ष्मबुद्ध्याप्यगम्याः ।
टीकेयं मामकीना स्फुटपदरचना शिष्यबोधाब्धिवृद्धि-
ज्योत्स्ना सन्दे . . . न्धतमसशमनी नित्यमास्तां हि लोके ॥
परदोषगुणक्षान्तिस्वीकारव्रतशालिनः ।
सन्तः सन्ति कियन्तोऽपि यदि किं दुर्जनैस्तदा ॥
नन्दाग्निभूपप्रमिते (१६३९) शकाब्दे ह्यवङ्गवर्षे (४१) ष्यधिशुक्रमासे ।
तिथौ तृतीये रचिता सिताहेऽर्पितास्तु कृष्णाङ्घ्रियुगे कृतिर्मे ॥

**Colophon:**

इति महापात्रश्रीधरकृतौ पाटीगणितटीकायां सर्वबोधिन्यामङ्कपाश-व्यवहारविवरणम् ।

The scribe adds—

श्रीवीरकेसरिदेवनृपतेरष्टाचत्वारिंशत्परिमिते ४८ अङ्के मार्गशिरे मासि शुक्लपक्षे दशम्यामर्कवासरे धनुर्धरस्थेऽर्के नृसिंहमिश्रेणेदं पुस्तकं लिखितम् ।

---

R. No. 5245.

Paper. 10¼ × 9¼ inches. Foll. 121. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926-27 from a MS. obtained through M.R.Ry. Narayanasvami Śastri of Mylapore, Madras.

क्रियाक्रमद्योतिकाव्याख्या.

KRIYĀKRAMADYŌTIKĀVYĀKHYĀ.

Foll. 1a—121. Fol. 121b is left blank.

A commentary on Aghōraśivācārya's Kriyākramadyōtikā described under No. 5137 of the D.C.S. MSS., Vol. XI.

Complete.

**Beginning :**

वन्दे महागणपतिं मदनारिसूनुं
वामोरुसुस्थवनिताभुजवेष्टिताङ्गम् ।
वल्लीशपूर्वजमभीष्टदमाश्रितानां
वाणीपतिप्रमुखदेवगणार्चिताङ्घ्रिम् ॥

कान्ताकङ्कणवीक्षिताङ्गममलं कालानवच्छेदकं
कारुण्यात् स्वपदार्चकाखिलनृणां काम्यप्रदानोद्यतम् ।
कामाङ्गक्षयकारणं कलिहरं काकोलभास्वद्गलं
कामाक्षीपतिमानतोऽस्मि सततं काञ्चीपुरीनायकम् ॥

साक्षात्सदाशिवपुरात्स्वयमेव शम्भुः
भक्तान्तरानुग्रहीतुमिहागतो यः ।
नाम्ना सदाशिव इति प्रथितोऽत्र काञ्च्या-
मस्मद्गुरुं तमतिसौम्यगुणं नमामि ॥

प्रणम्यामलमीशानं शक्तिं तत्समवायिनीम् ।
गणेशं च ततो वाणीं सदेशादिगुरूनपि ॥

अघोरदेशिकेन्द्रेण कृतामागमपद्धतिम् ।
क्रियाक्रमद्योतिकाख्यां व्याख्यास्ये गुर्वनुग्रहात् ॥

इह खलु निखिलशिवागमज्ञानकुशलः श्रीमदघोरशिवाचार्यः प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं वक्ष्यमाणकर्मकलापादिमूलकारणभूतं परशिवं तत्समवेतां शक्तिं चाद्येन श्लोकेन नमस्कृत्य द्वितीयेन श्लोकेन गुरुनमस्कारपूर्वं स्वकर्तव्यग्रन्थप्रतिपाद्यं नित्यादिकं प्रतिजानीते—वन्दे विश्वाधिकमित्यादिना । विश्वाधिकः विश्वस्माच्चराचरात्मकप्रपञ्चादधिकस्तं शान्तं रागद्वेषरहितस्तम् अनादिनिधनम् आदि जन्म निधनं नाशः आदिश्च निधनं च आदिनिधने न विद्येते आदिनिधने यस्य ।

जन्मनाशौ न विद्येते यस्य तौ न कथंचन ।
अनादिनिधनश्चायं षड्विकारविवर्जितः ॥ इत्युक्तत्वात् ।

* * * *

तदुक्तम्—

स्नानं पूजा जपो होमो ध्यानं चैव तु पञ्चमम् ।

इति नित्यं सदा कुर्यात् । इति ।

दीक्षा चैव प्रतिष्ठा च ज्ञेयं नैमित्तिकं द्विधा ॥ इति ।

इयं परिदृश्यमाना क्रियाक्रमद्योतिका क्रियाः स्नानशिवपूजादयः तत्र विद्यमानसमुदायश्च तेषां क्रमः विधानं तस्य द्योतिका प्रकाशिका, स्फुटं व्यक्तं यथा भवति तथा क्रियते मयेति शेषः ।

तत्राभिधास्यमानेषु नित्यादिषु प्रथमं करणीयमाह—प्रातरित्यादिना ध्यात्वेत्यन्तेन । प्रातस्समयः प्रातःकालः । अस्य कालस्य लक्षणं वक्ष्यति सन्ध्याप्रकरणे ।

**End:**

दमनकसमर्पणप्रकारः—तत इत्यादिना । दमनकसमर्पणानन्तरं प्रार्थनाप्रकारः—भगवन्नित्यादि । दामनकं पर्व दामनकोत्सवं कुसुमाञ्जलिः । अनन्तरकरणीयमाह—अग्न्यादिभ्य इति । अग्न्यादिभ्य इत्यादिपदेनान्त- . . ह्यादिदेवानामपि दमनकं देयमिति सूचितम् । यागं विसर्जयेदित्यनेन मण्टपस्थदेवविसर्जनपूर्वं चण्डपूजनमपि कृत्वा विसर्जयेत् ।

दमनोत्सवविधिस्समाप्तः ॥

एकमाकन्दनाथाङ्घ्रिपूजकेन द्विजन्मना ।
आचार्यकृतपद्धत्याः व्याख्यानं क्रियते मया ॥

---

R. No. **5246.**

Paper. 10¼ × 9¼ inches. Foll. 16. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. S. A. Rāmasvām Śastri, Trichur.

**विधिवादार्थः.**

VIDHIVĀDĀRTHAḤ.

Foll. 1*a*—15*a*. Foll. 15*b* and 16 are left blank.

Similar to the work described under Nos. 4279 and 4280 of the D.C.S. MSS., Vol. VIII.

Complete.

**Beginning :**

प्रवृत्तित्वावच्छिन्नकार्यतानिरूपितकारणतानिरूपितस्वनिष्ठविषयतानिरूपितविषयितासम्बन्धावच्छिन्नावच्छेदकताकं यत् तदेव विधिशक्यम्। तच्चेष्टसाधनत्वं कृतिसाध्यत्वं चेति द्वयं लोके । तदुभयज्ञानादेव घटादौ प्रवृत्युपलम्भात् । तथाच ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिविधिस्थले ज्योतिष्टोमत्ववाजपेयत्वादितत्तद्धर्मप्रकारकतत्तत्प्रवृत्तित्वावच्छिन्नं प्रति स्वनिष्ठप्रकारतानिरूपितज्योतिष्टोमत्वादितत्तद्वैजात्यावच्छिन्नविशेष्यतानिरूपितविशेष्यतासम्बन्धेनेष्टसाधनत्वकृतिसाध्यत्वोभयावच्छिन्नज्ञानस्यान्वयव्यतिरेकाभ्यां कारणत्वात् तेन सम्बन्धेन तदुभयमवच्छेदकम् । अवच्छेदकता च व्यासज्यवृत्तिः, न तु प्रत्येकविश्रान्ता । प्रत्येकविश्रान्तनानावच्छेदकताकावच्छिन्नकारणताया अपि नानात्वावश्यंभावादनेककार्यकारणभावकल्पनाप्रसङ्गात् तदपेक्षया व्यासज्यवृत्त्येकावच्छेदकताकोभयावच्छिन्नकारणताकल्पनायामेव लाघवमित्युपाध्यायमतमेव समञ्जसम् ।

**End :**

तथापि वैजात्यप्रकारकोपस्थित्यभावेऽपि बहुवित्तव्ययायाससाध्ये अननुष्ठानलक्षणाप्रामाण्यापत्त्या तद्वारणाय वैजात्यप्रकारकोपस्थितिरावश्यकीति तन्नि-

र्वाहाय निर्विकल्पकस्मरणमङ्गीकृत्यापि तादृशवैजात्यनिष्ठतादृशप्रकारता-निरूपितप्रकारिताशालिस्मरणमुपपादितमिति सर्वं समञ्जसमिति संक्षेपः ।

**Colophon:**

इति विधिवादार्थस्समाप्तः ॥

---

R. No. **5247.**

Paper. $10\frac{1}{4} \times 8\frac{1}{2}$ inches. Foll. 88. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926-27 from a MS. of Śrīmān Magunimiśra, Khandaduli, Rajasimhapuram, Ganjam district.

(*a*) माधवनिदानव्याख्या—बालबोधिनी.

MĀDHAVANIDĀNAVYĀKHYA : BĀLABŌDHINĪ.

Foll. 1*a*—86*a*. Fol. 86*b* is left blank.

A commentary by name Bālabōdhinī on the Mādhavanidāna described under No. 13186 of the D.C.S. MSS., Vol. XXIII.

Contains from the Udāvartanidāna to Nāsārōganidāna.

**Beginning:**

उदावर्तशूलं भवतीति शूलानन्तरमुदावर्तारम्भः । वातविण्मूत्रेत्यादि । वातादीनां निद्रान्तानां षष्ठीतत्पुरुषेणैकपदम् । तत्र वातः अधोगतोऽपान-वायुः, विट् पुरीषं, मूत्रं प्रस्रावः, जृम्भा जृम्भणम्, अश्रु लोतकं, क्षवः शक्का, उद्गारः उद्गरणं ढाकुटीति ख्यातं, वमिर्वान्तिवेगः, इन्द्रियं शुक्रम्, इन्द्रियशब्देनात्र शुक्रमुच्यते, क्षुत् बुभुक्षा, तृष्णा तृषा, उच्छ्वासः निश्वासपवनवेगः, एतेषां वातादिनिद्रान्तानाम् । धृ धारणे, धृञ् धारणे स्त्रियां क्तिन् । उदावर्तसंभवः उदावर्तानामुत्पत्तिर्भवति । उद्धृतेन वेगधारणेन वृत्तस्य वायोरूर्ध्वमावर्तनमुदावर्तः, किंचोद्धृतेन वेगविधारणेन वृत्तस्य वायोर्वर्तनमुदावर्तः । सर्वोदावर्तेषु वायोरेव कारणत्वम् । यदश्रु-श्रुतः सर्वेष्वेतेषु विदधदुदावर्तेषु कृत्स्नशः वायोः क्रिया विधातव्या स्वमार्गप्रतिपत्तये । उक्ताधोवायुग्रहादुदावर्तानां क्रमेण लक्षणमाह— वातमूत्रपुरीषेत्यादि । अधोवायुनिग्रहणोदावर्तलक्षणं वातनिग्रहादुपस्थित-स्यापानपवनस्य वेगधारणाद्धेतोः वातमूत्रपुरीषाणां वातस्याधोवायोः मूत्रस्य पुरीषस्य सङ्ग आसक्तिः, वातमूत्रपुरीषाणि न प्रवर्तन्त इत्यर्थः ।

* * * *

**Colophon :**

इति बालबोधिन्यामुदावर्तानाहरोगनिदानविवरणम् ॥

**End :**

दोषजमुक्त्वा आगन्तुजमाह—तीक्ष्णानां राजिकादीनां तीक्ष्णद्रव्याणामुपयोगात् भक्षणात् तथा कटून् मरीचादिकटुद्रव्याणि अतिजिघ्रतः नासारन्ध्रेणातिशयेन शिङ्घाणं तथार्कस्य निरीक्षणात् ।

---

(b) चातुरत्नमाला.

CĀTURATNAMĀLĀ.

Foll. 87*a*—88*b*.

Similar to the work described under No. 12749 of the D.C.S. MSS., Vol. XXI. By Paśupati.

Complete.

**Beginning :**

का भूषा योषाणां किं च शिशोः कण्ठभूषणं भवति ।
निर्मलमुक्तामाला पशुपतिरचिता च चातुरी वाचाम् ॥
कः कुलकमलदिनेशः सति विभवे यो भवेन्नम्रः ।
कस्य वशं जगदेति प्रियहितवचनस्य धर्मशीलस्य ॥
परधनहृदयहरा या सत्कविता वेशवनिता च ।
कं न स्पृशति विपत्तिर्वृद्धवचोवर्तिनं च दातारम् ॥

**End :**

संसारे कः सारो गङ्गाऽनङ्गारिसेवा च ।
द्रव्यैः किं करणीयं देयं विप्राय साधवे सततम् ॥
हृदयदेशेऽस्तु सतां विपुलसुवर्णावनद्धाङ्गी ।
श्रीपशुपतिरचिता संपूर्णा रत्नमालेयम् ॥

---

R. No. **5248.**

Paper. 10½ × 9½ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Śaṅkaran Nambūdirippād, Perumpalli-mana, Pazhanji, Cochin State.

आह्निकसारः.

ĀHNIKASĀRAḤ.

Foll. 1*a*—50*a*. Foll. 50*b*—52 are left blank.

Same work as that described under R. No. 5188 ante.

Complete.

---

R. No. **5249.**

Paper. 10¼ × 9¼ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Nambiyattan Bhaṭṭadirippad, Āvūr-mana, Oorakam, Cochin State.

सर्वसिद्धिः

SARVASIDDHIḤ.

Foll. 1*a*—34*b*. Foll. 35 and 36 are left blank.

An astrological work dealing with the determination of auspicious times for the performance of various religious ceremonies. It is stated to have been based on the works of Bṛhaspati and other authors.

Contains 1 to 4 Adhyāyas.

**Beginning:**

जयत्युच्चण्डदोर्दण्डखण्डिताखण्डलासुहृत् ।
ब्रह्माण्डमण्डलीभूतमण्डलाखण्डमण्डलः ॥

बृहस्पत्यादिभिः प्रोक्तज्योतिश्शास्त्रात्समुद्धृतम् ।
मुहूर्तं कथ्यतेऽस्माभिर्दैवज्ञहितकाम्यया ॥

राशयस्तिथयस्तारा मुहूर्तमिति कथ्यते ।
यदन्यदाह तत्सर्वं तस्य दोषगुणान्तरम् ॥

तयोरन्यं बली हन्ति तुल्यौ चेन्निष्फलावुभौ ।
बलवानपि दोषौघः स्वापवादैर्विनश्यति ॥

अपवादोऽपवादापवादैर्भाति च दुर्बलः ।
अपवादापवादश्च नश्येद्दैवज्ञपूजया ॥

* * * *

रिक्ता पर्वाष्टमी शूर्पपूर्वाहीन्द्रमघायमाः ।
कृत्तिकार्द्रेव रुक् षष्ठी द्वादशी सहितास्तु शुक् ॥
पापवारोऽस्तगश्शुक्रश्शुभाः षष्ठाष्टमान्त्यगाः ।
विषष्ठायत्रिगाः पापाः शुक्रः संज्ञाद्वयान्वितः ॥

* * * *

**Colophon:**

इति सर्वसिद्धौ प्रथमोऽध्यायः ।

**End:**

ऋक्षारिष्टोपवासाद्यौ विष्टिर्मात्रर्चनं ततः ।
पवित्रारोपतिथिपौ मांस एकांशको विधिः ॥
मन्दांशकेऽभिचारश्च क्रियावेले निशाकृतः ।
तारोद्धारो घटीसंज्ञो लक्षणं भग्रहांशकैः ॥
उक्तान्यत्र त्रयोविंशद्वस्तून्येव चतुर्थके ।
अध्यायोक्तवस्तूनि . . . . . . . . . . ॥

**Colophon:**

इति सर्वसिद्धौ चतुर्थोऽध्यायः ॥

---

R. No. **5250.**

Paper. $10\frac{1}{4} \times 9\frac{1}{2}$ inches. Foll. 252. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Śaṅkaran Nambūdirippād, Perumpalli-mana, Ponnani, Malabar district.

केरलाचारदीपिका.

KÊRALÂCÂRADÎPIKÂ.

Foll. 1*a*—250*a*. Foll. 250*b*—252 are left blank.

Similar to the work described under R. No. 3420(*b*) ante.

Contains the Adhyâyas 7 to 73.

**Beginning:**

परदेशादिह प्राप्ता ये ये च स्वयमागताः ।
जातिधर्माश्रमाचारांस्तेषां वक्ष्ये यथाक्रमम् ॥
इमा गिरः संग्रहस्य भाष्यभूता भवन्तु मे ।
सविस्तरं वर्णभेदानहं वक्ष्ये यथाक्रमम् ॥
ब्राह्मणक्षत्रियविशो शूद्राश्चेति चतुर्विधाः ।
जातयश्चान्तरालीकास्तेष्वन्तरितजातयः ।
विप्रादीनां च वर्णानामाभिजात्यं क्रमात्क्रमात् ॥

वक्ष्येऽहं केरलीयानां यथाशास्त्रं सविस्तरम् ।
नारदस्य गिराभ्येत्य कृष्णातीरं भृगूद्वहः ॥
ददर्श तत्र भूदेवं ज्वलितानलतेजसम् ।
ब्राह्मणानामुपाध्यायं वेदवेदाङ्गपारगम् ॥
दारिद्र्योपहतं नित्यमध्यापनपरायणम् ।
सदा शिष्यगणोपेतं बृहस्पतिमिवापरम् ॥
ब्राह्मणानां कुलश्रेष्ठं सदाचारप्रवर्तकम् ।
पतिव्रता तस्य भार्या तनयाश्चाष्ट सुव्रताः ॥
वेदाध्ययनसंपन्नाः सर्वे वेदाधिकारिणः ।
तेषां ज्येष्ठः पुण्यतमः ब्रह्मचर्यैकनैष्ठिकः ॥
जितेन्द्रियस्तपस्वी च सत्यसन्धो गुणाकरः ।
तेषां समीपमागत्य रेणुकानन्दवर्धनः ॥
प्रणम्योवाच विप्रेन्द्रं स विनीतः कृताञ्जलिः ।
भूसुरेन्द्र महाभाग शृणु त्वं मामकं वचः ॥
उपयातु भवानद्य सकुटुम्बो मम क्षितिम् ।
दारिद्र्यं संहरिष्यामि तत्र सत्यं महामते ॥
तत्रैव सुखभोक्तारो भवन्त्वैश्वर्यसंपदः ।
इति विज्ञापितस्तेन ब्राह्मणानामधीश्वरः ॥
तथेत्युक्त्वा सह ययौ कलत्रसुतबन्धुभिः ।
आनीय तान् भृगुसुतः श्रीमूलस्थानमण्टपम् ॥
अष्टैश्वर्यं ददौ तेषामनश्वरमनन्तरम् ।
ज्येष्ठपुत्राय च ददौ योगपीठं महामुनिः ॥
ब्रह्मचर्याश्रमं नित्यं योगाचार्यत्वमप्यथ ।
योगाचार्यं ज्येष्ठसुतं ब्रह्मचर्याश्रमस्थितम् ॥
वृषादीश्वरनाथस्य क्षेत्रकार्यार्थमादिशत् ॥

* * * *

चतुःषष्टितमग्रामदेशेषु मुनिसत्तमः ।
निवेशयामास च तान् वेदवेदाङ्गपारगान् ॥

* * * *

भट्टाचार्याः परे केचिद्वेदवेदाङ्गपारगाः ।
आत्मैकदेशाः श्रेष्ठास्ते भट्टवृत्तिषु योजिताः ॥
तदेकदेशवेदज्ञा भारताख्यानकोविदाः ।
द्विजा भारतभट्टाख्याः कल्पिताः क्षेत्रवासिनः ॥

* * * *

**Colophon:**

इति केरलाचारदीपिकायां सप्तमोऽध्यायः ।

**End:**

इदमेव परं मन्ये भृगुरामकथामृतम् ।
यः शृणोति सदा भक्त्या विष्णुलो(कं) च गच्छति ॥
कुठारया स भगवान् भृगुरामः पराक्रमी ।
हत्वा रिपून् मे निखिलान् रक्षत्वेव दिवानिशम् ॥
को नु रामं विना बन्धुर्लोके संसारनाशने ।
पातु मामखिलाधारः पर्शुरामो महामुनिः ॥
सर्वशत्रुञ्जयो रामः सर्वशत्रुभयं च मे ।
नाशयत्वेष भगवान् पर्शुपाणिरनारतम् ॥

**Colophon:**

इति केरलाचारदीपिकायां त्रिसप्ततितमोऽध्यायः ।

---

R. No. **5251.**

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 50. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Tātadēśikatātacārya of Villiyambakkam, Chingleput district.

रसिकरसायनम्.

RASIKARASĀYANAM.

Foll. 1a—49b. Fol. 50 is left blank.

A work on poetics and rhetoric in five chapters. Passages from the Bhāvaprakāśa, Daśarūpaka and Pratāparudrīya are quoted in this work.

Contains the Nāṭyaprakaraṇa, Kāvyaprakaraṇa, Nāyikāprakaraṇa and Rasaprakaraṇa (incomplete).

**Beginning:**

कल्याणं भवतां करोत्वभिनवप्रेङ्खोलभूषामणि-
स्फ्यायन्मौलिमणिप्रदीपनिवहं चण्डीपतेस्ताण्डवम् ।
किञ्चित्कुञ्चितपादमञ्चितजटाव्यालोलभागीरथी-
त्वङ्गत्तुङ्गतरङ्गशीकरकणव्याकीर्णदिङ्मण्डलम् ॥

ताहग्विधं ताण्डवमिन्दुमौलेरभ्युद्धतं येन बभूव (रम्यम्) ।
नमोऽस्तु तस्मै गिरिकन्यकाया लास्याय लोकत्रयमोहनाय ॥

अथ क्रमेण शास्त्रप्रतिपाद्यानर्थानाह—

आदौ प्रकरणे (नाट्यलक्षणं तु) निरूप्यते ।
(निरूप्यते) द्वितीये तु काव्यभेदादिलक्षणम् ॥
तृतीये नायिकादीनां स्वरूपपरिकीर्तनम् ।
चतुर्थे तु विभावादिपूर्वकं रसनिर्णयः ॥
पञ्चमे गुणदोषाणां संग्रहः क्रियते ततः ।
पञ्च प्रकरणान्येवं कथ्यन्तेऽत्र विभागतः ॥

अथ नाट्यप्रधाना निरूप्यन्ते—

तत्र नाट्यस्वरूपम्—

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते ।
रूपकं तत्समारोपाद् दशधैव रसाश्रयम् ॥

काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारात् चतुर्विधाभिनयेन तादात्म्यापत्तिर्नाट्यम् । तदेव नाट्यं दृश्यत्वेन रूपमित्युच्यते । नीलपीतादिरूपवत् नटे रामाद्यवस्थारोपेण प्रवर्तमानत्वाद्रूपकम्, मुखचन्द्रादिवत् । रसमाश्रित्य प्रवर्तमानं दशप्रकारमेव । तानेव प्रकारानुद्दिशति—

नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवाकारौ वीथ्यङ्केहामृगा इति ॥

* * * *

**Colophon:**

इति रसिकरसायने सर्वालङ्कारसंग्रहे नाटकादिप्रकरणं निरूपितम् ।

**End:**

अथ हर्षः—

प्रसत्तिरुत्सवादिभ्यो हर्षः स्वेदाङ्गकम्पकृत् ।

यथा—

तद्वक्त्राभिमुखं मुखं विनमितं दृष्टिः कृता पादयो-
स्तत्संलापकुतूहलाकुलतरे श्रोत्रे निरुद्धे मया ।
पाणिभ्यां च तिरस्कृतस्सपुलकः स्वेदोद्गमो गण्डयोः
सख्यः किं करवाणि यान्ति शतधा मत्कञ्चुके सन्धयः ॥

अथ आवेगः—

इष्टानिष्टागमाज्जात आवेगश्चित्तसंभ्रमः ॥

यथा—

क्षिप्तो हस्तावलग्नः प्रसभमभिहतश्चाददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन्.

---

## R. No. 5252.

Paper. 10½ × 9½ inches. Foll. 54. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. K. Nārāyaṇa Nambūdiri, Karakkāṭṭu dēśam, Kavalappara, Malabar district.

### निरुक्त्यर्थप्रबोधिनी.
### NIRUKTYARTHAPRABŌDHINĪ.

Foll. 1a—51b. Foll. 52 and 53 contain some miscellaneous passages relating to Karaṇalakṣaṇa. Fol. 54 is left blank.

A commentary on Cennubhaṭṭa's Nirukti, a work on Nyāya * by Kēśavapuri, disciple of Raṅgapuri.

See R. No. 3440(b) for a similar commentary by Viṣṇubhaṭṭa.

Complete.

**Beginning:**

भ्रमरीकबरीभारभ्रमरीमुखरीकृतम् ।
दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ॥
वेदानामादिवक्ता यो जगतामपि कारकः ।
अनन्तसंविदाधारं तं भजे कृष्णमीश्वरम् ॥
बालव्युत्पत्तिसिद्ध्यर्थं श्रीमद्रङ्गपुरीपदम् ।
प्रणम्य क्रियते टीका निरुक्त्यर्थप्रबोधिनी ॥

वक्रलक्षणटीकेयं श्रीकेशवपुरीकृता ।
चकास्तु विदुषां स्वच्छचित्तरङ्गे सरस्वती ॥

अथ न द्रव्यलक्षणं परीक्षकविचक्षणपरीक्षावीक्षणक्षोदक्षमं विपक्षकक्ष-प्रतिक्षेपदक्षसाक्षरोत्क्षिप्तप्रगल्भानल्पविकल्पसङ्कुल्पितकल्पनामात्रशरीरत्वात् । तथाहि—न तावद्गुणाश्रयो द्रव्यमिति द्रव्यलक्षणम्, प्रथमक्षणावच्छिन्ने कार्ये द्रव्ये अव्याप्तेः, तस्य तदा निर्गुणत्वात् । अथ मतं गुणाश्रयत्वं नाम गुणात्यन्ताभावानधिकरणत्वमिति, तदपि न निरूपणपदवीमुपारोढुमर्हति, गुणात्यन्ताभाव एवातिव्याप्तत्वात् । अथ भावत्वे सतीति विशेषणाददोष इति चेन्न, भावत्वानिरूपणात् । तथाहि—न तावद्विधिमुखप्रत्ययवेद्यत्वं भावत्वम्, प्रमेयत्वादावतिव्याप्तेः ।

**End :**

समवायं निर्वक्ति—द्रव्यत्वसमानाधिकरणत्वे सति द्रव्यत्वात्यन्ताभाव-समानाधिकरणसचेतरो भावः समवायः । भावः समवाय इत्युक्ते सत्तायाम् । अतः सत्तेतरेति । तावत्युक्ते द्रव्यत्वादौ । अतो द्रव्यत्वात्यन्ताभावसमानाधि-करणेति । तावत्युक्ते गुणत्वे । अतः द्रव्यत्वसमानाधिकरणत्वे सतीति । अभावो नामासमवायित्वे सति असमवायः । असमवायोऽभाव इत्युक्ते समवायिकेऽतिव्याप्तिः ।

**Colophon:**

इति निरुक्तिविवृतिस्समाप्ता ॥

---

R. No. 5253.

Paper. 10½ × 9½ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Nārāyaṇa Nambisan, Chirakkal, Shoranur, Malabar district.

Fol. 16*b* is left blank.

## वेदान्तार्थसारसंग्रहः.
## VĒDĀNTĀRTHASĀRASAṄGRAHAḤ.

A short treatise on Advaita-Vēdānta: by Sītārāma. Complete.

**Beginning:**

प्रणताज्ञानतिमिरभास्वन्तं करुणार्णवम् ।
परमानन्दचिद्रूपं प्रणम्यादिमदेशिकम् ॥
स्वभक्तबोधजलधिसुधाकरमधोक्षजम् ।
वन्दे स्वानन्दसंपूर्णं कृष्णं कारुण्यविग्रहम् ॥

इह खलु सकलश्रुतिमौलिलालितं सच्चिदानन्दघनमपास्तस्वगतसजातीयविजातीयभेदं नित्यशुद्धबुद्धमुक्तनिष्कलनिर्मलनिर्विकाररूपं भूमशब्दवाच्यं परं ब्रह्मैवाहमद्वितीयमस्मि इति निर्मला वस्तुदृष्टिः । अस्यामेव सनकसनन्दनसनातनसनत्कुमारशुकवामदेवादयः समस्तसज्जनचूडामणयः संततं सुखेन निर्भयमासते ।

**End:**

वेदान्तसारसर्वस्वं संगृहीतं मयाधुना ।
अनेन भगवान् साक्षात् परमात्मा प्रसीदतु ॥

**Colophon:**

इति श्रीदक्षिणामूर्तिचरणकमलभृङ्गेण सीतारामाख्यविदुषा विरचितं वेदान्तार्थसारसंग्रहप्रकरणं संपूर्णम् ॥

यत्कृपावैभवादेव देहाद्यखिलसाक्षिता ।
दृश्यतेऽवशमानन्दः प्रसीदत्वत्र मद्गुरुः ॥

---

### R. No. 5254.

Paper. 10¼ × 6¼ inches. Foll. 39. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Aṣṭamūrti Nambūdiri, Taccarāya-mana, Paravanna, Malabar district.

**सोमवारार्चनकाव्यम्.**

**SŌMAVĀRĀRCANAKĀVYAM.**

Foll. 1a—38b. Fol. 39 is left blank.

A poem in eight Sargas describing the greatness of the worship of Pārvatī and Śiva on Mondays. The author's name is not given.

Complete.

**Beginning:**

प्रकाशगोत्रा परमौलिराष्ट्रे चकास्ति कश्चिदसि . . न्तसंज्ञः
शिवालयो यत्र गिरीन्द्रपुत्र्या समं वसत्यर्धशशाङ्कमौलिः ॥
अनारतं वैश्रवणोपलाल्यैर्द्विजाग्र्यवृन्दाद्युपगीयमानैः ।
सुकीर्तिजश्रेष्ठनिवासभूताद्विभाति कैलासपदालयो यः ॥

* * * *

समाप्य पूजां विधिवद्यथोचितां द्विजातिवर्यानपि भोजनादिभिः ।
प्रसादयेश गिरिजां द्विजोत्तमानपि क्रमेणैव नरेन्द्रनन्दने ॥

* * * *

**End:**

सारस्वतः पूर्वसुतोपमानं देवीप्रसादात् सुतमाशु लेभे ।
तां चात्मजां सोमवतीं च दत्वा सुमेधसे सोऽपि सुखेन रेमे ॥
ततो जनास्ते प्रशशंसुरेतां सीमन्तिनीं सर्वगुणैः प्रशस्ताम् ।
शशाङ्कवारव्रतकर्शनोद्यत्प्रभावयुक्ता नृवरादयोऽलम् ॥

चन्द्राङ्गदस्य दयिता तनयानथाष्टौ
प्रासूत निस्तुलगुणांस्तनयामथैकाम् ।
कान्तेन साकममितद्युतिनाभिरेमे
वर्षायुतायुषमखण्डमुपेयुषी सा ॥

पद्योदितैर्न्यूनमलं गुणौघैरुद्योगभाक् काव्यमिदं पठन् यः ।
विद्योतितस्सोऽपि भवत्प्रसादाद्विद्याकलापोऽयमुपेश भूयात् ॥

**Colophon:**

इति सोमवारार्चनकाव्ये अष्टमस्सर्गस्समाप्तः ॥

---

## R. No. 5255.

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 140. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of Śrīman Bhagavān Mahāpātro, Nārāyaṇapuram, Dharakote, Ganjam district.

### प्रतिष्ठाप्रदीपः.
### PRATIṢṬHĀPRADĪPAḤ.

Similar to the work described under No. 5302 of the D.C.S. MSS., Vol. XI. By Nṛsiṁhavājapeyin, son of Murārimiśra and grandson of Gadādhara.

Complete.

Contains the following subjects :—

| | |
|---|---|
| १. अर्घ्यविधिः. | ३. वनयागविधिः. |
| २. पादप्रतिष्ठा. | ४. दिक्छान्तिः. |

५. स्नानविधिः.
६. अधिवासविधिः
७. विष्णुप्रतिष्ठा.
८. यज्ञावभृथः.
९. बलिदानविधिः.
१०. यात्राविधिः.
११. स्नपनोत्सवः.
१२. घटितद्वारप्रतिष्ठा.
१३. अघटितद्वारप्रतिष्ठा.
१४. प्रासादप्रतिष्ठा.
१५. ध्वजप्रतिष्ठा.

**Beginning:**

शाखाभिस्सकलानिरुक्तमहिमा नीलाद्रिमूलस्थितिः
पीनस्कन्धधृतिः प्रसूतविभव आनन्दकन्दोदयः ।
यः शोणाधरपल्लवः सुमनसामादिः सतामार्तिहा
भक्तेभ्यो वितरन् फलानि जयति श्रीकृष्णकल्पद्रुमः ॥
हयग्रीवं नमस्कृत्य नरसिंहेन धीमता ।
प्रणीतेऽयं प्रतिष्ठाप्रदीपः कृष्णतुष्टये ॥

प्रतिष्ठा नाम प्रस्थीयते प्रकर्षं बहुकालं स्थीयतेऽनेनेति कथंचिदभिमतद्रव्यस्य स्थित्यनुकूलः पूर्व्यापारः ।

तदुक्तं हयशीर्षे—

अर्चामूर्तिः स्मृतः कृष्णः पिण्डिका कमलालया ।
तयोर्यो विधिना योगः स प्रतिष्ठेति कीर्तिता ॥

येन कर्मणा प्रतिमापिण्डीयोगः सा क्रिया प्रतिष्ठेति । सा च पञ्चविधा—पादप्रतिष्ठा, दारुप्रतिष्ठा, देवप्रतिष्ठा, प्रासादप्रतिष्ठा, ध्वजप्रतिष्ठा । अन्याश्च कूपारामतटाकमण्टपमठसङ्क्रमसेतुपुरपताकगोपुरादीनां प्रतिष्ठाः प्रकीर्णरूपाः । सर्वत्र स्थित्यनुकूलव्यापारः प्रतिष्ठापदार्थः । फलसाधनत्वात् प्रधानम् । अन्यश्च लौकिकः पाषाणकर्मरचनादिः । पूजाहोमस्नपनाधिवासादिश्च वैदिकः सर्वप्रसङ्गः । प्रतिष्ठायाश्च फलसाधनत्वं यथा पादप्रतिष्ठायां हयशीर्षे—

य इमां सकलां कार्यां प्रतिष्ठां पादसंज्ञिताम् ।
स सर्वपापनिर्मुक्तो विष्णुलोके महीयते ॥

* * * *

**Colophon:**

इत्यभिचिद्याजपेयिनरसिंहविरचिते प्रतिष्ठाप्रदीपे अर्घ्यविधिः समाप्तः ॥

**End :**

यस्य देवस्य यच्चोक्तमायुधं लिङ्गसूचकम् ।
तस्य तन्मन्त्रयुक्तेन विधिना स्थापनं स्मृतम् ॥
अनेन विधिना दद्यात् सर्वमेतद्विचक्षणः ।
कुर्याद्देवस्य सदने ध्वजं विधिविधानतः ॥
तस्य स्वर्गेऽक्षयो वासो वैष्णवो नात्र संशयः ।
कदाचिद्यदि मानुष्यं लोकमायाति स्वेच्छया ॥
तदा लोकेषु सर्वेषु ध्वजीभूतः प्रकाशते ।
ध्वजयष्टिप्रदानेन वपुषा जायते नरः ॥
ध्वजदानेन चाप्नोति लोकं शक्रस्य दुर्लभम् ॥

इत्यच्छकौत्सकुलसंभवसाग्निचित्य-
यज्वा गदाधरबुधस्स्थित उत्तरेषु ।
तन्त्रे रहस्यमवबोधयितुं स्वकीये
किं जैमिनिस्स्फुटमसौ कलिनावतारः ॥
विद्याविवेकविनयादिभरद्वितीय-
स्तस्यापि सूनुरुदियाय मुरारिमिश्रः ।
नीलाद्रिनाथचरणाम्बुजसेवकेन
तस्यात्मजेन रचितोऽयमिह प्रदीपः ॥

**Colophon :**

इत्यग्निचिद्वाजपेयिनरसिंहविरचिते प्रतिष्ठाप्रदीपे ध्वजप्रतिष्ठा समाप्ता ॥

---

### R. No. 5256.

Paper. 10¼ × 9½ inches. Foll. 212. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Vrsabhadas Nayinar, Madras.

**प्रतिष्ठातिलकम् , द्राविडटीकासहितम्.**

**PRATISTHATILAKAM WITH TAMIL MEANING.**

Foll. 1a—211a. Foll. 211b and 212 are left blank.

Same work as that described under R. No. 1703 ante, wherein see for the beginning.

Contains the Parvans 1 to 3, 7, 8 complete and 9 incomplete.

**End :**

देवदत्तस्य भार्यायाः जैनदीक्षां ग्राहयेत् । अथवा वैधव्यदीक्षां वा ग्राहयेत् विकलत्वस्य पुरुषस्य स्त्रियो वा मरणे चेदुपायनप्रदानकर्णभूषणादिपरित्यागवैधव्यदीक्षाग्रहणं हित्वा, अन्यदेतत्सर्वं यथाविधि विदध्यात् । ततो मुनीनां निरवद्याहारं दत्वा पश्चाद्यथोचितं बन्धून् भोजयेत् । एतच्छ्राद्धकर्मेति विदुः । यतीनां मरणे निर्जन्तुकशुद्धशिलायां स्थापयेत् । इति प्रेतकर्मविधिः ॥

**Colophon:**

इत्यपरविधिः ।

---

R. No. **5257.**

Paper. 10½ × 9½ inches. Foll. 32. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Ayyana Nayinar of Madras.

(*a*) मुखस्तुतिः, द्राविडभाषासहिता·

MUKHASTUTIH WITH TAMIL MEANING.

Foll. 1*a*—9*b*.

In praise of Jina. The supplicant herein prays to Jina to pardon him for his faults and sins. The work is entitled as Mukhastuti.

Complete.

**Beginning:**

जय जय जिन शश्वद्विश्वविद्यैकमूर्ते
हर हर दुरितं मे जन्मजन्मन्यदोष ।
नय नय नतनाकिव्रात मां मुक्तिमार्गं
भव भव शरणं मे जन्मजन्मन्यधीश ॥

* * * *

अपवित्रः पवित्रो वा सुस्थितो दुःस्थितोऽपि वा ।
ध्यायेत्पञ्चनमस्कारं सर्वपापैः प्रमुच्यते ॥

* * * *

श्रीमत्पवित्रमकलङ्कमनन्तकल्पं
स्वायम्भुवं सकलमङ्गलमादितीर्थम् ।

नित्योत्सवं मणिमयं निलयं जिनानां
त्रैलोक्यभूषणमहं शरणं प्रपद्ये ॥

* * * *

अद्याभवत्सफलता नयनद्वयस्य
देव त्वदीयचरणाम्बुजवीक्षणेन ।
अद्य त्रिलोकतिलक प्रतिभासते मे
संसारवारिधिरयं चुलकप्रमाणम् ॥

**End:**

इच्छामि भंते ईर्यावाहियस्स ओलोचेउं ।
पुव्वुत्तरदक्खिणपच्छिमचउदिस्सु विदिसासु ।
विहरमाणेण मए जुगन्तरदट्ठिण्णा दट्ठव्वा ।
उवरिचरिआए पमाददोसेण पाणभूतजीवसत्ताणं ।
एदेसि उवघादो कदो वा कारिदो वा ।
कीरिन्दो वा समणुमणिओ तस्स मिच्छा मे दुक्कडम् ॥

* * * *

**Colophon:**

मुखस्तुतिः ईर्य्यावदं (समाप्तम्) ॥

---

(*b*) परिनिर्वाणभक्तिः, द्राविडभाषासहिता.

PARINIRVĀṆABHAKTIḤ WITH TAMIL MEANING.

Foll. 9*b*—22*a*.

Similar to the work described under No. 9475 of the D.C.S. MSS., Vol. VIII.

Complete.

**Beginning:**

विबुधपतिखगपनरपतिधनदोरगभूतयक्षपतिमहितम् ।
अतुलसुखविमलनिरुपमशिवमचलमनामयं प्राप्तम् ॥

* * * *

आषाढसुसितषष्ठ्यां हस्तोत्तरमध्यमाश्रिते शशिनि ।
आयातस्स्वर्गसुखं भुक्त्वा पुष्पोत्तराधीशः ॥
सिद्धार्थनृपतितनयो भारतवास्ये विदेहकुण्डपुरे ।
देव्यां प्रियकारिण्यां सुस्वप्नान् संप्रदर्श्य विभुः ॥

* * * *

चैत्रसितपक्षफाल्गुनशशाङ्कयोगे दिने त्रयोदश्याम् ।
जज्ञे स्वोच्चस्थेषु ग्रहेषु सौम्येषु शुभलग्ने ॥

* * * *

हस्ताश्रिते शशाङ्के चैत्रज्योत्स्ने चतुर्दशीदिवसे ।
पूर्वाह्णे रत्नघटैर्विबुधेन्द्राश्चक्रुरभिषेकम् ॥

* * * *

**End:**

पुज्जेमि वन्देमि णमस्सामि दुःखक्खओ कम्मक्खयो बाहिलाहो ।
सुगइगमणं समाहिमरणं जिनगुणसम्पत्ति होउ मज्झम् ॥

* * * *

**Colophon:**

परिनिर्वाणभक्तिः समाप्ता ॥

---

(c) सामायिकस्तोत्रम्

SAMAYIKASTOTRAM

Foll. 22a—28.

In praise of Jina by a devotee who, according to Jainism, observes the Samayika-vrata, which chiefly consists in a sense of equality towards all beings, self-control, purity in thought, etc.

Complete

**Beginning:**

नमः श्रीवर्धमानाय निर्धूतकलिलात्मने ।
सालोकानां त्रिलोकानां यद्विद्या दर्पणायते ॥

* * * *

जिनेन्द्रमुन्मूलितकर्मबन्धं प्रणम्य सन्मार्गकृतस्वरूपम् ।
अनन्तबोधादिभवं गुणौघं क्रियाकलापं प्रकटं प्रवक्ष्ये ॥

* * * *

यः सर्वाणि चराचराणि विविधद्रव्याणि तेषां गुणान्
पर्यायानपि भूतभाविभवतः सर्वान् तदा सर्वदा ।

जानीते युगपत्प्रतिक्षणमतः सर्वज्ञ इत्युच्यते
सर्वज्ञाय जिनेश्वराय महते वीराय तस्मै नमः ॥

* * * *

समता सर्वभूतेषु संयमः शुभभावना ।
आर्तरौद्रपरित्यागस्तद्धि सामायिकं व्रतम् ॥

**End:**

पापिष्ठेन दुरात्मना जडधिया मायाविना लोभिना
रागद्वेषमलीमसेन मनसा दुष्कर्म यन्निर्मितम् ।
त्रैलोक्याधिपते जिनेन्द्र भवतः श्रीपादमूलेऽधुना
निन्दापूर्वमहं जहामि सततं निर्वर्तये कर्मणाम् ॥

* * * *

अणुव्रतं चैव गुणव्रतं च शिक्षाव्रतं पञ्चविधं त्रिभेदम् ।
चतुर्विधं चेति गुरूपदिष्टं मह्यं सदास्तां विमले दृढं च ॥

**Colophon:**

इति सामायिकस्तोत्रं परिसमाप्तम् ॥

---

(*d*) चत्तारिदण्डकम्, द्राविडभाषासहितम्.

CATTARIDAṆḌAKAM WITH TAMIL MEANING.

*Foll. 28a—32a.*

Similar to the above each passage commencing with चत्तारि in Prakṛt.

Complete.

**Beginning:**

चत्तारिमङ्गलं अर्हन्ता मङ्गलं सिद्धा मङ्गलं साहू मङ्गलं केवलिपण्णत्तो धम्मो मङ्गलम् । चत्तारि लोगोत्तमा, अर्हन्ता लोगोत्तमा सिद्धा लोगोत्तमा साहू लोगोत्तमा केवलिपण्णत्तो धम्मो लोगोत्तमा । चत्तारि सरणं पव्वज्जामि अर्हन्ते सरणं पव्वज्जामि सिद्धे सरणं पव्वज्जामि साहू सरणं पव्वज्जामि ।

* * * *

**End :**

गरहामि अप्पाणं जाव अरहंताणं भअवन्ताणं पज्जुवासं करोमि ताव कायं पावकम्मं दुच्चरिअं वोसरामि ।

* * * *

**Colophon :**

चत्तारिदण्डकं समाप्तम् ॥

---

(e) धोसामिदण्डकम् , द्राविडभाषासहितम्.

DHOSAMIDANDAKAM WITH TAMIL MEANING.

Foll. 31a—32b.

In praise of the 24 Tīrthaṅkaras of the Jaina religion. The first passage commencing with धोसामि in Prakṛt.

Complete.

**Beginning :**

धोसामि हं जिणवरे तित्थयरे केवलि अणन्तजिणे ।
णरपवरलोअमहिए विहुवरिअमळे महप्पण्णे ॥

* * * *

लोअस्सुज्जोअअरे धम्मं तित्थंकरे सदा जिणे वन्दे ।
अरहंते कित्तिस्से चउवीसं चेव केवळिणो ॥

* * * *

**End :**

एवं मए अहित्थुदा विहुवरिअमळा पहीणजरमरणा ।
चउवीसंपि जिणवरा तित्थयरा मे पसीअन्तु ॥

* * * *

कित्तिअवन्दिअमहिआ एदे लोगोत्तमा जिणा सिद्धा ।
आरोग्गणाणलाहं दंतु समाहिं च मे बोहिम् ॥
चन्देहि णिम्मलअरा आइच्चेहि अहिअप्पहा सन्ता ।
साअर इव गम्भीरा सिद्धा सिद्धिं मम दीसन्तु ॥

* * * *

**Colophon :**

धोसामिदण्डकं समाप्तम् ॥

## R. No. 5258.

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippad, Punnata-manakal, Kottapadi, Malabar district.

### शौनकीयसार.

### ŚAUNAKĪYASĀRAḤ.

Foll. 1*a*—27*b*. Fol. 28 is left blank.

A summary of Ṛgvēdaprātiśākhya of Śaunaka. The author's name is not given.

Complete.

**Beginning** :

गणेशं दक्षिणामूर्तिं वाणीं व्यासं गुरूनपि ।
नमामि यत्प्रसादेन कृतिनः सन्ति देहिनः ॥
वेदवाक्यगणान् सर्वानकारादीन्नमाम्यहम् ।
तच्छन्दोमुनिदेवानप्याचार्यान् शौनकादिकान् ॥

अथ वर्णविषयाणि यानि ज्ञेयानि तानि कानिचिद्विलिख्यन्ते, ज्ञानस्याभ्युदयनिःश्रेयससाधनत्वात् । तथाहि—

आकाशवायुप्रभवः शरीरात्समुच्चरन् वक्त्रमुखे निनादः ।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः ॥
तमक्षरं ब्रह्म परं पवित्रं गुहाशयं सम्यगुशन्ति विप्राः ।
स श्रेयसा चाभ्युदयेन चैव सम्यक् प्रयुक्तः पुरुषं युनक्ति ॥ इति ।

तथान्यदपि—

वेदो हि वर्णसङ्घातो वेदो ब्रह्मेति कीर्त्यते ।
तस्मात्तद्वेदवर्णज्ञो ब्रह्मलोके महीयते ॥ इति ॥

एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति च । किंच, यथोक्तवर्णस्वरूपमज्ञात्वा मन्त्रादिप्रयोगे प्रत्यवायोऽपि भवति । तथाहि—

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥

इति ।

ततो वर्णतद्धर्मादीनामवश्यं ज्ञेयत्वात्तज्ज्ञानाय यथाशक्ति यत्नः क्रियते। तत्र के वर्णाः? कति ते? किं स्वरूपाः? इत्याकाङ्क्षायां शौनकीय-पाणिन्यादिवचनानुसारेण तानि प्रदर्श्यन्ते । तत्र वर्णानां स्वरव्यञ्जनभेदे-नाङ्गाङ्गिभावेन च द्वैविध्यमाह—

द्विविधं वर्णजातं हि स्वरो व्यञ्जनमेव च ।
अकारादि स्वरो ज्ञेयः कादि व्यञ्जनमुच्यते ॥ इति ॥

**End:**

चुत्वेन जातस्य चकारस्य न द्वित्वम् । कच्छदच्छि इत्यनयोस्तु द्वित्वं भवत्येव । तकारादेशस्य धातुस्थस्य चकारस्यानचि चेति . . मित्यादौ गकारोऽपि नेति श्रुतम् ॥

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम् ॥
उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ॥
प्रदीपभूतं विद्यानां सर्वासां समुपस्थितम् ॥

**Colophon:**

इति शौनकीयसारः समाप्तः ।

---

R. No. **5259**.

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 71. Lines, 20 in a page. Devanagari. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Paramēśvara Nambūdiri, Theyyanūr-mana, Vaniyankulam, Malabar district.

**शेषसमुच्चयविमर्शिनी.**

**ŚEṢASAMUCCAYAVIMARŚINĪ.**

Foll. 1a—70b. Fol. 71 is left blank.

A commentary on the Śeṣasamuccaya described under R. No. 3027 ante. The commentator's name is not given.

Complete.

**Beginning:**

श्रीमद्गुरून् गणेशं ब्रह्मादिदेवताश्च नत्वाथ ।
शेषसमुच्चयविषयां विमृशामि यथामति व्याख्याम् ॥

अत्र खलु ग्रन्थकृत् समीचीनतन्त्रप्रतिपादकान् तन्त्रसमुच्चयाख्यान् ग्रन्थादवशिष्टानि बाह्यानि विषमाणि तन्त्राणि समुच्चित्य प्रतिपादयितुमिच्छन्नादौ तद्विघ्नपरिसमाप्त्यादिप्रयोजनाय ता एव देवता उद्दिश्याशिषः प्रार्थयते—ब्रह्मार्केत्यादिना । एता ब्रह्माद्या देवता नमति नमनं कुर्वाणाय मे मह्यं प्रसन्ना अभिमतमिष्टं ददतु । कास्ता देवता इत्यत्राह—ब्रह्मार्क-

R. No. **5260.**

Paper. $10\frac{1}{4} \times 9\frac{1}{2}$ inches. Foll. 28. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1926-27 from a MS. of Śrīmān Magoni Miśra, Khandaduli, Rajasiṁhapuram, Aska, Ganjam district.

**वैद्यहृदयानन्दः**

**VAIDYAHṚDAYĀNANDAḤ.**

A work on medicine by Yōgiprahāraja, son of Nīlakaṇṭha. It is stated that this Nīlakaṇṭha was the Guru of the wife of king Vikrama of Nandapura and provided two villages for Brahmans and that he was called Jamadagnidēva. The author wrote another work called Vaidyālaṅkāra.

Complete in five Prakāśas dealing with the following subjects :—

१. ज्वरप्रतीकारः.
२. अतिसारादिप्रतीकारः.
३. कासादिप्रतीकारः.
४. अरोचकप्रतीकारः.
५. रसादिज्ञानम्.

**Beginning** :

कमलरुचिरनेत्रं गोपिकाकेलिपात्रं
कनकसदृशवस्त्रं नीलमेघालिगात्रम् ।
करविकसितगोत्रं नागजालारिपत्रं
कलुषदरचरित्रं नौमि गोपेन्द्रपुत्रम् ॥
गजेन्द्रवदनं वन्दे प्रपन्नभयभञ्जनम् ।
पार्वतीनन्दनं देवं कामदं सुरवन्दितम् ॥
श्रीराधेशपदारविन्दयुगलध्याननिकेतानः सदा
नानाशास्त्रविचक्षणो गुणिहृदानन्दाब्धिशीतद्युतिः ।
श्रीयोगिप्रहराजसत्कविरिदं लोकोपकारोज्ज्वलं
स्वल्पेनाद्य तनोति वैद्यहृदयानन्दं सुकाव्यं शुभम् ॥
ग्रन्थे मदीये सरसे रसज्ञा दृष्ट्वा यदा वेद्यपे न खेदः ।
जानाति यद्वन्मकरन्दभावं भृङ्गावली किं विहगोऽन्यदेव ॥

* * * *

वैद्यलक्षणम्—

सुगुरुकलितविद्यो धर्मशीलोऽभिमानी
सुप्रविरमृतहस्तः संप्रवीणः क्रियासु ।

समदृग कृततृष्णो धैर्ययुक्तः कृपालु-
विकलरहितचित्तः श्रीयुतो यः सवैद्यः ॥

आदौ विनिश्चित्य गदं तु साध्यं दोषाधिकानप्यथ तत्प्रशान्तिम् ।
समाचरेदौषधिभिश्च दानैर्जपादिहोमैर्विबुधार्चनैश्च ॥

रोग्याचरणम्—

वैद्यं नारायणं मत्वा तोषयेद्दिविधादरैः ।
यस्त्वौषधे सुधाबुद्धिः स रोगी लभते सुखम् ॥
अच्युतानन्तगोविन्दनामाद्यैर्मन्त्रितौषधम् ।
संपूज्य गुरुविप्रादीन् भजेल्लाग्नः सुवासरे ॥

इत्यादीनि स्फुटमस्मत्कृतवैद्यालङ्कारे ज्ञातव्यानि ।

**End:**

गोपनीयमिदं सर्वं तवाग्रेऽद्य प्रकाशितम् ।
लोकोपकारकः कान्ते यतस्त्वं प्राणवल्लभा ॥
यत्तातः ग्रहराजज्योतिषरविः श्रीनीलकण्ठः सुधीः
श्रीमन्नन्दपुरेशविक्रमनृपश्रीपट्टराज्ञीगुरुः ।
ब्रह्मण्यो जमदग्निदेवविदितः सद्गुरूणां तु यः
कर्ता ग्रामगुणस्य चामरवरच्छत्रादिचिह्नाङ्कितः ॥
काव्यव्याकरणादिनाटककृती साहित्यसङ्गीतवि-
द्यो वैद्यस्वरशिल्पज्योतिषकलाशास्त्रादिदक्षः स्वयम् ।
श्रीयोगिमहराजसत्कविरिदं वत्तान्वयक्षीरधेः
पूर्णेन्दुः स चकार वैद्यहृदयानन्दं स्वकान्तोक्तितः ॥
यावद्वृन्दावने राधा श्रीकृष्णप्रेमवर्धिनी ।
तावत्काव्यमिदं लोके तनोतु विदुषां मतिम् ॥

**Colophon:**

इति श्रीकविवरयोगिमहराजमहापात्रविरचिते वैद्यहृदयानन्दे रसादि-ज्ञानो नाम पञ्चमः प्रकाशः ।

---

### R. No. 5261.

Paper. 10½ × 9½ inches. Foll. 142. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Pūmalli-mana, Chalasseri, Malabar district.

आर्यभटीयम्, सव्याख्यानम्.

**ARYABHATIYAM WITH COMMENTARY.**

Similar to the work described under No. 13389 of the D.C.S. MSS., Vol. XXIV. The commentator's name is not given.

Contains the last two Pādas i.e., Kālakriyāpāda and Gōlapāda.

**Beginning:**

अनादिनिधनं कालं तल्लिङ्गं ग्रहतारकाः ।
नत्वा भूवर्षसर्वेलेहानुगा तस्य दृश्यते ॥

यच्छेषतयात् लौकिकगणितन्यायमशेषं गणितपादेन प्रत्यपादिन् तमेव कालं ज्योतिर्गतिविशेषैरनुमापयितुं कालक्रियापाद आरभ्यते । तत्र मन्त्रार्थवादेतिहासपुराणेषु लोके च प्रसिद्धकालविभाग एव क्षेत्रविभागेऽपि मूलं निरूप्यमाण इति प्रसिद्धस्तद्विभाग एव क्षेत्रेति दृश्यते वर्षमित्यादिना आर्याद्वितयेन ।

वर्षं द्वादश मासास्त्रिंशद्दिवसो भवेत्स मासस्तु ।
षष्टिर्नाड्यो दिवसः षष्टिश्च विनाडिका नाडी ॥
गुर्वक्षराणि षष्टिर्विनाडिका षडेव वा प्राणाः ।
एवं कालविभागः क्षेत्रविभागस्तथा भगणात् ॥

यथा वर्षं स्वावयवभूतैर्द्वादशभिर्मासैरारब्धं स मासः पुनर्न तथा नवतिथेरंशैरारब्धः सावयवभूतैर्दिवसैः त्रिंशतैर्वारब्धः, अतस्त्रिंशांशा एव सावयवा दिवसा इत्युभयत्रावयवावयविसम्बन्धगतो भेदस्तुशब्देन द्योत्यते । षष्टिर्नाड्यो दिवस इत्यत्रापि तुशब्दोऽनुवर्तनीयः, अस्यापि पूर्वस्माद्भिन्नत्वात् । षष्टिश्च विनाडिका नाडीत्यत्र चशब्देनातः परं विभागसाम्यं द्योत्यते । एष विभागः सौरादिषु मानेषु सर्वत्र समानः । किन्तु गुर्वक्षराणि षष्टिरादिविनाडिका आद्या विनाड्याः षष्ठ्यंश एव, मध्यमवृत्त्या गुर्वक्षरोच्चारणकालः, स्वस्थस्य जन्तोर्निश्वासश्च । तस्यैव षडंशः प्राणेनैकुलात्ममित्यस्य विवरणमेतत् ।

* * * *

इति विष्कम्भादियोगपर्यायः प्रदर्शितः । व्यतीपातानां प्रत्येकं तावत्यस्तदृश्या इति च तेनैव सिद्धम् । अत एकस्मिन् चन्द्रार्कपर्यायेऽत्र त्रयो व्यतीपाताः चक्रव्यतीपातश्चक्रार्धव्यतीपातस्सार्पमस्तकश्च । भास्करस्त्वाह—

सूर्येन्दुयोगे चक्रार्धे व्यतीपातोऽथ वैधृतिः ।
चक्रे च मैत्रपर्यन्ते विज्ञेयस्सार्पमस्तकः ॥
सूर्यसिद्धान्तेऽपि त्रितयमुक्तं व्यतीपातानाम्—
व्यतीपातत्रयं घोरं गण्डान्तत्रितयं तथा ॥ इति ।

End :

आर्यभटीयं नाम्ना पूर्वं स्वायंभुवं सदा सत्यम् ।
सुकृतायुषोः प्रणाशं कुरुते प्रतिकञ्चुकं योऽस्य ॥ इति ।

यदेतच्छास्त्रं पूर्वं जगत्स्रष्टुर्ब्रह्ममुखविनिस्सृतत्वात् नाम्ना स्वायम्भुवमासीत् । तदेवेदमिदानीं नाम्ना आर्यभटीयमभूत् । अस्मन्मुखविनिस्सृतत्वात्केवलं शब्दमात्रस्यैवोभयोर्भेदः ।

* * * *

द्विविधं संहिताज्ञानं दीपयन्ति मनीषिणः ।
व्याख्याने कुशलाः केचित्केचिद्ग्रन्थस्य धारणे ॥ इति ।

स्मर्यते चाध्ययनस्यापि फलमिदं शास्त्रमधीयान इत्यादौ तस्माद्ये पुनरिदं शास्त्रमधीयाना व्याचक्षाणाश्च रक्षन्ति तेषां प्रतिकञ्चुकमकुर्वतां सुकृतायुषी वर्धेताम् । ते सुकृतिनो दीर्घायुषश्च भूयासुः इत्यस्मिन्नर्थे पर्यवसानमित्यर्थः । एवमिदमस्माभिर्यथामति व्याख्यातम् ।

नमः स्वयंभुवे तस्मै तत्प्रसादादिदं कृतम् ।
नमो भगवते तस्मै श्रीमदार्यभटाय च ॥
शिष्यं नत्वेन विचार्याचार्यार्यभटसूत्रभाष्यमिदम् ।
यदि सन्न्यायाल्लिख्येदस्मै दातव्यमेव शङ्कर ते ॥

---

## R. No. 5262.

Paper. $10\frac{1}{2} \times 2\frac{1}{4}$ inches. Foll. 167. Lines, 20 in a page. Telugu. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Śivarāmadāsa Pantulu Garu, Koṭikalapūḍi, Bobbili.

(a) दैवज्ञकल्पलता, आन्ध्रटीकासहिता

DAIVAJÑAKALPALATĀ WITH TELUGU MEANING.

Foll. 1a—77a. Foll. 77b—105b contain some astronomical calculations.

A poetical work on astronomy with Telugu meaning by Kōṭikalapūḍi Kōdaṇḍarāmayarya, the priest of Raṅgarāya, Rāja of Bobbili.

The author who has commented on his own work, was the son of Veṅkaṭakṛṣṇayajvan and grandson of Veṅkaṭarāmaśāstrin.

Contains one to ten Adhyāyas.

Name of the scribe—Dandhyāla Śrīrāmulu. Date of transcription—Sunday, the 7th day of the bright fortnight of the lunar month Āśvayuja in the year Saumya.

**Beginning:**

श्रीमद्ध्वजाङ्कविरुद्धाङ्कुशशङ्खपद्मकौक्षेयकध्वजधनुर्झषमुख्यरेखम् ।
उद्यत्प्रभाकरगभस्तिसहस्रतेजं श्रीरामचन्द्रचरणं शरणं प्रपद्ये ॥

టీకా. శోభాయుక్తమైనటువంటిన్ని వక్రనక్రాంకుశశంఖచక్ర ధ్వజాదిసముద్రిక్తమ్ములగు రేఖాన్వితమైనటువంటిన్ని ఉదయకాల సూర్యకిరణసహస్రంవలె యుక్తమైనటువంటిన్ని శ్రీరామచంద్రులవారి పాద పద్మాన్ని శరణుబొందుచున్నాను.

**End:**

दिनकरविधुभौमज्ञेज्यशुक्रार्कपुत्राः फणिपतिशिखितारा: कुम्भजाद्या मुनीन्द्राः ।
निखिलहृदयसंस्थौ जानकीरामचन्द्रौ सकलशुभसमाजं सर्वदा मे दिशन्ति ॥

గ్రహనక్షత్రములతోకూడానున్ను కుంభజాదితారలతోకూడానున్ను చరిత్ర మేము చెప్పినాము గనుక యీ భక్తి కలుగుటచేత వారున్ను సర్వాంతర్యామిన్ని శ్రీకైలాసమేరువున్ను అయిన శ్రీరామచంద్రులవారున్ను మాకు విహితాముష్మిక శుభప్రదులున్ను కావలెనని ప్రార్థన చేస్తిమి.

* * * *

श्रीमद्बोब्बिलिनामपट्टणविभोः श्वेताचलाधीश्वरा-
गाराख्याह्वयचारणीपतिविभोः प्रेष्यः पुरोधाः कविः ।
विद्वान् कोट्टूलपूडिवंशजनितः कोदण्डरामाह्वयः
कृत्वा कल्पलतां दशाधिकरणां श्रीविष्णवे तां ददौ ॥

* * * *

**Colophon:**

इति श्रीकोट्टूलपूडिकुलपवित्रहरितसगोत्रवेङ्कटरामशास्त्रिपौत्रवेङ्कटकृष्णयज्वपुत्रश्रीकोदण्डरामार्यकृतकल्पलतायां स्वयङ्कृतान्ध्रभाषाव्याख्यानसमेतायां ग्रहयुद्धाध्यायो दशमस्समाप्तः ॥

(*b*) रामाष्टकम्.

RĀMĀṢTAKAM.

Fol. 106*a*. Fol. 106*b* is left blank.

Eight stanzas in praise of Rāmā.

Complete.

**Beginning:**

धर्मदलितेशधर्मः शरराशित्रुटितलवणशरराशिः ।
रामभुजबलविरामः पायात्संसारसंभवापायात् ॥

**End:**

रामाष्टकं सुपुण्यं पठतां पापापनोदनं दिव्यम् ।
आथर्वणिकरहस्यं साङ्गनुतं स्वेप्सितार्थदानचणम् ॥

---

R. No. 5263.

**Paper.** 10½ × 9½ inches. Foll. 144. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Hariharārājagāru, Chochina Jagannathapuram, Kudala, Ganjam district.

महाभारतम्, निगूढपदबोधिनीव्याख्यासहितम्.

MAHĀBHĀRATAM WITH THE COMMENTARY NIGŪḌHA-PADABŌDHINĪ.

Foll. 1*a*—144*a*. Fol. 144*b* is left blank.

The Mahābhārata with a running commentary called Nigūḍhapadabōdhini. The commentator, Nārāyaṇa, refers to the previous commentaries of Vaiśampāyana, Dēvasvāmin, Vimalabōdha, Arjunamiśra, Mādhava and Nārāyaṇasarvajña.

Contains from the Ādiparvan to the end of the Mōkṣadharma in the Śantiparvan.

**Beginning:**

निघण्टुभाष्यनिगमनिरुक्तानि विशेषतः ।
वैशम्पायनटीकादिदेवस्वामिमतानि च ॥
श्रीमद्विमलबोधस्य मतं मिश्रार्जुनस्य च ।
श्रीनारायणसर्वज्ञमतमालोच्य तत्त्वतः ॥
श्रीमहाभारतव्याख्या निगूढ[र्थ]पदबोधिनी ।
टीका विरच्यतेऽस्माभिरादिपर्वक्रमादियम् ॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

अत्र नारायणपदेनान्तर्यामिनारायणविष्णुकृष्णानां ग्रहणम् । नरपदेन जीवात्मरूपार्जुनस्य ग्रहणम् । नरः परमकारणभूतोऽजः । नराज्जातानि तत्त्वानीत्युक्तेः । नरोऽजे मनुजेऽर्जुन इति मेदिनी । उत्तमः उत्कृष्टः परमात्मा । तथा च भगवद्वचनम्—

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥ इति ।

नरश्चासावुत्तमश्चेति नरोत्तमस्तम् । अन्तर्यामिणः परमात्मकृन्माया-सम्बन्धराहित्यख्यापनार्थेदं विशेषणम् । नरं किंभूतं नरेषु स्वप्नभ्रमादि-स्वाविद्याकल्पितेषु जीवेषूत्तमम् उत्कृष्टं मुख्यमिति यावत् । एवं जीवपक्षे दृष्टिसृष्टिमाश्रित्यैतद्विशेषणमिति द्रष्टव्यम् । चैवशब्दो नवा-शब्दवदखण्डः । यद्वा चाकारविकारौ समुच्चयावधारणार्थकौ । नरोत्तममिति द्वयोः विशेषणम् तावुभौ भारतप्रतिपाद्यतया नमस्कृत्य तद्वाचिकां वाणीं नमस्कुरुते—सरस्वतीं वागधिष्ठात्रीं देवताम् ।

* * * *

ततस्तदनन्तरं जयाख्यं महाभारतमुदीरयेत् । जयशब्दस्य महाभारत-वाच्यत्वं लक्षणया । तथाचाभिधानम्—

चतुर्णामपि वर्णानां फलहेतौ जयोऽस्त्रियाम् ॥ इति ।

इदं तु चतुर्वर्गफलहेतु, भगवतो जयप्रतिपादकत्वाद्वा । यद्वा—

अष्टादश पुराणानि रामस्य चरितानि च ।
विष्णुधर्माणि शास्त्राणि शिवधर्माश्च शाश्वता ॥
साङ्गं वेदं पञ्चमं च यन्महाभारतं स्मृतम् ।
सौरधर्माश्च राजेन्द्र मानवोक्ता महीपते ॥
जयेति नाम तेषां च प्रवदन्ति मनीषिणः ।

यतो नारायणादिनमस्कारेण विघ्नोत्सादने जाते तस्माज्जयं ग्रन्थमुदीरयेत् वाचयेत् । जीयतेऽनेन संसार इति जयो ग्रन्थः । यद्वा जयतीति जयो विष्णुस्तन्महिमप्रतिपादकत्वाज्जयो ग्रन्थः । अत्र वाचकस्त्रिविधः सात्विकराजसतामसभेदात् ।

* * * *

सौतिरिति । तस्य हि पिता ब्राह्मण्यां क्षत्रियाज्जातः । ततस्सूत इति उच्यते । तत्पुत्रस्सौतिः । पौराणिको वैष्णवः, पुराणाख्यानकुशलो वा ।

नैमिशारण्य इति । वज्रस्य किल राज्ञो रथेन गच्छतस्तत्र रथनेमिरशीर्यत इति नैमिशारण्यमभवदिति वराहपुराणे । महर्षेर्नेमिषस्याश्रमोपलक्षितमरण्यमिति गुरुः । यद्वा, ब्रह्मणा विसृष्टस्य मनोमयस्य नेमिः शीर्यते कुण्ठीभवतीति यत्र तन्नैमिशं नेमिशमेव नैमिशम् । तथा च वायुपुराणे—

एतन्मनोहरं चक्रं मया सृष्टं विसृज्यते ।
यत्रास्य शीर्यते नेमिः स देशस्तपसस्स्मृतः ॥
इत्युक्त्वा सूर्यसङ्काशं चक्रं सृष्ट्वा मनोमयम् ।
प्रणिपत्य महादेवं विससर्ज पितामहः ॥
तेऽपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुम् ।
प्रययुस्तस्य चक्रस्य यत्र नेमिर्विशीर्यते ॥
तद्वनं तेन विख्यातं नैमिशं मुनिपूजितम् ॥ इति ।

* * * *

श्रीदेवबोधविमलबोध शाण्डिल्यमाधवाः ।
नारायणश्च सर्वज्ञोऽर्जुनमिश्रस्तथैव च ॥
एतेषां मतमालोच्य स्वमत्या च क्वचित्क्वचित् ।
कृता नारायणेनेयं निगूढपदबोधिनी ॥

आदिपर्वविषमपद्यविवरणम् ।

**End:**

इन्द्रियाणामसाधारणं कार्यमाह—येन पश्यतीति । येन कारणेन रूपादि पश्यति तस्य चक्षुरित्याख्या । एवं शेषेषु ।

आश्रयो नास्ति सत्त्वस्य क्षेत्रज्ञस्य च कश्चन ।
सत्त्वं मनस्संसृजति न गुणान् वै कदाचन ॥

आश्रय उपादानकारणं, सत्त्वं संसृजति न गुणानित्युक्तम् । तत्र विशेषमाह—सत्त्वं मनः संसृजतीति । मन एव साक्षी तत्र सत्त्वेन संसृज्यते । अन्ये गुणाः परम्परयेत्यर्थः । एवं वा पाठः—

आश्रयो नास्ति सत्त्वस्य गुणस्सत्त्वस्य चेतना ।
सत्त्वं मनस्संसृजति ।

The scribe adds—

श्रीरामचन्द्रनृपतेर्युगवर्णकाङ्के मार्गाख्यमासि सितपक्षधरे दशम्याम् ।
नारायणो रघुकुलाभरणः कवीन्द्रः टीकां लिलेख रुचिरां खलु भारतस्य ॥

## R. No. **5264.**

Paper. 10½ × 9½ inches. Foll. 102. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1926-27 from a MS. of Śrīmān Gadādhara Vidyābhūsaṇa, Ichapur, Ganjam district.

### (a) दैवज्ञाभरणम्.

### DAIVAJÑĀBHARAṆAM.

Foll. 1a—97b.

A treatise on horoscopy in 21 Prakāśas dealing with the following subjects.

Complete in 21 Prakāśas:—

१. ग्रहविवेचनम्.
२. राशिविवेचनम्.
३. लग्नविवेचनम्.
४. प्रसूतिविवेचनम्.
५. नक्षत्रगण्डविवेचनम्.
६. रिष्टविवेचनम्.
७. पित्ररिष्टविवेचनम्.
८. मात्ररिष्टविवेचनम्.
९. लग्नभावविवेचनम्.
१०. धनभावविवेचनम्.
११. तृतीयभावविवेचनम्.
१२. चतुर्थभावविवेचनम्.
१३. पुत्रभावविवेचनम्.
१४. रिपुभावविवेचनम्.
१५. कलत्रभावविवेचनम्.
१६. अष्टमभावविवेचनम्.
१७. नवमभावविवेचनम्.
१८. दशमभावविवेचनम्.
१९. लाभभावविवेचनम्.
२०. व्ययभावविवेचनम्.
२१. राजयोगविवेचनम्.

**Beginning :**

आदित्यस्सविता सूर्यो भास्करोऽर्को दिवाकरः ।
तिग्मांशुस्तपनो भानुः सहस्रांशुः प्रभाकरः ॥
शीतांशुश्चन्द्रमास्सोमो मृगाङ्केन्दू निशाकरः ।
शीतरश्मिर्निशानाथश्शशाङ्कश्शशलाञ्छनः ॥
अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ।
आरः क्षितिसुतो वक्रः क्रूराख्यश्च निगद्यते ॥

*     *     *     *

कारकः—

तातारण्यनृपाद्रिकृद्दिनमणिर्गोधूमगन्धप्रसू-
र्वार्ध्यानन्दनमोदके रससुहृद्रौप्यादिकृच्चन्द्रमाः ।

भूसत्त्वात्मजसाहसव्रणरुजा भ्रातानिवीर्यादिकृ-
द्भौमो ज्योतिषवैद्यमातुलसुहृच्छ्रीशिल्पिकृत्सोमजः ॥
सत्कर्मात्मजमित्रकीर्तिकनकक्ष्मागीतकृद्वाक्पतिः
मुक्ताश्रीस्मरगीतशास्त्ररजतालङ्कारकृद्भार्गवः ।
हस्त्यश्वायुधवैलशूलरणसञ्चाराहिमूलादिकृ-
न्मन्दो राजभयप्रयाणफणिकृद्राहुश्शिखी राहुवत् ॥

* * * *

मित्रम्—

मित्राणि सूर्यस्य कुजेन्दुजीवाः शत्रुस्सितार्कौ शशिजस्समस्स्यात् ।
सोमस्य मित्रे बुधतिग्मरश्मी कुजामरेज्यार्किसितास्समाश्च ॥
रवीन्दुजीवाः क्षितिजस्य बान्धवाः ज्ञोऽरिस्समौ भास्करदैत्यमन्त्रिणौ ।
बुधस्य मित्रे दिननाथभार्गवौ शत्रुश्शशी जीवकुजार्कजास्समाः ॥

**End:**

अश्विन्यनूराधास्थः श्रवणधनिष्ठासु पार्थिवं भौमः ।
स्वोच्चे मुदितो यदि वा वर्गोत्तमगतश्च नान्यत्र ॥
लग्नाधिपतिसंयुक्ते त्वेषां लग्ने समुद्भवः ।
तेषां देशं न मुञ्चन्ति न कदाचिदपि श्रियः ॥
तुङ्गेशस्थगृहे रविरेको नवमेषु यस्य शुक्रगुरुः ।
नियतं वा भवति नरो जाराङ्गनासमुद्भवो भूपः ॥

**Colophon:**

इति श्रीदैवज्ञाभरणे राजयोगविवेचनं नाम एकविंशः प्रकाशः ।
ग्रन्थश्च समाप्तः ।

---

(*b*) स्वल्पजातकम्.

SVALPAJATAKAM.

Foll. 98*a*—101*a*. Foll. 101*b*—102 are left blank.

Same work as that described under No. 14076 of the D.C.S. MSS., Vol. XXIV. By Varāhamihira.

Breaks off in the fourth Adhyāya.

---

R. No. 5265.

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 96. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Paramēśvaran Nambiyar, Tayyār-mana, Malabar district.

(a) सौभाग्यमञ्जरी.

SAUBHĀGYAMAÑJARI.

Foll. 1a—81b.

Similar to the work described under R. No. 1389 ante. By Nārāyaṇanātha (of Ponnūr?) son of Vāsudēva and disciple of Viṣṇu-nātha-Dēvarājagiri is stated to be the Guru of the author's Guru.

Complete in ten Unmēṣas.

**Beginning:**

आनन्दचिच्छक्तिशिवग्रस्ताशेषद्वयीपथः ।
रक्तशुक्लात्मकं नौमि श्रीगुरोश्चरणद्वयम् ॥
श्रीविष्णुवासुदेवाख्यावाचार्यपितरौ च मे ।
नानाविद्याधुनीवारिधारावारौ सदा भजे ॥
विघ्नशान्तिप्रदं विघ्नक्षेत्रेशं क्षेत्र . . कम् ।
वन्दे सतत । च वटुं योगिनीर्योगशालिनीः ॥
शान्त्यादिपञ्चकोटिं च पराभिमदम . रा ।
जिह्वाग्रे नृत्यतां नित्यं मम नित्या सरस्वती ॥
कामराजक्रमायातसम्प्रदायमधुलिहा ।
मया विरच्यते सम्यक्च्छ्रीमत्सौभाग्यमञ्जरी ॥

अथ ब्राह्मे समये समुत्थाय विहितशौचाचमनः मृद्वासने योन्यासीनः ।

समूर्धपद्मे शुभ्रेत सहस्रारविराजिते ।
तत्कर्णिकामध्येऽस्थुग्रचिचन्द्रासनमध्यगम् ॥
शुद्धस्फटिकसंकाशं शुक्लवस्त्रानुलेपनम् ।
वामेनोत्पलधारि॰्या शक्त्या वामाङ्कसंस्थया ॥
सव्येन दोष्णा सानन्दं समालिङ्गितविग्रहम् ।
वरदाभयहस्ताब्जं करुणामृतवारिधिम् ॥
सर्वज्ञानमयं सर्वमन्त्रचन्द्रोदयाचलम् ।
विलोचनं निजगुरुं स्मरेत्तन्नामपूर्वकम् ॥

इति च शिरसि ध्यात्वा बद्धाञ्जलिः निजगुरुमनुना तं प्रणम्य रक्तशुक्लात्मकौ तच्चरणौ मानसैरुपह(चा)रैरभ्यर्च्य, प्रकाशानन्दाख्यमित्यादिक्रया चरणस्तुत्याभिष्टूय नित्यानुष्ठानार्थमनुज्ञां लब्ध्वा रेचकपूरककुम्भकक्रमेण प्राणायामत्रयं कुर्यात् ।

* * * *

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यकवितार्किकचक्रवर्तिश्रीदेवराजगिरि-पूज्यपादप्रशिष्यस्य श्रीविष्णुवासुदेव(शिष्य)पुत्रस्य श्रीनारायणनाथस्य कृतौ सौभाग्यमञ्जर्यां प्रथम उन्मेषः ।

**End:**

उद्वास्य हृदयाम्भोजे संपूज्य च परां शिवाम् ।
श्रीगुरोश्चरणद्वन्द्वमर्चयेन्निजमूर्धनि ॥
वसनैर्भूषणैर्हृद्यैः स्वर्णरत्नादिभिर्धनैः ।
क्षेत्रैश्च वाहनैश्शिष्यः श्रीनाथं परितोषयेत् ॥

श्रीगुरूदितदिशा समासतो नामदानविधिरेवमीरिता ।
यं प्रपद्य भुवने मनीषिणः प्राप्नुवन्ति खलु देशिकेशताम् ॥

श्रीनानास्तिकगर्वपर्वतघटाभेदेषु वज्रायिता
भक्तानां मतिकैरवप्रहसने चन्द्रांशुलेशायिताः ।
वाचो यस्य जयन्ति सौघजलधेः कल्लोलमालायिताः
तं वन्दे परमं गुरुं यतिवरं श्रीदेवराजाचलम् ॥

ब्रह्मा किमेकवदनो द्विभुजो हरिः किं
साक्षादनाहततृतीयदृगीश्वरः किम् ।
इत्यूह्यमानमहिमा भुवि देशिकेशैः
प्रीतिं करोतु कृपया मयि विष्णुनाथः ॥

दुर्वारप्रतिवादिगर्वगहनाम्भोधेरगस्त्यायते
पादाक्रान्तजनाज्ञभावतमसः प्रत्यूषकालायते ।
नानासूक्तिसुधाप्रवाहविसृतैर्दुग्धाब्धिमध्यायते
यो नित्यं शरणं व्रजामि पितरं तं वासुदेवं गुरुम् ॥

हेमग्रामाधिपतिना भृगुवंशभुवा कृता ।
नारायणेन कृतिना श्रीमत्सौभाग्यमञ्जरी ॥
सुमनोज्ञ रसोद्भूतरसनिष्यन्दनिर्भरा ।
मञ्जरीव मुदे भूयात्सतां सौभाग्यमञ्जरी ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यकवितार्किकचक्रवर्तिश्रीदेवराजगिरि- पूज्यपादप्रशिष्यस्य श्रीविष्णुवासुदेवनाथशिष्यस्य श्रीनारायणनाथस्य कृतौ श्रीसौभाग्यमञ्जर्यां दशम उन्मेषः ॥

---

(b) कामोदयसिद्धिः.

KĀMŌDAYASIDDHIḤ.

Foll. 82a—85b.

A small work in praise of goddess Kāmēśvarī.

Complete.

**Beginning:**

निस्सीमानन्दया देव्या नित्यं समरसात्मकम् ।
परमस्य शिवस्याहं भजे श्रीपादुकाम्बुजम् ॥
सर्वानुग्राहिणीं नित्यां सर्वमङ्गलमातरम् ।
सर्वशक्तिं भजे शक्तिं पञ्चकृत्यकरीं प्रभोः ॥

* * * *

पाशाङ्कुशामृतकपालवराभयाङ्कैः
हस्तैश्चतुर्भिरभिरामदशारुणाङ्गी ।
कोणाग्रगा त्रिनयना तरुणेन्दुचूडा
कामेश्वरी मम ददातु समस्तकामान् ॥

**End:**

यः कामसिद्धिरिति मङ्गलकामधेनुं
कामेश्वरीस्तुतिमिमां पठति प्रतीतः ।
कान्त्या श्रिया कवितया गुणसम्पदा च
सोऽयं स्वयं भवत एव किमु प्रियाभिः ॥

**Colophon:**

कामोदयसिद्धिस्संपूर्णा ॥

---

(c) योगिनीहृदयम्.

YOGINĪHṚDAYAM.

Foll. 85a—96a. Fol. 96b is left blank.

Similar to the work described under No. 5698 of the D.C.S. MSS., Vol. XII.

Complete in four Paṭalas.

**Beginning :**

प्रकाशमध्यस्थितसत्त्वरूपां वराभये सन्दधति त्रिनेत्राम् ।
सिन्दूरवर्णामतिकोमलाङ्गीं मायामयीं तत्त्वमयीं नमामि ॥

कल्पद्रुमूलमणिकुट्टिमसन्निविष्टां
मुक्तातपत्रमणिमौक्तिकवृष्टिहृष्टाम् ।
इष्टाभये विदधतीं वरदां प्रसन्ना-
मिष्टाप्तये परशिवां परिशीलयामि ॥

**End :**

षोढान्यासस्त्वयं प्रोक्तस्सर्वतन्त्रेषु पूजितः ।
एवं यो न्यस्तगात्रः स्यात्स पूज्यस्सर्वयोगिभिः ॥
नास्त्यस्य पूज्यो लोकेषु प्रमातृप्रमुखो गुणैः ।
स एव पूज्यः सर्वेषां स स्वयं परमेश्वरः ॥
षोढान्यासविहीनं यः प्रणमेद्देव पार्वति ।
सोऽचिरान्मृत्युमाप्नोति नरकं च प्रपद्यते ॥

**Colophon :**

इति सङ्केतदीपिकायां योगिनहृदयन्यासक्रमः चतुर्थः पटलः ॥

---

(*d*) सम्पत्करीसंविदुपासनक्रमः.

SAMPATKARĪSAṀVIDUPĀSANAKRAMAḤ.

Foll. 92*a*—96*a*. Fol. 96*b* is left blank.

On the worship of Śakti.

Complete.

**Beginning :**

या कामत्वकविल्वनिर्वृतिमयी कामस्य शंभोः कला
यातायातविनोद . . कवती धाम्नः कुलाचाकुलाम् ।
. . . कृतचेतसामहमिति क्रोडीकृताशेषचित्-
स्वस्त्यायास्तु सरस्वती भगवती संपत्करी सा मुदे ॥

श्रीसंपत्करीक्रमः—

प्रातरुत्थाय प्रसन्नवदनः प्राङ्मुख उपविश्य, स्वगुरुपादुकया शिरसि वन्दनं कृत्वाऽस्त्रमन्त्रेण करतलशुद्धिदेहशुद्धितालत्रयदिग्बन्धनादिप्रकारान् कृत्वा मूलेन प्राणायामं विधाय, षडङ्गपूर्वकं मातृकां विन्यस्य, क्रों ईशानोर्ध्ववक्त्राय नमः क्रें तत्पुरुषः क्रें अघोरः क्रां वामदेवः क्रें सद्योजात-पश्चिमवक्त्राय नमः इति करद्वये ।

**End:**

तेनैव पुष्पादिकमभ्राय शेषितमर्घ्यमुक्ततत्त्ववाग्भवमयस्वात्मनो हृदयभूतममृतं श्रीदेशिकेन्द्राय निवेद्य, स्वयं प्रसादीकृत्य कामलकवित्वनृपतिमय स्वचैतन्यै . . . . कार्तिसुभगां संविन्मयस्सुखीभूयादिति शिवम् ।

**Colophon:**

सम्पत्करासावद्पासनक्रमः संपूर्णः ॥

---

R. No. 5266.

Paper. 10⅛ × 9½ inches. Foll. 9. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Narayaṇan Nambūdirippaḍ, Punnata-mana, Kottapadi, Malabar district.

(a) शौनकीयशिक्षा
ŚAUNAKĪYAŚIKṢĀ.

Foll. 1a—5a.

Same work as that described under *R. No.* 3731(*d*) ante, but with slightly different readings. By Śamaka.

Complete.

---

(b) शैशिरीशिक्षा.
ŚAIŚIRIŚIKṢĀ.

Foll. 5a—6a.

Same work as that described under R. No. 3712(*c*) ante, and with the following additional stanza in the beginning.

Complete.

**Beginning:**

शैशिरादिमुनिश्रेष्ठैरन्वितं मुनिपुङ्गवम् ।
नमामि शौनकं नित्यमृग्वेदस्य प्रवर्तकम् ॥

(e) पाणिनीयशिक्षा.

PĀṆINĪYAŚIKṢĀ.

Foll 6b—9a.

Same work as that described under No. 989 of the D.C.S. MSS., Vol. II.

Complete.

Fol. 9b contains some miscellaneous stanzas on Vēdalakṣaṇa.

---

R. No. 5267.

Paper. 10¼ × 9½ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Nambiyattan-Bhaṭṭatirippad, Arūr-mana, Malabar district.

कर्णार्जुनीयम्.

KARṆĀRJUNĪYAM.

Foll. 1a—7b. Fol. 8 is left blank.

This is a work in verse and prose describing the story of Śrī-Kṛṣṇa. The title Karṇārjunīya was written in the original MS. from which this MS. was copied. A conversation between Sātyaki and Kṛtavarman is found embodied in this work. Sātyaki praises Arjuna's valour and the other Karṇa's. In a stanza which is given in the extract it is said कर्णार्जुनीयं जन्यम्. There is no other satisfactory justification for the title of this work.

Wants the beginning.

**Beginning:**

. . . . . . . . . . . . . . . . . . . .

. . . . . . . . . . . . . . . . . . . . ।

ते वै धन्या जगति गृहिणो यद्गृहास्तावकीनैः

पादप्रक्षालनघनरसैः पूतमूर्धं भजन्ते ॥

देशाददिदानीं कतमान्मुनीन्द्र समेत्य मे . स्समलङ्कृतेयम् ।

किमर्थमुद्दिश्य समागमोऽयं तवेति चावेदितुमुत्सुकोऽस्मि ॥

श्रुत्वा तद्वचनं प्रणम्य जगतां नाथं बभाषे मुनि-

र्मा मा मोहय मां जनार्दन विभो दुर्वारया मायया ।

जाने त्वां निखिलेश्वरं विकृतिभिर्जन्मादिभिर्वर्जितं
सान्द्रानन्दचिदात्मकं यदुपतिं मायापटीसंवृतम् ॥

अहं खलु भवता चिकुरभरबहुलरुचिसंपादिततमिस्रदोषाः षोडशसहस्र-योषाः प्रतिगेहमेकेन मुहूर्तेन हस्ते कृता इति निशम्य तत्क्षणोन्मिषित कौतुकाक्रान्तमतिरस्वर्गतो निर्गत्य, विविधमणिमरीचिबहुलपेशलस्थलीं कुश-स्थलीमुपेत्य रुक्मविभूषिते रुक्मिणीभवने भवन्तमवलोक्य ततः परावृत्य चित्रतरभामानिलये समेत्य कान्ते समान्ते रुचिरविविधविभवो . . . तेषु निखिलभार्यानिकेतेषु निरीक्ष्य चित्रीयमाणचित्तवृत्तिरत्रैव पुनरप्यागतोऽस्मि ।

* * * *

प्रणमन्मुनिरथ कृष्णं विहिताप्लवनोऽत्र विधिवदाचम्य ।
अघमर्षणमारब्धवस्तदैव कन्यात्वमाप वनमध्येऽसौ ॥
एकाकिनी घातुकसत्त्वसङ्घैरियं परीता चकितातिवेलम् ।
किञ्चिद्रुदन्ती हरिणीव यूथच्युता तदानीं गहने चचार ॥

तस्मिन्नथ समये समस्तवसुन्धरापतिमकुटकोटिसन्ततसन्धार्यमाणवन्धुर-पादरेणुः स खलु सिन्धुत्मतिराखेटखेलनवाञ्छयाच्छतरतापिञ्छदलसच्छायो-रश्छदाच्छादितविपुलतरोरस्स्थलः.

* * * *

तदनु मनुजपतिरियं मया परिणेयेति निश्चितमतिर्निखिलयुवतिकुलमौलि-मालायमानामेनां तुरङ्गवरमारोप्य निजनगरमानीय महत्तरगुणोत्तरे मुहूर्ते विहितविवाहकर्मा निखिलमहिषीमुख्ययानया सहाभिमतं भोगजातमनुदिन-मनुबोभूयते स्म । अथ सा निरवद्याङ्गी पुत्राणां शतमजीजनत् । काले अधिकं च शताद्दितयात् कन्यानां पञ्चपञ्चाशत् ।

* * * *

अन्योन्योत्सृष्टघोरप्रहरणशकलीभूतयोधाङ्गनिर्य-
न्मांसासृक्पङ्कमग्नद्विरदचमरगदामुक्तफीत्कारभीमम् ।
उद्यन्नानास्त्रतेजःप्रसरणपिशितस्मातलाशावकाशं
जन्यं कर्णार्जुनीयं तव मनसि परिस्पन्दते किं न्विदानीम् ॥

**End:**

अस्पृष्टायुधमेव घातितवतीमष्टादशाक्षौहिणीं
निस्सङ्गामपि षोडशप्रणयिनीसाहस्रभोगाप्रियाम् ।

योगेनैव वरेण योगिनिवहैर्लभ्यां तनुं सन्त्यज-
न्निन्द्राद्यैरमरैः पतिस्त्रिजगतामस्त्वावि भक्त्या नतिः ॥
अथानुभूतामरपुष्पवृष्टिरारुह्य नागान्तकमौपवाह्यम् ।
दिक्पालसेवाञ्जलिदन्तुरेण पथा निजं धाम जगाम देवः ॥

**Colophon:**

कर्णार्जुनीयं समाप्तम् ।

---

R. No. **5268.**

Paper. $10\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 73. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Kadappēri Subrahmaṇyaśivācārya of Madurāntakam, Chinglepat district.

सिद्धान्तशेखरम्.

SIDDHĀNTAŚEKHARAM.

Foll. 1*a*—73*a*. Fol. 73*b* gives the contents of the work.

A digest on the procedure for the worship of God Śiva in temples: by Viśvanātha, son of Ubhayavēdāntabhāskara and disciple of Kṛṣṇayōgīndra.

Contains the Nimittakāṇḍa complete dealing with the following subjects:—

| | |
|---|---|
| १. पवित्रोत्सवविधिः. | १०. समयदीक्षाविधिः. |
| २. दमनोत्सवविधिः. | ११. विशेषदीक्षाविधिः. |
| ३. दीक्षाविधिः. | १२. निर्वाणदीक्षाविधिः. |
| ४. शक्तिपातलक्षणम्. | १३. स्वप्नलक्षणम्. |
| ५. श्रेष्ठगुरुलक्षणम्. | १४. त्रितत्त्वदीक्षाविधिः. |
| ६. वर्ज्यगुरुलक्षणम्. | १५. एकतत्त्वदीक्षाविधिः. |
| ७. शिष्यलक्षणम्. | १६. अभिषेकविधिः. |
| ८. दीक्षाकालनिर्णयः. | १७. अस्त्राभिषेकविधिः. |
| ९. अध्वोत्पत्तिलक्षणम्. | १८. व्रतोद्धारविधिः. |

**Beginning:**

पवित्रोत्सवविधिः—

वक्ष्ये पवित्राख्यविधिं शिवोक्तं शिवार्चनच्छिद्राविपूरणार्थम् ।
पुण्यप्रदं लोकहितं शुभार्थं भुक्तिप्रदं मुक्तिकरं नराणाम् ॥

पवित्रको वासुकिनायकोऽन्यं सर्पौ च गर्भौ तपसा तमर्च्य ।
शतं सहार्धेन समाश्च दिव्या वरप्रदं चक्रतुरम्बिकेशम् ॥
कण्ठेन मूर्ध्ना भुजगौ गृहीत्वा पवित्रकं प्राह हरस्तदाहिम् ।
प्रत्यब्दमेतं न करोति सूत्रं यस्तस्य पूजाफलमस्तु ते तत् ॥
इति प्रसिद्धं भुवि ते पवित्रं नैमित्तिकं केचिदिदं तु नित्यम् ।
संत्रायतेऽयं नरकात्पुमांसं यजुर्मिधानाच्च ततः पवित्रम् ॥
रवौ गते कर्कटकाख्यराशिं शुभे मुरारौ मलमासवर्जम् ।
आषाढमासे प्रवरं . . . तच्छ्रावणे मध्यममन्यदन्त्यम् ॥

* * * *

ताम्रोत्थकार्पासजसूत्रमुक्तं क्षौमोर्णपट्टाम्बुजदर्भशाणाः ।
मुञ्जादि जीवा तदभावमुक्तं द्विजादि कन्याकृतमुत्तमादि ॥

* * * *

श्रीविश्वनाथेन कृताध्वरेण (शैवागमाचार्यवरेण तेन) ।
श्रीकृष्णशैवागमचक्रवर्तिशिष्येण पवित्रविधिः कृतोऽयम् ॥

* * * *

**Colophon:**

इति श्रीशुद्धशैवागमाचार्यकृष्णयोगीन्द्रशिष्येण उभयवेदान्तभास्करसूनुना कृताग्निष्टोमयज्ञेन विश्वनाथेन विरचिते सिद्धान्तशेखरे नैमित्तिककाण्डे पवित्रदमनारोपणं नाम प्रथमः परिच्छेदः ।

**End:**

पूर्णान्तं जुहुयात्साम्वहृताङ्गानि जले क्षिपेत् ।
गृहस्थानपि तान् कुर्याच्छेषं प्राग्वत्समाचरेत् ॥
एतेषां शिवभक्तानां कुर्याद्दीक्षामथापि वा ।
उक्तो भ्रतो महादीनां विश्वनाथेन धीमता ॥

**Colophon:**

इति सिद्धान्तशेखरे नैमित्तिककाण्डे दीक्षाभेदो नाम सप्तमः परिच्छेदः-

---

R. No. **5269.**

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 11. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Ravivarma Rāja, Pudiyakōvilagam, Beypore, Malabar district.

(*a*) शिवस्तोत्रम्.

ŚIVASTŌTRAM.

Foll. 1*a*—5*a*.

A small work in praise of Śiva.

Complete.

**Beginning:**

कल्याणं नो विधत्तां कटकतटलसत्कल्पवाटीनिकुञ्ज-
क्रीडासंसक्तविद्याधरनिवहवधूगीतशर्वापदानः ।
तर्हिर्हेरम्बनादैस्तरलितनिनदत्तारकारातिकेकी
कैलासश्शर्वनिर्वृत्यभिजनकपदं सर्वदा पर्वतेन्द्रः ॥
यस्य प्राहुस्स्वरूपं सकलदिविषदां सारसर्वस्वयोगं
यस्येषुश्शार्ङ्गधन्वा समजनि जगतां रक्षणे जागरूकः ।
मौर्वी दर्वीकराणामपि च परिवृढः पूस्त्रयीसारलक्ष्यं
सोऽव्यादव्याजमस्मानशुभभिदनिशं नाकिनां श्रीपिनाकः ॥

**End:**

ध्यायन्नित्यं प्रभाते प्रतिदिवसमिदं स्तोत्ररत्नं पठेद्यः
किं वा ब्रूमस्तदीयं सुचरितमथवा कीर्तयामः समासात् ।
संपज्जातं समग्रं सदसि बहुमतिं सर्वलोकप्रियत्वं
संप्राप्यायुश्शतान्ते परमपति परब्रह्मणो मन्मथारेः ॥

**Colophon:**

श्रीशिवस्तोत्रं संपूर्णम् ॥

---

(*b*) भावप्रकाशः.

BHĀVAPRAKĀŚAḤ.

Foll. 5*a*—11*b*.

Same work as that described under No. 13010 of the D.C.S. MSS., Vol. XXII. By Śāradātanaya.

Contains the Dṛṣṭilakṣaṇa incomplete.

---

R. No. **5270.**

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 895. Lines, 20 in a page. Grantha, Good.

Transcribed in 1926–27 from a MS. brought by M.R.Ry. Aiyana Nainār, Mylapore, Madras.

Bound in five volumes.

## पद्मचरितम्.

## PADMACARITAM.

A huge work in Jaina religion relating to Padma (Rāma). The story of the Rāmāyana is described herein according to the Jaina religion in addition to a number of other stories. By Ravisēnācarya.

Contains 123 Parvans dealing with the following subjects:—

१. सूत्रविधानम्.
२. श्रेणिकचिन्ताभिधानम्.
३. विद्याधरलोकाभिधानम्.
४. ऋषभमाहात्म्याभिधानम्.
५. राक्षसवंशाधिकारः.
६. वानरवंशाभिधानम्.
७. दशग्रीवाभिधानम्.
८. Do.
९. वालिनिर्वाणाभिधानम्.
१०. दशग्रीवप्रस्थाने सहस्ररश्म्यनरण्यश्रमण्याभिधानम्.
११. मरुत्तयज्ञध्वंसनवादानुरागाभिधानम्.
१२. इन्द्रपराभवाभिधानम्.
१३. इन्द्रनिर्वाणाभिधानम्
१४. अनन्तफलधर्माभिधानम्.
१५. अञ्जनासुन्दरीविवाहकथनम्.
१६. पवनाञ्जनासंभोगाभिधानम्.
१७. हनुमत्संभवाभिधानम्.
१८. पवनाञ्जनासमागमाभिधानम्.
१९. रावणसाम्राज्याभिधानम्.
२०. तीर्थकरादिभवानुकीर्तनम्.
२१. सुव्रतवज्रबाहुकीर्तिधरमाहात्म्यवर्णनम्.
२२. कोसलमाहात्म्ययुक्तदशरथोत्पत्त्यभिधानम्.
२३. विभीषणव्यसनम्.
२४. केकयावरप्रदानम्.
२५. चतुर्भ्रातृसंभवाभिधानम्.
२६. सीताप्रभामण्डलोत्पत्त्याभिधानम्.
२७. म्लेच्छपराजयसङ्कीर्तनम्.
२८. रामलक्ष्मणक्षीरजलाभाभिधानम्.
२९. दशरथवैराग्यसर्वभूतहिताभिधानम्.
३०. भामण्डलसमागमाभिधानम्.
३१. दशरथप्रव्रज्याभिधानम्.
३२. दशरथरामभरतानां प्रव्रज्याप्रस्थानराज्याभिधानम्.
३३. वज्रकर्णोपाख्यानम्.
३४. वालखिल्योपाख्यानम्.
३५. कपिलोपाख्यानम्.
३६. वनमालालाभाभिधानम्
३७. अतिवीर्यनिष्क्रमणाभिधानम्.
३८. जितपद्मोपाख्यानम्.
३९. देशभूषणकुलभूषणोपाख्यानम्.
४०. रामगिर्युपाख्यानम्.
४१. जटायोरुपाख्यानम्.
४२. दण्डकारण्यनिवासाभिधानम्.

४३. शम्बूकवधाख्यानम्.
४४. सीताहरणरामविलापाभिधानम्.
४५. सीतावियोगाभिधानम्.
४६. मायाप्रकाराभिधानम्.
४७. विटसुग्रीववधाख्यानम्.
४८. कोटिशिलोत्क्षेपणाभिधानम्.
४९. हनुमत्प्रस्थानम्.
५०. महेन्द्रदुहितृसङ्गमाभिधानम्.
५१. पद्मगन्धर्वकन्यालम्भाभिधानम्.
५२. हनूमत्कन्यालम्भाभिधानम्.
५३. हनूमत्प्रत्यभिगमनम्.
५४. लङ्काप्रस्थानाभिधानम्.
५५. विभीषणसमागमाभिधानम्.
५६. उभयबलप्रमाणाभिधानम्.
५७. रावणनिर्गमनम्.
५८. हस्तप्रहस्ताभिधानम्.
५९. हस्तप्रहस्तनलनीलपूर्वभवानुकीर्तनम्.
६०. विद्यासन्निधानाभिधानम्.
६१. सुग्रीवप्रभामण्डलसमाश्वासनम्.
६२. पद्मशक्तिसन्तापाभिधानम्.
६३. रामशक्तिभेदरामविलापाभिधानम्.
६४. विशल्यापूर्वभवाभिधानम्.
६५. विशल्यासमागमनम्.
६६. रावणदूतागमाभिधानम्.
६७. शान्तिग्रहकीर्तनम्.
६८. फाल्गुनाष्टाह्निकमहिमाभिधानम्.
६९. लोकनियमाभिधानम्.
७०. सम्यग्दृष्टिदेवप्रातिहार्यकीर्तनम्.
७१. बहुरूपविद्यासन्निधानाभिधानम्.
७२. युद्धनिश्चयकीर्तनाभिधानम्.
७३. उद्योगाभिधानम्.
७४. रावणलक्ष्मणयुद्धवर्णनाभिधानम्.
७५. चक्ररत्नोत्पत्तिवर्णनम्.
७६. दशग्रीवाभिधानम्.
७७. प्रीतिङ्करोपाख्यानम्.
७८. इन्द्रजिदादिनिष्क्रमणाभिधानम्.
७९. पद्माय सीतासमागमाभिधानम्.
८०. मयोपाख्यानम्.
८१. साकेतनगरीवर्णनम्.
८२. रामलक्ष्मणमातृसमागमाभिधानम्.
८३. त्रिभुवनालङ्कारसंक्षेपाभिधानम्.
८४. त्रिभुवनालङ्कारसमागमाभिधानम्.
८५. भरतत्रिभुवनालङ्कारभवानुकीर्तनम्.
८६. भरतकेकयानिष्क्रमणम्.
८७. भरतनिर्वाणगमनम्.
८८. राज्याभिषेकाभिधानविभागदर्शनम्.
८९. मधुसुन्दरवधाभिधानम्.
९०. मधुरोपसर्गाभिधानम्.
९१. भवानुकीर्तनम्.
९२. मधुरापुरीनिवेशाभिधानम्.
९३. मनोरमालम्भाभिधानम्.
९४. रामलक्ष्मणविभूतिदर्शनीयाभिधानम्.
९५. जिनेन्द्रपूजादोहलाभिधानम्.

९६. जिनचिन्ताभिधानम्.
९७. सीतानिर्वासाभिधानम्.
९८. सीतासमाश्वासनम्.
९९. रामशोकाभिधानम्
१००. लवणाङ्कुशोपाख्यानम्.
१०१. लवणाङ्कुशदिग्विजयकीर्तनम्.
१०२. लवणाङ्कुशसमेतयुद्धाभिधानम्.
१०३. रामलवणाङ्कुशसमागमाभिधानम्.
१०४. सकलभूषणदेवागमाभिधानम्.
१०५. रामधर्मश्रवणाभिधानम्.
१०६ सपरिवर्गरामदेवपूर्वभवाभिधानम्.
१०७. प्रव्रजितसीताभिधानम्.
१०८. लवणाङ्कुशपूर्वभवाभिधानम्.
१०९. मधूपाख्यानम्.
११०. कुमाराष्टनिष्क्रमणाभिधानम्.
१११ प्रभामण्डलपरलोकगमनाभिधानम्.
११२ हनूमन्निर्वेदनम्.
११३. हनूमन्निर्वाणाभिधानम्.
११४. शक्रसुरसङ्कथाभिधानम्.
११५. लवणाङ्कुशतपोभिधानम्
११६. रामदेवविप्रलापाभिधानम्.
११७. लक्ष्मणवियोगे विभीषणवर्णनम्.
११८. कल्याणमित्रदेवाभिगमनम्.
११९. बलदेवनिष्क्रमणाभिधानम्.
१२०. गोचरसंक्षोभाभिधानम्
१२१. दानप्रसङ्गाभिधानम्.
१२२. पद्मस्य केवलोत्पत्त्यभिधानम्.
१२३. बलदेवनिर्वाणगमनाभिधानम्.

**Beginning:**

सिद्धं संपूर्णभव्यार्थं सिद्धेः कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञानचारित्रप्रतिपादिनम् ॥
सुरेन्द्रमकुटाश्लिष्टपादपद्मांशुकेसरम् ।
प्रणमामि महावीरं लोकत्रितयमङ्गलम् ॥
प्रथमं चावसर्पिण्यामृषभं जिनपुङ्गवम् ।
योगिनं सर्वविद्यानां विधातारं स्वयम्भुवम् ॥
अजितं विजिताशेषबाह्यशारीरशात्रवम् ।
शम्भवं शंभवत्यस्मादित्यभिख्यामुपागतम् ॥
अभिनन्दितनिःशेषभुवनं चाभिनन्दनम् ।
सुमतिं सुमतिं नाथं मतान्तरनिरासिनम् ॥

उद्यदर्ककरालीढपद्माकरसमप्रभम् ।
पद्मप्रभं सुपार्श्वं च सुपार्श्वं सर्ववेदिनम् ॥
शरत्सकलचन्द्राभं परं चन्द्रप्रभं प्रभुम् ।
पुष्पदन्तं च संफुल्लकुन्दपुष्पप्रभत्विषम् ॥
शीतलं शीतलध्यानदायिनं परमेष्ठिनम् ।
श्रेयांसं भव्यसत्त्वानां श्रेयांसं धर्मदेशिनम् ॥
वासुपूज्यं सतामीशं वसुपूज्यं जितद्विषम् ।
विमलं जन्ममूलानां मलानामतिदूरगम् ॥
अनन्तं दधतं ज्ञानमनन्तं कान्तदर्शनम् ।
धर्मं धर्मधुराधारं शान्तिं शान्तिजिताहितम् ॥
कुन्थुप्रभृतिसत्त्वानां कुन्थुं हितनिरूपितम् ।
अशोकक्लेशनिर्मोक्षपूर्वसौख्यार्पणादरम् ॥
संसारस्य निहन्तारं मल्लं मल्लिं मलोज्झितम् ।
नेमिं च प्रणताशेषसुरासुरगुरुं विभुम् ॥
अरिष्टनेमिं नमनारिष्टनेमिं महाद्युतिम् ।
पार्श्वं नागेन्द्रसंसक्तपरिपार्श्वं विशां पतिम् ॥
सुव्रतं सुव्रतानां च देशिकं दोषदारिणम् ।
यस्य तीर्थे समुत्पन्नं पद्मस्य चरितं शुभम् ॥
अन्यानपि महाभागान् मुनीन् गणधरादिकान् ।
प्रणम्य मनसा वाचा कायेन च पुनः पुनः ॥
पद्मस्य चरितं वक्ष्ये पद्मालिङ्गितवक्षसः ।
प्रफुल्लपद्मवक्त्रस्य परिपूर्णस्य धीमतः ॥
अनन्तगुणगेहस्य तस्योदारविचेष्टिनः ।
गदितुं चरितं शक्तः केवलं श्रुतकेवली ॥
मादृशोऽपि यदत्वेव चरितं तस्य यत्पुमान् ।
न तच्चित्रं क्रमायातपरसन्देशदेशनात् ॥
मत्तवारणसंक्षुण्णे व्रजन्ति हरिणां पती ।
प्रविशन्ति भटा युद्धं महाभटपुरस्सराः ॥

* * * *

वर्धमानजिनेन्द्रोक्तस्सोऽयमर्थो गणेश्वरम् ।
इन्द्रभूतिं परिप्राप्तः सुधर्मं धारिणीभवम् ॥
प्रभवं क्रमतः कीर्तिं ततोऽनुत्तरवाग्मिनम् ।
लिखितं तस्य संप्राप्य रवेर्यत्नोऽयमुद्गतः ॥
स्थितिर्वंशसमुत्पत्तिः प्रस्थानं संयुगं ततः ।
लवणाङ्कुशसंभूतिर्भवोक्तिः परिनिर्वृतिः ॥
अवान्तरभवैर्भूरिप्रकारैश्चारुवर्णिभिः ।
युक्तास्सप्त पुराणेऽस्मिन्नधिकारा इमे स्मृताः ॥
पद्मचेष्टितसम्बन्धकारणन्तावदत्र च ।
श्रैशीलादिगतं वक्ष्ये सूत्रसंक्षेपि तद्यथा ॥

* * * *

**Colophon:**

इत्यार्षे रविषेणाचार्यप्रोक्ते पद्मचरिते सूत्रविधानं नाम प्रथमं पर्व ।

अथ जम्बूमति द्वीपे क्षेत्रे भारतनामनि ।
मगधाभिख्यया ख्यातो विषयोऽस्ति समुज्वलः ॥

* * * *

आसीत्तत्र पुरे राजा श्रेणिको नाम विश्रुतः ।
देवेन्द्र इव बिभ्राणः सर्ववर्णधरं धनुः ॥
कल्याणप्रकृतित्वेन यश्च पर्वतराजवत् ।
समुद्र इव मर्यादालङ्घनत्रस्तचेतसा ।
कलानां ग्रहणे चन्द्रो लोकधृत्या धरामयः ॥

* * * *

एकदा तु पुरस्यास्य समीपं जिनसत्तमः ।
श्रीमान् प्राप्तो महावीरः सुरासुरनतक्रमः ॥
मातुरप्युदरे यस्य दिक्कुमारीविशोधिते ।
ज्ञानत्रयसमेतस्य सुखमासीत्सुरेन्द्रजम् ॥
जन्मनोऽर्वाक् परस्माच्च यस्य शक्रनिदेशतः ।
अपूरयत्पितुस्सद्म धनदो रत्नवृष्टिभिः ॥

जननाभिषवे यस्य नगराजस्य मूर्धनि ।
चक्रे महोत्सवो देवैराखण्डलसमन्वितैः ॥

**End:**

इति जीवविशुद्धिदानदक्षं परितश्शास्त्रमिदं नितान्तरम्यम् ।
सकले भुवने रविप्रकाशं स्थितमुद्योतितसर्ववस्तुसिद्धम् ॥
द्विशताभ्यधिके समासहस्रे समतीतेऽथ चतुर्थवर्षा(र्षे)युक्ते ।
जिनभास्करवर्धमानसिद्धेश्चरितं पद्ममुनेरिदं निबद्धम् ॥
कुर्वन्त्वेवात्र सान्निध्यं सर्वास्समयदेवताः ।
कुर्वाणास्सकलं लोकं जिनभक्तिपरायणम् ॥

* * * *

इदमष्टादशं प्रोक्तं सहस्राणि प्रमाणतः ।
शास्त्रमानुष्टुभश्लोकैस्त्रयोविंशतिसङ्गतम् ॥

**Colophon:**

इत्यार्षे रविषेणाचार्यप्रोक्ते पद्मचरिते बलदेवनिर्वाणगमनाभिधानं नाम त्रयोविंशत्यधिकशतं पर्व ।

The scribe adds—

वरकर्णाटकदिशायां निवसन् पुरितरङ्गणांनामश्रुतिमहाप्रतिष्ठातिलकविरचिते वा नेमिचन्द्रसूरयः ।

तद्दीर्घवंशजातः पुत्रः प्राज्ञस्य देवचन्द्रस्य ।
यन्नेमिचन्द्रसूनु(रि)र्वरभारद्वाजगोत्रजनितोऽहम् ॥

---

R. No. 5271.

Paper. 10½ × 9½ inches. Foll. 366. Lines, 20 in a page. Dêvanâgari. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Ayya Śāstiyār, Chennamangalam, Parur, Travancore State.

नाट्यशास्त्रम्.

NĀṬYAŚĀSTRAM.

Foll. 1*a*—335*a*. Foll. 335*b* to 366 are left blank. Bound in two volumes.

Same work as that described under No. 12999 of the D.C.S. MSS., Vol. XXII; with notable differences in the readings.

Complete.

**Beginning:**

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ॥
समाप्तजप्यं व्रतिनं स्वसुतैः परिवारितम् ।
अनध्याये कदाचित्तु भरतं नाट्यकोविदम् ॥
मुनयः पर्युपास्यैनमात्रेयप्रमुखाः पुरा ।
पप्रच्छुस्ते महात्मानो नियतेन्द्रियबुद्धयः ॥
योऽयं भगवता सम्यग् ग्रथितो वेदसंमितः ।
नाट्यवेदः कथं ब्रह्मन्नुत्पन्नः कस्य वा कृते ।
कत्यंशः किंप्रमाणश्च प्रयोगश्चास्य कीदृशः ।
सर्वमेतद्यथातत्त्वं भगवन् वक्तुमर्हसि ॥
तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनिः ।
प्रत्युवाच ततो वाक्यं नाट्यवेदकथां प्रति ॥
भवद्भिः शुचिभिर्भूत्वा तथावहितमानसैः ।
श्रूयतां नाट्यवेदस्य संभवो ब्रह्मनिर्मितः ॥
पूर्वं कृतयुगे विप्रा वृत्ते स्वायम्भुवेऽन्तरे ।
त्रेतायुगे च संप्राप्ते मनोर्वैवस्वतस्य तु ॥
ग्राम्यधर्मप्रवृत्ते तु कामलोभवशं गते ।
ईर्ष्याक्रोधाभिसंमूढे लोके सुखितदुःखिते ॥
देवदानवगन्धर्वयक्षरक्षोमहोरगैः ।
जम्बूद्वीपे समाक्रान्ते लोकपालप्रतिष्ठिते ॥
महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः ।
क्रीडनीयकमिच्छामो दृश्यं श्राव्यं च यद्भवेत् ॥
न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु ।
तस्मात् सृजापरं वेदं पञ्चमं सार्ववर्णिकम् ॥
एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च ।
तस्मार चतुरो वेदान् योगमास्थाय तत्त्ववित् ॥

धर्म्यमर्थ्यं यशस्यं च सोपदेशं ससंग्रहम् ।
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम् ॥
सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रदर्शकम् ।
नाट्यसंज्ञमिमं वेदं सेतिहासं करोम्यहम् ॥
एवं सङ्कल्प्य भगवान् सर्ववेदाननुस्मरन् ।
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसंभवम् ॥
जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥
वेदोपवेदसम्बन्धो नाट्यवेदो महात्मना ।
एवं भगवता सृष्टो ब्रह्मणा ललितात्मकम् ॥
उत्पाद्य नाट्यवेदं तु ब्रह्मोवाच सुरेश्वरम् ।
इतिहासो मया सृष्टस्स सुरेषु नियुज्यताम् ॥
कुशला ये विदग्धाश्च प्रगल्भाश्च जितश्रमाः ।
तेष्वयं नाट्यसंज्ञो हि वेदस्सङ्क्राम्यतां त्वया ॥

* * * *

**Colophon:**

इति भारतीये नाट्यशास्त्रे शास्त्रोत्पत्तिर्नाम प्रथमोऽध्यायः ।

**End:**

प्रेक्षणीयप्रदानं तु सर्वदानेषु पूज्यते ।
न तथा गन्धमाल्येन देवास्तुष्यन्ति पूजिताः ॥
यथा नाट्यप्रयोगज्ञास्तुष्यन्ति स्तुतिमङ्गलैः ।
गान्धर्वं चैव नाट्यं च यस्सम्यगनुपश्यति ॥
लभते सद्गतिं पुण्यां समं ब्रह्मर्षिभिर्नरः ।
एवं नाट्यप्रयोगे बहु बहु विदितं कर्म शास्त्रप्रणीतं
न प्रोक्तं यच्च लोकादनुकृतिकरणं तच्च कार्यं विधिज्ञैः ।
किं चान्यत्सत्यपूर्वं भवतु वसुमती शाश्वती नष्टरोगा
शान्तिर्गोब्राह्मणानां नरपतिरवनिं पातु चेमां समग्राम् ॥

**Colophon:**

इति भारतीये नाट्यशास्त्रे नाट्यावतारो नाम षट्त्रिंशोऽध्यायः ।

R. No. 5272.

Paper. 10¾ × 9¾ inches. Foll. 155. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Śri-Kumaran Nambōdirippad, Kaṭṭumada-mana, Andathod, Malabar district.

हरिवंशव्याख्या — पददीपिका.

HARIVAMŚAVYĀKHYĀ : PADADĪPIKĀ.

A commentary on the Harivamśa described under No. 1968 of the D.C.S. MSS., Vol. IV, Part I.

Breaks off in the 50th Adhyaya.

**Beginning :**

अवान्तरतमा नाम विष्णुमूर्तिर्हिमवद्गिरिगुहायां तस्मिन्नाश्रमे तपस्तप्त्वा निवसन् मानुषं मनुष्यलोके धर्मप्रस्थापनार्थं द्वापरावसाने . . . . . . . . . . द्वैपायननामा भगवान् पराशराद्यमुनाद्वीपे सत्यवत्यामवततार । तस्यावतारोऽपि लोकानुग्रहार्थमेव । तथा खलु भगवतो हि प्रवृत्तिः । स स्वयमेव रजोभिमानी ब्रह्मरूपेण सृजते, तमोभिमानी रुद्ररूपी भूत्वा संहरते च, सत्त्वाभिमानी पुरुषरूपेण स्थितिं च करोति । तथा चोक्तम्—

ब्रह्मत्वे सृजते लोकान् रुद्रत्वे संहरत्यजः ।
पुरुषत्वे उदासीनस्तिस्रोऽवस्थाः प्रजापतेः ॥ इति ॥

उदासीनशब्देन स्थितिरुच्यते । सा द्विविधा, दुष्टनिग्रहद्वारा धर्मप्रस्थापनद्वारा च । तत्र दुष्टानामसुरराक्षसादीनां निग्रहार्थमेव कल्पिता विष्णुमूर्तयो भिद्यन्ते नरनारायणनरसिंहादयः । ते तथा धर्मप्रस्थापनार्थाय च सन्ति, ते खलु कपिलवासुदेवहयग्रीवावान्तरतमादयः । तेषामप्यवान्तरतमा नाम व्यासरूपी जातः । अन्तानमान्तरं तमस्तदवगतं यस्य तस्य खलु तन्नाम, स भविष्यद्वृत्तान्तमधिकृत्य निरूपितवान् ।

* * *

उक्तं च—

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥ इति ।

एवं वेदान् विभज्य धर्मस्थित्यर्थं पुनरारोपितवान् वेदाधिकारिणामेवेदानीं धर्मस्थितिर्भवेत् । इतरेषां स्त्रीशूद्रादीनां वेदबाह्यत्वात्स्वधर्मोपायो न स्यात् । तेषामपि धर्मस्थितिः कथं भवेदिति निरूप्य चतुर्णां वेदानां

पिण्डितार्थग्रहणरूपेण महाभारतसंज्ञकं प्रबन्धं कृतवान् । तदष्टवर्गप्रतिपादकमष्टादशपर्वयुक्तं द्विसहस्राध्यायलक्षग्रन्थपरिमाणपरिमितं च । तत्र युधिष्ठिरसुयोधनावाश्रित्याष्टवर्गः प्रतिपादनीयः । तत्रापि धर्मार्थकाममोक्षसंज्ञकश्चतुर्वर्गः युधिष्ठिरमाश्रित्य ग्राह्यरूपेण प्रतिपादितः । तथैवाधर्मानर्थद्वेषबन्धसंज्ञकश्चतुर्वर्गस्सुयोधनमाश्रित्य हेयरूपेण धर्मेणापि सुयोधनेन कृतः स हेय एव । स्पर्धया च मत्सरेण च पौण्डरीकादियज्ञः कृतः । तथा खलु तस्य धर्महेयत्वम् ।

* * * *

एवं ग्राह्याग्राह्यरूपेण युधिष्ठिरपक्षं सुयोधनपक्षं चाश्रित्य पूर्वकाण्डोक्तार्थं सर्वं महाभारते प्रतिपाद्य पुनरुत्तरकाण्डे आरण्यभागार्थं कथारूपेण कर्तुमिच्छन् निरूपितवान् । कथमारण्यार्थं कथारूपेण करिष्य इति चिन्तयन् विष्णोरवताररूपेण कर्तुं निश्चितवान् । आरण्यार्थप्रतिपादनमीश्वरोऽहमिति भावना । तद्भगवतो बहुविधेष्ववतारेष्वपि श्रीकृष्णावतारे स्वरूपज्ञानं विद्यते तस्मात्तस्य चरितमाश्रित्यैवारण्यवाक्यार्थं प्रकाशयितुं शक्यमिति निश्चित्य श्रीहरिकथां च कृतवान् ।

* * * *

ततस्तत्र सद्वृत्तैः शौनकादिभिर्महाभारतश्रवणे जातकौतूहलैः संपूज्य पृष्टः सूतः स्वर्गारोहणपर्यन्तं महाभारतकथां विस्तरत एवोक्त्वा तदवसाने वासुदेवाय नम इत्युक्त्वा विरराम । पुनः शौनकोऽपि महाभारतश्रवणानन्तरमारण्यभागं हरिवंशं च प्रष्टुमारब्धवान् ।

कृते ध्यायन् यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥

इति वचनात् मुख्यपुरुषार्थसाधनं भगवत्सङ्कीर्तनमेवेति मत्वा श्रुतानुवादद्वारेण पृच्छति—शौनकेत्यादिना । भवता महदाख्यानं परिकीर्तितम्, अत्र भवच्छब्दः पूज्यवाचकः, तस्माद्भवतेति पूज्यवाचकेन भवच्छब्देनोक्त्यादावेव भगवच्चरितं सम्यक् वक्तुं तस्यावर्जनं करोतीत्यभिप्रायः । सुमहाभारतमित्यनेन कथाया अतिविस्तृतत्वं च सूचितम् । परिकीर्तितं सम्यगुक्तमित्यर्थः । सौते इति सम्बुद्ध्या त्वमपि पितृवत् व्याख्यासीरिति सूचयति ।

* * * *

**Colophon:**

इति हरिवंशे पददीपिकायां प्रथमोऽध्यायः समाप्तः ।

**Colophon:**

इत्येकोनपञ्चाशोऽध्यायः ॥

**End:**

नारदस्य वाक्यं श्रुत्वा दुःखार्त एवावसदित्युक्तम् । पुनः स्वस्य रक्षार्थं कंसः प्रवृत्तोऽभवदित्यर्थः । स इत्यादिना ।

* * * *

लोकं लोकवासिजनं प्रतीत्यर्थः । बहु चरतः बहु पापं कुर्वतः । निरवद्यं सुखम् । असाधारणं फलानुभवम् । अनवगतमप्राप्यमित्यर्थः । प्रदिशति इति विद्वज्जनो वदतीत्यभिप्रायः ।

---

R. No. 5273.

Paper. 10½ × 9½ inches. Foll. 122. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926-27 from a MS. of Naḍuvil-maṭham, Trichur, Cochin State.

(a) मन्त्रकल्पः

MANTRAKALPAḤ.

Foll. 1a—75b.

Deals with the details of procedure relating to the repetition of the following Mantras as laid down in various Tantric works.

१. त्रैष्टुभमन्त्रकल्पः. Foll. 1a—17b.

२. आग्नेयास्त्रमन्त्रः. Foll. 18a—23b.

३. अश्वारूढादिमन्त्रः, taken from Sautrāmaṇitantra. Foll. 24a—50b.

४. मातङ्गेश्वरीमन्त्रः, taken from Surēndrasaṁhitā. Foll. 51—61b.

५. गणेशमन्त्राः. Foll. 62a—75b.

**Beginning:**

वर्णावृतं साध्ययुतं सकारं णान्ते लिखेदष्टदलेषु हंसम् ।
आवेष्टयेदम्बुगृहेण बाह्ये लान्तावृतं यन्त्रमिदं ज्वरघ्नम् ॥
कृत्वा रेखाष्टक . . पुनस्तिर्यगालिख्य चक्रं
बाह्यावृत्यं लिखतु विधिवद्बिन्दुयुक्तं क्षकारम् ।

अन्तःपङ्क्तौ लिखतु षरणौ शिष्टकोष्ठे त्रयान्तं
कृत्वा नाम प्रथितमुदितं यन्त्रमेतज्ज्वरघ्नम् ॥

* * * *

ओं ज्वरमन्त्रस्य ब्रह्मा ऋषिः अनुष्टुप् छन्दः ज्वरो देवता ।

त्रिपात् . . . . . . . त्रिशिरा रक्तलोचनः ।
समे . . (सु)खं दद्यात्सर्गोमयपतिर्ज्वरः ॥

ओं भस्मायुधाय विद्महे ज्वालारुद्राय धीमहि । तन्नो ज्वरः प्रचोदयात् ।

* * * *

काश्यप उवाच—

शृणुध्वं मुनयः सर्वे सिद्धाश्रमनिवासिनः ।
यज्ज्ञानमिच्छतो यूयं मामद्य समुपस्थिताः ॥
पुरा पुरत्रयं हन्तुमुद्युक्तेन पुरद्विषा ।
प्रसादितं यदाग्नेयमस्त्रविज्ञानमुत्तमम् ॥
सप्रयोगोपसंहारं सोद्धारं सहपूजनम् ।
सध्यानं सक्रियभेदमशेषार्थप्रदायकम् ॥
अस्त्रस्योद्धरणं पूर्वं प्रतिपङ्क्तिमनन्तरम् ।
ततः प्रयोगसंहारौ स्तम्भद्वेषा . . च्चाटनम् ॥
साधनं भ्रामणं चैव मारणं रोगसाधनम् ।
शान्तिरक्षादिकं सर्वं क्रमेण कथयामि वः ॥

* * * *

**Colophon:**

इति प्रथमः पटलः ।

* * * *

**Colophon:**

इति त्रैष्टुभे तृतीयः पटलः ।

**End:**

जितंत इति पूर्ववत् संतर्पयेत् । अयमेव मध्यंदिनसायं सन्ध्ययोर्विशेषः । अन्यत् सर्वं प्रातः सन्ध्यावत् ।

---

(b) क्रोडमुखीस्तोत्रम्.

KRŌḌAMUKHĪSTŌTRAM.

Foll. 75b—76b.

Same work as that described under No. 10745 of the D.C.S. MSS., Vol. XIX with the following additional stanzas in the end. By Avadhūta.

Complete.

**End :**

अवधूतदासनिर्मितमति . . . चाररक्षणोपायम् ।
इति निग्रहाष्टकमिदं श्रीवाराह्या जपं च होमसमः ॥
विटविदूषकनर्तकगायकभ्रमरशृङ्ग . . . विनोदकैः ।
प्रकटिते तु हरस्य शिवार्चनं जपतु घोरमिमं त्रिपुरास्तवम् ॥
अयमञ्जलिरम्ब कोटिकृत्वः क्रियते देवि भवार्णवावतारे ।
भवती च . . . सहोदरश्च रमतां नः पुरतः परिस्फुरताम् ॥

---

(c) चतुःशती·

CATUŚŚATI.

Foll. 76a—97b.

Same work as that described under No. 5616 of the D.C.S. MSS., Vol. XII.

Contains 1 to 5 Paṭalas complete.

---

(d) योगिनीषट्ककूटक्रमः·

YŌGINĪṢAṬKAKŪṬAKRAMAḤ.

Foll. 97b—122b.

On the details connected with the due repetition of the Yōginī Mantra.

Complete.

**Beginning :**

अथ श्रीयोगिनीषट्ककूटक्रमो लिख्यते—

अथैकान्ते उत्तराभिमुखः प्राङ्मुखो वा सुखासने समुपविश्य, सपर्यासाधनमखिलं दक्षिणे स्थापयित्वा, शुद्धोदकपूर्णकुम्भं वामतः संस्थाप्य, हस्तादिक्षालनार्थमन्यत्पात्रं पृष्ठतो निधाय, परितो दीपानारोप्य, न्यासादिकं कुर्यात् । ऐं शिवादिश्रीगुरुभ्यो नम इति ।

मूर्ध्नि पद्मे सहस्रारे सितकेसरसङ्कुले ।
तत्रैव कर्णिकामध्ये हंसवाहनसंयुतम् ॥

दक्षिणामूर्तिरूपेण स्थितं निजगुरुं शिवम् ।
सर्वज्ञानालयं सर्वदेवतापुण्यपञ्जरम् ॥
आगमोक्तेन मार्गेण स्मरेत् ज्योतिस्स्वरूपिणम् ।
एवं स्मृत्वा नमस्कृत्य स्तुत्वानुज्ञां प्रलभ्य च ॥
वामतः शारभीं शैवीमूर्तिं क्षेमकरीं स्मरेत् ।
ओं ह्रीं ह्रौं नमश्शिवाय महाशारभाय नमः ॥

**End:**

गगनासनसंरूढं भुवनान्तरशालिनि ।
चारुकन्दे हि मे देवि प्रसादं कुरु भैरवि ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं महेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु ते ॥

इति प्रार्थना ।

इति प्रौढाक्रमं संपूर्णम् ॥

ऐं क्लीं सौं क्लीं ऐं क्लीं सौः ऐः एषा बालामनुः । तद्वत्प्रौढा ऐं ह्रीं . . . गणपति वरवरद सर्वजनं मे वशमानय ओं ह्रीं ह्रौं नमश्शिवाय नमश्शिवाय ।

इति मन्त्रः ।

**Colophon:**

मन्त्रकल्पं समाप्तम् ।

---

### R. No. 5274.

Paper. 10¾ × 9¼ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Aṣṭamūrti Nambūdiri, Tacharayattu-mana, Paravanna, Malabar district.

**कृष्णगीतिव्याख्या—विपञ्चिका.**

KṚṢṆAGĪTIVYĀKHYĀ: VIPAÑCIKĀ.

A commentary entitled Vipañcikā by Citrabhānu on a work entitled "Kṛṣṇagīti" by Mānavēda. Kṛṣṇagīti is said to be a charming work set to music describing the story of Śrī-Kṛṣṇa. The commentary was written at the instance of king Rājarāja.

Breaks off in the second Sarga.

**Beginning :**

विघ्नेशं भारतीं व्यासं गुरुं तं दक्षिणेश्वरम् ।
नमामि प्रदिशन्त्वेते ममाभीष्टं दयालवः ॥
संभाव्यमानवेदान्तस्फुरत्सन्मुखनिर्गता ।
लसेन्ममोत्तमश्लोका कृतिः श्लाघ्यपदा बुधैः ॥
मानवेदकृतेर्व्याख्या कृष्णगीतेर्विपश्चिका ।
राजराजनियोगेन रच्यते चित्रभानुना ॥

इह खलु कविर्गद्यपद्यादिभ्योऽपि पदानां सङ्गीतप्रयोगानुगुण्येन सद्यस्सर्वजनमनस्समावर्जननैपुण्यादेव तत्प्रधानं श्रीकृष्णचरितवर्णनरूपं कृष्णगीतिनामधेयं किमपि काव्यं चिकीर्षुस्तस्याविघ्नपरिसमाप्त्यादिप्रयोजनसिद्धये स्वाभिमतां देवताशिरोमणिभूतां कामपि देवतामभाष्टि—त्रिजगतीत्यादिना । सा देवता मे चकास्त्वित्यन्वयः । सा सर्वोत्कृष्टत्वादिप्रसिद्धा देवता शुद्धसत्त्वगुणोपहितत्वे सत्युपाधिनैर्मल्यादेव बाह्याभ्यन्तरभेदराहित्येन स्फाटिककलशोदरनिहितपयाच्छादितपरब्रह्मस्वरूपो भगवान् कृष्ण एवात्र देवतात्वेनाभिप्रेतः । मे चकास्तु मम नयनविषयमापादयत्वित्यर्थः । सम्बन्धमात्रे षष्ठी । अथवा मे मह्यं चकास्तु स्वरूपमाविष्करोतु । कर्मणा यमभिप्रैतीत्यत्र कर्मशब्देन क्रियाया अपि ग्रहणात् । संप्रदानस्याभिप्रेतमर्थमेव स्पष्टयति—पशुयुवतिमोग्येति ।

* * * *

**Colophon :**

इति कृष्णगीतिव्याख्यायां विपश्चिकायां प्रथमः सर्गः ।

नुत्वेत्यादि । विबुधगणे स्वामिनि नुत्वा नत्वा गते प्रावृडत्यासन्नप्रसूतिं सहायामत्यन्तदीनामेनां परिचरन्तीव प्रकटरसं सपदि प्रादुर्बभूव । हन्त विबुधगणे देवगणे ।

* * * *

**End :**

रूपमेव स्तौति—महिताशिरोधृतमणिमकुटम् । महितेन शिरसा धृतमलङ्कृतं मणिमकुटं रत्नमयं किरीटं यस्मिंस्तत् । अथ मकुटं किरीटं पुन्नपुंसकं परतिलकाविभासितफालम् ।

## R. No. 5275.

Paper. 10½ × 9¼ inches. Foll. 24. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Pūmalli-mana, Chalasseri, Malabar district.

### केरलाचारदीपिका.

### KĒRALĀCĀRADĪPIKĀ.

Foll. 1a—23a. Foll. 23b and 24 are left blank.

Same work as that described under R. No. 5250 ante and with slight difference. By Bilvamaṅgalayōgīśvara.

Contains the Adhyāyas 60 to 64 complete and 65 incomplete.

---

## R. No. 5276.

Paper. 10½ × 9¼ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Nīlakaṇṭhan Nambudirippād, Kaññūr-mana, Ottapalam, Malabar district.

### कृषिशास्त्रम्.

### KṚṢIŚĀSTRAM.

A work on agriculture dealing with such matters as fixing the auspicious time for entering into the fields, for ploughing them, for the construction of cottages to live in, etc.

Incomplete.

Contains the following subjects:—

१. मूढहयोगः.
२. मित्रयोगः.
३. कलहकृद्योगः.
४. धनधान्यसंग्रहणयोगाः.
५. धुर्वादिविनियोगः.
६. रोगारम्भकयोगाः.
७. रोगचिकित्सायोगाः.
८. वृक्षपाषादिकूपतटाकपापसेतुबन्धसस्यरक्षादिविधिः.
९. गृहारम्भे स्तम्भकवाटाद्यश्वादीनां गवां च मण्डलस्तम्भादिविधिः.

**Beginning:**

अथातस्संप्रवक्ष्यामि सङ्कीर्णविषये नृणाम् ।
क्रियाणामपि सत्कालमुहूर्तं च विशेषतः ॥

प्रथमं संप्रवक्ष्यामि समयं कृषिकर्मणः ।
शुभ . . . नृणां चैव देवानां च विशेषतः ॥
कृषिमूलं हि सर्वत्र प्राणिनां सम्पदस्सदा ।
कृष्यभावे न संपत्स्यात् तस्माच्च प्रारभेत् कृषिम् ॥
पूर्वं सुभूप्रवेशः स्यान्निमित्तं चावलोकयेत् ।
मैत्रार्यमाश्विरोहिण्यां साहिर्बुध्न्यां कुजाहनि ॥
स्वात्युत्तरेषु पुष्ये च रौद्रे याम्ये च चित्रभे ।
कुर्यात्प्रवेशनं भूमेः प्रथमं स्वीकृतासु तु ॥
वारेषु कौजः श्रेष्ठोऽत्र मध्यमौ बुधजीवयोः ।
शेषा वारा विवर्ज्यास्स्युः सोमवारः कदाचन ॥

* * * *

सर्वान् दोषगुणानत्र निरपेक्षं प्रवक्ष्यते ।
बीजनिर्वापणे योगान् चतुर्मुखमुखोदितान् ॥
आर्कवारे स्वमध्येऽर्के बीजान् कृष्णान् प्रवापयेत् ।
मन्दवारेऽरुणे लग्ने बीजानुक्तानथावपन् ॥

**End:**

चन्द्रे ज्येष्ठां गते लग्ने कृषिं कृत्वालवालकान् ।
पुनस्तद्योगकाले च वार्ताकादि निवापयेत् ॥
प्ररोहसमये यानि पुष्पाण्यारूढतां पुनः ।
योग्यानि तेषां योगोऽयं बहूनां मूलिनामपि ॥

---

R. No. 5277.

Paper. 10¾ × 9¼ inches. Foll. 44. Lines, 20 in a page. Grantha. Good.

Transcribed in 1925-27 from a MS. of Maṅgattammaṅgar, Vaḍakkuttirumāḷigai, Alwartirunagari, Tinnevelly district.

रहस्यचरमश्लोकचन्द्रिका

RAHASYACARAMAŚLOKACANDRIKĀ.

Foll. 1a–42a. Foll. 42b—44 are left blank.

Same work as that described under R. No. 379 ante wherein see for the beginning. By Pelappūr Dīkṣita.

Breaks off in the ninth Kalā.

**End :**

विधौ वाक्यस्वारस्यसिद्धे गौरवस्यादोषत्वात् । प्रतिबन्धकभावतया दृष्टकारणभूतारोपित . . . . रूपत्यागविशिष्टस्य साधनेच्छारूपतया दृष्ट-कारणरूपस्य शरणवरणस्य सर्वमुक्तिप्रसङ्गपरिहारार्थमन्यार्थस्यैव . . . . . . अपायात नियतपूर्ववृत्तित्वरूपेण मोक्षव्याजत्वेनाज्ञातज्ञापनरूपो विशिष्ट-विधिरिति निष्कृष्टसिद्धान्ते अदृष्टकल्पनासंभवाद्विशिष्टविधिगौरवशङ्काया अनवकाशपराहतत्वाच्चेति दिक् ।

---

## R. No. 5278.

**Paper.** 10¼ × 9¼ inches. **Foll.** 40. **Lines,** 20 in a page. **Dēvanāgarī** Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Paramēśvaran Nambiyar, Tayyūr-mana, Vaniyankulam, Malabar district.

क्रियालेशस्मृतिः.

KRIYĀLĒŚASMṚTIḤ.

Similar to the work described under R. No. 3753(*b*) ante. By Nīlakaṇṭha.

Complete.

**Beginning :**

विष्णुदुर्गाशिवस्कन्दविघ्नशास्तृहराच्युतान् ।
नत्वा तान् पूजनादीनि लिख्यते शास्त्रलेशतः ॥
महद्ग्रन्थात् सुविस्तारधारणाक्षमचेतसाम् ।
अज्ञानामुपकाराय ज्ञानिनां लाघवाय च ॥
ज्ञातविस्मरणार्थाय लिख्यते लेशतः क्रिया ।
क्रियालेशस्मृतिर्नाम सुसन्धिर्लिख्यते कृतिः ॥
यन्न्यूनं यद्गुरुकं वा तद्विशोध्यात्र साधु वै ।
सन्तः संभावयन्त्वेनां सर्वानुग्रहबुद्धयः ॥
बीजाङ्कुरादिकर्मात्र दीक्षान्तावसानिकम् ।
किंचित् किंचित्समुद्धृत्य लिख्यते शास्त्रसागरात् ॥

यव(मुद्ग)तिलव्रीहिमाषशिम्बकुलुत्थकान् ।
प्रियङ्गुसर्षपश्यामराजमाषाढकीयुताम् ॥
पालिकादिषु निक्षिप्य सिक्त्वाम्यस्य बलिं निशि ।
पललं रजनीचूर्णं सलाजं दधि सक्तु च ॥
मूलाङ्कुरमिति प्रोक्तं पूर्वं भूतस्य निर्हरेत् ।

* * * *

**Colophon:**

इति क्रियालेशस्मृतौ प्रथमः पटलः ॥

**End:**

क्रियालेशस्मृतिश्चैषा सर्वेषामुपकारिणी ।
स्वल्पग्रन्था सुबोधा च सर्वानुष्ठानसूचनी ॥
लिखिता नीलकण्ठेन सर्वानुग्रहबुद्धिना ।
गुरोः प्रसादलव(तो) देवतानां प्रसादतः ॥
संक्षेपवृत्तेन नटीव लोके संक्षेपतः साधकसत्तमानाम् ।
सर्वाणि कर्माणि च दर्शयन्ती सतामियं प्रीतिकरी च भूयात् ॥

**Colophon:**

इति क्रियालेशस्मृतौ द्वादशः पटलः ।

त्रिविधं गन्धाष्टकमपि शाक्तेयं वैष्णवं च शैवमिति ।
चन्दनकर्पूरागः कुङ्कुमकपिमांसिना चोरः ॥ ?
गन्धाष्टकमिति शक्तः सान्निध्यकरं च लोकरञ्जनकृत् ।
चन्दनह्रीवेरागरुकाष्ठासृगुशीरमांसि मु पर । ?
चन्दनकर्पूरागरुमूलरुधिरकुशीतरोगजलापर ॥

इति क्रियालेशस्मृतिः समाप्ता ॥

---

R. No. 5279.

Paper. 10½ × 9½ inches. Foll. 66. Lines, 20 in a page. Dêvanâgarî. Good.

Transcribed in 1926–27 from a MS. of Naduvil-matham, Trichur.

उणादिसूत्रवृत्तिः.
UṆĀDISŪTRAVṚTTIḤ.

Foll. 1a—65b. Fol. 66 is left blank.

Similar to the work described under No. 1269 of the D.C.S. MSS., Vol. III. By Śvētavanavāsin, son of Āryabhaṭṭa of Uttaramērūr.

Contains 1—3 Pādas and 101 Sūtras in the 4th Pāda.

**Beginning :**

प्रणम्य भाष्यकाराय तन्मतस्पर्शशोधिताम् ।
व्याख्यामुणादिसूत्रस्य करिष्यामि यथाविधि ॥
कृपावाजिमिस्वदिसाध्यशूभ्य उण् ॥

डुकृञ् करणे, पा पाने, लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैवेति परिभाषया पिबतेरेव ग्रहणम्, लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणमिति कृपा इत्यस्याप्यग्रहणम् । डुमिञ् प्रक्षेपणे, स्वद आस्वादने, राध साध संसिद्धौ, अशू व्याप्तौ, एतेभ्यो धातुभ्य उण् प्रत्ययो भवति । णकारो वृद्ध्यर्थः । युगर्थश्च । उणादिप्रत्ययान्ताः संज्ञाशब्दाः । तेन तेषामत्र स्वरूपसंवेदनस्वरसवर्णानुपूर्वीमात्रफलमन्वाख्यानम् । अत एवाचार्यः पाणिनिः प्रतिपदविधिमनाहत्य लक्षणमेतत्सर्वं संग्राह्यं पठति—उणादयः बहुलमिति । बहुलमुणादयो द्रष्टव्याः । येयं शाकटायनादिभिः पञ्चपादी रचिता तत्राप्येतेन परिसमाप्ताः ।

* * * *

**Colophon :**

इतीन्दुग्रामसमीपवर्त्यग्रहारवास्तव्येनोत्तरमेर्वभिजनेन धर्मशास्त्रपारगार्यभट्टसूनुना गार्ग्येण श्वेतवनवासिनाम्ना विरचितायामुणादिवृत्तौ प्रथमः पादः ।

* * * *

**Colophon :**

इतीन्दुग्रामसमीपवर्त्यग्रहारवास्तव्येनोत्तरमेर्वभिजनेन धर्मशास्त्रपारगार्यभट्टसूनुना गार्ग्येण श्वेतवनवासिनाम्ना विरचितायामुणादिवृत्तौ तृतीयः पादः समाप्तः ।

ईप्रत्ययाकारस्यापरिसमाप्तत्वात्तमेवाधिकारमाश्रित्य निपातनमाह—वातप्रमीः ।

वातशब्दे तृतीयान्त उपपदे अपूर्वान्मीङ ईप्रत्ययो निपात्यते ।

* * * *

**End:**

मापोरुरि च ।

माङ्माने । गामादाग्रहणेष्वविशेषः । पा पाने आभ्यां रुप्रत्ययः । तत्सन्नियोगेन मापोरलोऽन्त्यस्यैकारश्चान्तादेशः । मिमीत इति मेरुः । सुवर्णगिरिः राजा च । पिबति रश्मिभिर्जलमालम् ।

---

R. No. **5280.**

Paper. 10½ × 9¼ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Aṣṭamūrti Nambūdiri, Taccherayattu-manakkal, Tirur, Malabar district.

रामायणप्रबन्धः.

RĀMĀYAṆAPRABANDHAḤ.

Foll. 1a—30a. Fol. 30b is left blank.

A work in prose and poetry narrating the story of Rāma as described in Vālmīki's Rāmāyaṇa.

Contains the Yuddhakāṇḍa only.

**Beginning:**

तौ सुग्रीवविभीषणौ रघुपतिः पार्श्वद्वये मानयन्
सौमित्रिं पुरतः प्रभञ्जनसुतं भृत्यं पुरस्कृत्य च ।
युक्तो वानरसेनया सकलया राजन्यचूडामणि-
स्तीर्त्वाऽम्भोनिधिमास्पदं च विदधे लङ्कोत्तरद्वारि सः ॥
व्याघत्रीतुङ्गपीनस्तनकलशमिलत्कुम्भिकुम्भाभिमान
प्रत्यागच्छन्मदान्धद्विरदपतिपदक्षुण्णकूटे त्रिकूटे ।
स्कन्धावारं विधाय न्यवसदथ गिरा रामभद्रस्य लङ्कां
जाताशङ्कां विधास्यन् सह बलनिवहैश्चक्रवर्ती कपीनाम् ॥
श्रुत्वा दाशरथिं सुवेलकटके साटोपमर्वं धनु-
ष्टङ्कारैः परिपूरयन्ति ककुभः प्रोज्झन्ति कौक्षेयकान् ।
अभ्यस्यन्ति तथैव चित्रफलके लङ्कापतेस्तत्पुन-
र्वैदेह्याः कुचपत्रवल्लिरचनाचातुर्यमर्वं कराः ॥

तदनु मदनदूयमानमना दशाननोऽपि अशरणेयमवश्यं वश्या भविष्यतीति भल्लग्रवृक्णकण्ठं मायामयं रामशिरो निशाचरैः कपिबलकलकलाकर्णनसुखायमानायै जनकतनयायै प्रदर्शयामास ।

**End :**

इति विहितविबुधकार्यो विश्वानुजिघृक्षया गृहीतमानुषवेषो भगवानरविन्दनाभः सदारावरजः सकलमित्रपरिवृतो निसर्गनिस्तुषनिजचरितवितीर्णनिखिलभुवनानन्दश्चिराय परमेण सुखेन सुतरां विरराज ।

निशाचरतमोलीनजगदुन्मेषहेतवे ।
जानकीजानये तस्मै तेजसां निधये नमः ॥

पङ्क्तिमिलदङ्कणविचङ्क्रमणलीला-
सङ्कुणितकिङ्किणिघणङ्कणितकाञ्चि ।
अश्चितमिदं चरतु तन्मनसि केली-
संचलितकुन्तलमनन्तमजमोजः ॥

---

R. No. 5281.

Paper. 10¼ × 9¼ inches. Foll. 8. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Poramōtu Nambūdiri, Akkirattu-mana, Kavalappara, Malabar district.

**भानुमतम्.**

**BHĀNUMATAM.**

A work on Śilpa. The Adhyāyas contained herein chiefly deal with the making and consecration, etc., of images of Śivalingas.

Breaks off in the 7th Adhyāya.

**Beginning :**

लिङ्गोद्भवं प्रवक्ष्यामि यथावदनुपूर्वशः ।
एकमूर्तित्रयो भागमेकरूपनिरामयम् ॥
दर्शनं . . श्रवणं दृष्टादृष्टापरावरम् ।
भूतलेषु महत्तत्त्वं रुद्रलोके प्रमोदते ॥
परमं वैष्णवं सिद्धं वैदिकं श्रौतिकं तथा ।
पौष्टिकं कीर्तिमाप्नोति तस्मात् स्थावरमिष्यते ॥

चतुरश्रं नाह्निका(ब्राह्म)लिङ्गमष्टाश्रं वैष्णवं तथा ।
ध्यष्टाश्रं भास्करं नाम दीर्घाश्रं कालभद्रकम् ॥
द्वात्रिंशदष्टकं लिङ्गं भास्करमितिरं(तन्नि)वि(ग)द्यते ।
सुवृत्तं शाङ्करं नाम त्रिकोणमीशाननामतः ।
गणनाथस्य यत्कर्म लिङ्गं शाङ्करमिष्यते ॥
यस्य लिङ्गस्य विष्कम्भं तत्समं ब्रह्मभागशः ।
मध्यभागं तथा कुर्यात्पूजामानं तु कर्णके ॥
इत्येवं ब्राह्मिकं लिङ्गमृषीणामिति पूजयेत् ॥

* * * *

**Colophon:**

इति भानुमते लिङ्गमानलक्षणे प्रथमोऽध्यायः ।

**End:**

**Colophon:**

इति भानुमते लिङ्गशास्त्रे लिङ्गस्य लक्षणे षष्ठोऽध्यायः ।

प्रतिष्ठालक्षणं वक्ष्ये यथावदनुपूर्वशः ।
गर्भागारेण सप्तांशं तन्मध्ये ब्राह्मिकं भवेत् ॥

* * * *

यत्र त्रिंशतिभागं वा एकविंशतिभागतः ।
एवं षण्णवतीभागमेकांशे वामभागतः ॥
तन्मध्ये स्थापनं प्रोक्तं सूत्रं प्रदक्षिणो भवेत् ।
पश्चाद्बहिरी स्थाप्यमुमासङ्गममिष्यते ॥
षडंशे पदमध्येषु वीरभद्रेश्वरस्य तु ।
सप्तांशे पदमध्येषु महेश्वरं च स उच्यते(?) ॥
पञ्चादशपदमध्येषु . . . . . . . ।

---

R. No. **5282.**

Paper. 10¼ × 9¼ inches. Foll. 22. Lines, 20 in a page. Devanāgari. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Aṣṭamūrti Nambūdiri, Tachaniyattu-mana, Paravanna, Malabar district.

रासक्रीडा.
RĀSAKRĪḌĀ.

Foll. 1a—22a. Fol. 22b is left blank.

A small poem describing the Rāsakrīḍā of Śrī-Kṛṣṇa, as found in Purāṇas.

Complete.

**Beginning :**

आतुङ्गमस्तकमनस्तमितानुभाव-
मातङ्गभारहरमङ्घ्रिसरोजभाजाम् ।
मोदं करोतु शिवयोस्सुकृतैकमत्यं
मातङ्गमानुषवपुर्महितं महो वः ॥
प्रालेयशङ्खकुमुदस्फटिकावदातां
बालेन्दुमण्डितमनोज्ञकिरीटभाराम् ।
आलोकयामि मनसा वचसां सवित्रीं
नालीकयोनिवदनाम्बुजकेलिहंसीम् ॥

* * * *

भूभारभूतदनुजक्षपणाय गूढं
गोपालधाम्नि वसतो मधुकैटभारेः ।
व्यासादिभिः कविभिरादृतमादरेण
रासोत्सवं परिमितैः कथयामि पद्यैः ॥
शब्दागमेषु सुलभो न परिश्रमोऽस्ति
विद्वत्प्रमोदजनको न वचोविलासे ।
उद्वेलमन्तरुदिता सरसीरुहाक्षे
भक्तिः परं जनमिमं मुखरीकरोति ॥
नारीजनं रसयितुं धृतगोपवेषे
नारायणे मनसि कौतुकमादधाना ।
अभ्याजगाम शरदम्बुजवक्त्रलक्ष्य-
मस्पेतरं कमपि विभ्रममुद्वहन्ती ॥

* * * *

गोपीजनस्य नयनप्रमदं विधातु-
मापीतरूपसुषुमः कमलाकटाक्षैः ।

आत्मानमाभरणमप्रतिमं अगत्वा
दैत्यारिरात्तरसमाभरणैरयुङ्क ॥
आलक्ष्यचारुतरचन्द्रकसान्द्रशोभां
मौलौ बबन्ध सुभगे शिखिपिञ्छमालाम् ।
शृङ्गारविभ्रममयं व्रजसुन्दरीणां
शङ्के प्रदर्शयितुमद्भुतमिन्द्रजालम् ॥

**End:**

आभीरसुन्दरदशामतिपुण्यभाजा-
मापूरयन्नभिमतान्यरविन्दनेत्रः ।
उन्निद्रचन्द्रसुषुमासखमेवमेव
निन्ये गणं निखिलमेष शरन्निशानाम् ॥
विक्रीडितं व्रजवधूनिवहैरिदं य-
श्चक्रायुधस्य कथयत्यनुमोदते वा ।
भक्तस्य तस्य भगवत्पदपङ्कजान्ते
मुक्तिः करे ननु किमत्र विचारणीयम् ॥

**Colophon:**

इति रासक्रीडा समाप्ता ।

---

R. No. 5283.

**Paper.** 10½ × 8½ inches. Foll. 422. Lines, 20 in a page. **Dēvanāgarī.** Good.

Transcribed in 1926–27 from a MS. of the Central Library, **Baroda.** Bound in two volumes.

बृहदारण्यकोपनिषद्भाष्यवार्तिकव्याख्या—न्यायकल्पलतिका.

BṚHADĀRAṆYAKŌPANIṢADBHĀṢYAVĀRTIKA-VYĀKHYĀ: NYĀYAKALPALATIKĀ.

Foll. 1*a*—422*a*. Fol. 422*b* is left blank.

A commentary on Surēśvara's Bṛhadāraṇyakōpaniṣadbhāṣyavārtika: by Ānandapūrṇa alias Vidyāsāgara, disciple of Abhayānandapūjyapāda. Complete.

**Beginning:**

यद्दृष्टे दृष्टनष्टस्फुरितमलपटैर्नष्टमोहैर्विशिष्टैः
दृष्टोत्पादार्थनाशं स्फटिकमणिशिलास्पष्टमिष्टं प्रकृष्टम् ।

साटोपं कोटिवीवैरटति सुघटितं दुःखकोपानदष्टं
तद्ब्रह्मैवाहमस्मि प्रकटितकपटस्पष्टसंसाररङ्गे ॥
श्रीमच्चन्द्रशिखामणिर्गिरिसुताबिम्बात्मतेजोमणिः
शर्वांद्दश्वविभातकामलमणिर्ब्रह्माण्डचूडामणिः ।
कालव्यालविषोपशान्तिदमणिश्चिन्तामणिश्शङ्करो
जीयान्मोहविभेदवासरमणिर्गोकर्णभूषामणिः ।
शोभो भावो . घूर्णमानचलितलसन्नेत्रपत्रप्रशोभ
श्रीमद्वक्त्रारविन्दप्रविसनकराग्रोद्धरन्नौघकुम्भ ।
कारुण्याब्धप्रवृष्ट्या कुरु कुरु सुदृढं वादविभ्रान्तिताप-
प्रध्वंसं भावमुग्धप्रविरचितमिदं कृत्यबीजं प्ररोहेत् ॥
सरोजजन्माननपद्महंसीं गिरीशकल्पद्रुमकल्पवल्लीम् ।
हरेरुरस्सागरलक्ष्मगङ्गामुपास्महे कामपि देवतां ताम् ॥
वेदान्तव्रातनीरं शतपथकथितन्यायरत्नप्रपूरं
पारावारं सुतारं निगमगुरुषडङ्गात्मसद्ग्राहघोरम् ।
कारंकारं सुगाहं श्रुतमतमथितैर्ब्रह्मविद्यामृतं यः
प्रादादादाय तस्मादशरणशरणं शङ्करं तं नमामः ॥
आज्ञावज्रं सुरेशं कृतनिखिलजगत्त्राणमात्मप्रभावा-
द्दिक्चाकाशावकाशं विशदतरयशोराशिभिः पूरयन्तम् ।
वेदैराघोषमानप्रकटगुणगणं निर्जितारातिवीरं
वन्दे गोत्रप्रभेदं सुरनिकरनुतं गोसहस्रप्रकाशम् ॥
अपारासारसंसारसागरोत्तारसेतवे ।
श्रीमते गुरवे श्वेतगिरये स्तान्नमस्क्रिया ॥
शिवौ तत्त्वैकसद्भावौ प्रकृतिप्रत्ययाविव ।
सुसंप्रदायया युक्त्या व्याकुर्वे वार्तिकामृतम् ॥

इह खलु निखिलप्राणभृतां प्रवृत्तिरिष्टोपायप्रेक्षापुरस्सरा । द्विविधं चेष्टं दृष्टमदृष्टं च । तत्र दृष्टेष्टसाधनगोचरा प्रवृत्तिः स्वारसिकी, न शास्त्र-प्रदीपमाकाङ्क्षति । अदृष्टोपायप्रवृत्तिसिद्ध्यर्थं तत्प्रकाशशास्त्रप्रदीप आदर-णीयः । तत्र सर्वोत्कृष्टेष्टैकवस्तुतदुपायप्रकाशनप्रवृत्तबृहदारण्यकोपनिषद्भाष्य-

वार्तिकमारभमाणः शिष्टाचारमनुविदधानो विशिष्टदेवतातत्त्वानुसरणतन्नमस्काररूपं मङ्गलं चिकीर्षुरभिधेयसम्बन्धाधिकारिप्रयोजनप्रतिपादनायाह —स्वाविद्याविभवेति । अस्य च नियोगतः फलवत्कार्यान्तरारम्भसंयोगात् स्वयं साक्षादफल(मपि फ)लवत्सन्निधावफलं तदङ्गमिति कार्यान्तरशेषत्वेऽवधृते अन्यारम्भस्य समाप्तिपर्यन्तत्वादपेक्षिताविघ्नपरिसमाप्तिः प्रयोज . . . नपेक्षितविधानं दुर्लभमिति फलान्तरकल्पनाया दुर्बलत्वात् । अतो यथासाम्प्रदायिकमध्यायानध्यायादिस्वाध्यायाविघ्नार्थ . . . . . . र्थः । तं वन्द इति सम्बन्धः । क्रियाफलस्य कर्त्रभिप्रायत्वादात्मनेपदप्रयोगः ।

* * * *

शान्तय इति—निरन्वयानर्थवृत्तिफलत्वात् वेदान्तानां तद्वृत्तिरपि तत्फलेत्यर्थः । कैवल्यान्यवृत्तिफलत्वाद्वार्तिकस्य फलान्तराभावादनारम्भ इत्यत्राह—कृतार्थिकेति । वेदान्तानामद्वैतपरत्वमयुक्तं भेदालम्बनप्रत्यक्षादिविरोधादित्यादिशुष्कतर्कोत्थासंभावनानिरासोऽवान्तरफलमित्यर्थः । उक्तानुक्तदुरुक्तचिन्तनं वार्तिकलक्षणमिह न संभवति, भाष्यकृतो दुरुक्तासंभवादत आह—वचसेति । वार्तिकरूपवाक्येन दुरुक्तचिन्ता स्पष्टेति भावः । वार्तिकस्य कुतर्कनिराससामर्थ्यं कुतोऽत्राह—न्यायसमाश्रितेनेति । नीयते प्राप्यतेऽभिमतोऽर्थोऽनेनेति न्याय आगममूलयुक्तिः, तदाश्रितेनेत्यर्थः ।

* * * *

गुरवो यां वृत्तिं सचक्रुः तस्या अर्थाविष्करणं प्रक्रम्यत इत्यन्वयः । अगम्भीरत्वप्रयुक्ताक्षेपं प्रतिक्षिपति—सकलेति । सकलस्याम्नायस्य कर्मकाण्डदेवताकाण्डब्रह्मकाण्डात्मकस्यार्थः सम्यक् साध्यते यया सा सकलाम्नायार्थसंशोधनी ताम् । कर्मकाण्डस्य साध्यसाधनसम्बन्धेऽवान्तरतात्पर्यं श्रुतिद्वारा ब्रह्मात्मनि । एवं देवताकाण्डस्यापि । ब्रह्मकाण्डस्य तु साक्षात् ब्रह्मपरत्वमिति संशोधयतीत्यर्थः । काण्वोपनिषद्वृत्तिरिति समाख्याविरोधात् कथं सकलाम्नायसंशोधनमत्राह—काण्वेति । सकलाम्नायार्थपरिज्ञानं कथमेषामत्राह—गुरव इति । उत्पचितस्सर्वज्ञा इति यावत् । गुरुषु बहुवचनं स्मर्यते ।

**End:**

कण्वोपनिषदो भर्तृप्रपञ्चप्रभृतिभिर्विवृतत्वात् तद्वृत्तिरेवासाधारणगोचररहितानादरणीया, सुतरां तदीयं वार्तिकमित्याशङ्क्याह—अस्मादिति । वेद-

शिरसामैकात्म्यतात्पर्येण वृत्तिमस्मद्गुरुरेव चक्रे । नेतरेषां तदुपरि ज्ञानादतो न पिष्टपेषणमित्यर्थः । शङ्करवृत्तौ भास्करप्रभृतेररोचकदर्शनात् तद्वार्तिकं न विद्वदादरणीयमत्राह—सज्जनेति ।

* * * *

आशैलादिति । एवं सन्नसतिभास्करेण सादृश्यं प्रदर्श्य ततो वैशिष्ट्यं दर्शयति—आरादिति ।

परापरस्वरूपेण परं यत्तत्प्रकाशितम् ।
श्रीमन्महाबलं देवं वन्दे गोकर्णमण्डनम् ॥
निखिलनिगमप्रत्येयार्थप्रसूनसमुल्लस-
न्मधुरिमवचोगुम्भः शुम्भत्प्रभूतसुखाम्बुधिः ।
प्रहसितसुधाधारः स्फारस्फुरत्पदपद्धति-
स्त्रिभुवनमलङ्कुर्याद्विद्यापयोधियतीशितुः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्याभयानन्दपूज्यपादशिष्येणानन्दपूर्णमुनीन्द्रेण विद्यासागरापरनामधेयेन विरचितायां सुरेश्वरवार्तिकटीकायां न्यायकल्पलतिकायामष्टमोऽध्यायस्समाप्तः । समाप्ता न्यायकल्पलतिका ।

The scribe adds—

स्वस्ति संवत् १४९९ वर्षे शाके १३५६ वर्षे मार्गशीर्षमासे शुक्लपक्षे दशम्यां तिथौ गुरुदिने उत्तराभाद्रपदनक्षत्र तैतुलकरणे अद्येह धवलमण्डलमण्डलकरणे विराटपुरापरनामधेये श्रीमत्परमहंसपरिव्राजकाचार्यश्रीश्रीमद्ब्रह्मेन्द्राश्रमश्रीचरणचरणार्भकश्रीमद्रामेन्द्राश्रमश्रीचरणमठे वि . मोरसुत त्रि . राजाकस्य अध्ययनार्थं तथा परोपकृतये च श्रीसुरेश्वरवार्तिकस्य टीका न्यायकल्पलता विद्यासागरीयापरनामधेया आभ्यन्तरनागरजातीयमहश्रामसुतेन विष्णुना लिखिता ।

The scribe of the present MS.

अस्य न्यायकल्पलतिकाख्यस्य ग्रन्थस्य लेखनक्रमो विक्रमसंवत् १९८२ शालिवाहनशकः १८४८ खिस्तीयाब्द १९२६ मिते वर्षे श्रावणशुक्लपक्षम्यां भानुवासरे समाप्तिं गतः ॥

यत्रास्ते वटपत्तनाख्यनगरं श्रीगुर्जरालङ्कृति
तत्र श्रीपुरुषोत्तमेत्यभिधया जातो द्विजानां वरे ।
श्रीगौडेऽतिविशुद्धवर्णसमुदाये वनजोमातृको
रेवाशङ्करसूनुतामधिगतो मद्दावरङ्के कुले ॥

R. No. 5284.

Paper. 10¼ × 9¼ inches. Foll. 19. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Narayaṇa Nambûdirippâd, Punnata-mana, Kottapaḷi, Malabar district.

**शौनकशिक्षाव्याख्या.**

ŚAUNAKAŚIKṢĀVYĀKHYĀ.

Foll. 1a—19a. Fol. 19b is left blank.

A commentary on the Śaunakīyaśikṣā described under R. No. 3731(d) ante.

Incomplete.

**Beginning** :

सृष्ट्वाग्रे वियदादिकैस्सुरनृगोपल्यादिकांश्चापरां-
श्चोत्पाद्यात्र च संप्रविश्य विविधं नामानि रूपाणि च ।
व्याकृत्य स्थित एष कर्म निखिलं कुर्वन्निवालक्ष्यते
यस्तं नौमि विभुं चिदात्मकमजं वेदान्तवेद्यं शिवम् ॥
या शौनककृता शिक्षा वर्णोच्चारणबोधिनी ।
अविस्मृत्यै स्फुटं तस्याः श्रुतार्थो लिख्यते मया ॥

इति खलु भगवान् शौनकः ऋग्वेदवर्णोच्चारणप्रतिपादकं शिक्षाख्यं ग्रन्थं चिकीर्षुस्तस्याविघ्नपरिसमाप्त्यादिसिद्ध्यै स्वाभीष्टदेवतानमस्कारपूर्वकं श्रोतृबुद्धिसमाधानाय चिकीर्षितं प्रतिजानीते—सर्वज्ञमिति । अहं शिवं प्रणम्य वर्णोच्चारणलक्षणं प्रवक्ष्यामीत्यन्वयः । शिवशब्देनात्राशेषमङ्गलभूतमखिलकारणमानन्दरूपं परं ब्रह्म । देवताविषयोऽन्तःकरणप्रह्वीभावः प्रणामः । भक्तिपुरस्सरं शिवे मनस्समाधायेत्यर्थः । अपरिज्ञातस्वरूपे मनस्समाधानस्याशक्यत्वात् तस्य स्वरूपं कथयति—सर्वज्ञमित्यादिविशेषणचतुष्टयेन । सर्वस्य शब्दार्थप्रपञ्चस्य स्वरूपभूतत्वात् । सदा ज्ञाता सर्वज्ञः, यस्सर्वविदिति श्रुतेः ।

* * * *

"शिक्षा शिक्षयति व्यक्तं वर्णोच्चारणलक्षणम्" इति सर्वासामेव वर्णोच्चारणलक्षणप्रतिपादकत्वमस्त्येव, तत्राप्यृग्विति विशेषग्रहणात् पाणिनीयादिभ्य इयमृग्वेदस्य प्रकृष्टोपकारिका, अन्यत्र सामान्येनेत्युक्तम् । ऋग्वेदोपकारादेवास्यारम्भस्समर्थितः ।

**End:**

पदान्तीयानां स्पर्शानां यरवाः ऊष्मसु परेषु विकृतौ सत्यन्तां न शाकलाभिनिधानमित्यस्यासंयुक्तं शाकलं तत् यच्छाकलाभिनिधानमुक्तं ल्कार ऊष्मस्वपि शाकल्येनेत्यादि । तदुच्चारणकाले उत्तरेण वर्णेनासंयुक्तमुच्चरेत् । अभिनिहितं वर्णमुच्चार्य वर्णसन्तानमपि छिन्दन्नुत्तरयरवादि तेन संश्लि . .

---

R. No. **5285.**

**Paper.** $10\frac{1}{2} \times 8\frac{1}{4}$ inches. Foll. 60. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. P. Nilakaṇṭha Śarma, Punnasseri, Pattambi, Malabar district.

(*a*) दक्षयागप्रबन्धः-

DAKṢAYĀGAPRABANDHAḤ.

Foll. 1*a*—10.

A work in prose and poetry narrating the story of the performance of a sacrifice by Dakṣa, the self-immolation of Sati or Dākṣāyaṇi in the sacrificial fire and the destruction of the sacrifice by Śiva.

**Complete.**

**Beginning:**

श्रीमत्कैलासशैले सकलगणचमूचक्रसंपूर्णसानौ
सानन्दं पारिजातप्रसवसुरभिलान् मानयन् मन्दवातान् ।
प्रत्यग्रप्रेमहृद्यामनिशमनुसरन् दक्षजामिक्षुचाप-
क्रीडाभेदैरनेपीत्कमपि च समयं सोमलेखाकलापः ॥

पश्यन् वक्त्रं विनयमदनोल्लासमन्दाक्षकान्तं
मन्दं मृद्गन्नुरसिजयुगं पाणिना शोणभासा ।
आकूतानां शतमपि वदन्निङ्गितैर्भङ्गुराङ्ग्याः
तस्यामासीत्प्रणयपरवानिन्दुचूडः शिवायाम् ॥ .

* * * *

तस्मिन्नथ समये समयमनु समभ्यस्यमानयमनियमादिवश्यहृद्भिर्विश्वसृग्भि-रामन्त्रितसकलगीर्वाणगणमहामुनिनिवहसिद्धसाध्यचारणादिभिस्संभृतनिखिलसं-भारः जातु संवत्सरादिभूते पवित्रतमे पक्षावसिते चित्रायोगे कोऽपि सत्रयागस्समारभ्यते स्म ।

तत्र च समागतेषु सकलदैवतेषु सदःप्रधाणप्रतिष्ठितविशिष्टविष्टरनि-विष्टे त्रैविष्टपकुलोत्कृष्टे शिपिविष्टे ।

* * * *

आयान्तमालोक्य तमासनेभ्यस्सद्यस्समुत्तस्थुरशेषसभ्याः ।
चित्तेन पश्यन् परमात्मरूपं रुद्रस्तु नैवाचलदासनात् स्वात् ॥
अभ्युत्थानभाजं सदसि दिविषदामग्रतस्सन्निषण्णं
पश्यन् मात्सर्यरोषव्यतिकरमलिनीभूतचेता निकामम् ।
सत्या भर्तारमत्युत्तमचरितनिधिं नित्यमत्यादराह्र्ं
दक्षो रूक्षाक्षरौघैरकृत विनिकृतं प्यक्षमक्षुद्रसारम् ॥

**End:**

त्रस्तश्मश्रुर्भवतु स भृगुः पुष्टदन्तस्तु पूषा
मित्रस्याक्ष्णा भजतु च भगो नेत्रकृत्यं समस्तम् ।
दक्षो यज्ञे विशसितपशोराननेनाकबन्धो
भूयात् स्फायद्विनयमहिमा कर्मठो धर्ममार्गे ॥
इत्थं वाचा पुरारेरविकमधुरया वीतकम्पा निलिम्पाः
सद्यस्संप्राप्य सत्रक्षितिमनुमिलितां प्राकृतैः प्राणजीवैः ।
दत्वा रुद्रस्य भागं विधिवदवहिताः सत्रशेषं समाप्य
स्वस्वास्स्वं स्वं निवासं प्रययुरतिसुखस्सोऽपि दक्षो बभूव ॥

---

(*b*) पाञ्चालीस्वयंवरकथा.

PAÑCĀLĪSVAYAṀVARAKATHĀ.

Foll. 10*a*—30*a*.

Same work as that described under R. No. 2455(*b*) ante without the introductory stanzas in the beginning and with difference in the end.

The readings considerably differ herein.

Complete.

(*c*) सुभद्राहरणचम्पूः.

SUBHADRĀHARAṆACAMPŪḤ.

Foll. 30*a*—50*a*.

Same work as that described under R. No. 2455(*d*) ante; and with the additional stanza in the beginning as given below and with difference in the end.

The readings considerably differ herein.

Complete.

**Beginning:**

इत्थं कृतव्यवस्थां द्रुपदनृपसुतामानुपूर्व्या भजन्तो
याते तस्मिन् मुनीन्द्रे हतविमतजना वर्धयन्तः स्वराज्यम् ।
रोषस्याकस्मिकत्वात् कुहचिदनुचितेऽप्यायुधादानभीत्या
राजान्तन्यस्तशस्त्रास्सुखमिह नगरे रेमिरे पाण्डुपुत्राः ॥

---

(*d*) मत्स्यप्रबन्धः.

MATSYAPRABANDHAḤ.

Foll. 50*a*—60*a*. Fol. 60*b* is left blank.

Same work as that described under R. No. 3042 ante with different readings.

Complete.

The scribe adds—

सरःपारे वासुदेवनाम्ना शिवभूसुरेण एकदिनोल्लेखितमेतत्प्रबन्धरत्नं शिवपदमाश्रयम् ॥

---

R. No. **5286.**

Paper. 10½ × 9½ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Kumaran Nambūdirippad, Kaṭṭumāḍam-mana, Andathod, Malabar district.

लक्षणसंग्रहः.

LAKṢAṆASAṀGRAHAḤ.

Foll. 1*a*—7*b*. Fol. 8 is left blank.

A small work explaining the Padārthas or categories according to the Vaiśēṣika system of philosophy: by Bālayajvan, son of Hṛṣikēśayajvan.

Complete.

**Beginning:**

यद्यस्सर्वज्ञतामीयुरपि वा लघुसंविदा ।
यं ध्यात्वा दक्षिणामूर्तिं सततं तमुपास्महे ॥

उक्तान्यपि च लक्ष्माणि पूर्वाचार्यैस्समासतः ।
विशदार्थं वदिष्यामि विजयाय च वादिनाम् ॥

ननु पृथिव्यादिस्वरूपसिद्धौ किं लक्षणेन । सिद्धार्थे साधनवैयर्थ्यात् । तदसिद्धौ त्वशक्यं लक्षणकथनम्, आश्रयासिद्धेरिति । उच्यते । स्वरूपेणावगतस्य व्यवहारविशेषप्रतिपादनार्थं वा, सामान्येन व्यवहारप्रसिद्धस्य विशेषावगमार्थं वा, लक्षणप्रवृत्तेः । सर्वत्र लक्षणापेक्षायामनवस्था । लक्ष्यवत् लक्षणस्याप्यन्यतो लक्षणीयत्वादिति चेन्न । अप्रतीत एवार्थे लक्षणस्यापेक्ष्यत्वात् सर्वत्र च प्रतीत्यभावात् । यस्तु सर्वथैवाप्रतिपन्नः नासौ बोधनार्हः । तस्य बालबधिरादिवज्जिज्ञासाभावेनानधिकारादिति । प्रयोजनसम्बद्धार्थजातस्य कार्त्स्न्येन प्रतिपादको ग्रन्थश्शास्त्रम् । तच्च सूत्रभाष्यवृत्तिवार्तिकटीकाप्रकरणभेदेन षड्विधम् ।

* * * *

तत्र भावपदार्थाः षड्विधाः । यथोक्तम्—द्रव्यगुणकर्मसामान्यविशेषसमवायाः षडेव पदार्था इति ।

द्रव्यं गुणस्तथा कर्म जातिश्चेतत्क्रमाद्यथा ।
विशेषस्समवायश्च पदार्थाः षडिमे मताः ॥ इति च ।

तत्र गुणवद्द्रव्यं समवायिकारणं द्रव्यमिति वा । उत्पन्नं कार्यं यत्र समवैति तत्समवायिकारणम् । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणमिति वा । अभूत्वा भावि कार्यम् । कारणाधीनसत्त्वात्मलाभ इति यावत् । स्वकारणसमवायः प्रागसतस्सत्तासमवायो वा कार्यत्वमिति केचित् ।

**End:**

विपर्यये तु बाधिका । सामानाधिकरण्य . . . विवादाध्यासितं नित्यसम्बन्धेन सम्बन्धं द्रव्यत्वादाकाशवत् । न च समवायैकत्वे वस्तुसङ्करप्रसङ्गः । तस्य समस्तासङ्करस्वभावत्वेन परिकल्पनात् । प्रतिपन्नानुरोधित्वात् कल्पनाया इति ।

श्रीहर्षीकेशयज्वार्यसूनुना बालयज्वना ।
द्रव्यादिषट्पदार्थानां कृतो लक्षणसंग्रहः ॥

**Colophon:**

इति लक्षणसंग्रहस्समाप्तः ॥

## R. No. 5287.

Paper. 10¼ × 9½ inches. Foll. 110. Lines, 20 in a page. Dēvanāgrī. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Yajñēśvara Dikṣitar, New Kalpati, Palghat.

ज्योतिष्टोमप्रदीपिका.

JYŌTIṢṬŌMAPRADĪPIKĀ.

Foll. 1*a*—109*a*. Foll. 109*b* and 110 are left blank.

Similar to the work described under No. 1119 of the D.C.S. MSS., Vol. II. By Raṅganātha.

Complete.

**Beginning :**

प्रणम्य साम्बमीशानं वाणीं बोधायनं गुरुम् ।
क्रियते रङ्गनाथेन ज्योतिष्टोमप्रदीपिका ॥

अग्निष्टोमेन यक्ष्यमाणो भवति स उपकल्पयते कृष्णाजिनं च कृष्णविषाणं च वासश्च मेखलां च सैषा पृथ्वी वेणी कार्या भवति त्रिवृदेकतःपाशां द्वाविंशतिं च दर्भपुञ्जीलानि नवनीतं चाञ्जनं च सतूलां च शरेषीकामौदुम्बरं च दण्डं चमसं च व्रतदानं स्थालीं सशिक्यामेक्षणामेतानि त्रयोदश यजमानस्तावन्त्येव भवन्ति । पत्नीमभितो भवन्ति । कुम्बं च कुरीरं च वासश्च योक्त्रं च शङ्खुं च परिमितानि दर्भपुञ्जलानि नवनीतं चाञ्जनं च सतूला च शरेषिका मृन्मयः पात्रशङ्कुश्च स्थाली सशिक्या समेक्षणा ।

कृष्णाजिनानि पञ्च स्युरेकं सर्वाङ्गसुन्दरम् ।
वासांसि षोडशैकत्वे पत्न्या वृद्धौ तु वर्धयेत् ॥
स्थालीं कुम्भं प्रणादीनि कौलालानि यथाविधि ।
आसन्दीं शकटादीनि दारवाणि प्रकल्पयेत ॥
दशासप्तोर्ध्वपात्राणि तान्युदूखलवद्विदुः ।
प्रादेशपरिमाणानि नैयग्रोधप(मि)तीरितम् ॥

* * * *

आत्मानुकूलताारेषु सोमोपक्रम इष्यते ।
नान्दीमुखादयः पूर्वं प्रातस्स्नानादिपञ्चकम् ॥

पूर्वेद्युरुदकशान्तिं प्रतिसरबन्धं च कृत्वा, प्रातस्स्नानादिपञ्चकं कृत्वा, सोमाङ्गं नान्दीश्राद्धं हिरण्यरूपेण कृत्वा, इन्द्रादयः प्रीयन्तामिति पुण्याहं वाचयित्वानुज्ञां कृत्वा, जघनेन गार्हपत्यं प्राक्तूलान् दर्भान् संस्तीर्य, तेषु प्राङ्मुखो यजमानस्सपत्नीक उपविश्य, ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं द्वादशस्तोत्रेण द्वादशशस्त्रेण रथन्तरनाम्ना एकविंशतिगोदक्षिणेन ज्योतिष्टोमेनाग्निष्टोमेन यक्ष्ये । त्रिरुपांशु त्रिरुच्चैः तन्म(कर्म)ऋध्यताम् । ओं तथा । प्रायश्चित्तपक्षे पित्र्यादिषु त्रिष्वपि सोमहीनेष्वैन्द्राग्नमाह—श्रुतिराश्विनं च । तत्रायं विशेषः । याः पुरस्तादित्यादि । हृदये निविष्टं मम . . . यं त्रिपूर्वसोमपीथविच्छेदसन्धानार्थमैन्द्राग्नं पशुं दौर्ब्राह्मण्यनिर्हरणार्थमाश्विनं पशुं चाग्नीषोमीयेण पशुना सहोपालम्भं कुर्वन् द्वादशस्तोत्रेण . . . सोमेन यक्ष्ये । त्रिरुपांशु त्रिरुच्चैः तन्म(कर्म)ऋध्यतामित्यादि ।

* * * *

**Colophon:**

इत्यग्नीषोमीयस्समाप्तः ।

इति सोमयागे प्रथमप्रश्नस्समाप्तः ।

**End:**

पूर्णाहुत्येवोदवस्येदित्यस्मिन् पक्षेऽग्नीन् परिस्तीर्याज्यं निरूप्याधिश्रित्य पर्यग्नि कृत्वा स्रुवं स्रुचं च निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वा काश्चित् समिधमादाय, अग्नये स्वाहेत्याहवनीये जुहोति, अजस्रैरेवाग्निभिरुदवस्येद्दित्यस्मिन पक्षे सप्तमे अग्न इति जुहोति । नेत्यपरे । अनारब्धस्य याः पुरस्तादित्यादि । अग्निहोत्रमारभ्यते न यावज्जीवं होष्यामि, अग्निहोत्रं वै दशहोतुर्निदानम् । अत्र दशहोतारं हुत्वा कूश्माण्डैर्जुहोति ।

अथ सायमग्निहोत्रं हुत्वा काले प्रातरग्निहोत्रं जुहोति । सन्तिष्ठते ज्योतिष्टोमो ज्योतिष्टोमः ॥

---

R. No. 5288.

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 238. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Svāmināthaśivācārya of Mylapore.

सकलागमसारसंग्रहः.

SAKALĀGAMASĀRASAMGRAHAḤ.

Foll. 1a—236a.

Similar to the work described under No. 5549 of the D.C.S. MSS., Vol. XI.

Complete.

Deals with the following subjects :—

| | |
|---|---|
| १. समुदायमासपूजाविधिः. | २२. पवित्रविसर्जनविधिः. |
| २. घृतस्नानविधिः. | २३. पुरकर्मविधिः. |
| ३. पुष्यमासपूजाविधिः. | २४. अमावास्योत्सवविधिः. |
| ४. घृतकम्बलविधिः. | २५. वारपूजाविधिः. |
| ५. फाल्गुनमासपूजाविधिः. | २६. प्रदोषपूजाविधिः. |
| ६. चैत्रमासपूजाविधिः. | २७. ग्रहणपूजाविधिः. |
| ७. वैशाखमासपूजाविधिः. | २८. अष्टमीपूजाविधिः. |
| ८. ज्येष्ठमासपूजाविधिः. | २९. महानिवेद्यविधिः. |
| ९. क्षीरलेपनविधिः. | ३०. शतकुम्भविधिः. |
| १०. नवोदकविधिः. | ३१. अष्टबन्धनविधिः. |
| ११. श्रावणमासपूजाविधिः. | ३२. जपपूजाविधिः. |
| १२. भाद्रपदमासपूजाविधिः. | ३३. भूमिप्रवेशपुरस्सरकृषिकर्मविधिः. |
| १३. तुलामासपूजाविधिः. | ३४. बीजावापनविधिः. |
| १४. कृत्तिकामासपूजाविधिः. | ३५. आग्रयणविधिः. |
| १५. दीपपूजाविधिः. | ३६. धान्यसंग्रहणविधिः. |
| १६. अरुणपूजाविधिः. | ३७. नवनैवेद्यविधिः. |
| १७. मार्गशीर्षमासोत्सवविधिः. | ३८. कोष्ठसंग्रहणविधिः. |
| १८. सङ्क्रमपूजाविधिः. | ३९. एकस्थानहोमविधिः. |
| १९. पुष्योत्सवविधिः. | ४०. धेन्वर्चना. |
| २०. वसन्तोत्सवविधिः. | ४१. ब्रह्मकूर्चविधिः. |
| २१. पवित्रारोहणविधिः | ४२. मन्त्रः. |

**Beginning:**

नानादिव्यागमेषु प्रचुरमहिम्ना रत्नजालं यथाब्धे-
स्तेन श्रीलोकनाथो विविधवरमहीना संश्रिता गुणाढ्याः ।१
सङ्ख्यावन्मण्डलीभिर्न्न . . लिखितमासपूजासमेता-
मित्थावज्ञायकादे जयतिमहितले किन्तु मासोत्सवोऽपि ॥१

अंशुमति—

मासपूजाविधिं वक्ष्ये श्रूयतां रविसत्तम ।
आयुरारोग्यमैश्वर्यं धनधान्यसमृद्धिदम् ॥
पुत्रश्रीकीर्तिदं नृणामपमृत्युविनाशनम् ।
भुक्तिमुक्तिप्रदं चैव सर्वकामफलप्रदम् ॥
विप्राणां च तपोवृद्धिस्तथा विद्याप्रदायकम् ।
क्षत्रियाणां जयं चैव परसेनापलायनम् ॥
लोके दुर्भिक्षनाशं च महामार्याश्च मोचनम् ।
वैश्यानां धनसंपत्तिः शूद्राणां कृषिलाभकम् ॥

कारणे—

सर्वपापहरं चैव सर्वशान्तिकरं शुभम् ।
सर्वशत्रुक्षयकरं सर्वयज्ञफलप्रदम् ।
सर्वव्याधिप्रशमनं सर्वश्रीकीर्तिवर्धनम् ।
श्रीकरं विजयं प्रोक्तं शेषाच्छत्रुविनाशनम् ॥

* * * *

सूक्ष्मतन्त्रे—

पुण्यकाले विशेषेण मासपूजां समारभेत् ।
एकमासे द्विनक्षत्रे द्वयोरपि च पूजयेत् ॥
एवं कालविधिः प्रोक्तो यागशालाविधिं शृणु ।

कारणे—

मण्टपं च ततः कुर्याद्भवनस्य चतुर्दिशि ।
अथवा त्वीशदिग्भागे मण्टपं चतुरश्रकम् ॥
मण्टपस्योक्तमार्गेण कल्पयेत्तु विचक्षणः ।
मध्ये वेदिं च सङ्कल्प्य मण्टपस्य त्रिभागतः ॥

* * * *

**Colophon:**

इति सकलागमसंग्रहे चिदम्बररहस्यं नाम मासपूजासमुदायविधिपटलः समाप्तः ॥

**End:**

हैं शुद्धप्रासादमाह । हौं हृत्प्रासादमाह । हीं कलालप्रासादमाह । ह्रीं कमलकुलप्रासादमाह । हां क्षमणप्रासादमाह । ह अन्तस्थप्रासादमाह । हं हं क्षूं लूं ब्रं श्रं अं ऊं कण्ठोपकण्ठप्रासादमाह ।

ओं हां हां शिवाय नमः मूलप्रासादमाह ।

अन्तस्स्थप्रासादमाह । औं आदित्यप्रासादमाह ।

हं सः आत्मप्रासादमाह । ओं हां हौं शिवाय नमः ।

प्रासादपञ्चाक्षर ।

नमःशिवायेति स्थूलसूक्ष्मम् ।
स्थूलं नमः शिवाय सूक्ष्मम् ।
नमोऽन्तं शिवाय इति शुद्धम् ।

Foll. 236*b*—237*b* give the contents of the work. Fol. 238 is left blank.

---

## R. No. **5289.**

**Paper.** 10½ × 9¼ inches. Foll. 86. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Nārāyaṇasvāmi Śāstri, Mylapore.

**योगजतन्त्रम्.**

YŌGAJATANTRAM.

Foll. 1*a*—85*b*.

This is one of the Śaivāgamas and is called Yōgajatantra or Yōgajāgama. The subjects dealt with herein are apparent from the headings of the Paṭalas given below.

Contains the following Paṭalas:—

| | |
|---|---|
| १. परिवारस्थापनविधिः. | ७. तालसंख्याविधिः. |
| २. आचार्यलक्षणविधिः. | ८. शूललक्षणविधिः. |
| ३. विघ्नेश्वरस्थापनविधिः. | ९. पवित्रारोहणविधिः. |
| ४. लिङ्गस्थापनविधिः. | १०. मण्डलविधिः. |
| ५. रत्नलिङ्गस्थापनविधिः. | ११. फलपाकविधिः. |
| ६. प्रतिमालक्षणविधिः. | १२. पञ्चाक्षरविधिः. |

१३. विभवनिश्चयोविधिः.
१४. नैवेद्यविधिः.
१५. अग्निकार्यविधिः.
१६ कुण्डलक्षणविधिः.
१७ शान्तिहोमविधिः.
१८. दीक्षालक्षणविधिः.
१९. प्रासादलक्षणविधिः.
२०. लिङ्गलक्षणविधिः.
२१. महोत्सवविधिः.
२२. महोत्सवविधिसमापनम् (incomplete).

**Beginning:**

कल्याणं कुरुतां कश्चित्करुणावरुणालयः ।
मयूरनगराधीशो मम नृत्तविनायकः ॥
परिवारस्थापनं वक्ष्ये यथावित्तानुसारतः ।
अन्तर्मण्डलके कुर्यात्परिवाराणि चाष्टसु ॥
अथवान्यप्रकारेण अन्तर्द्वारेऽथवा पुनः ।
अन्तर्मण्डलके स्थाप्य वृषभं पूर्वतो न्यसेत् ॥
एकद्वित्रिचतुर्दण्डपञ्चाष्टनवदण्डकम् ।
दशद्वादशमण्डान्तं वृषभं पीठकं स्थितम् ॥
पीठाग्रे दण्डकान्नीत्वा महोक्षं स्थाप्य . . वद्यदि ।
प्रासादार्धेन वा कुर्यात् सत्रिहस्तसमन्वितम् ॥
भित्त्यन्तरप्रमाणेन परिवाराः प्रकीर्तिताः ।
ऋषभं पूर्वतः स्थाप्य बुध्वा मानेयके न्यसेत् ॥
सप्तमातृगणान् वीरो दक्षिणे स्थापयेत्ततः ।
नैरृत्यां गणनाथं तु गजपृष्ठालयी कुरु ॥
वारुणे तु कुमारं स्यात् ज्येष्ठायां वायुदेशके ।
सौम्ये विष्णुं तथा स्थाप्य चण्डेशमीशतो न्यसेत् ॥
अन्तर्मण्डलके स्थाप्य तथा तत्रैव कल्पयेत् ।
अथाष्टपरिवाराणामभिहारे कृतं मया ॥

\- * * * *

**Colophon:**

इति योगजे प्रतिष्ठातन्त्रे परिवारस्थापनपटलः ॥

**End:**

कामिके—

ध्वजदण्डः पतिर्ज्ञेयः ध्वजस्थितवृषः पशुः ।
पाशो ध्वजस्य सूत्रं स्यात् त्रिपदार्थस्वरूपिणम् ॥
इच्छाज्ञानक्रियाशक्तिर्यष्टित्रयमिदं भवेत् ।
यष्टिदण्डं तु नादं स्याद्वलयं बिन्दुरेव च ॥
उत्सवस्य तु कर्तृत्वं ध्वजारोहणमुच्यते ।

Fol. 86 contains a table of contents of this work.

---

R. No. **5290.**

Paper. 10¼ × 8¼ inches. Foll. 188. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926-27 from a MS. of Śrīman Bhagavān Mahāpātro, Nārāyaṇapuraśāsanam, Dharakote, Ganjam district.

नैषधचरितटीका—हर्षहृदयम्.

NAIṢADHACARITAṬĪKĀ: HARṢAHṚDAYAM.

Foll. 1*a*—188*a*. Fol. 188*b* is left blank.

This is the further portion of the work described under R. No. 4486 ante, wherein see for the beginning. By Gōpīnātharatha, son of Dēvadatta and grandson of Nayaśarman and a descendant of Dharmāditya.

Contains the Sargas 12—22.

**End:**

मीमांसाम्भोधिमन्थाचलमुकुलवपुर्वादिमातङ्गसिंहो
धर्मादित्यद्विजेशो नयविनयगुरुस्सर्वशास्त्रार्थवेत्ता ।
योऽभूत्तत्प्रनप्तृस्तनयविरचिता या नलीये चरित्रे
टीका तस्यामयासीदुदितदिनमुखस्सर्ग एकोनविंशः ॥

* * * *

श्रीहर्षमिति । नवसाहसाङ्कस्य काशीराजस्य चरिते चम्पूकृतः तस्य महाकवेः कृतौ नलस्य चरिते महाकाव्ये द्वाविंशः सर्गो गतः । गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते । शशाङ्कस्य चन्द्रस्य सङ्कीर्तनं यत्र सर्गे ।

**Colophon:**

इति श्रीमदाचार्यगोपीनाथरथकविराजकृतौ हर्षहृदयाख्यायां नलचरितटीकायां द्वाविंशस्सर्गः ॥

R. No. **5291.**

Paper. 10½ × 9¼ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926-37 from a MS. of M.R.Ry. Nārāyaṇa Nambiyār, Munial, Shoranur, Malabar district.

हंससन्देशः.

HAṀSASANDĒŚAḤ

Foll. 1*a*—10*a*. Foll. 10*b*—12*b* are left blank.

A short poem written in imitation of Kālidāsa's Mēghasandēśa. Instead of a cloud in the Mēghasandēśa a Haṁsa (swan) is described as conveying the message, here. The author, whose name is not given mentions one Kṛṣṇapāda.

Incomplete.

**Beginning :**

दिव्यः श्रीमान् सुरतरुलतामण्टपे सिद्धयूनो
र्नर्मोलापं किमपि कलयन् कर्णयोः कालिदासः ।
मन्दं मन्दं सुरभिपवनं नन्दने सेवमानो
बन्धुस्मृत्या तरलहृदयः स्त्रीविषादप्युदारा ॥ १

ग्रस्तस्सोऽयं ग्रह इव परेणास्तधीरन्तरङ्गे
साक्षात्कुर्वंश्चटुलनयनां कण्ठसंश्लिष्टबाहुम् ।
किञ्चाहष्ट्वा भ्रमरवलितश्चाटुकारः पुरस्तात्
धाराबाष्पैर्गतिविहतये दुर्गपारादकार्षीत् ॥

मन्दाराणां सुमधुमसृणस्सिद्धमन्त्रैः परागै-
रन्धीकुर्वन्मधुकरवधूझङ्कृतैर्हन्त पान्थान् ।
भूयो भूयः क्षुभितहृदयं नोदयामास चैनं
मन्दो वायुस्तदपि न जहौ सोऽपि वाचंयमत्वम् ॥

पश्चादादौ शरदि वसुधां प्रस्थितं राजहंसं
कश्चित्पूर्णं विधुमिव पुरः पश्यतः पक्षपातात् ।
सद्यः प्रीत्या स्फुटतरतिजप्रश्नमास्तायमासी-
न्मन्दायन्ते सदुपगमने बाधयस्तन्महत्त्वात् ॥

* * * *

नत्वा देवं शिवमय शिवालङ्कृतस्वाङ्कभावां
कः प्रत्यूहस्तव निर्गमिषोः सिद्धयस्ताः करस्थाः ।
गन्तव्या ते तदनु महिता चित्पुरी सत्वरीता
सीमन्तोद्यच्छिखरकलिका शृतवाप्यास्सुगाप्याः ॥

* * * *

तत्रस्थानां द्विजकुलभुवां मौलिमाणिक्यभूयं
बिभ्राणास्ते रुचिरमहसः कृष्णपादा जयन्ति ।
एभिः क्लृप्ता सुरवरपुरीवोल्लसन्ती विशाला
विद्याशाला लसति सुमनस्सङ्घसंपूर्यमाणा ॥
अङ्गोपाङ्गच्छुरितनवलावण्यसन्दर्शनीया
श्रेयोमार्गानुपदिशति च श्रीमती या सवित्री ।
वात्सल्येन प्रतिपदमिमां लालयन्ती तनूजा-
मास्ते तत्र श्रुतीरिति जनाल्लप्स्यसे पृच्छ्यमानात् ॥

* * * *

**Colophon:**

इति हंससन्देशे पूर्वखण्डं समाप्तम् ।

**End:**

पियूषाहङ्कृतिनिगरणे व्यक्तमाधुर्यधुर्यां
वाणीमाध्वीं सदसि विबुधास्त्वत्प्रियस्यानुवेलम् ।
पायंपायं मदनसमराडम्बरे स्वर्वधूनां
रागोत्कर्षं नियतमधरे नो विदुः स्वान्तरङ्गे ॥
पृच्छत्यार्यः कुशलमनघे त्वां वधूरत्नमालां
त्वत्संयोगाद्धृदयनिहिताच्छश्वदुद्यत्प्रमोदः ।
नैवानन्दं वितरति दृशोर्नन्दनं सुन्दरीणां
धुष्टं कुट्टिम्विव सुमणितैर्मारमौर्वीविरावैः ॥

---

R. No. **5292.**

**Paper.** 10¾ × 9¼ inches. Foll. 14. Lines, 20 in a page. **Dēvanāgarī.** Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Nārāyaṇa Nāmbūdiri, Chirukkal, Painkulam Desam, Shoranur, Malabar district.

शृङ्गारसुधाकरः.

ŚṚṄGĀRASUDHĀKARAḤ.

Foll 1a—13b. Fol. 14 is left blank.

Same work as that described under R. No. 3692 ante The MS. described under R. No. 3692 ante is a fragment without the beginning and end and the MS. now under reference contains the portions wanting in that MS. Thus the two MSS. altogether make up the complete work.

**Beginning:**

व्यापारेण निजेन यन्मनसिजस्यार्थौ वरीयानिति
व्यक्तं वक्ति नृणां भवेष्विह सुखं सम्पादयन्नञ्जसा ।
यस्यार्थे मणिहारवल्लिरमलाप्यर्धेऽपि मुक्तालता
तद्दिव्यं मिथुनं तनोतु नितरां श्रेयांसि भूयांसि नः ॥

नान्द्यन्ते सूत्रधारः—सप्रश्रयमञ्जलिं बद्ध्वा,

सौवर्णचक्रजघनस्थलनृत्तधूत-
वक्षोजघट्टनविमृष्टघनाङ्गरागम् ।
माधत्पिकारवमनोहरकण्ठनालं
भूयान्मुदे मृगदृशां पुरुषायितं वः ॥

नेपथ्याभिमुखमवलोक्य, मारिष इतस्तावत् ।

प्रविश्य पारिपार्श्विकः—

जृम्भमाणकलशजलधिसंभूतडिण्डीरमण्डलापाण्डरकुण्डलीशकलेवरमृदुलपर्य-ङ्कविहितसंवेशस्य, चञ्चलासचयाञ्चितघनाघनघटहृतापाटच्चरकपिशकौशेयघटि-तापघनस्य मन्दहाससुन्दरेन्दिराननारविन्दस्यन्दमानमरन्दसन्दोहसमास्वादलो-लुपलोलम्बस्य महानीलमहोनीलमहीशयकुशेशयविरचित.

* * * *

उत्तरतो विलोक्य सहासम्,

बहुचन्द्रकाभिरामैर्बर्हस्तोमैर्हरिन्मणिश्यामैः ।
नृत्यति शिखावलोऽयं तापिञ्छौघे घनाघनभ्रान्त्या ॥

पश्चिमतो विलोक्य, स्मरणमभिनीय, सानन्दम्, या विद्युल्लतिका त्रिलोकीललनाललामायते ।

निस्तुलितनिदाघकिरणं शाखाश्रेण्या रथोपमश्रोण्या ।
अभिनवनिधुवनसाक्षी प्रदृश्यते मञ्जुकुञ्जमिदम् ॥

**End :**

चन्द्रो यथा चन्द्रिकया यथा चन्द्रेण चन्द्रिका ।
तथा युवां हि भूयास्तं संपृक्तौ सन्ततं मिथः ॥

इति हस्तेन हस्तं ग्राहयित्वा किं युवयोर्भूयः प्रियमुपहरामि । तथापीदमस्तु, भरतवाक्यम्—

प्रसादयन्तु सुधियां गलनालं मिलद्गुणाः ।
कवेर्ध्वन्यध्वनीनस्य सूक्तिमौक्तिकमालिकाः ॥

निष्क्रान्तास्सर्वे ।

**Colophon :**

समाप्तश्चायं भाणः ॥

---

R. No. **5293.**

Paper. 10¼ × 9¼ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Nārāyaṇa Nambiśan, Chirakkal, Painkulam Desam, Shoranur, Malabar district.

**ध्रुवचरितम्.**

**DHRUVACARITAM.**

Foll. 1*a*—17*a*. Foll. 17*b* and 18 are left blank.

A small poem describing the story of Dhruva as described in Purāṇas. The name of the author is not given.

Complete.

**Beginning:**

प्रणम्य वैकुण्ठपदारविन्दं विरिञ्चशर्वप्रमुखादिवन्द्यम् ।
औत्तानपादेश्चरितं ब्रवीमि पुराणकर्त्रा मुनिना कृतं यत् ॥
पुरा बभूवावनिपालवर्यः स्वायम्भुवाख्यस्य मनोस्तनूजः ।
उत्तानपादो जगतीति कश्चित् ख्यातिं लभन् निर्जरमुख्यरेष्टः ॥
स भूमिपालः प्रशशास धात्रीमनन्यपृथ्वीपतिशासनां ताम् ।
एकः पयोराशिविराजिसप्तद्वीपान्वितां देवपुरीमिवेन्द्रः ॥

* * * *

वसुन्धरायामिति रक्षितायामनेन राज्ञा सुभगे महिष्यौ ।
बभूवतुर्द्वे सुरुचिः सुनीतिरिति प्रसिद्धे भुवनेषु तस्य ॥

तयोस्तु पत्न्योः सुरुचिर्नृपस्य बभूव सत्कीर्तिरिवानभीष्टा ।
सा शार्ङ्गपाणिं शरणं गतेव लेभे सुपुत्रं ध्रुवनामधेयम् ॥

*   *   *   *

ध्रुवस्तु कस्मिंश्चिदहन्यवेक्ष्य तातस्य शुक्लांशुकसंवृतेऽङ्के ।
मुदा स्थितं भ्रातरमुत्तमं तं स्वयं समारोढुमगान्नृपाङ्कम् ॥
तदन्तिकस्था सुरुचिर्नृपाङ्कमारोढुमायान्तमवेक्ष्य रुष्टा ।
सासूयमेनं वचनं बभाषे सौन्दर्यदर्पेण निरस्तदेवी ॥

**End:**

ध्रुवलोकमिति ख्यातं हरिणा निर्मितं पदम् ।
समाप्य मात्रा सहितः प्रमुमोद महीपतिः ॥
मुनीश्वरेभ्यश्चरितानि विष्णोः शृण्वन्नघघ्नानि मनोहराणि ।
तच्चिन्तनानन्दपयोधिमग्नस्तत्राधुनापि प्रविभाति राजा ॥
आयुस्सन्तानविद्याधनमधुरिपुभक्तिप्रदं सर्वपाप-
क्लेशातङ्काहितघ्नं ध्रुवचरितमिदं कीर्तितं लोकरम्यम् ।
अल्पप्रज्ञेन नारायणपदयुगयोर्भक्तिभाजा मयैवं
संशोध्यालं भवद्भिः सकलबुधजना गृह्यतां धर्मशीलाः ॥
विसृष्टराज्यं मधुकाननस्थं ध्यायन्तमात्माङ्घ्रियुगं ध्रुवं यः ।
ररक्ष सन्तुष्टमनाः स नित्यं सर्वत्र सौख्यं विदधातु देवः ॥

**Colophon:**

इति ध्रुवचरितं समाप्तम् ॥

The scribe adds—

കൊല്ലം 1920-മത കക്കടമാസം ൨൧ ഉത്ര പ്രൊഷ്ഠപദയും പൂൎവ്വ
പക്ഷത്തിൽ ദ്വാദശിയും കൂടിയ ദിവസം എഴുതിത്തീൎന്നു.

---

R. No. **5294.**

Paper. [illegible] × 9¼ inches. Foll. 6. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Punnata-mana, Kottapadi, Malabar district.

पदसंख्याप्रदीपिकादीपिका.

PADASAṄKHYĀPRADĪPIKĀDĪPIKĀ.

Padasaṅkhyāpradīpikā is a work dealing with the number of Padas contained in each Aṣṭaka of the Ṛgvēda. The present work is a glossary on it by Dāmōdara.

Contains 1 to 3 Adhyāyas complete and a small portion of the fourth Adhyāya in the fifth Aṣṭaka.

**Beginning :**

पञ्चमस्याष्टकस्याथ पदसङ्ख्याप्रदीपिका ।
दीपिका लिख्यते येयो विष्णुर्दिशतु मङ्गलम् ॥

स्तुषे—उद्देशत्ताच्छिवे रागः पूर्वं प्रचन्तस्तुमिमानानावस्सङ्ख्यान्वय-
क्षतेः । ता भुज्युं धिम्वन्नं युधि भङ्गुरः । कल्यां प्रसूतस्सुकाविर्गोत्रि ।
अद्येत्यन्तः । कल्येत्यङ्कैनेशूतोशक्षिरक्षतेः । परिहृत्य द्रिषो निष्ठानन तस्यो-
र्ध्वमन्वयात् । ऊर्ध्वो वामङ्घ्रिनिष्ठो स्यान्तव्रतस्योत्तरेऽन्वयात् युवे कथांङ्घ्रो
निर्मलश्शुकः ।

* * * *

**Colophon :**

इति दामोदरविरचितायां पञ्चमस्याष्टकस्य प्रथमः ।

**End :**

त्वमिन्द्राङ्घ्र्यन्त ऋभुक्षा न वाजोर्थादिमङ्गतः ।
वयन्वङ्क्स्यामेत्यन्तो न ब्रह्मास्योर्ध्वमन्वयात् ॥
वासतीव श्वघं शम्भुरखण्डयत् उदूष्यः विशश्विरं श्रुतौ रागी ।
नूनमङ्घ्रिश्चतुष्पादो न वितस्योत्तरेऽन्वयात् ।
पूर्वं सुजानः पादान्तो नत्वा व्यत्यर्थपीडया ॥

**Colophon :**

इति पदसङ्ख्याप्रदीपिकादीपिका ॥

---

R. No. **5295.**

**Paper.** 10¼ × 9¼ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Paramēśvara Nambūdiri, Tiyanūr-mana, Vaniyankolam, Malabar district.

पदरत्नम्.

PADARATNAM.

Foll. 1a—34a. Fol. 34b is left blank.

Enumerates the words in each Varga of the Ṛgvēda. By Rāvaṇa

Complete.

**Beginning :**

श्रीशं प्रणम्य वाक्यानि वक्ष्ये शाकलवि . ना ।
ऋग्वेदप्रतिवर्गस्थं पदसङ्ख्यादिसिद्धये ॥
एकैकस्य तु वर्गस्य भवेद्वाक्यचतुष्टयम् ।
आद्येन व्यक्षरेष्वेषु परिसङ्ख्यायते पदम् ॥
द्वितीयेन विसर्गान्तं तृतीयेन त्ववग्रहम् ।
हलान्तं तु चतुर्थेन वर्गैः कटपयादिभिः ॥
पकारे परतो रावो रथोग्राजा ऋतो दिवः ।
इत्येतानि जठेजस्या दुष्पेति च पदद्वयम् ॥
नावग्रहेषु पठ्यन्ते न विसर्गेषु चाप्युत ।
अकाराद्यास्स्वरा ओनास्सप्त ह्रस्वा इहोदिताः ।
. . . प्रथमं वाक्यं पदसङ्ख्या शताधिका ॥

* * * *

द्विपदं पदसङ्ख्यायामेकमेव नयेत् पदम् ।
यत्र मान्तः श्लोकपादस्तत्र सूक्तं समाप्यते ॥
अध्यायादावृचां सङ्ख्या वाक्येन त्र्यक्षरेण तु ।
प्रदर्श्यतेऽग्निमीळेऽस्मिन्नृक्सङ्ख्यां वर्धयेदिति ॥

पदं सङ्ख्याग्निरक्षस्त्वच्छनान् समीची । अमी बृहत् । इन्द्रावरुणवामे तवा वायो । धवा ठेल्यार्थनाद्वारः । वायो चण्डमुग्रश्च न स्त्वयमश्विना ।

**End:**

च्योफ़् घयु सेचा वुत्वो तो खुडे वुवेची कुर्डो याढा । शा बूं पुतो शोव । व्यो स च्छिद् पीवा झसो तैणजुणषयाढे गीदैति च्छिाति वुगि ऋतं च नास्ति ।

रावणेन कृतं ह्येतत् पदरत्नं सतां हितम् ।
पठन् पदानि निश्चित्य परिपूर्णाशयो भवेत् ॥

**Colophon:**

इति पदरत्नं समाप्तम् ।

---

R. No. **5296.**

Paper. 10¾ × 9½ inches. Foll. 72. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Bhavadasa Nambūdiri, Mayanūr Desam, Ottapalam, Malabar district.

पाशुपतम्.

PĀŚUPATAM.

Foll. 1*a*—71*b*. Fol. 72 is left blank.

This is one of the Śaivāgamas explaining the religion of the Vīra-Śaivas. By Nandin.

Contains the Jñānakāṇḍa forming Paṭalas 1 to 4 without the beginning in the first Paṭala and the Yōgakāṇḍa forming Paṭalas 5 to 14.

**Beginning:**

आसने वस्त्रसंवीते निवेश्य शिवदेशिकम् ।
अष्टमूर्तिमयानष्टौ कृत्तिवासं निवेशयेत् ॥
पाद्यादिभिस्समभ्यर्च्य दत्वा तु घृतपायसम् ।
भक्तेषु तेषु दत्वार्घ्यं प्रदाय गुरुदक्षिणाम् ॥
वरयेत् कार्यमुक्त्वादौ शिवगायत्रिया गुरुः ।
मूर्तिपान् मूर्तिमन्त्रैस्तु नत्वा तान् वरयेत्पुनः ॥
क्ष्माम्भियजमानार्कवारीरणनिशाकराः ।
व्योमान्ता मूर्तयो ह्येता निर्दिष्टास्त्रिजगत्पतेः ॥
क्षितिर्वै धार्यते लोकाल्लोकाः क्षितिमयाः स्मृताः ।
सर्वगं क्षितिरूपं ते क्षितिमूर्ते नमोऽस्तु ते ॥

* * * *

**Colophon:**

इति पाशुपते नन्दिप्रोक्ते प्रथम(: पटलः) ।

. . . . . . . . . . . . . . . . . . . . ।
अध्यायं संप्रवक्ष्यामि शिवतत्त्वसमन्वितम् ॥

शिवः पशुपतिः प्रोक्तः पशवो ब्रण(वो) मताः ।
ते पाशबद्धाः पशवः पाशस्स्यादध्वसश्चयम् ॥
सिसृक्षुरखिलां सृष्टिमसौ देवस्सनातनः ॥

* * * *

शिवादेवाखिला सृष्टिरेवं जाता यथाक्रमम् ।
स एव सकलो ज्ञेयो न तदन्यन्महेश्वरात् ॥
सूक्ष्मा च निर्मला नित्या शान्ता निर्वाणरूपिणी ।
सा विजृम्भति सृष्ट्यर्थं शिवसंयोगकारणात् ॥
शक्तिशक्तिमतोर्योगात् त्रिधा भवति सा पुनः ।
इच्छाज्ञानक्रिया चेति बिन्दुनादकलामयी ॥
शक्तिशक्तिमतोर्योगात् ज्ञातश्चायं सदाशिवः ।
सदाशिवस्य देवस्य योगपीठं ततो भवेत् ॥
तस्य तस्य क्रमादन्तर्दीपाकारैः षडक्षरैः ।
दीपिते तु ततः शान्ते यत्तद्योगासनं विदुः ॥
परं सदाशिवं तत्त्वं विद्या सकलनिष्कला ।
सृष्टिरुत्पद्यते तस्मात् तस्मिन्नेव च लीयते ॥

* * * *

**Colophon:**

इति पाशुपते चतुर्थः पटलः । ज्ञानकाण्डं समाप्तम् ।

**End:**

ज्ञानानां परमं ज्ञानं गुह्यानां गुह्यमुत्तमम् ।
हितानां च हितं नान्यच्छास्त्रं पाशुपतं विदुः ॥
यथाहं श्रुतवान् पूर्वं साक्षाद्भगवतो मुखात् ।
तथेदमखिलं तन्त्रं मया तुभ्यं निवेदितम् ॥
नादीक्षिताय दातव्यं नासंवत्सरवासिने ।
नाभक्तायाविनीताय नान्यभक्ताय वा क्वचित् ॥
कृतज्ञाय विनीताय शुचये ब्रह्मचारिणे ।
वक्तव्या सर्वदाचार्यैरित्येवं शिवशासनम् ॥

गुप्तं हि स्थापयेत् सर्वमगुप्तं नाशयेन्नरः(म्) ।
तस्मात् सर्वप्रयत्नेन गोप्यमेतत्सदा बुधैः ॥

**Colophon :**

इति पाशुपते नन्दिप्रोक्ते योगकाण्डावसानिके चतुर्दशः पटलः ॥

---

R. No. **5297.**

**Paper.** 10¼ × 9¼ inches. Folî. 236. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1926–27 from a MS. of M.R.Ry. Ayyana Nāyanār Avargaḷ, Madras.

**वृषभनाथचरित्रम्.**
**VṚṢABHANĀTHACARITRAM.**

A poem in 20 Sargas describing the leading incidents in the life of Vṛṣabhanātha, the first among the Jaina Tīrthaṅkaras: by Sakalakīrti Bhaṭṭāraka.

Complete in 20 Sargas dealing with the following subjects :—

१. इष्टदेवतानमस्कारकरणमहाबलखगेन्द्रराज्यवर्णनम्.
२. महाबलभवान्तरललिताङ्गोद्भववर्णनम्.
३. वज्रजङ्घोत्पत्तिश्रीमतिवज्रदन्तभवान्तरवर्णनम्.
४. वज्रजङ्घश्रीमतिविवाहपात्रदानकरणवर्णनम्.
५. मन्त्रिपुरोहितसेनापतिश्रेष्ठिव्याघ्रसूकरनकुलवानरभवान्तरवज्रजङ्घरार्य-श्रीमतिचरार्यभोगभूमिसुखसम्यक्त्वलाभवर्णनम्.
६. श्रीधरदेवसुविधिराजाच्युतेन्द्रभववर्णनम्.
७. वज्रनाभिचक्रवर्तिसर्वार्थसिद्धिगमनवर्णनम्.
८. गर्भावतरणजन्माभिषेककल्याणवर्णनम्.
९. श्रीवृषभनाथराज्यवर्णनम्.
१०. वृषभनाथदीक्षाकल्याणवर्णनम्.
११. भगवत्केवलोत्पत्तिवर्णनम्.
१२. भगवत्समवसरणरचनावर्णनम्.
१३. भगवत्तत्त्वधर्मोपदेशवर्णनम्.
१४. भगवत्सहस्रनामस्तुतितीर्थविहारवर्णनम्.

१५. भरतेश्वरदिग्विजयवर्णनम्.

१६. भरतानुजदीक्षातपोबाहुबलिविजयकेवलोत्पत्तिवर्णनम्.

१७. भरतद्विजस्थापनस्वप्नफलवर्णनम्.

१८. सुलोचनाजयविवाहवर्णनम्.

१९. जयसुलोचनाभवान्तरवर्णनम्.

२०. वृषभनाथादिनिर्वाणगमनवर्णनम्.

**Beginning:**

श्रीमन्तं त्रिजगन्नाथमादितीर्थकरं परम् ।
फणीन्द्रेन्द्रनरेन्द्रार्च्यं वन्देऽनन्तगुणार्णवम् ॥
व्युच्छित्तौ कल्पवृक्षाणां यः प्रजापतिरूर्जितः ।
शशास कृपया दीनाः प्रजा असयादिकर्मसु ॥
इन्द्रेण योजितं देव्याः कूटनाटकमुद्रसम् ।
वीक्ष्याभूत् सहसा यो विरक्ताङ्गो भोगसंसृतौ ॥
यो जीर्णतृणवत्त्यक्त्वा जगत्साम्राज्यमद्भुतम् ।
स्वयं बुद्धः प्रवव्राज वनं गत्वा शिवाप्तये ॥
व्युत्सर्गं दधतो यस्य षण्मासान्तं सदुर्धरम् ।
पादाब्जावम्बुजैर्भक्त्यापूजयन् वनचारणाः

* * * *

जगाम शाश्वतं स्थानमनन्तसुखसागरम् ।
तमादितीर्थकर्तारं वृषभं वृषलाञ्छनम् ॥
अनन्तमहिमोपेतं स्तुवे प्रारब्धसिद्धये ।
येन प्रकाशितो धर्मो वर्ततेऽद्यापि संसृतौ ॥
स्वर्गमुक्तिकरो ह्येषा चतुरसङ्घैर्दयामयः ।
स्थास्यत्यग्रे च तावद्यावत्कालस्यान्तिमं दिनम् ।
तं सन्मतिं महावीरं नौमि तन्मतिसिद्धये ॥
शेषान् सर्वान् जिनाधीशान् धर्मसाम्राज्यदायकान् ।
त्रिजगन्नाथपूज्याङ्घ्रीन् भव्यबन्धूनमाम्यहम् ॥
श्रीमते विश्ववन्द्याय धर्मतीर्थप्रवर्तिने ।
जगतां बन्धवे श्रीसीमन्धरस्वामिने नमः ॥

त्रिकालविषयानर्हत्तृतीये द्वीपजान् वरान् ।
सर्वान् विश्वार्चितान् स्तौमि तद्गुणाप्त्यार्हतो गुणैः ॥

* * * *

वन्दे वृषभसेनाख्यमाद्यं श्रीगणनायकम् ।
दक्षं सर्वाङ्गपूर्वाणां रचने ज्ञानहेतवे ॥
श्रीगौतमं गणाधीशं चतुर्ज्ञानर्द्धिभूषितम् ।
धर्मराजस्य राज्यार्हमीडे सर्वार्थसिद्धये ॥
सर्वर्द्धिभूषितान् शेषान् महतो मुक्तिगामिनः ।
गणेशान् ज्ञानतीर्थोद्धरणे दक्षान् नमाम्यहम् ॥
सर्वान् श्रीकुन्दकुन्दादीनाचार्यांश्च महाकवीन् ।
विश्वतत्त्वहितान् नौमि परार्थाख्यसिद्धये ॥

* * * *

नमस्कृत्येति शास्त्रादौ विश्वमाङ्गल्यसिद्धये ।
सर्वविघ्नविनाशाय स्वेष्टदेवान् जिनादिकान् ॥
चरित्रं पावनं वक्ष्ये तीर्थकृद्वृषभेशिनः ।
स्वान्येषामुपकाराय ज्ञानतीर्थप्रवृत्तये ॥
श्रेयसश्चरमाङ्गस्य भरतेशस्य चक्रिणः ।
बाहुबल्यादिबन्धूनां पुत्राणां श्रीजिनेशिनः ॥
आद्यर्हतश्चरित्रेण समं वक्ष्यामि मिश्रितम् ।
निरवद्यं चरित्रं च पृथक् पृथक् पर्वादिभिः ॥
यच्चरित्रं पुरा प्रोक्तं महामतिविशारदैः ।
मया बाल्येन तत्प्रोक्तं कथं शक्यं प्रिये सताम् ॥
तथापि तत्प्रणामस्तवार्जिताद्भुतपुण्यतः ।
समासेन करिष्येऽहं स्तोकं सारं च तच्छ्रुतम् ॥

* * * *

अथास्ति प्रथमो द्वीपो जम्बूवृक्षोपलक्षितः ।
लक्षयोजनविस्तीर्णो सद्वृत्ताद्वीपाब्धिमध्यगः ॥
तन्मध्ये नाभिवद्भाति महामेरुस्सुदर्शनः ।
लक्षैकयोजनोत्तुङ्गश्चैत्यालयवनादिभिः ॥

पेरोः पश्चिमदिग्भागे विदेहोऽपरसंज्ञकः ।
क्षेत्रोत्तमो विभात्युच्चैर्धर्मतीर्थादिवर्धनैः ॥
विदेहा मुनयो यत्र भवन्ति तपसा सदा ।
तस्मात् सार्थकनामायं विदेहः प्रोच्यते जनैः ॥

* * * *

तस्याः खगाधिपैस्सेव्यः खगेन्द्रोऽतिबलाह्वयः ।
मुक्तिगामी महाभोगी सद्दृष्टिश्शीलवान् महान् ॥

* * * *

मनोहराभिधा तस्य पट्टराज्ञी प्रियाऽभवत् ।
पुण्यलक्षणसंपूर्णा धर्मकर्मकरा सती ॥
तयोर्महाबलाभिख्यः पुत्रोऽभूदतिसुन्दरः ।
रूपलावण्यकान्त्यादिगुणैर्दिव्यैरलङ्कृतः ॥

* * * *

**Colophon:**

इति भट्टारकश्रीसकलकीर्तिविरचिते श्रीवृषभनाथचरित्रे इष्टदेवतानमस्कारकरणमहाबलखगेन्द्रराज्यवर्णनं नाम प्रथमस्सर्गः ॥

**End:**

विश्वाग्र्यो विश्वधाता त्रिभुवनपतिभिस्सेवितोऽर्च्यस्तवार्थैः
र्ध्येयो यो योगिवर्गैश्शिवसुखगुणकृन्मुक्तिमुक्त्येकदाता ।
भव्यानां धर्मनेता समगुणजलधिर्विश्वतत्त्वप्रदीपो
न(?) च्छात्रादीश्वरो वो दिशतु शिवपथं मङ्गलं विश्वनाथैः ॥

एषा तेन महाचरित्ररचनाव्याजेन वन्द्यस्तुतो
ज्येष्ठोऽर्च्योऽखिलयोगिनां गुणनिधिस्तीर्थेशिनामग्रजः ।
बोधिं स्वात्मगुणा समाधिमसमं कर्मारिनाशं शिवं
पश्चात्तद्धारिकषायशत्रुविजयं मुदाच मेत्राचिरात् ॥

ये पठन्ति सुधियस्सुचरित्रं भक्तिरागगुणतोऽग्रजिनस्य ।
ते निहत्य बहुपापकरोगान् ज्ञानसद्गुणसुखानि लभन्ते ॥

* * * *

विश्वार्च्यं विश्ववन्द्यं भवचकितधियां दोषदूरं शरण्यं
पूर्णं भव्यैर्गुणैर्घैरिशवसुखजनकं लोकनाथैः सपूज्यम् ।
अज्ञानध्वान्तनिघ्नं दुरितचयहरं धर्ममूलं पवित्रं
. . . . . . . जयतु सकलकीर्त्या यावदास्ते सुधर्मः ॥

अष्टाविंशाधिकोऽमी षट्चत्वारिंशच्छतप्रमाः ।
अस्यार्षहच्चारित्रस्य स्युः श्लोकाः पण्डिता बुधैः ॥

Colophon:

इति भट्टारकश्रीसकलकीर्तिविरचिते श्रीवृषभनाथचरित्रे श्रीवृषभनाथादिनिर्वाणगमनवर्णनं नाम विंश[ति]स्सर्गः ॥

---

R. No. 5298.

Paper. 10¼ × 9¼ inches. Foll. 234. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926-27 from a MS. of Śrīman Bhagavan Mahāpatrō, Nārāyaṇapuraśāsanam, Dharakote, Ganjam district.

कृत्यकौमुदी.

KṚTYAKAUMUDĪ.

Foll. 1a—233a. Foll. 233b and 234 are left blank.

A digest on Dharmaśāstra by a person named Śrīkṛṣṇa-Bṛhaspati.

Contains the Kālavivēka complete and the Prāyaścitta incomplete.

**Beginning:**

श्रुतिस्मृतिपुराणोक्तकर्मौघान् यस्य तृप्तये ।
अनुतिष्ठन्ति विद्वांसस्तस्मै श्रीपतये नमः ॥

समुद्धृता वेदपयोधिजन्मनः स्मृतिप्रचन्द्रोः सुकृताब्धिवर्धिनः ।
धन्यातिसंवित्तिकुमुद्वती त्वहत्सुधा च कुर्यान्मम कृत्यकौमुदी ॥

अशोकषष्ठी(काष्टमी)—

चैत्रे मासि सिताष्टम्यां ये बहन्ति पुनर्वसौ ।
अशोकस्याष्टकलिका न ते शोकमवाप्नुयुः ॥

अत्राष्टमीपुनर्वसुयोग उत्तमः । भेदेषु प्रथमपतितस्य मुख्यत्वात् पर्व-स्यङ्गेषु तिथेः प्राधान्येन प्रधानत्वाच्चाष्टम्यामेव । अशोककलिकादानमन्त्रो यथा—

त्वमशोकहरामीष्ट मधुमाससमुद्भव ।
ददामि शोकसन्तप्तो मामशोकं सदा कुरु ॥

यद्येयं बुधवासरे तदा विशेषः—

चैत्रे मासि सिते पक्षे वृषलग्ने पुनर्वसौ ।
श्रौतस्मार्ते बुधाष्टम्यां वाजपेयफलं लभेत् ॥
अशोकैरर्चयेद्दुग्रमशोककलिकाः पिबेत् ।
उग्रं नृसिंहं . . . . . . . . . . . . . ॥

* * * *

**Colophon:**

इति श्रीकृतिबृहस्पतिविरचितायां कृत्यकौमुद्यां कालविवेकप्रकरणं समाप्तम् ।

अथ प्रायश्चित्तम्—

अथ प्रायश्चित्तार्थं परिषदुपस्थानम् । तत्र याज्ञवल्क्यः—

विहितस्याननुष्ठानादविहितस्य च सेवनात् ।
अनिग्रहादिन्द्रियाणां नरः पतनमृच्छति ॥
तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये ।

* * * *

**End:**

उत्तरच्छददानेन सर्वान् कामानवाप्नुयात् ।
वितानकप्रदानेन पुण्यं सुमहदश्नुते ॥
कुसुम्भनीलीरक्तादिश्वेतैर्वस्त्रैर्द्विजोत्तमाः ।
दत्वा भवति धर्मात्मा सर्वरोगविवर्जितः ॥
दुकूलकप्रदानेन वह्निष्टोमफलं लभेत् ।
सलोमानि च वस्त्राणि यः प्रयच्छति धर्मवित् ।
कृतानि वरवर्णानि सोऽश्वमेधफलं लभेत् ।
आरक्तान्यपि विप्रेन्द्र वासांस्याभरणानि च ।
दत्त्वैवं देवदेवाय वह्निष्टोमफलं लभेत् ॥
सुवर्णस्य प्रदानेन सर्वान् कामानवाप्नुयात् ।

## R. No. 5299.

Paper. 10¼ × 9¾ inches. Foll. 220. Lines, 20 in a page. Grantha. Good.

Transcribed in 1926-27 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Panavur-mana, Lakkiti, Malabar district.

प्रपञ्चसारसम्बन्धदीपिका.

PRAPAÑCASĀRASAMBANDHADĪPIKĀ.

Foll. 1a—219b. Fol. 220 is left blank.

A commentary on the Prapañcasāra attributed to Śaṅkara: By Uttamabōdha, disciple of Amaraprakāśa. The commentator salutes one Vaikuṇṭhavāṇi as his Guru.

Complete in 32 Paṭalas.

**Beginning:**

वन्देऽहं दक्षिणामूर्तिं सर्वविद्याप्रवर्तकम् ।
भुक्तिमुक्त्योः प्रदातारं सर्वज्ञं सर्वहृत्स्थितम् ॥
हृद्ध्वान्तमुत्सार्य विवक्षितार्थे करोति वाचं जगतां सरस्वती ।
त्वत्पादयोर्भक्तिरविच्युता या सा स्यात् प्रभूता मम जन्मजन्मनि ॥
नित्यं या त्रिगुणा गृणाति च वपुःप्याश्रित्य लोकानिमान्
सृष्ट्वा पालयते विनाशयति वा मुक्तिश्च यत्सिद्धितः ।
वन्दे तां शिवसन्तति गजवरप्रोत्फुल्लवक्त्राम्बुजां
विघ्नाद्रिप्रकरप्रणाशकरणायास्मत्प्रवृत्तेरहम् ॥
दृष्ट्वा यो दिव्यदृष्टिः कलियुगसमये मन्दभाग्या मनुष्या-
स्तस्मात्तन्त्रप्रपञ्चसुरयजनविधिर्मत्कृतो निष्फलस्स्यात् ।
इत्याविर्भूय पृथ्व्यां पुनरपि कृतवांस्तन्त्रसारं गिरीश-
स्तं वन्दे शङ्कराख्यं महिततममनःप्रार्थनीयार्थभूतम् ॥
यत्कटाक्षलवेनाहं प्राप्तवानीदृशात्मताम् ।
वैकुण्ठवाणिनामानं ब्रह्मभूतं गुरुं भजे ॥
परिणमन्ति चतुर्दश विद्याः स्वयमुपेत्य सदैव यमाद्दुः ॥
अमरराजसरस्वतिनामा गुरुरयं स्फुरतां मम चित्ते ॥
व्याख्याविशेषानालोक्य सारं सङ्गृह्य यत्नतः ।
प्रपञ्चसारसम्बन्धदीपिका रच्यते मया ॥

इह खलु प्रपञ्चागमसारसङ्ग्रहभूतं प्रपञ्चसाराख्यतन्त्रं प्रारभमाणो भगवान् भगवत्पादाचार्यः प्रारिप्सितपरिसमाप्तिप्रत्यूहविध्वंसनादिलाभाय संविद्रूपपरदेवतातत्त्वानुस्मृतिपूर्वकमाशीर्वादरूपमङ्गलाचरणं मुखतस्समाचरन् अन्वारम्भौपयिकं विषयादिचतुष्टयमप्यर्थात् सूचयति—अकचटतपयाद्यैरित्यनेन श्लोकेन। तत्र शाराणि शरीराणि शीर्यमाणतया तानि पुरुषाणां भोगायापवर्गाय चेश्वररूपेण ददाति प्रयच्छतीति मनुस्वरूपेण, दैप् शोधन इति शोधयतीति वा, सत्त्वज्ञानरूपेण द्यति खण्डयतीति वा शारदा। यद्वा शृणातेर्हिंसार्थस्यैतद्रूपम्। शारो लयमोक्षे सकारणस्य संसारस्य महाप्रलयादौ कार्त्स्न्यातस्योपासकानां निखिलपापजातस्य च शारं लयं ददातीति शारदा। सैषा वाग्देवता वः युष्माकमभ्युदयापवर्गार्थिनां चेतसोऽन्तःकरणस्य परिशुद्धिं वैमल्यं वितरतु प्रयच्छत्विति सम्बन्धः। शुद्धान्तःकरणवतामेव परमपुरुषार्थावतारादेषां प्रार्थना कृता।

* * * *

**Colophon:**

इति प्रपञ्चसारसम्बन्धदीपिकायां प्रथमः पटलः।

**End:**

ब्रह्मादीनां [illegible]

R. No. 5300.

Paper. 10¼ × 9¼ inches. Foll. 152. Lines, 20 in a page. Dêvanāgari. Good.

Restored in 1926–27 from a Library MS. described under No. 4907 of the D.C.S. MSS., Vol. X.

नयद्युमणिः.

NAYADYUMAṆIḤ.

Same work as that described under No. 4907 of the D.C.S. MSS., Vol. X. By Mêghanādari.

Complete.

---

R. No. 5301.

Paper. 10¼ × 9¼ inches. Foll. 136. Lines, 20 in a page. Dêvanāgari. Good.

Restored in 1926–27 from a Library MS. No. N. 21-1

मीमांसानयविवेकदीपिका.

MĪMĀMSĀNAYAVIVĒKADĪPIKĀ.

Same work as that described under R. No. 1552 ante. By Varadarāja, son of Raṅganātha and disciple of Sudarśanācārya. The author belongs to Kiḍambi family and Ātrêyagōtra.

Contains from the second Pāda of the first Adhyāya to the end of the same Adhyāya.

**Beginning :**

. . . . . . सन्दोहध्वान्तध्वंसनकर्मठम् ।
नमामि तुरगग्रीवं हरिं स . . . प्रदम् ॥
यन्नामग्रहमात्रेण क्षीयन्ते विघ्नहेतवः ।
तमेकदन्तं वन्देऽहं व . . . . . . . . ॥
. . . . . जद्वन्द्वनिरन्तरनिषेवणात् ।
विद्यानिधिः शिष्यगणो नमामस्तं सुदर्शनम् ॥
नमामि पितरौ वृद्धानपि कल्याणचेतसः ।
यत्प्रसादेन मूकोऽपि भवेद्वाचस्पते . . ॥
. . . . . . . . . चन्द्रादीन् समुपास्महे ।
पुरा गङ्गापगातीरे किडाम्बिकुलभूषणम् ॥

यज्ञद्रोणात् समभवत् प्रणतार्तिहराभिधः ।
ततः स . . . मात्रो . . . . बहुश्रुतः ॥
ततः श्रीरङ्गनाथस्य विपश्चित्सत्तमोऽजनि ।

तत्सूनुना वरदराजबुधाग्रिमेण
व्याख्यायते नयविवेक इति प्रबन्धः ।
सत्संप्रदाय . . . . . दीपिकेति
व्याख्या यदीयकृतिरादरणीयभावा ॥

तत्र त्रिपाद्यां गम्भीरं भवदेवसमीरितम् ।
अहं नयविवेकाख्यं व्याचक्षे दुर्ग्रहं परैः ॥
महान्ते यत्र . . . . . . . . . . . . . ।
तथापि सम्प्रदायोऽत्र दुर्लभस्संप्रकाश्यते ॥
अनेकविधदोषेण दुष्टा यद्यपि मत्कृतिः ।
अदोषयन्तु तां सन्तः कृपाबहुलचेतसः ॥
. . . . . . . . . . . . . . . . .
. . . . . . मतिपरिमाण . . . . ति यत् ।
. तानुद . . . स्येयं कृतिरपि तु मत्तुल्यमहिमा
जनिष्य . . . कोऽपि स्वकृत . . . . . . ॥

. . . . . . . त्तत्र गुरुणा . . . संक्षिप्त इति तदीयगम्भीराशयविवृतये स्वेन तत्र प्रपञ्चितम् । विपाद्या . . . . . स्वावत्युन्मुखशिष्यव्युत्पत्तये विस्तरप्रयासो गुरुग्रन्थ . . . . पायमात्रकथन . . . तदर्थं प्रतिपादकोऽयं ग्रन्थ इति श्रोतुमनस्स . . . . . . यागसमुत्थाप्रामाण्य निरसनरूपार्थैक्यप्रतिपादकस्त्रिपादीति समाहारनिर्देशः द्वादशलक्षणीतिवत् ।

ननु स्वत एव गुरुमतस्य निरवद्यत्वे व्यक्तत्वे च स्वकृतिव . . . श्रोतॄणां सुखग्रहणमपि स्वकृतेः प्रयोजनमेव ।

* * * *

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥

वायव्यं श्वेतमालभेत भूतिकामः . . . . सार्थवादकेषु विधिवाक्येषु चिन्ता—किं तान्यप्रमाणम्, उत प्रमाणमिति । तद . . मियं चिन्ता । वायुर्वै क्षेपिष्ठेत्यर्थवादस्य किं हेतुसमर्पकतयान्वयः, किं स्तुतिसमर्पकतया-

न्वयः । यदा हेतुसमर्पकतया तदा हेतुसापेक्षत्वादप्रामाण्यम् । यदा स्तुति-समर्पकतया तदा न . . . त्वात् प्रामाण्यमिति फलफलिभावः । एवं सर्वत्र फलफलिभाव ऊह्यः ।

* * * *

विधान्तरेण परमतमाशङ्कते अथेति । प्रामाण्यं तु वेदस्य सर्वस्यापि प्रथमपाद एव सिद्धम् । अधुना तु त्रिपाद्यां तदेकदेश . . . र्थवाद-मन्त्राणामुपयोगमात्रमुच्यत इत्यर्थः ।

* * * *

**Colophon :**

इत्यात्रेयस्य श्रीसुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोः वरदराजस्य कृतौ नयविवेकदीपिकायां प्रथमस्याध्यायस्य द्वितीयः पादः ।

**End :**

अध्यायार्थमुपसंहरति—अत इति ।

इत्थं त्रिपाद्यां भवनाथभावं निरन्तराभ्यासनिरस्तमोहः ।

प्राकाशयद् दीपिकयानवद्यमभीष्ट . . . . कुलो . . ॥

**Colophon :**

इत्यात्रेयस्य सुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोः वरदराजस्य कृतौ नयविवेकदीपिकायां प्रथमस्याध्यायस्य चतुर्थः पादः ॥

प्रथमाध्यायश्च समाप्तः ॥

---

## R. No. 5302.

Paper. 10¼ × 9¼ inches. Foll. 186. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1926–27 from the Library MS. described under R. No. 1552 ante.

### मीमांसानयविवेकदीपिका.

### MĪMĀṀSĀNAYAVIVEKADĪPIKĀ.

Same work as the above. By Varadarāja son of Raṅganātha. The author is said to have been proficient in Vaidya, Vyākarṇa and Jyautiṣa, as also in the Prabhākara school of Pūrvamīmāṁsā.

Contains the second Adhyāya complete.

**Beginning :**

वागीशो यस्य वदने यस्य लक्ष्मीश्च वक्षसि ।

यस्यास्ते हृदये संवित् तं नृसिंहमहं भजे ॥

प्रणमदमरमौलिश्रेणिरत्नप्रभाभि-
र्विकसितपदपद्मं पद्मयानन्तयापि ।
सह समुपनिविष्टं पद्मपीठे हयास्यं
निखिलविषयबोधोत्पादहेतुं नमामः ॥

विद्वदग्रिममुदग्रवैभवं तं सुदर्शनगुरुं वयं नुमः ।
यत्प्रसादलवतो गुरोर्मते शिष्यवर्ग इह सर्वतोऽधिकः ॥

रचयति वरदार्यो दीपिकां शास्त्रभेदं
महितनयविवेकोद्द्योतिनीं तीक्ष्णमेधाः ।
गुरुणि गुरुमतेऽपि ज्योतिषे शासनेऽपि
प्रथितविमलकीर्तिर्वैद्यके शब्दशास्त्रे ॥

टीकाकृतैव शास्त्रभेदलक्षणं सम्यगभिहितमिति स्वकृतिवैयर्थ्यमाशङ्क्याह—द्वितीयेनेति । द्वितीयेनाध्यायेन द्वितीयेन निबन्धेन यन्निबध्यते तदेव भवेन निरवद्यं परापादितदोषवर्जितं निगद्यत इत्यक्षरयोजना ।

**End :**

ततः किमित्यत्राह—उभयं त्विति । तदुभयमपि सारस्वते सत्रे द्वादशाहचोदकेन प्राप्तम् । तथापि किमित्यत्राह—तत्रैवेति ।

इत्थं व्यरीरचदुदग्रमतिप्ररोहः
श्रीरङ्गनाथतनयो वरदार्यमिश्रः ।
दुःसंप्रदायतिमिरापनयप्रवीणां
व्याख्यामुदारभवदेवकृतौ द्वितीये ॥

यद्यपि स्वमतिमान्द्यमहिम्ना व्याकृतौ बहुविधा अपि दोषाः ।
सन्ति सन्त इह तांस्तु सहन्तां गच्छतः स्खलनिरप्युचितेति ॥
एष बाल इति कौतुकबुद्ध्या मामकीनकृतिमाद्रियमाणाः ।
भूषयन्तु विबुधाः स्वयुतोक्तिर्दोषवत्यपि मतानुगुणैव ॥

यद्ध्यानमङ्गलनिरस्तसमस्तमोह-
स्वान्तस्तमस्तिरयति त्रिदशेन्द्रवन्द्यम् ।
मूकोऽपि वाजिवदनस्य हरेः सपर्या-
रूपेण तस्य रचिता नयदीपिकेयम् ॥

यदाचारो मानं श्रुतिपथजुषां वैदिकविधौ
यदुक्तिर्व्याकारो निगमवचसां सोपनिषदाम् ।
यदालोको लोके गुरुमतसमासत्ति(त्ति)फलकः
स जीयाद्वक्काख्यो गुरुरिह विपश्चित्परिवृढः ॥

**Colophon:**

इत्यात्रेय(स्य)श्रीसुदर्शनाचार्यशिष्यश्रीरङ्गनाथसूनोः वरदराजस्य कृतौ नयविवेकदीपिकायां द्वितीयस्याध्यायस्य चतुर्थः पादः ।

समाप्तोऽध्यायश्च ।

---

R. No. **5303.**

Paper. 10¼ × 9½ inches. Foll. 234. Lines, 20 in a page. Dēvanāgari. Good.

Restored in 1926–27 from the Library MS. described under R. No. 1552 ante.

**मीमांसानयविवेकदीपिका.**

MĪMĀṀSĀNAYAVIVĒKADĪPIKĀ.

Same work as the above. By Varadarāja.
Contains the third Adhyāya complete.

**Beginning:**

शुद्धस्फटिकसंकाशं जाह्नवीजन्मभूपदम् ।
अज्ञाननाशकं विष्णुं नमामि तुरगाननम् ॥
यस्याशु स्मृतिमात्रेण नष्टाः प्रत्यूहहेतवः ।
नमामि प्रणतामीष्टदायिनं द्विरदाननम् ॥
नमो गुरुभ्यस्तदनु भाष्यकारप्रभाकरौ ।
नाथं भवं निबन्धृंश्च चन्द्रादीन् समुपास्महे ॥
सुदर्शनगुरुं वन्दे गम्भीरगुरुदर्शनम् ।
यत्प्रसादेन शिष्याणां करस्थामलकायते ॥
आत्रेयकुलसंभूतो वरदार्यो बहुश्रुतः ।
विवेकहृदयज्ञाने दीपिकां निर्ममे सुधीः ॥

स्वकीयग्रन्थे श्रोतृजनाविलम्बितप्रवृत्त्यर्थं प्रकृतविषये स्वकृतिवैयर्थ्यपरिहारार्थं च विवरणनिबन्धनपञ्चिकाद्वयसम्यगर्थाज्ञानविनिवृत्तये युक्तीना-

मुक्तप्रत्युक्तरूपपरंपरात्मकव्याख्या शेषलक्षणे क्रियत इति कर्तृनामग्रहण-पूर्वकमाह—पञ्चिकाद्वयेति ।

**End:**

सवनीयशब्दोऽपि सवनीयपुरोडाशमुपस्थाप्य तद्द्वारा असवनीयमपि पुरोडाशं दण्डिवल्लक्षयितुं . . . . . . . . यात् ।

**Colophon:**

इति सुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोः वरदराजस्य कृतौ मीमांसानयविवेकदीपिकायां तृतीयस्याध्यायस्याष्टमः पादः ।

समाप्तश्चाध्यायः ।

---

## R. No. 5304.

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 179. Lines, 20 in a page. Dēvanāgari Good.

Restored in 1926-27 from the Library MS. described under R. No. 3883 ante.

### मीमांसानयविवेकदीपिका.

### MĪMĀṀSĀNAYAVIVĒKADĪPIKĀ.

Same work as the above. By Varadarāja.

Contains the Adhyāyas four (wanting the first 17 Sūtras) and six (wanting the first Pāda).

**Beginning:**

आश्रयिष्वविशेषेण भावार्थः प्रतीयेत ।

इहाश्रयिणः पदार्थाः स्वाहाकारस्विष्टकृदादय उदाहरणम् । तत्र चिन्ता—किं ते . . . . न्द्रस्य प्रतिपत्तिरूपदृष्टार्थत्व

* * * *

संगतिरित्याशङ्क्य संगत्यवान्तरसंगतिपूर्वपक्षबीजान्याह— यथेति ।

* * * *

**Colophon:**

इति श्रीमदात्रेय(स्य)सुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोर्वरदराजस्य कृतौ नयविवेकव्याख्याने चतुर्थस्याध्यायस्य प्रथमः पादः ।

**End:—**

इत्थं षष्ठे व्याक्रिया भावनाख्ये . ग्रन्थे स्वीयभावे कृतेयम् ।

एतां सन्तः संप्रदायोपगूढां शुद्धेनान्तश्चेतसा भावयन्तु ॥

औपदेशिकविचारतत्परे षट्के एवमधुनातनैः कृता ।
दीपिका नयविवेकगोचरा मानसान्धतमसापनोदनी ॥

**Colophon :**

इत्यात्रेयस्य सुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोः वरदराजस्य कृतौ नयविवेकदीपिकायां षष्ठाध्यायस्याष्टमः पादः ।

अध्यायश्च समाप्तः ।

---

R. No. **5305.**

Paper. 10½ × 9½ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1926–27 from the Library MS. described under R. No. 3883 ante.

**मीमांसानयविवेकदीपिका.**

**MĪMĀṂSĀNAYAVIVĒKADĪPIKĀ.**

Same work as the above. By Varadarāja.
Contains the seventh Adhyāya.

**Beginning :**

नत्वा शारदचन्द्रगौरवपुषं देवं तुरङ्गाननं
वन्दित्वा च सुदर्शनार्यचरणौ व्याख्यामहं प्रारभे ।
ख्यातोऽभीष्टदकोविदो भवकृते ग्रन्थे विवेकाभिधे
कार्यैकाधिकतार्थचिन्तनपरे षट्के तथैवोत्तरे ॥

तत्र तावदतिदेशतत्परे सप्तमे नयविवेकदीपिका ।
तन्यते वरदराजसूरिणा रङ्गनाथतनयेन धीमता ।

श्रुतिप्रमाणत्वाच्छेषार्थभेदे हि षट्कभेदः । तद्भेदे च संबन्धः ।

**End :**

सर्वोपपत्तिमती तृतीयां प्रकृतिं गवामयनं भविष्टम । तत्र च सर्वाह-
व्यापितया ज्योतिरादिगतत्वे दर्शनमुपपन्नमित्यर्थः ।

इत्थं विरचिता सम्यक्सप्तमे दीपिका मया ।
. . . . नातिदेशे संचरन्तां विपश्चितः ॥

**Colophon :**

इत्यात्रेयस्य सुदर्शनाचार्यशिष्यस्य रङ्गनाथसूनोर्वरदराजस्य कृतौ नयविवेकदीपिकायां सप्तमस्याध्यायस्य चतुर्थः पादः ।

अध्यायश्च समाप्तः ।

---

R. No. **5306.**

Paper. 10¼ × 8¼ inches. Foll. 39. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1926-27 from the Library MS. described under R. No. 3853 ante.

**मीमांसानयविवेकदीपिका.**

**MĪMĀMSĀNAYAVIVĒKADĪPIKĀ.**

Same work as the above. By Varadarāja.
Contains the eighth Adhyāya.

**Beginning :**

नत्वा हयास्यं कमलासहायं सुदर्शनाख्यं च गुरुं मुनीन्द्रम् ।
यतेऽष्टमेऽभीष्टदकोविदोऽहं व्याख्यां विधातुं भवनाथकृत्याम् ।

अथ विशेषलक्षणम् । अथेदानीं वृत्तमित्यादिभाष्यं सूत्रव्याख्यानमात्रपरम् । अत्र विशेषलक्षणमित्येतत् सूत्रमेव वृत्तवर्तिष्यमाणयोः संबन्धमाहेति टीकाकृतोक्तम् । तदनुभाषते—अत्रेति ।

**End :**

तत्र हेतुः—सामान्येति । यावत्संभवं सामान्योपदिष्टैः स्मृत्याचारप्राप्तैरेव धर्मैरङ्गत्योपकारसिद्धिकल्पनायाः कार्यत्वसिद्धेः कार्यत्वनिर्वाहादित्यर्थः ।

विशेषातिदेशे कृता दीपिकेयं यथासंप्रदायं मयाभीष्टदेन ।
गुरोश्चक्रमूर्तेः पदद्वन्द्वसेवानिरस्ताखिलान्तस्तमःसंचयेन ॥

**Colophon :**

इति श्रीसुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोर्वरदराजस्य कृतौ नयविवेकदीपिकायामष्टमस्याध्यायस्य चतुर्थः पादः ।

समाप्तश्चाध्यायः ।

## R. No. **5307.**

Paper. 10¼ × 9½ inches. Foll. 143. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1926–27 from a MS. described under No. 11481 of the D.C.S. MSS., Vol. XX.

किरातार्जुनीयव्याख्या—लघुटीका.

KIRĀTĀRJUNĪYAVYĀKHYĀ: LAGHUṬĪKĀ.

Same work as that described under No. 11481 of the D.C.S. MSS., Vol. XX. By Prakāśavarṣa.

Contains 1 to 18 Sargas complete, but wants the beginning in the 1st Sarga.

---

## R. No. **5308.**

Paper. 10¼ × 9½ inches. Foll. 262. Lines, 20 in a page. Grantha. Good.

Restored in 1926–27 from the Library MS. described under No. 13421 of the D.C.S. MSS., Vol. XXIV.

ज्यौतिषसंहितार्णवः.

JYAUTIṢASAṀHITĀRṆAVAḤ.

Same work as that described under No. 13421 of the D.C.S. MSS., Vol. XXIV. By Kadambēśvara, son of Viśvēśvaramahāprasādin.

Complete.

---

## R. No. **5309.**

Paper. 10¼ × 9¼ inches. Foll. 228. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1926–27 from the MS. described under No. 11454 of the D.C.S. MSS., Vol. XX.

अभिनवभारतम्.

ABHINAVABHĀRATAM.

Foll. 1a—227a. Foll. 227b and 228 are left blank.

Same work as that described under No. 11454 of the D.C.S. MSS., Vol. XX. By Narasappa Mantrin.

Wants the beginning in the 1st Sarga and breaks off in the 24th Sarga.

R. No. **5310.**

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 56. Lines, 20 in a page. Dēvanāgari. Good.

Restored in 1926–27 from the Library MS. described under No. 5585 of the D.C.S. MSS., Vol. XII.

कुलप्रदीपः

KULAPRADĪPAḤ.

Same work as that described under No. 5585 of the D.C.S. MSS., Vol. XII. By Śivānandācārya.

Contains Prakāśas 1 to 8 complete.

---

R. No. **5311.**

Paper. $10\frac{1}{2} \times 9\frac{1}{2}$ inches. Foll. 38. Lines, 20 in a page. Dēvanāgari. Good.

Restored in 1926–27 from a Library MS. described under No. 14257 of the D.C.S. MSS., Vol. XXV.

न्यायसिद्धान्ततत्त्वम्.

NYĀYASIDDHĀNTATATTVAM.

Foll. 1*b*—38*b*. Fol. 1*a* contains some miscellaneous passages on Nyāya.

Same work as that described under No. 14257 of the D.C.S. MSS., Vol. XXV. By Śrīnivāsa, grandson of Anantayadēśika of Naidhruvakaśyapagōtra.

Complete.

**Beginning:**

. . . . . सरसीरुहलग्नचित्तो
दैत्येन्द्रसूनुरतिलङ्घितविघ्नजातः ।
जातस्तमिन्द्रधवलं वरद . . . .
देवं . . . . . . . सततं भजामः ॥

श्रीमान्नैध्रुवकाश्यपान्वयसुधावाराशिधौ चन्द्रमा
नप्ताऽनन्तयदेशिकस्य तनयः श्री . . . . . . ।
ख्यातस्तर्कवितर्ककर्कशमहामोहान्धकारच्छिदा
दक्षो यस्य विपक्षपक्षदृषदां टङ्का . . . . . ॥

सिद्धान्तार्थपलेखातुरपरिमृदिता लोचनाहीश्वबुद्ध
प्रज्ञामध्याचलेन्द्रममथन . . . . . . . . . . भाजः ।
तर्कांकूपारमध्यादमृतमुदहरन् न्यायसिद्धान्ततत्त्वं
श्रीश्रीवासो . . . विबुध . . . . . . . . . णो वरिष्ठः ॥

पदार्थो द्विविधः भावोऽभावश्चेति, भावः षड्विधः, द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । तत्र द्रव्यं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि . . . . चतुर्विंशतिप्रकारा . . . रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारभेदात् । कर्म च पञ्चविधम् ।

* * * *

अत्र मीमांसकाः—सङ्ख्या सामान्यं नित्यमेव । अपेक्षाबुद्ध्यभावे द्वित्वादिप्रत्यक्षाभावस्तु अपेक्षाबुद्धेः व्यञ्जकत्वादेवोपपत्तेः, तस्योभयसिद्धत्वात्तदुत्पत्तावपि तस्य हेतुत्वे तवैव गौरवादिति प्राहुः ।

उत्तानास्तु चतुर्विंशतिगुणाः पञ्च कर्माणि षड्रसा इत्यादिव्यवहाराणामपेक्षाबुद्धिविशेषविषयकत्वेनावद्यकत्वात् द्रव्येऽपि द्वित्वादिव्यवहाराणामपेक्षाबुद्धिविषयत्वेनैवोपपत्तौ द्वित्वादिसङ्ख्यायां मानाभावात्, तद्धेतारेवेति न्यायादेकत्वमेव सङ्ख्या, न तु द्वित्वादिकमपीति वदन्ति ।

See under No. 14257 of the D.C.S. MSS., Vol. XXV for the end.

---

## R. No. 5312.

Paper. 10¼ × 9¼ inches. Foll. 78. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1926-27 from the Library MS. described under No. 13091 of the D.C.S. MSS., Vol. XXIII.

**चरकसंहिताव्याख्या—पञ्चिका.**

CARAKASAMHITĀVYĀKHYĀ—PAÑCIKĀ.

Same work as that described under No. 13091 of the D.C.S. MSS., Vol. XXIII. By Ācāryasvāmikumāra.

Breaks off in the second Adhyāya of the Sūtrasthāna.

R. No. **5313**.

Paper. 10½ × 9½ inches. Foll. 55. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1926-27 from the Library MS. described under No. 4468 of the D.C.S. MSS., Vol. IX.

**वादकुतूहलम्.**

**VĀDAKUTŪHALAM.**

Foll. 1*a*—55*a*. Fol. 55*b* is left blank.

Same work as that described under No. 4468 of the D.C.S. MSS., Vol. IX.

Incomplete.

---

R. No. **5314**.

Paper. 10½ × 9½ inches. Foll. 44. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1926-27 from the Library MS. described under No. 5569 of the D.C.S. MSS., Vol. XII.

**आनन्दतन्त्रम्, सव्याख्यानम्.**

ĀNANDATANTRAM WITH COMMENTARY.

Same work as that described under No. 5569 of the D.C.S. MSS., Vol. XII. The commentary is by Nṛsiṁhācārya of Maudgalyagōtra.

Breaks off in the fifth Paṭala.

---

R. No. **5315**.

Paper. 10½ × 9½ inches. Foll. 372. Lines, 20 in a page. Grantha. Good.

Restored in 1926-27 from a Library MS. described under No. 13058 of the D.C.S. MSS., Vol. XXII.

**शिल्पसंग्रहः**

**ŚILPASAṄGRAHAḤ.**

Foll. 1*a*—372*a*. Fol. 372*b* is left blank.

Bound in two volumes.

Same work as that described under No. 13058 of the D.C.S. MSS., Vol. XXII.

Incomplete.

## R. No. 5316.

Paper. 10½ × 9¼ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī Good.

Restored in 1926-27 from a Library MS. described under No. 12980 of the D.C.S. MSS., Vol. XXII.

अभिनयदर्पणम्.

ABHINAYADARPAṆAM.

Foll. 1*a*—15*b*. Fol. 16 is left blank.

Same work as that described under No. 12980 of the D.C.S. MSS., Vol. XXII.

Complete.

---

## R. No. 5317.

Paper. 10½ × 9¼ inches. Foll. 91. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1926-27 from a Library MS. described under R. No. 1786.

मीमांसानयविवेकः.

MĪMĀṀSĀNAYAVIVĒKAḤ.

Same work as that described under R. No. 1786.

Contains from the 2nd Pada of the 1st Adhyāya to the end of 2nd Adhyāya.

---

## R. No. 5318.

Paper. 10½ × 9¼ inches. Foll. 100. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1926-27 from a Library MS. described under No. 7939 of the D.C.S. MSS., Vol. XV.

प्रपञ्चसारविवरणम्.

PRAPAÑCASĀRAVIVARAṆAM.

Same work as that described under No. 7939 of the D.C.S. MSS., Vol. XV.

Contains the Paṭalas 1 to 22 and 24 to 35 and breaks off in the 36th Paṭala. The 22nd Paṭala wants the end and the 24th Paṭala wants the beginning.

---

## R. No. 5319.

Paper. 10½ × 9¼ inches. Foll. 78. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Bhavadasa Nambūdiri, Mundanattu-mana, Ottapalam, Malabar district.

वाक्यपदीयव्याख्यानम्—हेलाराजीयम्

VĀKYAPADĪYAVYĀKHYĀNAM: HĒLĀRĀJĪYAM.

Foll. 1a–78a. Fol. 78b is left blank.

Same work as that described under R. No. 2411 ante. By Hēlārāja. Contains the Samuddēśas 9 to 13 complete and 14th incomplete.

**Beginning**:

क्रियानन्तरं कालस्समुद्दिष्टः । स हि क्रियायाः परिच्छेदकः । तत्र दर्शनान्तरलक्षितं तावत्तत्स्वरूपमाह—

व्यापारव्यतिरेकेण कालमेके प्रचक्षते ।
नित्यमेकं विभुद्रव्यं परिमाणं क्रियावताम् ॥

परावरादिप्रत्ययलिङ्गो व्यापक एको मूर्तोऽन एवाकृतकत्वान्नित्यः कालः क्रियाव्यतिरिक्तो जन्मादिक्रियाद्वारेण भावपरिच्छेदको वैशेषिकैराम्नातः । स विस्तरतस्तत एवावगन्तव्यः ।

तस्य परिच्छेदकान्तरेभ्यः परिच्छेद्यभेदेन भेदमाह—

दिष्टिप्रस्थसुवर्णादिमूर्तिभेदाय कल्पते ।
क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिका ॥

* * * *

**Colophon**:

इति भूतिराजतनयेन हेलाराजेन कृते प्रकीर्णप्रकाशे कालसमुद्देशो नवमः ॥

**End**:

अभावशशविषाणादीनामपि वस्तुभूतोत्तरपदाश्रयं लिङ्गम्, नचान्यथाभावो वाश्रयत्वादभावे व्यवह्रियत इति व्यापकमिदं संस्त्यानप्रसवौ स्त्रीति लिङ्गत्रयं सिद्धान्तितमवगन्तव्यमित्यन्तपदसंस्कारनिमित्तभूताः पदार्थाः पर्यवसितविचाराः ।

**Colophon**:

इति भूतिराजतनयहेलाराजकृते प्रकीर्णप्रकाशे लिङ्गसमुद्देशस्त्रयोदशः ।

असमस्तपदगतानर्थान् विचार्य समस्तपदविषयान् विचारयितुं पञ्चप्रकारवृत्तिपदविचारः प्रस्तूयते—

* * * *

कुत्सितरूप इति । यथा वृषलरूपो दस्युरूप इति तद्यथा प्रशस्तत्वे-नोपलक्षितं निन्द्यते प्रशस्तक इति अपरिप्रशंसासाध्यारोपितप्रशंसा वा, कस्य चिद्धि प्रशंसा न परिसमाप्ता । अंशेन . . . तत्वात् कस्यचित्प्रशस्तस्य प्रशस्तत्वमारोप्यते, एवं कुत्साद्यभिचारसंभवात् । कुत्सितशब्दाद्वर्तमानकुत्सा-सम्बन्धमनवगतं द्योतयितुमुपप.

---

R. No. **5320.**

Paper. 10¼ × 9¼ inches. Foll. 84. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Nadādūr Vidvān Vēṅkaṭaśēṣācārya, Villur, Madura district.

सिद्धान्तरत्नावली.

SIDDHĀNTARATNĀVALĪ.

Foll. 1a—83b. Fol. 84 is left blank.

Same work as that described under No. 5063 of the D.C.S. MSS., Vol. X. By Vēṅkaṭācārya, disciple of Vēṅkaṭadēśika and son of Tātācārya.

Contains the Paricchēdas 3 and 4 complete.

**Beginning:**

रङ्गेशयः श्रुतिकिरीटरहस्यमात्त-
पादाब्जभक्तिरिति नः कथयन् कराभ्याम् ।
लीलोपधानपरजानुविलम्बिताभ्यां
भक्तिं परां दिशतु भव्यसमृद्धिहेतुम् ॥

उक्तं परिच्छेदयुगेन विश्वहेतुत्वमाश्रित्य हरेः परत्वम् ।
तदेव चास्मिन्ननवद्यविद्यावेद्यत्वमालम्ब्य निगद्यतेऽद्य ॥

मोक्षसाधनभूतास्स्युर्विद्या ब्रह्मैकगोचराः ।
अतस्तद्वेद्यता लक्ष्मीपतेर्ब्रह्मत्वसाधनम् ॥
तत्रादितः सूत्रभाष्यप्रणेतृभ्यां प्रकाशितः ।
न्यायः प्रकाश्यते सर्वविद्यावेद्यत्वगोचरः ॥

लिङ्गभूयस्त्वाद्धि बलीयस्तदपि नारायणानुवाकः कृत्स्नो ऽविषयः । संशयस्तु किं सर्वविद्यासु नारायण एवोपास्यः, उत दहरविद्यामात्रे, किं नारायणानुवाकेन सर्वविद्यानामुपास्यविशेषो निर्धार्यते, उत दहरविद्याया

एव, किमत्र दहरोद्देशेन नारायणत्वं विधीयते, उत सर्वविद्योपास्योद्देशेन? किं हृदयायतनत्वश्रवणमनुरोद्धव्यमुत लिङ्गभूयस्त्वमिति । तत्र हृदयायतनत्वानुरोधे दहरोद्देशेन नारायणत्वविधानात् नारायणानुवाकस्य दहर विद्यामात्रोपास्यविषयत्वात् तस्यामेव नारायण उपास्यः स्यादिति पूर्वपक्षे फलफलिभावः । राद्धान्ते तु लिङ्गभूयस्त्वानुरोधे सर्वोपास्योद्देशेन नारायणत्वविधानात् नारायणानुवाकस्य सर्वविद्योपास्यविशेषनिर्धारकतया सर्वविद्यासु नारायण एवोपास्य इति फलफलिभावः । तत्र पूर्वः पक्षः—

**End :**

तस्मात् सर्वनन्तव्योऽपि भगवानेव । तदेवं सर्वधर्माराध्यत्वमुक्तप्राप्यत्व-सर्वविद्यावेद्यत्वादिजगत्कारणत्वव्याप्तधर्मप्रतिपादकैः साक्षात्तत्प्रतिपादकैश्च वेदान्तैः परमकारुणिकत्वं भगवदसाधारणत्वेनावगम्यत इति जन्माद्यस्य यत इति सूत्रोदितं जगज्जन्मादिकारणं परं ब्रह्म भगवान् नारायण इति सिद्धम् ।

**Colophon :**

इति श्रीशठमर्षणकुलतिलकनिखिलवेदान्तविद्यानिषद्यायितहृदयकमल-श्रीताताचार्यनन्दनस्य हयवदनकरुणाकटाक्षवीक्षालब्धपदवाक्यप्रमाणसारस्य-सारस्य श्रीमन्निगमशिखरगुरुचरणसरसिरुहचञ्चरीकायमाणमानसस्य श्रीवेङ्कट देशिकपादसेवासमधिगतश्रीमच्छारीरकमीमांसाभाष्यहृदयस्य वेङ्कटाचार्यसज्वनः कृतिषु सिद्धान्तरत्नावल्यां तुरीयः परिच्छेदः ।

ताताचार्यो यस्य तातः क्षितिपतिमकुटीराजिनीराजिताङ्घ्रि-
माता श्रीवेङ्कटाम्बा निखिल . . . . गण्यपुण्यप्रभावा ।
तेनानेकप्रबन्धप्रकटितयशसा वेङ्कटार्येण क्लृप्ता
शुद्धा सिद्धान्तरत्नावलिरिह विदुषां श्रेयसे भूयसेऽस्तु ॥
गुणसान्द्रं गुरुचन्द्रं यतिराजमुनिं नमामि यद्दीक्षा ।
रक्षा जगतां साक्षात् सद्रत्नावलिमिमामदित . . ॥
जयति यतिसार्वभौमो जयति स निगमान्तदेशिको धन्यः ।
स जयति च गुरुवरेण्यस्तनयो यस्याहिशैलमौलिमणिः ॥

इति सिद्धान्तरत्नावली समाप्ता ॥

## R. No. 5321.

Paper. 10½ × 9¼ inches. Foll. 38. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Svāminātha Śivacaryar of Mylapore.

विजयोत्तरसंहिता.

VIJAYOTTARASAMHITĀ.

Foll. 1a—37b. Fol. 38 is left blank.

A treatise on Śaivāgama dealing with the following subjects:—

१. शिवार्चनपटलः
२. सकलाराधनपटलः.
३. अङ्कुरार्पणपटलः.
४. भक्तोत्सवपटलः.

Complete.

**Beginning:**

इष्टुर्विधीयते शम्भोस्सामान्येतद(र)रूपिणे ।
राजा द्रव्यपरित्यागे जीवमुद्दिश्य भावतः ॥
सा च लिङ्गाप्रयागेषु शिवेन परिभाषितः ।
लिङ्गस्य गुरुमूर्ति च वह्निर्वा मन्त्रसंस्कृतः ॥
शिवविद्याधिपा सार्धं शिवेद्यर्थविवेकलम् । !
लिङ्गाग्निशिवविद्यासु तुल्यप्रीतीनिव स्थितिः ॥ !
स्थण्डिले मण्डलं यद्वा यन्मूर्तिरपरं च यत् ।
युक्ते स्नानतया सर्वं शम्भोर्मूर्तिरनिन्दिना ।
मूर्तिस्तु द्विविधा शम्भोः सात्मिका च निरात्मिका ।
नासामन्या परा मूर्तिर्नित्या विज्ञानरूपिणी ॥
तथा नित्यं शरीरीशः पैर्विज्ञातनुरिशवः ।
लिङ्गाद्यन्यतमां मूर्तिमेवं निश्चित्य साधकः ॥
प्रत्यहं पूजयेद्देवं पञ्चशुद्धिपुरस्सरम् ।
आत्मस्थानगुणाधारद्रव्यमन्त्रविशुद्धयः ॥
शुद्धयः पञ्च मन्त्रोक्तविद्योच्यन्ते क्रमेण तु ॥

* * * * *

अन्तर्यागं ततः कुर्याद्धृदये भावभक्तिभिः ।
आसनं मनसा कृत्वा शिवमूर्तिद्वयं ततः ॥

आवाह्य च शिवं सा(चग(त्म)मर्घ्यपाद्यादि कल्पयेत् ।
पञ्चामृताभिषेकाद्यैर्दिव्यगन्धानुलेपनैः ॥
दुकूलपट्टमेवाद्यैर्वासोभिर्विविधैरपि ।
हेमरत्नमयैः पुष्पैर्धूपदीपपवित्रकैः ॥
नैवेद्यैर्विविधैर्देवं साधारं ध्यायपयजेत् ।
नास्ति . . न्तथा कृत्वा सिद्धं सन्तर्पयेद्द्विजान् ॥

* * * *

**Colophon:**

इति श्रीविजयोत्तरे त्रिसहस्रसंहितायां शिवार्चनपटलस्समाप्तः ।

**End:**

उत्सवान्ते स एव स्यात् कर्तृवाञ्छावशेन तु ।
दमनारोहणादौ तु मासपूजार्थमुत्सवम् ॥
विधायकस्तुतं पूर्वं रात्रौ . वाद्य एव वा ।
आचार्यपूजा कर्तव्या वस्त्रहेमाङ्गुलीयकैः ॥
निन्दाति पञ्चनिष्कान्तं तद्द्विधा दक्षिणा भवेत् ।
यागोपयुक्तं यद्द्रव्यं देशिकाय प्रदापयेत् ॥
एवं महोत्सवं कुर्याच्छ्रद्धापूर्वं नरोत्तमम् ।
त्रिसप्तकुलमुद्धृत्य शैवं स्थानमवाप्नुयात् ॥

**Colophon:**

इति विजयतन्त्रे त्रिसहस्रिकायां संहितायां महोत्सवपटलः समाप्तः ।

The scribe adds—

मयूरपुरविद्यमानस्वामिनाथशिवाचार्यसकाशादागतं पुस्तकं दृष्ट्वा लिखित-
मिदम् ।

---

R. No. **5322.**

Paper. 10¼ × 9¼ inches. Foll. 80. – Lines, 20 in page. Grantha. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Professor A. Cakravarti Avargal, M.A., Presidency College, Madras.

हरिवंशकथासंग्रहः.

## HARIVAMŚAKATHĀSANGRAHAḤ.

A treatise narrating the story of the Harivaṁśapurāṇa in accordance with the Jaina religion: by Abhimanyuśreṣṭhin.

Complete in five Prakaraṇas dealing with the following subjects:—

१. पीठिकाप्रकरणम्.
२. वासुदेवविजयविहरणप्रकरणम्.
३. हरिप्रद्युम्नकुमारोदयप्रकरणम्.
४. हरित्रिखण्डसिद्धिवर्णनम्.
५. नेमिनाथपरिनिर्वाणप्रकरणम्.

**Beginning:**

श्रीमते नेमिनाथाय केवलज्ञानमूर्तये ।
स्याद्वादवादिने नित्यं नमोऽस्तु भवहारिणे ॥
बलोपेन्द्रनतं नेमिं प्रह्वीकृत्य गुणार्णवम् ।
हरिवंशपुराणस्य समासो वर्ण्यते मया ॥
जैनसेनसमुद्रस्य पारं गन्तुं न पार्यते ।
भव्यैः कालप्रभावेन तदर्थः श्रुतिसौन्दरः ॥
लम्बकञ्चुकवंशेऽसौ जातो जनमनोहरः ।
शोभनाङ्गः शुभाङ्गाख्यो देवकी यस्य वल्लभा ॥
तस्यात्मजः कलावेदी विशेषगुणभूषितः ।
रामचन्द्राभिधः श्रेष्ठी मल्हाणीवनिताप्रियः ॥
तत्सूनुर्जनविख्यातः शीलपूजाद्यलङ्कृतः ।
अभिमन्युर्महादानी तत्प्रार्थनवशादसौ ॥
शृण्वन्ति य इमं भक्त्या भव्याः सुकृतमूर्तयः ।
प्राप्नुवन्ति महाभोगांस्ततो निर्वाणमच्युतम् ॥
शुभवाक्यप्रबन्धेन तथा सङ्कलनात्मना ।
प्रोच्यते जैनसेनार्थः शृण्वन्तु भुवि कोविदाः ॥

इह जम्बूद्वीपभरते मगधदेशे विलासिनीललाटतिलकावभासिराजगृहपुरवरेश्वरः प्रचण्डशात्रवत्रिककुम्भिकुम्भविदारणप्रवणसिंहः श्रेणिको नाम राजा । सोऽग्रमहिषीचेलिन्या सहास्थानमण्टपमण्डनीभूतरत्नसिंहासनारूढो वरपुरुषवधूजननेत्रकैरव पूजितो यावदास्ते तावदृषिनिवेदकेनागत्य सर्वाङ्गालिङ्गितभूतलेन विज्ञप्तः । देव! सुरासुरखेचरभूचरादिस्तुतपादपीठः संसारसागरगर्तावर्तमग्नजनदत्तावलम्बः श्रीवीरजिनो विपुलाद्रौ स्थित इति । स श्रुत्वा आसनादुत्थाय सप्तपदानि संमुखं गत्वानम्य प्रमोदनिद्रप्रबोधकार्यानन्दभेरीरवपूरिताखिलाशः समस्तजनेन सानन्दो वन्दितुं गतः ।

समवसरणावनिं प्राप्य संसारदुःखदावानलसन्दग्धभव्यजनदा(ताप)हारिजिन-मवलोक्याभ्यर्च्य तत्स्तुतिगङ्गासरित्प्रवाहेण प्रक्षालितानन्तानुबन्धिक्रोधमा-नमायालोभमिथ्यात्वसम्यग्मिथ्यात्वसम्यक्प्रकृतिरूपसप्तप्रकृतिमलकलङ्कक्षालितस-म्यग्दृष्टिर्भूत्वा गणधरादीनभिवन्द्य स्वकोष्ठे उपविष्टः । दिव्यध्वनिश्रवणा-मृतपानानन्तरं राजा पृच्छति स्म गौतमम् । भगवन् हरिवंशः कैश्चिदेवं प्रतिपाद्यते । हरिर्नित्योऽपि दशावतारान् समायातः कथम् ।

मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः ।
रामो रामश्च रामश्च बुद्धः कल्की च ते दश ॥ इति ।

तथार्जुनस्य सारथिश्चाभूत् । युधिष्ठिरस्य दूतोऽपि । राधिकानाम-गोपवध्वा सह पौराधारिकोऽस्य जनि । षण्मासान् जलधौ स्वपिति । तथा पाण्डवाः पञ्चापि यमादीनां पुत्राः । कर्णस्सूर्यजः कर्णान्निर्गतः, द्रौपदी पञ्चानां वनितापि महासती । अभिमन्युर्गर्भे स्थित्वा शृणोति । अर्जुनेन मायासूकरनिमित्तं महेश्वरो जितः । द्रोणः कलशाज्जातः । भूरिश्रवा भस्मनि जात इत्यादि परमार्थः कथमिति । श्रुत्वा गणभृदाह—हे निर्जितारातिमण्डल शृणु तद्वृत्तान्तम् । तद्यथा—अस्मिन् भारते उत्सर्पिण्यवसर्पिण्यौ कालौ वर्तेते । तयोश्च प्रत्येकं षट् कालास्स्युः । तत्रापीयमवसर्पिणी अस्या-माद्यः सुष्मः सुषमः कालश्चतस्रः ।

* * *

**Colophon:**

इति हरिवंशपुराणसमासे अभिमन्युश्रेष्ठिनामाङ्किते पीठिकाप्रतिपादकं प्रथमं प्रकरणम् ।

**End:**

समुद्रविजयादीनां मध्ये केचन मोक्षं गताः । केचन सौधर्मप्रभृति सर्वार्थसिद्धिपर्यन्तं गता आर्यिका सौधर्माद्यच्युतान्तरं गताः । नेमिनाथ-षट्पञ्चाशद्दिनहीनसप्तशतवर्षाणि धर्मोपदेशानन्तरं मासमेकं योगनिरोधं कृत्वा दण्डकवाटप्रतरलोकपूरणाख्यसमुद्घातपूर्वकमूर्जयन्तशिखरिशेखरे निर्वाणमवाप । ततः पुरन्दरादयः परिकल्याणपूजां विधाय स्वलोकं गताः ॥

**Colophon:**

इति हरिवंशपुराणसमासे अभिमन्युश्रेष्ठिनामाङ्किते नेमिनाथपरिनिर्वाण-वर्णनं पञ्चमप्रकरणं समाप्तम् ।

यादवान्वय विभूषणीभवा दानपूजनविनोदचेतसा ।
कारितेयमभिमन्युना मुदा स्वान्वयश्रवणहेतुका कथा ॥
यदुक्तं जिनसेनेन सूरिणा भव्यबन्धुना ।
तन्मह्यं रामचन्द्रेण संक्षेपेणैव भाषितम् ॥
यावद्रत्नाकरो लोके यावन्मेरुसुदर्शनः ।
तावत्तायं समासो हि तिष्ठतादर्हदाश्रये ॥
लम्बकञ्चुकवंशस्य मण्डनो भव्यपुङ्गवः ।
अभिमन्युर्गणी लोके वर्धतेष्वनादिभिः ॥

R. No. 5323.

Paper. 10¾ × 9¾ inches. Foll. 176. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Svāminathaśivācaryar of Mylapore.

सन्तानसंहिता.
SANTĀNASAMHITĀ.

Foll. 1a—174a. Foll. 174b—176a give the contents of the work. Fol. 176b is left blank.

A treatise on Śaivāgama dealing with the construction of temples and the procedure connected with the consecration of the image of Śiva in temples for purposes of worship.

Contains the following Paṭalas—

१. प्रश्नपटलः.
२. लिङ्गोत्पत्तिविधिः.
३. कर्षणविधिः.
४. प्रथमेष्टकाविधिः.
५. प्रासादलक्षणविधिः.
६. मूर्धेष्टकाविधिः.
७. शिलाग्रहणविधिः.
८. प्राकारविधिः.
९. मण्टपविधिः.
१०. ब्राह्मपीठविधिः.
११. परिवारविधिः.
१२. वृषभलक्षणविधिः.
१३. प्रतिमालक्षणविधिः.
१४. अक्षरकल्पविधिः.
१५. मन्त्रोद्धारविधिः.
१६. शिवलिङ्गप्रतिष्ठाविधिः.
१७. चरलिङ्गप्रतिष्ठाविधिः.
१८. प्रतिमास्थापनविधिः.
१९. शूलस्थापनविधिः.
२०. प्रासादस्थापनविधिः.
२१. ऋ(वृ)षभस्थापनविधिः.
२२. अग्निप्रतिष्ठाविधिः.

२३. मातृप्रतिष्ठाविधिः
२४. विघ्नेशस्थापनाविधिः.
२५. कुमारस्थापनविधिः
२६. ज्येष्ठास्थापनविधिः.
२७. दुर्गास्थापनविधिः
२८. आदित्यस्थापनविधिः.
२९. चण्डेशस्थापनविधिः
३०. विष्णुस्थापनविधिः.
३१. आगमप्रतिष्ठाविधिः
३२. गौरीप्रतिष्ठाविधिः
३३. मानुषस्थापनविधिः.
३४. सहस्रकलशस्थापनविधिः
३५. पञ्चाशत्स्नपनविधिः
३६. पञ्चाशदधिकशतद्वयस्नपनविधिः
३७. अष्टोत्तरशतस्नपनविधिः
३८. एकाशीतिस्नपनविधिः.
३९. एकोनपञ्चाशत्स्नपनविधिः
४०. पञ्चविंशतिस्नपनविधिः.
४१. नवकुम्भविधिः
४२. पञ्चकुम्भस्थापनविधिः
४३. स्नानविधिः.
४४. भस्मस्नानविधिः
४५. कायम्यासविधिः.
४६. अर्चनाविधिः.
४७. मुद्रालक्षणविधिः.
४८. नैवेद्यविधिः
४९. अग्निकार्यविधिः
५०. कुण्डलक्षणविधिः.
५१. नित्योत्सवविधिः.
५२. उत्सवविधिः
५३. प्रायश्चित्तविधिः.
५४. आचार्यलक्षणविधिः.
५५. पाषाणप्रत्ययविधिः.
५६. परशुप्रत्ययविधिः.
५७. सत्यप्रत्ययविधिः
५८. अक्षतस्याशनविधिः.
५९. कुम्भसर्पविधिः.
६०. रक्षादीपविधिः.
६१. कृत्तिकादीपविधिः
६२. शीतकुम्भविधिः
६३. अद्भुतशान्तिविधिः
६४. दीक्षामण्डलविधिः.
६५. शिवदीक्षाविधिः.
६६. पवित्रारोहणविधिः

**Beginning :**

कैलासपीठमध्यस्थं हरं सुरवरार्चितम् ।
यक्षैश्च ऋषिभिस्सार्धं देवैर्भूतैरनेकशः ॥
प्रणिपत्य जगन्नाथं देवी वचनमब्रवीत् ।
अष्टाविंशतिभेदेन शैवभेदं विधीयते ॥
इदानीं श्रोतुमिच्छामि सन्तानसंहितां पराम् ।
ज्ञानश्च(च)र्याक्रियायोगं ब्रूहि मे परमेश्वर ॥
अस्मिंस्तन्त्रे च देवेश लिङ्गोत्पत्तिः कथं प्रभो ।
कर्षणस्य विधिः को वा प्रथमेष्टाविधिः कथम् ॥

प्रासादस्य प्रमाणं किं मूर्धेष्टकाविधिः कथम् ।
शिलाग्रहणकं देव तस्य . . . . . ॥
. . . . . कथं देवस्य पादशिला कथम् ।
प्राकाराणां विधिः को वा मण्टपस्य कथं प्रभो ॥
बाह्यपीठप्रमाणं किं परिवारालयः कथम् ।
ऋषभे लक्षणं किन्तु प्रतिमालक्षणं कथम् ॥
अक्षरं कल्पकं ज्ञेयं मन्त्रोद्धारं(रः) कथं प्रभो ।
शिवलिङ्गप्रतिष्ठा च चरलिङ्गस्थापनं कथम् ॥
प्रतिमास्थापनं को वा त्रिशूलस्थापनं कथम् ।
प्रासादस्य प्रतिष्ठा का ऋषभस्थापनं कथम् ॥
विनायकप्रतिष्ठा का कुमारस्थापनं कथम् ।
ज्येष्ठायाः स्थापनं किं वा दुर्गायाः स्थापनं कथम् ॥
आदित्यस्थापनं किं वा चण्डेशस्थापनं कथम् ।
नारायणप्रतिष्ठा का आगमस्थापनं कथम् ॥
गौरीप्रतिष्ठा का देवमानुषस्थापनं कथम् ।
स्नपनं नवविधं किन्तु स्नानमस्यविधिः कथम् ॥
कायन्यासः कथं देव अर्चनार्चा कथं प्रभो ।
अग्निकार्यं कथं देव कुण्डानां लक्षणं कथम् ॥
नित्योत्सवः कथं देव उत्सवस्य विधिः कथम् ॥
प्रायश्चित्तं कथं देव आचार्यस्य च लक्षणम् ।
पाषाणप्रत्ययः किं वा परशुप्रत्ययः कथम् ॥
कथं च प्रत्ययं सत्यमक्षताशनकं कथम् ।
कुम्भसर्पः कथं देव रक्षादीपः कथं प्रभो ॥
कृत्तिकादीपकं कर्म शीतकुम्भः कथं प्रभो ।
अद्भुतानां च शान्तिस्तु दीक्षामण्टपकं कथम् ॥
दीक्षाभिषेचनं किंच पवित्रारोहणं कथम् ।
नास्तिचक्रं कालचक्रमाधाराधेयकं कथम् ॥
सर्वतत्त्वविभेदं च सर्वं कथ मम(य मे) प्रभो ।
शर्वाय सर्वदेवाय ईशानाय नमो नमः ।
महादेव महातेजो नमस्सोमार्धधारिणे ।
लोकनाथ लोकगुरो सर्वेश्वराय ते नमः ॥

**Colophon :**

इति सन्तानसंहितायां प्रश्नपटलः प्रथमः ॥

**End :**

शिवबीजेन मन्त्रेण विन्यसेद्देशिकोत्तमः ।
प्रासादेनाज्यहोमं तु चरुं दशाक्षरेण तु ॥
लाजं च सर्षपं चैव यवं चैव तिलं तथा ।
शर्करां च क्रमाद्धुत्वा पञ्चब्रह्मेण देशिकः ॥
सहस्रं वा तदर्धं वा अष्टोत्तरशतं तु वा ।
पञ्चकुण्डेषु होतव्यं यस्य स्विष्टकृतं तथा ॥
हुत्वान्ते तु महादेवं पवित्रारोपणं भवेत् ॥
प्रोक्षणे च प्रतिष्ठान्ते स्नपनं तीर्थमेव च ।
अन्येषु शुभकार्येषु होतव्यो देशिकोत्तमः ॥
एवं कृत्वा महाशान्ति राजराष्ट्रसुखावहाम् ।
आचार्यपूजनं कृत्वा वस्त्रहोमानि गोधनैः ॥
पदार्थान् पूजयेत्पश्चाद्ब्राह्मणान् सर्वांश्च पूजयेत् ।
पवित्रारोहणं प्रोक्तं नाडीचक्रं शृणु प्रिये ॥

**Colophon :**

इति सन्तानसंहितायां क्रियापादे पवित्रारोहणविधिर्नाम सप्ततितमः पटलस्समाप्तः ।

---

R. No. **5324.**

Paper. 10¼ × 9¼ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Mūppil Nair, Kavalappara, Malabar district.

**राघवीयव्याख्यानम् — बालपाठ्यम्.**

RĀGHAVĪYAVYĀKHYĀNAM : BĀLAPĀṬHYAM.

Foll. 1*a*—13. Foll. 13*b* and 14 are left blank.

Same work as that described under R. No. 3413 ante.

Incomplete.

---

R. No. **5325.**

Paper. 10¼ × 9¼ inches. Foll. 116. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Svāmināthaśivācārya of Mylapore.

किरणागमः

KIRAṆĀGAMAḤ.

Foll. 1a—115b. Fol 116 is left blank.

Deals with the worship of Śiva and with the performance of the various religious festivals in Śaiva temples. The procedure herein is narrated in the shape of a conversation between Śiva and Garuḍa.

Contains the following Pādas :—

१. विद्यापादः. | ३. चर्यापादः.
२. क्रियापादः. | ४. योगपादः.

Complete.

**Beginning** :

कैलासशिखरासीनं सोमं सोमार्धशेखरम् ।
हरं दृष्ट्वाब्रवीत्तार्क्ष्यः स्तुतिपूर्वमिदं वचः ॥
जयान्धकपृथुस्कन्धबन्धभेदविचक्षण ।
जय प्रवरवीरेश संरुध्य पुरदारक ॥
जय प्रथितसामर्थ्य मन्मथस्थितिनाशक ।
जयाच्युततनुध्वंस आलकूटबलापह ॥

* * *

एवमुक्ते हरौ प्राह प्रस्फुटश्चन्द्रशेखरः ।
भद्रमेतत् त्वया पृष्टं शृणु ज्ञानं महोदयम् ॥
किरणाख्यं महातन्त्रं परामृतसुखप्रदम् ।
सर्वानुग्राहकं शुभ्रं पदार्थोद्द्योतकं स्फुटम् ॥
पशुपाशपतिज्ञानविचारप्रतिपादकः ।
क्रियाचर्यासमोपेतं योगे भूतिभयापहम् ॥

गरुडः—

यद्येवं (चेत्) पशुस्तावत् कीदृशो बध्यते कथम् ।
मुच्येत कथमाख्याहि सन्देहविनिवृत्तये ॥

ईश्वरः—

पशुर्नित्यो ह्यमूर्तज्ञो निष्क्रियो निर्गुणोऽप्रभुः ।
व्यापी मायोऽन्तरस्थो भोगोपायविचिन्तकः ॥
तस्याशुद्धस्य सम्बन्धं समायाति शिवात् कलम् ।
तयोद्दलितसामर्थ्यो विद्याद्योतितगोचरः ॥

रागेण रञ्जितश्चापि प्रधानेन गुणात्मना ।
बुद्ध्यादिकरणानीकसम्बन्धाद्बध्यते पशुः ॥

* * * *

**Colophon:**

इति श्रीमत्किरणाख्ये महातन्त्रे प्रथमः पटलः समाप्तः ।

**End:**

भोगमोक्षप्रदां शुद्धां सर्वमन्त्रलयाव्ययाम् ।
ध्यात्वा जपति नित्यं यस्तेन मन्त्राखिलाः खग ॥
ध्यात्वा जप्त्वा भवत्यत्र नात्र कार्या विचारणा ।
एवं समासतः प्रोक्तो मातृकायाः क्रतुः परः ॥
बृहत्तन्त्रोदये स्वारात् सारभूतामृतो यथा ।
उद्धृतं शुभदं शुद्धं किरणं रत्नमानतः ॥

**Colophon:**

इति किरणाख्ये महातन्त्रे योगपादे मातृकान्यासविधिर्नाम चतुःषष्टितमः पटलः समाप्तः । योगपादस्समाप्तः ।

किरणपटलसङ्ख्यैर्ज्ञानकाण्डेर्दिनेशै-
र्भवति नवकयुग्मं कर्मकाण्डोपयुक्तम् ।
गगनगमन एव प्राहुराचारकाण्डे
मुनिभिरमलयोगे स्याच्चतुःषष्टिसङ्ख्या ॥
मुनिवरपरिगृह्यं सर्वमन्त्रप्रविष्टं
सकलगुरुसकाशात् पक्षिराजेन पृष्टम् ।
अमृतशिवसुवक्त्रे दीप्तवत्सुप्रदीप्तं
किरणमखिलमेतत्प्रोक्तमेतद्विशोध्यम् ॥

---

R. No. 5326.

Paper. 10¼ × 9½ inches. Foll. 14. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Mūppil Nāir, Kavalappara, Shoranur.

(a) रघुवंशव्याख्या—पदार्थदीपिका.

RAGHUVAMŚAVYĀKHYĀ: PADĀRTHADĪPIKĀ.

Foll. 1*a*—9*a*. Fol. 9*b* is left blank.

Same work as that described under R. No 1854 ante. By Nārāyaṇa, pupil of Kṛṣṇa.

Contains the first Sarga incomplete.

---

(*b*) स्वाहासुधाकरम्.

SVĀHĀSUDHĀKARAM.

Foll. 10*a*—12*a*. Foll. 12*b*—14 are left blank.

A short treatise in prose and verse describing the love between Svāha, wife of Agni, and the moon. The name of the author is not given in the manuscript. But it is published in the Kāvyamālā Series and the name of the author, according to the printed edition, is Nārāyaṇa Bhaṭṭa.

Complete.

**Beginning :**

मङ्गल्यं वः करोतु ज्वलनदयितया सङ्गमे भर्तृभीत्या
ग्रस्ताङ्गो हन्त तस्यामपि च हुतवहग्रासतां प्रापितायाम् ।
निश्चन्द्रे व्योममार्गे सदसि च हरिणा कौशलादर्शितात्मा
वासोभिस्सोपहासं सकलसुरगणैरर्चितोऽयंमृगाङ्कः ॥

जिह्वायां कमलोद्भवस्स्वगृहिणीं वाणीं दधात्यादरात्
कृष्णो वक्षसि सिन्धुराजतनयामादाय धत्ते चिरम् ।
देहार्धे गिरिकन्यकां च गिरिशो गृह्णाति मोहाद्यथा
स्वाहां हव्यभुगादधाति जठरे कामातुरोऽयं तथा ॥

अग्न्यादयस्त्रयो देवास्समादधति वल्लभाम् ।
दधाति याममात्रं न पावकस्सन्ध्ययोर्द्वयोः ॥

सन्ध्योपासनकर्मणे च दयितां निक्षिप्य कान्ते गते
चन्द्रस्तामवलोक्य मन्मथशरैस्सन्तापितात्मा चिरम् ।
मल्लीचन्दनमन्दमारुतरसेष्वाहन्त निन्दापरः
कष्टं कांश्चन वासरानगमयत् प्रत्येकमब्दोपमान् ॥

तदनु कदाचन दिवसावसानवेलायां मन्दमन्दमायाति च मलयशिखरशेखरितसुन्दरतरचन्दनतरुमञ्जुलतरमञ्जरीविद्रुमरमकरन्दबिन्दुभरणमन्दगमने मन्दपवने

* * * *

एष दोषाकरः कुमुदिनीरोहिणीभ्यामविज्ञातवृत्तान्तः स्वाहया सनाथीकृत-मुटजाङ्गणमभिससार ।

**End:**

विज्ञायाथ दयानिधिस्स भगवानाकाङ्क्षितं नाकिनां
सद्यः प्रादुरभूदपारमहिमा मन्दस्मितार्द्राननः ।
नीलाम्भोजविकोमलैश्च सकलानानन्दयन्नङ्गकै-
श्चन्द्रालोकनकौतुकं सुमनसां वक्त्रेन्दुना पूरयन् ॥
निन्दन्तः केचिदिन्दुं कतिचन दयितां पावकस्याक्षिपन्तः
स्वाहानाथस्य जाड्यं महदिति च परे निर्विशङ्कं वदेयुः ।
चित्रं चित्रं चरित्रं सकलसुरपतेर्माधवस्येति भक्त्या
वैकुण्ठं संस्तुवन्तो रुचिरविरचितं मन्दिरं भेजिरे ते ॥

समाप्तम् ॥

---

R. No. 5327.

Paper. $10\frac{1}{4} \times 8\frac{1}{4}$ inches. Foll. 10. Lines, 29 in a page. Dēvanāgarī, Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Mūppil Nair, Kavalappara, Malabar district.

पञ्चावस्थाविवेकः (उत्तरभागः).

PAÑCĀVASTHĀVIVEKAḤ (UTTARABHĀGAḤ).

Foll. 1*a*—9*b*. Fol 10 is left blank.

A treatise on the Advaita-Vēdānta describing the differences of five Avasthās, i.e., Jāgrat, Svapna, Suṣupti, Mūrchā and Maraṇa: by Vāsudēvayati, disciple of Gōpālatīrtha.

Complete; but wants a small portion in the beginning.

**Beginning:**

. . . . . . . . . . . . . . . . . . . . . . . . त्रिप्रकारस्तत्तत्प्रका-शकसाक्षिणः स्वरूपं चोपदिश्यते । तत्र प्रथमं तावत् प्रत्यक्षं तत्कारणं भावरूपमज्ञानं समर्थ्यते—यथा निर्मलं निरवयवं परिपूर्णमाकाशमिन्द्रनील-महाकटाहवन्नीलमिति श्वेतमिति चाज्ञैः प्राज्ञैश्च कल्प्यते । त्रिगुणमजादि-प्रतिबिम्बसहितमज्ञानं सच्चिदानन्दात्मकं जीवस्य स्वरूपभूतं ब्रह्माश्रित्य तत्र कल्पितं भवति । देवात्मशक्तिं स्वगुणैर्निरूढमिति श्रुतेस्तदज्ञानमस्तदिति

वक्तुं न शक्यते । सर्वेषामप्ययमज्ञ इति केवलसाक्षिज्ञानेन सिद्धत्वात् । तथा सदित्यपि वक्तुं न शक्यते । शुक्तिज्ञानेन रजताज्ञाननाशवत् घटज्ञानेन घटाज्ञाननाशवत् जीवपरैक्यस्वरूपज्ञानेन नासदासीदित्यनुपपन्नम् , विरुद्धत्वात् । अतोऽनिर्वचनीयमज्ञानं सिद्धं भवति ।

* * * *

अत्र वाक्यार्थो वर्ण्यते । इदं तत्त्वमसिवाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति । सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं विशेषणविशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति । तदुक्तम्—

सामानाधिकरण्यं च विशेषणविशेष्यता ।
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनोः ॥ इति ।

**End :**

एवं पञ्चावस्थानिरूपणं साक्षिणोऽन्यस्य मिथ्यात्वमवधार्य त्वंपदार्थो शोधयित्वोभयत्र विरुद्धांशं परित्यज्याविरुद्धचैतन्यमात्रं लक्षयित्वा अखण्डार्थमवधार्याहं ब्रह्मास्मीति ज्ञात्वा मुक्तो भवति । न पुनरावर्तते न पुनरावर्तते ।

**Colophon :**

इति श्रीमद्गोपालतीर्थशिष्यवासुदेवयतिकृतौ पञ्चावस्थाविवेक उत्तरभागः । समाप्तश्चायं ग्रन्थः ।

श्रीमद्गुरुपदाम्भोजमस्मच्चेतसि वर्तताम् ।
तेनैव सकलं यातु दुरितं चातिदारुणम् ॥

---

## R. No. 5328.

Paper. 10¾ × 9¼ inches. Foll. 80. Lines, 20 in a page. Dēvanāgari Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Mahamahōpadhyāya Nārāyaṇa Nambūdirippad, Killimaṅgalam, Malabar district.

सिद्धान्तकौमुदीव्याख्या—बृहच्छब्देन्दुशेखरः.

**SIDDHĀNTAKAUMUDĪVYĀKHYĀ : BṚHACCHABDENDUŚEKHARAḤ.**

Same work as that described under Nos. 1411—1413 of the D.C.S. MSS., Vol. III, wherein see for the beginning of the Pūrvārdha. By Nāgēśabhaṭṭa, son of Śivabhaṭṭa.

Contains the Bhvādiprakaraṇa incomplete in the Uttarārdha.

**Beginning:**

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्त इति भाष्याद्युक्तेः मध्ये कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति—श्रौत्रेति । श्रोत्रियस्य भावः श्रौत्रम्, अर्हतो भावः आर्हन्ती, ताभ्यां विदैरित्यर्थः । तेन वित्त इति चणप् । वेदाध्ययनकर्तृत्वेन तदुक्तानुष्ठानकर्तृत्वेन च सिद्धापहतपाप्मेत्यादिगुणैः स्तूयमान इत्यर्थः । अगुण इति । श्रुतिसिद्धाना मप्येषामनन्तकल्याणगुणानां वियदादिवत् व्यावहारिकत्वादापाततोऽपिशब्दद्योतितविरोधपरिहारः । एवं च विरोधाभासोऽत्रालङ्कारः । विजयन्ततरामिति—वि इति भिन्नं पदम् । कतिपयतिङन्तोत्तरपदस्य छन्दस्येव स्वीकारात् । तिङश्चेति तरप्याम् । न च जयते इत्यस्य वीत्येतत्साकाङ्क्षत्वेनासामर्थ्यात्कथं तरप् । उपसर्गाणां द्योतकत्वात् तरबर्थं प्रति तिङन्तार्थस्य प्रधानत्वेन सापेक्षत्वेऽपि दोषाभावाच्चेति दिक् ।

* * * *

। वर्तमाने लट् ।

वर्तमानत्वं च प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भिन्नत्वं वा । तच्च प्रकृत्यर्थविशेषणम् । प्रतिधातु अनन्तलडादेशानां शक्तिकल्पनापेक्षया एकधातोरेव शक्तिकल्पने लाघवात् । तदाह—वर्तमानेत्यादि । धातोरिति । यद्यपि धातोरित्यधिकारसूत्रमिहैव वक्तुं युक्तम्, तथापि यङ्विधिस्थधातुग्रहणानुवृत्त्यैव सिद्धे तत्सूत्रं मन्दप्रयोजनमिति ध्वनयितुं नेहोपन्यासः ।

**End:**

यद्यपि भाष्ये सित्रकिन्मामाना अनुदात्तेत इत्युक्तम् । तथाप्यनुक्रमदर्शनाय क्तिनिः पठितः । न त्वयमनुदात्तेदिति कैयटः । यद्यपि बधिनोक्तः, दानशानची स्वरितेताविति नोक्तम्, तथापि वृत्त्याद्यनुसारादुक्तम् । धातुपाठे संप्रति तथा पाठदर्शनाच्च । गुपादिष्वनुबन्धकरणमिति भाष्येण ध्वनितम् ।

## R. No. 5329.

Paper. 10½ × 9¼ inches. Foll. 24. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Dāmōdaran Nambūdiri, Perimanattu-mana, Shoranur post, Malabar district.

तर्कसंग्रहव्याख्या—अर्थप्रकाशिका.

TARKASAṄGRAHAVYĀKHYĀ: ARTHAPRAKĀŚIKĀ.

Same work as that described under R. No. 3371 ante. By Puruṣōttamabhaṭṭa.

Complete.

---

## R. No. 5330.

Paper. 10½ × 9¼ inches. Foll. 98. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Tāmraparṇi Vēṅkaṭaramaṇācār, Nerūr, Trichinopoly district.

ध्यानपद्धतिः

DHYĀNAPADDHATIḤ.

Foll. 1a—97a. Foll. 97b and 98 are left blank.

On the manner meditating upon the Supreme Lord: by Satyadharmatīrtha, pupil of Satyanātha.

Complete.

**Beginning:**

लक्ष्मीपतिं हयग्रीवं नरसिंहं गुणार्णवम् ।
वेङ्कटेशं जगद्वन्द्यं व्यासकृष्णादिकान् नुमः ॥
आनन्दतीर्थं गुरुराजमीडे श्रीमज्जयार्यं यतिराजसत्वम् ।
तद्वंशजातं परहंसराजं श्रीसत्यनाथेन्द्रमहं नमामि ॥
यस्सत्यनाथस्य पदाम्बुजस्य संसेवयावाप्तसमस्तविद्यः ।
तत्संस्मृतिध्यानपरायणं तं नतोऽस्मि सत्याभिनवीनतीर्थम् ॥
प्रायेणाल्पायुषो मर्त्याः कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमतयो मन्दभाग्याह्युपद्रुताः ॥
भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः ।
सन्ति तस्मात् संग्रहेण क्रियते ध्यानपद्धतिः ॥

सृष्टिरक्षाहतिज्ञाननियत्यज्ञानबन्धनान् ।
मोक्षं च विष्णुतश्चैव ज्ञात्वा मुक्तिर्न चान्यथा ॥
पञ्चभेदांश्च विज्ञाय तारतम्यं ततो जयम् ।

अवतारान् हरेर्ज्ञात्वा न चान्यथेति महाभारततात्पर्यनिर्णये श्रीमदाचार्यैरेव सृष्टिकर्तृत्वादिज्ञानस्यैव मोक्षसाधनत्वेन निर्णीतत्वात् सृष्ट्यादिकं निरूपणीयम्। अतः श्रीमद्भागवततात्पर्यनिर्णयविष्णुरहस्यवराहपुराणादीनि यथामत्यालोच्य ध्यानार्थं सङ्क्षेपेण सृष्ट्यादिकं निरूप्यते । तत्र सृष्टिश्चतुर्धा—शुद्धसृष्टिः, पराधीनविशेषावाप्तिसृष्टिः, मिश्रसृष्टिः, केवलसृष्टिरिति। तत्र शुद्धसृष्टिर्नाम, देहेन्द्रियाद्यन्तःकरणादिषु विकारेण केवलं लीलयैव जगदुपकारार्थं मूलरूपात् बहिरागमनम् । इयमेवात्मसृष्टिरित्युच्यते ।

**End:**

अमरलोकप्रचुराणां लिङ्गभङ्गानन्तरं दुःखमाधकं सुखं किंचिद्भवत्येव मिश्रगतयस्त्रिविधा इति वदन्तीति च । अ . . नरनरहर्यांचार्यविरचितमध्वसिद्धान्तसारोद्धार उक्तं ज्ञेयम् । इति श्रीवादिराजगुरु . . णतिः अतो ललाः अललाः, लं लालकाश्च सलिङ्गभङ्गा इति । मध्यमानामपि लिङ्गभङ्गानन्तरं विमुक्तिरिति चालं प्रपञ्चनेनेति दिक् ।

**Colophon:**

इति श्रीमत्सत्यधर्मतीर्थरचिते नित्यसंसारिलिङ्गभङ्गविचारस्समाप्तः ।

---

R. No. 5331.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 24. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Durgam Subrahmanya Śastri, Kavali, Nellore district.

**सर्वमानार्थसंग्रहः.**

**SARVAMĀNĀRTHASAṄGRAHAḤ.**

Foll. 1b—24a. Fol. 24b is left blank.

Similar to the work described under No. 4761 of the D.C.S. MSS., Vol. IX. By Kṛṣṇasvāmin.

Complete.

**Beginning :**

विधिविष्णुमहेशाद्यैरुपास्यं साम्बमीश्वरम् ।
जगज्जन्मादिकर्तारं ब्रह्मयोनिमहं भजे ॥
सद्गुरोर्दक्षिणामूर्तेश्चरणाम्बुरुहद्वयम् ।
प्रणम्य शिरसा कुर्वे सर्वमानार्थसंग्रहम् ॥
उमासुतमहं वन्दे शाङ्करं सर्वसिद्धिदम् ।
वागीश्वरीं भारतीं तां वीणापुस्तकधारिणीम् ॥

* * * *

नारायणादिकां दिव्यां गुरूणां च परम्पराम् ।
यावदेव भवेत्साक्षाच्छ्रीगुरोश्चरणाम्बुजम् ॥
तावत्सनामिमां सर्वां प्रणम्य च यथाक्रमम् ।
चिकीर्षितस्य शास्त्रस्य समारम्भे तु सर्वथा ॥
विघ्नध्वंससमाप्त्यर्थं श्रुतिमानानुसारतः ।
शिष्टाचारानुमानाच्च पूर्वाचार्यैस्तु सर्वदा ॥
शास्त्रादौ सुकृतान्येव मङ्गलानि हि सादरम् ।
अधुना चापि लोकेऽस्मिन् ग्रन्थारम्भेऽपि सादरम् ॥
कृत्वैव मङ्गलं पश्चात् प्रवर्तन्ते बुधा जनाः ।
ततश्च सर्वथा सर्वैर्निर्विघ्नपरिपूर्तये ॥
ग्रन्थादौ मङ्गलं कार्यं सफलं सप्रमाणकम् ।
मङ्गलस्य समाप्तिर्हि फलं मुख्यं भवेदलम् ॥

* * * *

पञ्चानामपि मानानां प्रमाणत्वं स्वतो न हि ।
तं पुनः श्रुतिवाक्यैस्तु सहकारितया पठेत् ॥
द्वैतप्रपञ्चसिद्धौ तु साधकत्वात् प्रमुख्यताम् ।
प्रमाणतां भजन्तोऽपि तत्त्वमस्यादिगोचरे ॥
निष्कले तु परे तत्त्वे कथमेव प्रमाणताम् ।
भजेयुस्तानि सर्वाणि न कथंचिद्भजन्ति हि ॥
तथापि मन्दबुद्धीनां सद्वाक्यार्थविवेचने ।
सुखेन च प्रवृत्त्यर्थं दृष्टान्तविधया बहिः ॥

आकाशादिपदार्थानां श्रुतसूक्ष्मतया त्विह ।
समुपन्यासवन्मानात् स्थूलारुन्धतिवत्पुनः ॥
प्रमाणत्वं भवेदेव जन्माद्यस्येति सूत्रतः ।
प्रसूचिता भवेत् सम्यगनुमानादिमानता ॥
तथा हि शास्त्रमेतस्मिन् यतो वेत्यादिमानतः ।
चराचरस्य जगतः कार्यजन्मादिकर्तृता ॥

* * * *

एवं हि शास्त्रयोस्तत्र काणभुङ्न्यायरूपयोः ।
बाह्यार्थद्वैतविज्ञाने साधकत्वेन भूरिशः ॥
षोडशानां तु सप्तानां पदार्थानां निरूपणम् ।
सुकृतं विस्तरेणैव बौद्धानां मतभञ्जनात् ॥

* * * *

बोधायनकृतं शास्त्रं प्राचीनमिति सादरात् ।
अङ्गीकृत्यैव मानेन वेदान्तगतवाक्यकैः ॥
रामानुजैस्तके शास्त्रे ब्रह्मतत्त्वनिरूपणम् ।
कृतमेव भवेत्सम्यग्विशिष्टाद्वैतभावतः ॥

* * * *

सर्ववेदान्तवाक्यानां षड्भिर्लिङ्गैर्यथाक्रमम् ।
सदादिवाक्यतस्सिद्धमहातात्पर्यवैभवात् ॥

**End:**

यत एवमतस्तस्मात्साङ्ख्यादिमतवत्पुनः ।
कर्ममीमांसकानां तु मतमेतन्निरीश्वरम् ॥
प्रायशस्तद्भवेन्मानात्प्रदुष्टमिति तर्कतः ।
श्रीमच्छारीरके त्वत्र द्वितीये दूषयिष्यति ॥
यतस्तु परमेशस्य जगज्जन्मादिवत्पुनः ।
शास्त्रस्यापि सवेदस्य कर्तृत्वमपि . . नात् ॥
वेदप्रामाण्यसिद्ध्यर्थमीश्वरस्य च मायिनः ।
प्रकृत्या परमाप्त्यर्थं सांसिद्धं भवति ध्रुवम् ॥

**Colophon:**

इति श्रीकृष्णस्वामिप्रणीतः सर्वमानार्थसंग्रहस्समाप्तः ॥

## R. No 5332

Paper. 10½ × 9¼ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Muppil Nair, Kavalappara, Malabar district.

दायक्रमसंग्रहः.

DĀYAKRAMASAṄGRAHAḤ.

Foll. 1*a*—23*a*. Foll. 23*b*—28*a* contain the contents of this work. Fol. 28*b* is left blank.

Similar to the text described under R. No. 1806 ante. By Śrī-kṛṣṇatarkālaṅkārabhaṭṭācārya.

Complete.

**Beginning:**

जगदम्बापदद्वन्द्वमापदां क्षयसाधनम् ।
विश्वकोटिविनिर्माणस्थितिसंहारकारणम् ॥
निधाय हृदये दायाधिकारक्रमसंग्रहः ।
क्रियते पण्डितामोदिश्रीमच्छ्रीकृष्णशर्मणा ॥

अथ दायाधिकारक्रमः—

तत्रादौ मृतधने औरसपुत्रस्याधिकारः ।

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरस्समम् ।
भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥

इत्यादिवचनैः पितृमरणानन्तरं पुत्रस्य स्वत्वज्ञापनात् । तदभावे पौत्रस्य तदभावे प्रपौत्रस्याधिकारः । मृतपितृकपौत्रमृतपितृपितामहकपौत्रयोः पुत्रेण सह तुल्याधिकारः । तेषां पिण्डदातृत्वेनोपकाराविशेषात् । जीव-त्पितृकयोस्तु पुत्रप्रपौत्रयोर्नाधिकारः, पार्वणपिण्डदानाभावे उपकाराभावात् । एषामभावे पत्नी धनाधिकारिणी, पत्नी दुहितरश्चैवेत्यादिवचनात् । तत्रायं विशेषः- पत्नी तद्धनानि भुञ्जीतैव । न तु तस्य दानधर्म . . . विक्रयान् कर्तुमर्हति ।

तदाह कात्यायनः—

अपुत्रा शयनं भर्तुः पालयन्ती गुरौ स्थिता ।
भुञ्जीतामरणात् कान्ता दायादा ऊर्ध्वमाप्नुयुः ॥

**End:**

न च—

ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ।
क्षेत्रियस्यैव तद्बीजं न वप्ता फलमर्हति ॥
एष धर्मो गृहस्थस्य दास्युष्ट्राजाविकस्य च ।
विहङ्गमहिषीणां च विज्ञेयः प्रसवं प्रति ॥

इति वचनात् दासीश्वरस्यैव तदवश्यमिति वाच्यम् । तत्र दासीपदस्य परोढादासीपरत्वात् । स्वयमूढायां तु दास्यां तथाविधापत्यस्य विभाज्यत्वमेवेति स्मार्तमतमिति ॥

**Colophon:**

इति श्रीकृष्णतर्कालङ्कारभट्टाचार्यविरचिते दायाधिकारक्रमसंग्रहः समाप्तः ॥

---

R. No. 5333.

Paper. 10¼ × 9¼ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Muppil Nair, Kavalappara, Malabar district.

लघुस्तुतिव्याख्यानम्—विंशतिविवरणम्.

LAGHUSTUTIVYĀKHYĀNAM: VIṀŚATIVIVARAṆAM.

Foll. 1*a*—12*a*. Fol. 12*b* is left blank.

A commentary on Laghubhaṭṭāraka's Laghustuti which work has been described under No. 9624 of the D.C.S. MSS., Vol. XVIII: By Sadāśiva.

Contains from the third stanza of the third Paṭala to the end of the work.

**Beginning:**

अथेदानीं तृतीयश्लोकोपात्तत्वमेव प्रपञ्चयति—

दृष्ट्वा संभ्रमकारि वस्तु सहसा ऐ ऐ इति व्याहृतं
येनाकूतवशादपीह वरदे बिन्दुं विनाप्यक्षरम् ।

येन सम्भ्रमकारि वस्तु दृष्ट्वा येन केनापि पुरुषेण सर्पादिकं वस्तु दृष्ट्वा ऐ ऐ इति वाग्बीजं व्याहृतं, येन संयम आकुलवशादिह संभ्रमविषये, वरदे वरप्रदानशीले, बिन्दुरहितमपि वाग्बीजं येनोच्चरितम्, अक्षरं

क्षररहितं, तस्यापि वाचामनुग्रहस्तरसा जायते। तस्मिन्ननुग्रहे सञ्जाते सति तस्य वक्त्रोदरात् वाचो निर्यान्ति। कीदृग्भूता वाचः आकूतवशादभिप्राय-वशात्, सूक्तिसुधारसद्रवमुचः प्रमाणप्रमेयामृतस्राविणः वक्त्रोदरादास्यकुहरात् वाचो निर्यान्ति, देवि त्रिपुरे वक्तृत्वभूतां त्वां ये भजन्ते तेषां तरसा तवानुग्रहे सञ्जाते सति इति ध्रुवमेव निश्चितमेवेत्यर्थः। वागैश्वर्यं जायते वाचामैश्वर्यं वागैश्वर्यं परमेश्वरत्वमित्यभिप्रायः।

**Colophon:**

इति सदाशिवकृतौ विंशतिविवरणे तृतीयः पटलः।

**End:**

इति सदाशिवकृतौ विंशतिविवरणे लघुसन्तानजनलघुनामधेयपूज्यपाद-रचितान्येतानि स्तोत्रमन्त्रात्मकानि विंशतिश्लोकानि, तेनैव लोकान् प्रत्यात्म-प्रणताख्यापनाय च देव्या क्षोभणशान्तये चैकविंशकमप्युक्तवृत्तक-मप्युक्तम्।

* * * *

**Colophon:**

इति सदाशिवकृतौ विंशतिविवरणे एकोनविंशः पटलः।

* * *

अस्मत्पूज्यपादलघुसन्तानोत्पन्ना सर्वोऽप्यस्मिन् गुरवस्तेषां सन्ततिजोऽहं तस्मात्तेषामाचार्याणां प्रभावात् केनापि कविना दूषणं वक्तुं चिन्तयितुं वा न शक्यत इत्यसतां प्रत्युक्तवानाचार्य आत्मनि लघुत्वं दृढं स लघुः तस्मात्सन्तोऽप्यनुगृह्णन्त आत्मलघुत्वं दृढमित्यनेन सत्प्रामाण्यं कृतवानाचार्यः। तेनैवाचार्येणाप्येतदुक्तं भवति—देवि त्रिपुरे मां प्रसह्यैव त्वद्भक्त्या सञ्जायमानमिदं स्तोत्रमन्त्रं भक्तिमुखरितेन मया विरचितं त्वद्भक्तिमुखरितानां येषां तेषामेव मया विरचितमिति ध्रुवं निश्चितं नान्येषां मया विरचितमित्येतन्म-न्निश्चितम्।

The scribe adds—

इयं व्याख्या महापुण्या सर्वमङ्गलदायिका।
वेङ्कटाचलहस्तेन ग्रन्थोऽयं लिखितस्स्वयम्॥

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधयुक्तम्।
योगीन्द्रवन्द्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि॥

R. No. 5334.

Paper. 10¼ × 9½ inches. Foll. 80. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927–28 from a MS. brought by M.R.Ry. Nārāyaṇasāmi Śāstri, Mylapore, Madras.

ऋग्वेदभाष्यम्.

RGVEDABHĀṢYAM.

Same work as that described under R. No. 3649 ante. By Skandasvāmin.

Contains the Adhyāyas 1 and 2 in the first Aṣṭaka.

**Beginning :**

मन्त्राणामवबोद्धव्यो यतोऽर्थोऽङ्गत्वसिद्धये ।
ऋग्वेदस्यावबोधार्थमतो भाष्यं करिष्यते ॥

मन्त्राः पञ्चप्रकाराः—प्रैषाः, करणाः, क्रियमाणानुवादिनः, शस्त्राभिष्टवनादिगताः, जपानुवचनगता इति । प्रैषास्तावत् दैव्याः शमितार आरभध्वमित्येवमादयः । करणाः इदमहमर्वावसोः सदसि सीदामीत्येवमादयः । क्रियमाणानुवादिनः, युवा सुवासा इत्येवमादयः । शस्त्राभिष्टवनादिगताः आ त्वा रथं यथोतये ब्रह्म जज्ञानमित्येवमादयः । जपानुवचनादिगताः तदद्य वाचः प्रथमं रेवतीरित्येवमादयः । एते सर्वे प्रयोगकाले सर्वार्थान् प्रतिपादयन्तः कर्मणोऽङ्गत्वं प्रतिपद्यन्ते, नोच्चारणमात्रेण । कुत एतत् ? ये तावत् प्रैषाः करणाः क्रियमाणानुवादिनो वा तेषां कोऽर्थः ? ते सर्वे तस्य कर्मणोऽङ्गभूतत्वादङ्गभूतस्य चास्मृतस्यानुष्ठातुमशक्यत्वात्, स्मरणस्य कर्मणापेक्षितत्वात् प्रैषादिभिश्च कर्तुं शक्यत्वात् ।

* * * *

अविदितदैवतस्य मन्त्रस्य कर्मण्यङ्गाभावादज्ञायमानार्थस्य च मन्त्रस्य दैवतस्य वेदितुमशक्यत्वात्, जपानुवचनादिगतानामपि बोद्धव्य एवार्थः । एवं सर्वमन्त्राणां कर्माङ्गत्वसिध्यर्थं यतो बोद्धव्योऽर्थः अतः ऋग्वेदस्यावबोधार्थमस्माभिर्भाष्यं करिष्यते । तत्रार्षदैवतयोरर्थावबोधने उपयुज्यमानत्वात् ते दर्शयिष्यन्ते, न छन्दः अनुपयुज्यमानत्वादिति । अग्निमीळे—ऋषिराद्यो मधुच्छन्दाः स विश्वामित्रपुत्रः । आग्नेयं प्रथमं सूक्तं मधुच्छन्दस आदितः । अग्निमीळे अग्निं स्तौमि । कीदृशं पुरोहितं शान्तिकपौष्टिकैः

कर्मभिः यो राजानमापद्भ्यस्त्रायते स पुरोहितः, तत्स्थानीयम् । कस्य ? यज्ञस्य अधिकृतस्यापदामपहन्तारं देवं दातारं दीप्तं वा ।

* * * *

**Colophon:**

स्कन्दस्वामिकृते ऋग्वेदभाष्ये प्रथमोऽध्यायः समाप्तः ।

अयं देवाय । आर्भवं प्रथमं सूक्तम् । ऋभुर्विभ्वा वाजश्च त्रयः पुत्रास्सुधन्वनः । ते रथकारा बभूवुः । अतिशयवद्भिः कर्मभिर्देवत्वमीयुः । तेऽत्र साहचर्यात् पञ्चान् हेम्र्यासिः देवेभ्यो जातेभ्यः य ऋभवो मनुष्याः सन्तः कर्मकौशलात् देवा जाताः । तेभ्यः स्तुतिः मेधाविभिरस्माभिः ऋग्लक्षणया वाचा मुखमासा मानवा इति ।

**End:**

नेमिरिवारान् परि ता बभूव । रथचक्रपृष्ठं हि नेमिः । स यथाऽरान् परिगृह्णाति तद्वत्ता सर्वास्तान् मनुष्यान् सर्वाणि तानि जङ्गमानि द्वादशारमिति प्रसिद्धोऽरशब्दः ।

वलभीविनिवास्येतामृगर्थागमसंहृतिम् ।
भर्तृध्रुवसुतश्चक्रे स्कन्दस्वामी यथास्मृति ॥

**Colophon:**

स्कन्दस्वामिकृते ऋग्वेदभाष्ये प्रथमाष्टके द्वितीयोऽध्यायः समाप्तः ।

---

R. No. **5335.**

Paper. 10¼ × 9½ inches. Foll. 7. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Mahāmahōpādhyāya Nārāyaṇa Nambūdirippād, Killimangalam, Shoranur, Malabar district.

अद्वैतसिद्धान्तवैजयन्ती.
ADVAITASIDDHĀNTAVAIJAYANTĪ.

A work on the principles of Advaita philosophy.
Incomplete.

**Beginning:**

पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये ।
व्यासशङ्कररूपाय श्रीपरब्रह्मणे नमः ॥
वन्दे वन्दारुमन्दारमिन्दिरानन्दमन्दिरम् ।
वृन्दावनचरं भक्तवृन्दावनपरं महः ॥
नत्वा श्रीभगवत्पादपादपाथोरुहद्वयम् ।
करोम्यद्वैतसिद्धान्तवैजयन्तीं सतां मुदे ॥

इह खलु परमपुरुषार्थसाधनमात्मतत्त्वज्ञानमामनन्ति न्यायवेदान्तनिष्णाताः । तच्चात्मतत्त्वं कर्तृत्वभोक्तृत्वादिनिखिलानर्थविरहितसच्चिदानन्दं न प्रत्यगभिन्नब्रह्मात्मकमिति निरूपणीयमिति । निरूपणं च साधकप्रदर्शनबाधकनिराकरणात्मकम् । तत्र साधकाः—असङ्गो ह्ययं पुरुषः, सत्यं ज्ञानमनन्तं ब्रह्म, सदेव सोम्येदमग्र आसीत्, नेह नानास्ति किंचन, नात्र काचन भिदास्ति, तत्त्वमसीत्यादयो निश्चितार्थतात्पर्यकाः उपनिषद एव । तत्र निश्चितप्रामाण्यकप्रमाणान्तरविरोधे तात्पर्यानिश्चयात् तदविरोधस्तावदुपपादनीयः । स च यावत्प्रत्यक्षादिग्राह्यद्वैतजातस्य यावत्पारमार्थिकत्वं निराक्रियते तावद्दुरुपपाद इति तस्य मिथ्यात्वमुपपादनीयम् । अतस्तदेवादौ स्वपक्षसाधनायुपन्यासेन प्रपञ्चयते । तथाहि तत्र विप्रतिपत्तिः—ब्रह्म प्रमातिरिक्ताबाध्यं सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं मिथ्या न वेति ।

**End:**

ध्वंसप्रतियोगित्वं चाकाशादौ नासिद्धम् । "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इति श्रुतिसिद्धजन्यत्वेनानुमितत्वात् । "आकाशवत् सर्वगतश्च नित्यः" इत्यस्यात्मनिदर्शकत्वं समानकालीनसर्वगतत्वेनाभूतसंप्लवावस्थायित्वेन चेति द्रष्टव्यम् ।

---

R. No. **5336.**

Paper. 10½ × 9¼ inches. Foll. 22. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Vēdāntarāmānujācaryar, Srirangam.

(a) भगवद्गीतासङ्गतिमाला.

BHAGAVADGĪTĀSAṄGATIMĀLĀ.

Foll. 1a—8b.

A small treatise giving the main theme dwelt upon in each of the Adhyâyas of the Bhagavadgîtâ.

By Bhâradvâja.

Complete.

**Beginning:**

अथ श्रीभगवद्गीतासङ्गतिमाला लिख्यते—

यश्शरीरेऽधितिष्ठन्तं जीवमुद्दिश्य योगिराट् ।
अगायत ब्रह्मविद्यां तस्मै श्रीब्रह्मणे नमः ॥
स्वस्ववर्णज्ञाननिष्ठासाध्यभक्त्याख्यनिष्ठया ।
अवाप्यः पर आत्मेति गीताशास्त्रे समुच्यते ॥
षट्कत्रयेण सम्बद्धा गीता सर्वार्थदायिनी ।
आदिमेन तु चक्रेण निष्ठोक्ता ज्ञानकर्मणोः ॥
ताभ्यां निर्वर्त्यभक्त्याख्यं ज्ञानमुक्तं द्वितीयके ।
तृतीयेन प्रथा तस्य पुरुषस्य विवेचनम् ॥
सर्वेश्वरस्य चान्येषां मुक्तानां क्रियते पुनः ।
कर्मयोगो नाम कर्मफलं त्यक्त्वा च कर्तृताम् ॥
सम्यगारभते येन कर्मोपायस्स ईरितः ।
ज्ञानयोगो निजे रूपे स्थितिस्संरुध्य मानसम् ॥
भक्तियोगः परब्रह्मण्यासक्त्योपस्थितिस्सह ।
त्रयाणामपि योगानामुत्तमोपासना स्मृता ॥
उपासना तु विज्ञेया भक्तिध्यानादिवाचिका ॥

इति सङ्क्षेपार्थः ।

प्रथमाध्याये—

नित्यानित्यविवेकाख्यपायोपन्यास आदिमे ।

द्वितीयाध्याये—

प्रपन्नं तु द्वितीये तं व्याजीकृत्य रमापतिः ।
सङ्ग्रहेण यथान्यायदृष्टी प्रोवाच सङ्गतिम् ॥

**End:**

एवमष्टादशाध्याये सप्तविंशतिसङ्गतीः ।
अवोचन्माधवः पार्थमिति गीतार्थसङ्ग्रहः ॥

भारद्वाजोऽवोचदेवं पञ्चत्रिंशाधिकैश्शतैः ।
श्लोकैस्सङ्गृह्य भगवद्गीतातात्पर्यमादरात् ॥

इति मोक्षोपदेशयोगः ।

**Colophon :**

इति भगवद्गीतासङ्गतिमाला संपूर्णा ॥

---

(*b*) भगवद्गीतासङ्गतिमालाव्याख्या.

BHAGAVADGĪTĀSAṄGATIMĀLĀVYĀKHYĀ.

Foll. 9*a*—22*b*

A commentary on the work described above.

Breaks off in the fifth Adhyāya.

**Beginning :**

अथ श्रीभगवद्गीतासङ्गतिमालाव्याख्या लिख्यते—

ज्ञानरूपं सदाभ्यासादानन्दमयमन्तिमे ।
ध्यात्वा सङ्गतिमालाया व्याख्यां कुर्वे यथामति ॥

अथ श्रीभरद्वाजमहर्षिगोत्रसंभूतो भारद्वाजो नाम विपश्चित् स्वस्मै परेषां चात्यन्तोपकाराय श्रीमहाभारतस्थभीष्मपर्वान्तर्गतश्रीभगवद्गीतान्तस्स्थसङ्गतीस्संगृह्य प्रत्यध्यायं पृथक् पृथक् पद्यरूपेण सङ्गतिमालाख्यं ग्रन्थं प्रारभमाणः प्रारिप्सितस्याविघ्नेन समाप्त्यर्थं परमगुरुं प्रति नमस्क्रियाख्यं मङ्गलमारचय्य तेन सह श्रीगीतार्थशास्त्रं विशिष्टमप्यष्टभिः श्लोकैः सङ्क्षिपति—तथाहि य इति । यः देशतः कालतः वस्तुतश्च परिच्छेदरहितो ध्येयत्वाच परिच्छेदसहितश्च सर्वोत्तमत्वेनोपनिषदादिषु सुप्रसिद्धः । योगिराट्, चित्तवृत्तिनिरोधो योगः सः अस्यास्तीति योगी तेषां राजा श्रेष्ठः योगिराट् । युञ्जानानां शुभावलम्बनतमतया स मुक्तः पातञ्जलादिशास्त्रेषु सूचितश्च ईश्वरः, एष तु प्रकृतिलीनबद्धमुक्तेभ्यो विलक्षणोऽनादिमुक्तः । शरीरे, शीर्यत इति शरीरमनित्यत्वलक्षणविशिष्टं तादृशे देहे अधितिष्ठन्तं अधिकृत्य स्थितं जीवं प्रत्यगात्मानमुद्दिश्य ब्रह्मविद्यां ब्रह्म सर्वव्यापकं सर्वोत्कृष्टं च वस्तु तत्प्रतिपादकं तत्प्राप्यं च विद्या ज्ञानं ज्ञानप्रतिपादिनीं वाचमगायत । स्वयमेव देवभाषया अगायत । तामेव श्रीवेदव्यासः सप्तदशभिः(?) श्लोकैरुपनिबद्ध एषैव भगवद्गीतेति सर्वसंमता विराजते ।

* * * *

**Colophon:**

इति प्रथमाध्यायः ।

**End:**

**Colophon:**

इति ज्ञानयोगप्रतिपादकः चतुर्थाध्यायः संपूर्णः ।

अथ पञ्चमाध्यायसङ्गतिः संगृह्णाति—पञ्चमे पञ्चमाध्याये प्रश्नपूर्वकः अर्जुनप्रश्नपुरस्सरः कर्मसंन्यासः चतुर्थाध्यायोक्तज्ञाननिष्ठानुकूलकर्मत्यागक्रमः कथ्यते भगवतोच्यत इत्यर्थः । मोहसागरान्तर्निमग्नार्जुनप्रश्नादपि सर्वज्ञभगवदुक्तोत्तरस्यैव गरीयस्त्वान्निष प्रश्नो बलीयान् । कुतः उपदिष्टकर्मज्ञानस्वरूपानभिज्ञतया कर्मसंन्यासकर्मयोगयोर्मध्ये यच्छ्रेय इति पृष्टत्वात् कृतकर्मणां ज्ञाने परिसमाप्तिः ।

* * * *

एनमेवार्थं संन्यासः कर्मयोगश्चेत्यारभ्य दुःखमाप्तुमयोगत इत्यन्तेन प्रथमं विवृणोति भगवान् अस्मिन् पञ्चमाध्याये ।

---

## R. No. 5337.

Paper. 10½ × 9½ inches. Foll. 40. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Muppil Nair, M.L.C., Kavalappara, Malabar district.

धर्मसंहिता.

DHARMASAMHITĀ.

Foll. 1*a*—39*a*. Foll. 39*b* and 40 are left blank.

A work mainly dealing with Varṇāśramadharma.

Contains the following subjects:—

१. शौनकप्रश्नः.

२. वर्णधर्मः.

३. ब्रह्मचर्यव्रतम्.

४. गृहस्थधर्मः.

५. वानप्रस्थधर्मः.

६. नारदव्यामोहनम्.

७. Not given.

८. क्षेत्रमाहात्म्यम्.

| | |
|---|---|
| ९. Not given. | १२. तुलसीमाहात्म्यम्. |
| १०. Not given. | १३. Do. |
| ११. गीतामाहात्म्यम्. | १४. सालग्राममाहात्म्यम्. |

Contains the Adhyāyas 1 to 14 complete, 15th incomplete.

**Beginning :**

सच्चिदानन्दरूपाय विष्णवे परमात्मने ।
नमस्सर्वाङ्कुरत्नाय सदसद्व्यक्तिहेतवे ॥
शुद्धस्फटिकसङ्काशां सर्वाभरणभूषिताम् ।
वन्दे सरस्वतीं वाक्स्थां वाञ्छितार्थोपलब्धये ॥
महर्षेस्सर्वलोकेषु पूजितस्य महात्मनः ।
प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ॥
कृत्वाथावभृथस्नानं सरस्वत्यां तपस्विनः ।
शौनकाद्यास्सशिष्यास्ते जग्मुर्व्यासाश्रमं वरम् ॥
व्यासस्समागतान् सर्वान् सशिष्यान् संशितव्रतान् ।
अर्घ्यपाद्यादिभिस्सम्यक् पूजयामास बुद्धिमान् ॥
तेन संभावितास्सर्वे कृतकृत्यास्तपोधनाः ।
स्वेष्वासनेषूपविष्टाः पश्यन्तश्च परस्परम् ॥
उपविष्टेषु सर्वेषु विद्वत्सु च तपस्विषु ।
शौनकः प्रणिपत्योर्व्यां व्यासं सत्यवतीसुतम् ॥
तेषां मध्ये सुखासीनमृषि . . . . . . ।
विनयावनतो भूत्वा सर्वज्ञं परिपृच्छति ॥
भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
परं रहस्यं त्वं वेत्सि यन्न विन्दन्ति मादृशाः ॥
कैवल्यं निष्कलं शान्तं शाश्वतं त्वयि तिष्ठति ।
त्वं विष्णुस्सर्वभूतानां सच्चिदानन्दविग्रहः ॥

* * * *

श्रीवेदव्यासः—

साधु पृष्टं त्वया वत्स सर्वभूतहितैषिणा ।
भवता विदुषा सत्यं प्रश्न एष सुदुस्तरः ॥

श‍ृणु शौनक वक्ष्यामि संक्षेपाद्धर्मसंहिताम् ।
नारदायाह भगवान् पूर्वं नारायणस्स्वयम् ॥
कदाचिन्नारदो गत्वा श्वेतद्वीपं जगत्पतेः ।
यं श्रीवैकुण्ठममलं परं प्राहुर्विचक्षणाः ॥
वैष्णवानां निलयनं विष्णुप्रियकरं सदा ।
सनकाद्यैस्सदा सेव्यमनन्तासनसंस्थितम् ॥
चतुर्भुजं विशालाक्षं श्वेतवस्त्रावकुण्ठितम् ।
शङ्खचक्रगदापद्मवनमालाविभूषितम् ॥

* * * *

श्रीभगवानुवाच —

साधु साधु महाप्राज्ञ प्रश्न एषो हि दुर्लभः ।
वक्ष्याम्यहं मुनिश्रेष्ठ रहस्यां धर्मसंहिताम् ॥
मनःप्रीतिकरं सर्वं जगदेतच्चराचरम् ।
प्रसन्ने मनसि प्रीतिस्सर्वस्सञ्जायते मुने ॥
मनस्तु चञ्चलं नित्यमजितेन्द्रियकर्मणाम् ।
जितेन्द्रियाणां विदुषां मनस्तिष्ठत्यचञ्चलम् ॥

**Colophon :**

इति धर्मसंहितायां शौनकप्रश्नो नाम प्रथमोऽध्यायः ॥

**End :**

विष्ण्वर्चने वैश्वदेवे श्राद्धकर्मणि शस्यते ।
व्रते कर्मणि नो शक्तां तुलसीं भवनाशिनीम् ॥
तुलसीवनमध्ये ये सञ्चरन्तीह जन्तवः ।
अपि कीटपतङ्गाद्या यान्ति विष्णोः परं पदम् ॥
इति ते कथितं सर्वं तुलसीस्तवमुत्तमम् ।
व्रतमप्यमलं किं तत् परं श्रोतुमिहेच्छसि ॥

**Colophon :**

इति श्रीधर्मसंहितायां तुलसीमाहात्म्यं नाम त्रयोदशाध्यायस्समाप्तः ।

अथ सालग्राममाहात्म्यं नाम चतुर्दशोध्यायः—

वैनतेयः—

सालग्रामस्य माहात्म्यं लक्षणं च जगत्पते ।
श्रोतुमिच्छामि भगवन् त्वत्तः पङ्कजलोचन ॥

श्रीभगवानुवाच—

अतः परं प्रवक्ष्यामि सालग्रामशिलार्चनम् ।
लक्षणं च महामूर्तेः शृणु तार्क्ष्य महामते ॥
द्वारभागे समे चक्रे दृश्यन्ते नान्तरीयके ।
वासुदेवस्स विज्ञेयः शुक्लाभं च सुशोभनम् ॥

* * * *

तस्मात्तां पूजयेन्नित्यं धर्मकामार्थसिद्धये ।
सालग्रामोद्भवो देवो देवे द्वारवती शिला ॥
उभयोस्सङ्गमो यत्र तत्र मुक्तिर्न संशयः ।
अथोत्तरे यदि भवेत् द्वे द्वे चक्रे सुशोभने ।
यत्तद्धरिहरं विद्या . . . . . . . . ॥

---

R. No. 5338.

Paper. 10¾ × 9½ inches. Foll. 60. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927–28 from a MS. of M.R Ry. Damōdaran Nambūdiri, Perumanattu-mana, Shoranur, Malabar district.

साम्बपञ्चाशिका, सव्याख्या.

SĀMBAPAÑCĀŚIKĀ WITH COMMENTARY.

A work in praise of Sūrya by Sāmba(?) with commentary. The name of the commentator is not known.

Complete.

**Beginning:**

नमस्समस्तजन्तूनां प्राणानां प्राणदायिने ।
सर्वदाय जगद्धात्रे सवित्रे परमात्मने ॥
शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपते-
रुद्गीयोऽभ्युदितः पुरोऽरुणतया यस्य त्रयीमण्डले ।

भास्वद्वर्णपदक्रमेरिततमस्सप्तस्वरार्थैर्विय-
द्दिग्यास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे ॥ इति ।

अनेनादित्यः स्तूयते, न शब्दराशयादिः । या वाक्यवृत्तिर्गुणगण-कीर्तनेन देवताया अहो महमित्याश्चर्यजननी सा स्तुतिरिति स्तुति-लक्षणं वैचित्र्यप्रतिपादनमाश्चर्यहेतुः । तत् त्रिविधं वैचित्र्यम्, शब्दतोऽर्थत उभयतश्चेति । अयं श्लोकः उभयतो वैचित्र्यप्रतिपादकः । तथाहि—एक एव जगद्भासकत्वेन वेदरूपेण ब्रह्मरूपेण च स्थित इति वैचित्र्यम्। उत्तरश्लोकानां सूत्रभूत उत्तरे व्याख्यानरूपः । एतस्य वाक्यस्य चतु-र्ष्वर्थेषु पृथक् पृथग्वाचकसामर्थ्यं शब्दतो वैचित्र्यम् । अत एवावृत्त्या चत्वारः श्लोका भवन्ति । सूत्रवत् एक एवादित्यश्चतुर्धा व्यवस्थित इत्यर्थः । अनेन गुणकीर्तनं च देवस्य भवति । पद्मोके चतुर्वेद्येव श्रेष्ठतम मण्डलं विराड्रूपस्य चक्षुः, एवं लोके श्रोत्रग्राह्याणां वेदस्तद्रू-पेण स्थितो हिरण्यगर्भश्चादित्यः स्वप्नावस्थासुषुप्त्यवस्थानसाध्यातव्यानां (जाग्रदवस्थानां) ब्रह्मत्रयाणां साधको यजमान . . . व्याकृतो . . . . स्सात्वतानां सङ्कर्षणशब्दवाच्योऽधिदैवते । अध्यात्मे सुषुप्त्यभिमानी प्राज्ञो जीवः । त्रयाणां सत्ता स्फूर्तिप्रदं ब्रह्म । तुरीयं निर्गुणं तद्रूपेणापि स्थितः आदित्य इत्यर्थतो वैचित्र्यं भगवतस्सूचितम् । प्रथममादित्ये योजना ।

**End:**

इति परमरहस्यश्लोकपञ्चाशिकैषा
तपननमनपुण्या सागमब्रह्मचर्चा ।
हरतु दुरितमस्मद्वर्णिता कर्णिता वो
दिशतु च शुभदृष्टिं मातृवद्भक्तिभाजाम् ॥

इति शब्दः प्रकारवाची परमरहस्यं ब्रह्म तत्प्रतिपादकत्वात् स्तोत्र-मपि परमरहस्यं शुद्धिसाधनम् । श्लोकानां सङ्ख्यामाह—पञ्चाशिका पञ्चाशत्सङ्ख्यासम्बद्धा पञ्चाशिका एषा स्तुतिः, तपनः सविता तस्य नमने नमस्कारे पुण्या, अदृष्टहेतुः । सागमब्रह्मचर्चा आगमेन वेदान्त-साङ्ख्ययोगादिसहिता, तत्र प्रतिपादितपुरुषार्थलाभकारणमित्यर्थः । ब्रह्म-चर्चा, परब्रह्मणो मननस्वरूपमाह । हरतु दुरितमस्मद्वर्णनानिमित्तमाकर्णिता

श्रुता, दिशतु ददातु, शुभदष्टिं ब्रह्मविद्यामित्यर्थः । केषां मातृवत्पितरि भक्तिमतामित्यर्थः ।

**Colophon:**

इति साम्बव्याख्यानं संपूर्णम् ।

नमश्शिवाभ्यां नवयौवनाभ्यां परस्पराश्लिष्टवपुर्धराभ्याम् ।
नगेन्द्रकन्यावृषकेतनाभ्यां नमो नमश्शङ्करपार्वतीभ्याम् ॥

शुद्धस्फटिकसङ्काशं त्रिनेत्रं चन्द्रशेखरम् ।
इन्दुमण्डलमध्यस्थं वन्दे देवं सदाशिवम् ॥

---

R. No. 5339.

Paper. 10½ × 9½ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Dāmōdaran Nambūdiri, Perumanattu-mana, Shoranur, Malabar district.

साम्बपञ्चाशत्, सभाष्यम्.

SĀMBAPAÑCĀŚAT WITH BHĀṢYAM.

Foll. 1*a*—23*b*. Fol. 24 is left blank.
Similar to the above.
The commentary is attributed to Bhagavatpāda.
Complete.

**Beginning:**

शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपते-
रुद्गीथोऽभ्युदितः पुरोऽरुणतया यस्य त्रयीमण्डले ।
भास्वद्वर्णपदक्रमेरिततमस्सप्तस्वरार्थैर्विय-
द्विद्यास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे ॥

तस्मै नमः, परब्रह्मणे प्रकृष्टब्रह्मरूपाय योगगम्याय । गोः भारत्याः पत्ये भर्त्रे प्रोचारकाय । यस्य गोपतेः त्रयीमण्डले ऋग्यजुस्सामसमूहे शाखासहस्रविस्तीर्णे वेदागमे य उद्गीथः प्रणव ओङ्काराख्यः स पुरः अग्रे अरुणतया सारथित्वेन अभ्युदितः प्रथितः । यत उक्तं "स्तुवन्त्योङ्कारं ब्रह्मेति" यतो जीवादित्यात् वाक् पश्यन्त्युदिता ततो मध्यमा ततो वैखरी तस्यां च वर्णमा . . मादौ प्रणवः, ततस्त्रयीमण्डलज्ञानं ततस्त-

ज्ञानादात्मज्ञानप्राप्तिरिति । कीदृशस्य गोपतेः ? शब्दार्थत्वविवर्तमान-परमज्योतीरूपः । शब्दत्वेनार्थत्वेनाभिधानत्वेन संज्ञित्वेन विवर्तमानः प्रतिष्ठमानः शब्दः गौरश्वः पुरुष इत्यादिकस्संज्ञारूपः ।

* * * *

पदानां क्रमैः चरणन्यासैरिति तन्नाशितं तमो यैस्तैः सप्तस्वररूपैरश्वैर्वियति व्योम्नि, विद्यारूपं मन्त्रमयं स्यन्दनं रथमुन्नयन्, ऊर्ध्वं प्रापयन्निव यो लक्ष्यते । वस्तुतो हि भानुबिम्बं नोर्ध्वं नाधो गच्छति; भूगोलवशादुदयेऽधोगतमिव मध्याह्ने ऊर्ध्वं गतमिव लक्ष्यते । तस्मै गोपतये रश्मिभर्त्रे परब्रह्मणे मोक्षद्वाराय नमः ।

**End:**

इदं स्तोत्रमुपसंहरन् कविराह—

इति परमरहस्यश्लोकपञ्चाशिकैषा
तपननमनपुण्या सागमब्रह्मचर्या ।
हरतु दुरितमस्मद्वर्णिताकर्णिता वो
दिशतु[च] शुभसमृद्धिं मातृवद्भक्तिभाजाम् ॥

एषां श्लोकानां पञ्चाशत् तपननमनपुण्या पवित्रा शुद्धशास्त्रागमपूर्वकस्य ब्रह्मणो बृहत्तालक्षणस्याध्यात्मज्ञानस्य चर्चा अध्ययनम्, अस्मद्वर्णिता भक्तिभाजां श्रुता सती दुरितं हरतु, मातृवच्छुभसमृद्धिं च ददातु ॥

**Colophon:**

इति भगवत्पादीयं साम्बपञ्चाशद्भाष्यं संपूर्णम् ।
पुरुषे मण्डले भानोर्गृहे देहे च जृम्भिते ।
भुक्तिमुक्तिप्रदायास्मै परस्मै ब्रह्मणे नमः ॥
वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं ब्रह्मणि न्यसेत् ।
एकज्ञानं च योगाश्च शेषोऽन्यो ग्रन्थविस्तरः ॥
वामे मरकतश्यामा दक्षिणे विद्रुमारुणा ।
देवता दम्पतिमयी सा मे कामदुघा भवेत् ॥

---

## R. No. 5340.

Paper. $10\frac{1}{4} \times 9\frac{1}{4}$ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Vēdāntarāmānujacaryar, Srirangam.

सत्संप्रदायनिरूपणम्.

SATSAMPRADĀYANIRŪPAṆAM.

A controversial treatise on some of the doctrines of Śrī-Vaiṣṇava religion : by Vēdānta-Rāmānuja.

Contains the following subjects :—

१. लक्ष्मीतत्त्वनिरूपणम्.
२. भगवत्कृपायास्सहेतुकत्वनिरूपणम्.
३. सिद्धोपायनिरूपणम्.
४. शठकोपादिप्रबन्धनिरूपणम्.
५. कृपाशब्दार्थनिरूपणम्.
६. परमतपरिहासः.
७. वर्णधर्मनिरूपणम्.
८. निगमनम्.

Complete.

**Beginning :**

अस्तोकाध्वरिवादिहंसजलमुक्काचीपराम्भ्वाल्पक-
श्रीरामानुजसद्गुरूत्तमकृपापात्रं पवित्रं सताम् ।
ज्ञानाधारविशुद्धवाजिवदनात्तज्ञानभूषायुतं
तादृग्ज्ञानविशेषलब्धसुमहद्वैराग्यरूपोज्ज्वलम् ॥
श्रीमद्वेङ्कटनाथतीर्थदिवसे तस्यैव भूम्नः कृपा-
यातं वेङ्कटनाथकार्यममलं वन्दारुवृन्दाश्रितम् ।
श्रीरङ्गेशकृपात्तवेदमकुटाचार्याभिधानादिभिः
ख्यातं तं प्रणमामि शुद्धमतिमत्सत्संप्रदायाप्तये ॥
श्रीरामानुजसंप्रदायरसिकस्त्वप्यन्तरामानुजः
पौर्वापर्यविरुद्धवादकुशलान् कांश्चित्स्वगोष्ठीगतान् ।
दूरीकृत्य सुशास्त्रनीतिसहितैर्वादैस्सतां संमतैः
तद्रामानुजदृष्टमेव पुनरप्यर्थं प्रवक्ति स्फुटम् ॥
मध्यस्था भुवि पण्डिताश्च बहवो निष्पक्षपातैर्युताः
सारासारविवेकिनः श्रुतिनयप्रज्ञास्सदा जाग्रति ।
सर्वज्ञश्च हरिस्स्वयं घनघृणो जागर्त्यतोऽस्मद्गुरोः
कारुण्याद्विलिखामि मूर्खमतयो निन्दन्तु का नः क्षतिः ॥

श्रीमच्छङ्कररामानुजाचार्याभ्यां प्रतिष्ठापितं वैदिकं मार्गं मध्ये मध्ये बाह्यैः कल्मषतां प्राप्यान्ते श्रीमद्वेदान्ताचार्यैरिव सिद्धान्तीकृत-

स्वात् तदादरणरूपं कृतज्ञतानुसन्धानमादौ द्वाभ्यामनुसन्धत्ते—स्वगोष्ठीगतान् श्रीरामानुजसंप्रदायस्थाः स्थूलदृष्ट्या ज्ञानपुत्रीभूतश्रीकुरुकेशतच्छिष्यश्रीविष्णुचित्ताचार्यसंप्रदायस्थाः श्रीपराशरभट्टपादाश्र . ति कलिमथनाचार्यसंप्रदायस्था इति द्विविधाः । एतयोर्द्वयोरपि रहस्यार्थपाठविषये प्रभेदः । तथाहि—घटिकाशतककर्तृश्रीमद्वरदाचार्यादधीतश्रीवेदान्ताचार्योक्तश्रीमद्रहस्यत्रयसारादिशास्त्रानुष्ठातार अहोबिलमठीयाः

* * * *

अथ संग्रहपूर्वपक्षः—

श्रीमान् शक्त्या विहीनस्स्वयमिह वृणुते संसृतिस्थं विमोक्तुं
जीवैः कार्यं न किंचिद्वृजिनसुकृतयोरन्वयोऽतो न चैषाम् ।
मुक्तेः प्राप्यं द्वितत्त्वं प्रवरणसमये त्वेकतत्त्वस्य योगः
प्राहुर्ये केचिदित्थं स्वमतविमतितस्तन्मतं खण्डयामि ॥

संग्रहसिद्धान्तः—

श्रीमान् शक्त्या समेतस्स्वत इह वृणुते प्रीतिपूर्वं भजन्तं
स्वातन्त्र्यादीशदत्ताद्वृजिनसुकृतयोरन्वयी स्याद्धि जीवः ।
जीवैः कार्यं च किंचित् परमपुरुषतत्त्वं च लक्ष्म्या सहैकं
तस्मात्प्राप्यं तदैकं स्वशरणवरणीयं च तद्वस्तु सिद्धम् ॥

**End :**

इत्येवं वेदमौलिप्रकुपितमनसां वादजालं निरस्तं
प्राचीनानां गुरूणां श्रुतिसृतिरपि सुस्थापिता नीतियुक्ता ।
श्रीमद्रामानुजार्यप्रतिमकुटगुरुप्रोक्तशास्त्रानुसारा-
च्छ्रीमद्वेदान्तरामानुजगुरुकृतिनावादि दुर्वादिहन्त्रा ॥

न वा वित्तोन्मत्तं न जडमपि जात्येकशरणं
समुद्दिश्यावोचं सरससमिदं ग्रन्थतिलकम् ।
परं तु श्रुत्यन्तप्रथितगुरुवाणीसुविलस-
द्विशुद्धस्वान्तानां ग्रथितमिदमानन्दजनकम् ॥

वेदान्तरामावरजबुधेन गुरुसेविना ।
सतां कृतं मतिमतां संप्रदायनिरूपणम् ॥

R. No. **5341.**

Paper. 10¼ × 9¼ inches. Foll. 50. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Mūppil Nair, M.L.C., Kavalappara, Malabar district.

कल्याणगुणरत्नाकरः

KALYĀṆAGUṆARATNĀKARAḤ.

Foll. 1a—49a. Foll. 49b and 50 are left blank.

A work on medicine by Vaidyanātha.

Complete.

**Beginning:**

प्रणम्य गुरुपादाब्जं कल्याणगुणसागरम् ।
लिख्यते वैद्यनाथेन पूज्यपादकृतं त्विदम् ॥

त्रैलोक्यचिन्तामणिगुणः—

वह्निं दीपयते बलं च कुरुते तेजश्च संवर्धयेत्
वीर्यं वर्धयते विषं च हरते दार्ढ्यं विधत्ते तनोः ।
अभ्यासेन निहन्ति मृत्युपलितं पुष्टिं प्रदत्ते . .
कासं कृन्तयते क्षयं क्षपयते पित्तं च निर्मूलयेत् ॥
वातं विभ्रति शूलपाण्डुग्रहिणीरक्तातिसारान् जयेत्
मेहप्लीहभगन्दरान् ज्वरगरानर्शांसि कुष्ठानपि ।
क्षतान् कृच्छ्रजलोदराश्मरिगदान् शोफान् हरत्यौदरान्
वैद्यासाध्यरुजो निहन्ति सहसा त्रैलोक्यचिन्तामणिः ॥

**End:**

शाणपुष्पी—திருகிருப்பை.

संग्राहिणी च शिशिरा शारिबा कफपित्तजित् ।
तृष्णारुचिप्रशमनी रक्तपित्तापहा स्मृता ॥
त्रिदोषशमनी स्वादुः रूक्ष्या रक्तप्रसादनी ।
भिषग्भिः ऋद्धिः कथिता वृद्धिश्चापि तथा गुणाः ॥
सामान्येन प्रयोज्या या केषांचिल्लिखिता गुणाः ।
भेषज्यनामलिखिता अपि लेख्यानिरीक्षये ॥

**Colophon:**

इति कल्याणगुणरत्नाकरस्समाप्तः ॥

## R. No. 5342.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 62. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Mūppil Nair, M.L.C., Kavalappara, Malabar district.

देवीमाहात्म्यव्याख्या—गूढार्थदीपिका.

DĒVĪMĀHĀTMYAVYĀKHYĀ : GŪḌHĀRTHADĪPIKĀ.

Foll. 1a—61a. Foll. 61b and 62 are left blank.

Similar to the work described under No. 5614 of the D.C.S. MSS., Vol. III.

Contains the Adhyāyas 1—13 complete.

**Beginning:**

सच्चिद्रूपा परा शक्तिस्त्रिगुणानन्तरूपिणी ।
जगज्जन्मस्थितिध्वंससाक्षिण्यस्तु शिवाय नः ॥
आत्मानन्दसुधाधाम्नो गुरुदुग्धाम्बुधेर्मम ।
कटाक्षविछीकल्लोलाः क्षालयन्तु मनोमलम् ॥
श्रीमद्गुरुपदाम्भोजभावनावासनामयी ।
देवीचरितगूढार्थदीपिका प्रोच्यते मया ॥

इह खलु पुरा शशिमौलिप्रणयान्तेवासी समस्तविशारदः श्रीमार्कण्डेयः परमेश्वरप्रसादलब्धाष्टादशविद्यः क्रोष्टुकिनाम्ने स्वशिष्याय ताः समुपदिदेश । प्रसिद्धाश्च ता ह्यष्टादशविद्याः । तथा च श्रूयते—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वो वेद एव च ।
अर्थशास्त्रचतुर्थास्ते विद्या ह्यष्टादश स्मृताः ॥ इति ।

* * * *

तत्रोक्तेषु पुराणेषु मध्ये मार्कण्डेयाभिधेऽस्मिन् पुराणे सर्गादयः प्रवर्तिताः । मन्वन्तरप्रकरणे तु सप्त मन्वन्तराणि प्रपञ्चितानि । एकस्मिन् कल्पे हि चतुर्दश मनवः । कल्पो नाम ब्रह्मणो दिनम् । तत्रास्मिन् वराहाख्ये कल्पे हि षण्मनवोऽतीताः स्वायंभुवस्वारोचिषोत्तमतापसरैवत-

चाक्षुषाख्याः । साम्प्रतं सप्तमो मनुर्वैवस्वतो नाम । तस्य मत्स्यमूर्तेरनुग्रहान्मन्वन्तरलाभश्च सप्रपञ्चमुपवर्णितः । परं भविष्यतस्सावर्णेः विष्णुमायाप्रसादतो मन्वन्तरलाभश्चोक्तः । तत्र तस्य क . . . वानुग्रहप्रकारः सप्रपञ्चं विवस्वता क्रोष्टुकिना पृष्टो मार्कण्डेयस्तद्विपदा(वक्तु)स्तन्मनस्समाधानार्थं तदभिमुखीकरोति । सावर्णिस्सूर्यतनय इति श्लोकद्वयेन—यः अष्टमः मनुः कथ्यते लोके तदुत्पत्तिं निशामय । उत्पत्तिरुद्भवहेतुः । कार्येण कारणोपचारः । पूर्वजन्मनि तस्य तत्सेवया तदनुग्रहलाभप्रकारस्तन्निशामयेति । अत्र निशामयेति वदता भविष्यन्तमप्यर्थमहं तव करतलामलकवत् प्रत्यक्षीकृतमिव वाग्वैभवेन करोमीत्यावेदितम् । सावर्णिः सूर्यतनय इत्याद्युक्तानुवादः ॥

**Colophon :**

इति देवीचरितव्याख्यायां गूढार्थदीपिकायां प्रथमोऽध्यायः ।

**End :**

अत्रापि सावर्णो भविता मनुरित्युपसंहारश्च कृतः । तेन चात्र सवर्णशब्दस्याजामेकां लोहितशुक्लकृष्णामिति श्रुतेः, गुणसाम्यरूपिण्याः प्रकृतेः वाचकत्वादुपक्रमोपसंहारैकरूप्यादिषड्विधतात्पर्यलिङ्गपर्यालोचनया तस्यैकविषयत्वमवधार्यते । सुरथवैश्यौ च तत्सेवया भुक्तिमुक्तिफलसाधनत्वख्यापनायोदाह्रियेते ।

**Colophon :**

इति देवीमाहात्म्यव्याख्यायां गूढार्थदीपिकायां त्रयोदशोऽध्यायः ।

या चक्रे मधुकैटभासुरवधं संभूय देहाद्धरे-
र्या जघ्ने महिषं च देवमहसा संभूतदिव्याकृतिः ।
भूत्वा चन्द्रशिखामणेः प्रियतमा देहाच्च या सानुगान्
शुम्भादीन्निजघान साम्ब्रु सततं भुक्त्यै च मुक्त्यै नमः ॥

आपदि किं करणीयं स्मरणीयं चरणयुगलमम्बायाः ।
तत् स्मरणं किं कुरुते ब्रह्मादीनपि किङ्करीकुरुते ॥

श्रीमद्गुरुपदाम्भोजभावनावासनामयीम् ।
सन्तो विमत्सरास्सन्तः शोधयन्तु गिरं मम ॥

## R. No. 5343.

Paper. 10½ × 9½ inches. Foll. 6. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927-28 from a MS. of M.R.Ry. Vēdāntarāmānuja-cāryar, Srirangam, Trichinopoly district.

सत्यसंग्रहः.

SATYASAṄGRAHAḤ.

Similar to the work described under R. No. 5340 ante.

By Vēdāntarāmānuja.

Complete.

**Beginning:**

द्वयोर्भावो द्विता ज्ञेया द्वितैव द्वैतमुच्यते ।
यस्माद् द्वैतं न तत्तावदद्वैतं मतमीर्यते ॥
विशिष्टं स्थूलसूक्ष्माभ्यां चिदचिद्भ्यां यतस्स्मृतम् ।
तयोर्विशिष्टमद्वैतं विशिष्टाद्वैतमीर्यते ॥
धर्मद्वारा चितस्स्थौल्यं सौक्ष्म्यं च कथितं ततः ।
स्वरूपेणाचितः प्रोक्तं तद्वयं व्यापितात्र हि ॥
य आत्मनीति वेदस्तु विशिष्टैक्यं नियन्तृताम् ।
शरीरित्वं व्यापकत्वं समाधाने च भाषते ॥
सर्वं खल्वादिवेदेनाभेदवादः स्फुरत्पदः ।
सर्वं ब्रह्मेति कश्चित्तु सिद्धान्तमकरोत्पुरा ॥
द्वा सुपर्णावितीत्यादिश्रुतयो भेदवादकाः ।
अतस्तु कश्चिद् द्वैतस्य सिद्धान्तमकरोत् पुनः ॥

**End:**

यद्वद्रुते श्रुतिस्सम्यक् तद्वत्प्राज्ञो भवेद्ध्रुवम् ।
तस्मादनलसो नित्यं स्ववर्णाश्रमकर्मणाम् ॥
आचरन् श्रद्धया सार्कं त्यक्त्वा वैषयिकं सुखम् ।
ब्रह्मवस्तुनि संसक्तस्तस्मिन् ध्यानपरायणः ॥
सर्वकर्मविनिर्मुक्तः पूर्णानन्दमयो भवेत् ।
इत्थं वेदान्तरामावरजेन निरूपितम् ॥

**Colophon:**

इति सत्यसंग्रहो नाम ग्रन्थः ॥

निष्पन्नभक्तिरभ्यासाद्वैराग्याच्च दयानिधेः ।
अनुग्रहाच्च यः कश्चिज्जीवो निर्मुक्तबन्धनः ॥

* * * *

यथा कर्कशतां चैव तथाप्यस्य परोक्षतः ।
ब्राह्मणः क्षत्रियो वापि यो वा को वा विवेकवान् ॥

---

R. No. 5344.

Paper. 10½ × 9¾ inches. Foll. 4. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Mūppil Nair, M.L.C., Kavalappara, Malabar district.

न्यायरत्नम्.

NYĀYARATNAM.

A treatise on astronomy.

Complete.

Contains the following subjects :—

१. विक्षेपाध्यायः.
२. काललग्नाध्यायः.
३. छायाध्यायः.
४. विपरीतच्छायाध्यायः.
५. ग्रहणाध्यायः.
६. शृङ्गोन्नत्यध्यायः.
७. मौढ्याध्यायः.
८. व्यतीपाताध्यायः.

**Beginning :**

मदीयहृदयाकाशे चिदानन्दमयो गुरुः ।
उदेतु सततं सम्यगज्ञानतिमिरारुणः ॥
नमस्कृत्य गुरून् भक्त्या गणेशादीन् ग्रहानपि ।
न्यायरत्नाह्वयं किञ्चिद्गणितं क्रियते मया ॥
इह ग्रहाः स्फुटीकार्यास्सकलाः पूर्वशास्त्रतः ।
वैधृतादितरत्रेन्दोः कार्या चान्त्यस्फुटक्रियाः ॥
कुवादेरन्त्यकेन्द्रोत्थदोर्गुणा त्रिगुणाहृता ।
शीघ्रोच्चो न स्फुटोऽल्पं न दोर्ज्यापान्त्यश्रुतिर्भवेत् ॥
अन्त्यकेन्द्रे भुजाभावे कर्क्यैणाद्योऽस्ति मौर्विका ।
स्ववृत्तो नाग्यनन्दघ्नन्दा प्रान्त्यश्रुतिस्तया ॥

**End :**

स्वदोःकान्त्युक्तचापोनं त्रिभं कोट्युत्थमेव वा ।
ओजयुक्पदगे च . स्वर्णं स्यात् सोऽयनान्तगः ॥
अल्पकान्त्ययनान्तस्थसूर्येन्द्वोरपमान्तरे ।
बिम्बैक्यार्धाधिके दोषस्तत्समीपे न विद्यते ॥
न्यायप्रदर्शनायैवं गणितेष्वल्पचेतसाम् ।
गणिताब्धौ निमज्ज्यैतन्न्यायरत्नं मयोद्धृतम् ॥

**Colophon :**

इति न्यायरत्ने व्यतीपाताध्यायोऽष्टमः ॥

---

## R. No. 5345.

Paper. 10¾ × 9¼ inches. Foll. 138. Lines, 20 in a page. Dēvanāgari Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Tāmaraparṇi Veṅkaṭaramaṇācār, Nerūr, Trichinopoly district.

भागवततात्पर्यटीकार्थसंग्रहः – मणिप्रकाशः.

BHĀGAVATATĀTPARYAṬĪKĀRTHASAṄGRAHAḤ : MAṆI-PRAKĀŚAḤ.

Foll. 1*a*—137*a*. Foll. 137*b* and 138 are left blank.

A brief commentary on the Bhāgavatatātparyaṭīkā. By Vēdagarbhanārāyaṇa. The commentary is called Maṇiprakāśa.

Contains the 5th Skandha breaking off in the 16th Adhyāya.

**Beginning :**

यदीयचरणाम्भोजकेसरीघातखर्परात् । (?)
उद्भूज्जाह्नवी लोके भजेऽहं तं त्रिविक्रमम् ॥
प्रणम्य पञ्चमस्कन्धदैवतां विष्णुरूपिणीम् ।
वन्दे श्रीमन्महाभाष्यरघुनाथार्यसद्गुरून् ॥
अध्यायगद्यपद्यादिस्तबकाननसानुभिः ।
पूर्वोपदिष्टमार्गेण पञ्चमस्कन्धपर्वतम् ॥
आरोढुमुत्सहे तेषामल्पज्ञोऽपि कृपाबलात् ।
ये तु सच्छास्त्रपारीणास्ते कुर्वन्तु दयां मयि ॥

यां नारदात्मविद्यामधिगम्य पुनर्महीम् ।
भुक्त्वा विभज्य पुत्रेभ्य ऐश्वर्यं समगात् पदम् ॥

इति चतुर्थस्कन्धोक्तं नारदोपदेशादनन्तरमपि प्रियव्रते कृतं महीभोगं श्रुत्वा राजा पृच्छतीत्याह—राजेति । राजा परीक्षित् । पृच्छतीति शेषः । तत्त्वविषययोग्यता भविष्यतीत्येतस्मिन्नध्याये निरूप्यते । तत्त्वविशेषविशयी परीक्षित् शुकं पृच्छतीत्यत आह—प्रियव्रत इति । पूर्वं चतुर्थस्कन्धे परमवैराग्येण परमभगवद्भक्तः राज्यं परित्यज्य तपसे वनं गन्तुमुद्युक्तं प्रति नारदेनोक्तं राज्यमनुभवन्नेव त्वया भगवद्ध्यानादिलक्षणपूजादिकं कार्यमिति तेन तथैव कृतमिति चोक्तम्, तत्राक्षेपपूर्वकं पृच्छति—प्रियव्रत इत्यादिना । हे मुने शुकाचार्य भागवतः स्वतो भगवद्भक्तः प्रियव्रतः तन्नामा राजा आत्मारामः नारदोपदेशेनात्मविज्ञानानन्दस्वरूपभूते परमात्मनि आ सम्यक् रमतइति तथा भूत्वा निरन्तरं भगवद्ध्यानयुक्तस्सन्नेव गेहे अरमत सर्वसाम्राज्यभोगानन्वभवदित्युक्तम् ।

**Colophon:**

इति श्रीमद्भागवततात्पर्यटीकार्थसंग्रहे वेदगर्भनारायणेन विरचिते मणिप्रकाशे पञ्चमस्कन्धे प्रथमोऽध्यायः ।

**End:**

तन्नामा राजा चरमोद्भवः चरमे अवसाने अन्तिमभागे उत्पन्नः प्रैयव्रतं प्रियव्रतसम्बन्धिनमिदम् इमं वंशमन्वयं कीर्त्यात्यलङ्करोत् अत्यन्तं भूषितवान् । विष्णुः सुरगणान्यथालङ्करोति तथालङ्कृतवानित्यर्थः ।

**Colophon:**

इति श्रीमद्भागवततात्पर्यटीकार्थसंग्रहे वेदगर्भनारायणेन विरचिते मणिप्रकाशे पञ्चमस्कन्धे पञ्चदशोऽध्यायः ।

भूवलयतत्परिमाणविषयकं श्रीनारायणमहिमज्ञानोपलक्षणमित्यावश्यकत्वान्मोक्षोपयोग्येवेत्याशयेन पूर्वं सङ्क्षेपत उक्तं समुद्रद्वीपमानादिकं प्रपञ्चेन वर्णयत्यध्यायपञ्चकेन ।

* * * *

एतादृशे ब्रह्मणि यन्मन आवेशितं तत्पादारविन्दैकरततया कृतं तपं समर्थं भवति । तदेतद्भगवद्रूपं हे गुरो . . . . . . योग्योऽसि हेति प्रसिद्धिं सूचयति इति राजा पप्रच्छेत्यन्वयः । एवं पृच्छन्तं.

## R. No. 5346.

Paper. $10\frac{3}{4} \times 8\frac{1}{2}$ inches. Foll. 312. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Vṛṣabhadāsa Nāyanār, Madras.

Bound in two volumes.

### प्राभृतत्रयम्, द्राविडव्याख्यासहितम्.

### PRĀBHṚTATRAYAM WITH TAMIL MEANING.

Foll. 1*a* to 312*a*. Foll. 165 to 168 and 312*b* are left blank.

A work on Jain philosophy in Prakṛt containing a commentary in Tamil. The name of the commentator is Kauṇḍēśa. The three Prābhṛtas are Pañcāstikāya, Pravaraṇasāra, and Samayasāra.

The name of the scribe and the date of transcription of the original MS.:—Sixth day (*i.e.*, Thursday) of the month of Āṣāḍha in the year Virōdhikṛt, at Ponnūr in the Sannidhi of Āḻvār in Kanakamalai. By Padumannaṅgaḷ, disciple of Ajitasēnadēvaraiya.

Complete.

**Beginning :**

नत्वार्हत्सिद्धसूरीनुदितगुणगणान् पाठकान् सर्वसाधून्
कौण्डेशः प्राभृतोक्तत्रितयमतिशयात्यन्तगम्भीरवाक्यम् ।
विस्तीर्णार्थं सुखेन द्रमिडजनपरिज्ञानमुद्दिश्य साक्षाद्
वक्ष्येऽहं द्रामिडोक्त्या गुरुवचनसमभ्यस्तशास्त्रार्थसारः ॥

* * * *

इंदसदवंदिआणं तिहुवणहिदमहुरविसदवक्काणम् ।
अन्तातीदगुणाणं णमो जिणाणं जिदभवाणम् ॥

* * * *

समणमुहुग्गदमट्ठं चदुगदिविणिवारणं सणिव्वाणम् ।
एसो पणमिअ सिरसा समयमिणं सुणुह वोच्छामि ॥

* * * *

समवायो पंचण्णं समओत्ति जिणुत्तमेहि पण्णत्तम् ।
सोचेव भवदि लोगो त्तत्तोआओअळोगोरवम् ॥

* * * *

जीवा पोग्गळकाआ धम्माधम्मं तहेव आआसम् ।
अत्थित्तम्मिअ णियदा अणण्णमआ अणुमहत्ता ॥

* * * *

जेसि अत्थि सहावो गुणेहिं सह पज्जयेहिं विषहेहिम् ।
ते होन्ति अत्थिकाया णिप्पण्णं जेहि तेल्लोकम् ॥

**End:**

पासंडिलिङ्गेसुव गिहलिङ्गेसुव बहुपआरेसु ।
कुव्वन्ति जे ममत्तिं ते हि णणाअं समयसारम् ॥

* * * *

ववहारिओ पुणणओ दोण्णिवि लिङ्गाणि भणइ मोक्खपहे ।
णिच्छ अणेयाण इच्छइ मोक्खपहे सव्वलिङ्गाणि ॥

* * * *

जो समअवाहुडमिणं पडिऊण अत्थसच्च योणाउम् ।
अत्थे ताइह सो होहइ उत्तमं सोक्खम् ॥

* * * *

**Colophon:**

प्राभृतत्रयव्याख्यानं समाप्तम् ॥

The scribe adds—

*விரோதிகிருது௵ ஆடி மீ" 6௳ வியாழக்கிழமையும், தசமியும் விசாக நக்ஷத்திரத்திலே பொன்னூர் கனகமலை ஆழ்வார் சந்நிதியில் அஜிதசேனதேவாசாரியரவர்கள் சிஷ்யரான பதுமன்னவர்கள் நகலெழுத லிபி.*

---

R. No. **5347.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 134. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Mūppil Nair, M.L.C., Kavalappara, Malabar district.

**अष्टादशन्याससमुद्रालक्षणादिमन्त्रावलिः.**

**AṢṬĀDAŚANYĀSAMUDRĀLAKṢAṆĀDIMANTRĀVALIḤ.**

Foll. 1a—133a. Foll. 133b and 134 are left blank.
Similar to the work described under R. No. 2578 ante.
Complete.

**Beginning :**

पार्वत्युवाच—

भगवन् करुणासिन्धो श्रोतुमिच्छामि शङ्कर ।
मन्त्रस्याष्टादशन्यासमुद्राणां लक्षणं वद ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं परम् ।
अष्टादशन्यासमुद्रालक्षणं प्राणनायिके ॥
अर्चने जपकाले तु ध्याने काम्ये च कर्मणि ।
तत्तन्मुद्राः प्रयोक्तव्याः देवतातन्निधायिकाः ॥
ऋषिर्गुरुत्वाच्छिरसेऽवधार्य छन्दोक्षरत्वाद्रसनागतं स्यात् ।
धियावगन्ता च तया सदैव हृदि प्रतिष्ठा मनुदेवता च ॥
ऋषिच्छन्दोदेवतानां न्यासे त्वङ्गस्य ईरिताः ।
ऋषिर्वर्णादिको धातुस्तो गत्या प्रापणेन च ॥
याताभ्यां यत्स्वरूपं स गुरुः स्यादृषिवाचकः ।
इच्छादोऽर्णात्मको धातुस्तच्छदद्यच्छदादिकः ॥
तयोरिच्छां ददातीति च्छन्दो मन्त्रार्णवाचकः ।
आत्मनो देवताभावप्रदानात् देवतेति च ॥
पदं समस्ततन्त्रेषु विद्वद्भिस्समुदीरितम् ॥

* * * *

प्रोक्तानीत्यङ्गमन्त्राणि सर्वतन्त्रेषु सूरिभिः ।
तत्रैव मन्त्रः क्लीं हुं फडिति चाप्यभिधीयते ॥
परं चैवास्य मन्त्रस्य भवन्त्यङ्गानि मन्त्रिणाम् ।
एवमष्टादशन्यासमुद्रालक्षणमीरितम् ॥
योज्या हि सर्वमन्त्रेषु परमं गोप्यमेव हि ।
भक्तानामुपदेष्टव्यं प्रिये तुभ्यं मयोदितम् ॥

**Colophon :**

इत्यष्टादशन्यासविधिः ।

**End :**

ओं श्रीं नमो भगवति जगन्मोहिनि सकलजनजपध्यानविघ्नकरि गच्छ गच्छ, परकर्ममन्त्रयन्त्रतन्त्रादिभक्षणं कुरु कुरु स्वाहा । परकर्म-

मन्त्रयन्त्रतन्त्रशक्तिणि । इषेत्वोर्जे त्वा वायवस्योपायवस्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे । अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि । शं नो देवीरभिष्टय आपो भवन्तु पीतये। शंयो-रभिस्रवन्तु नः । नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ।

---

R. No. 5348.

Paper. 10¼ × 9¼ inches. Foll. 174. Lines, 20 in a page. Grantha Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Māppil Nair, M.L.C., Kavalappara, Malabar district.

यन्त्रमन्त्राचारः.

YANTRAMANTRĀCĀRAḤ.

Foll. 1a—173a. Foll. 173b and 174 are left blank.

Similar to the above.

Incomplete.

**Beginning:**

अथ प्रवक्ष्यामि च वैदिकानि यन्त्राणि संक्षिप्य सतान्त्रिकाणि ।
इष्टाय भक्ताय सुसंयताय शुश्रूषवे शिष्यवराय तावत् ॥

सङ्क्षेपात् स्वयमेव वदति भूयो दुर्जयत्वाद्धिताय मन्त्रविदामनुष्टुभा यन्त्रं लिख्यते—

आलिख्याष्टदलं पद्मं तारं तत्कर्णिकान्तरे ।
सद्योदरे समीतीच जीवं साध्यार्णवेष्टितम् ॥
तारस्य पार्श्वयोर्दृष्टिनी ई इति च वै पुनः ।
तयोरधस्ताच्छ्रोत्रं च उ ऊ इति च तत्पुरः ॥
जिह्वां श्रुमिति दित्त्वेतान् सोऽहं हंसाक्षरात्क्रमात् ।
प्राणप्रतिष्ठामन्त्रं च गायत्रीमन्त्रयन्त्रयोः ॥
यथावकाशं विलिखेद्वृत्ताकारेण तद्बहिः ।
द्वौ द्वौ स्वरौ केसरेषु दलेषु त्र्य . . . काक्षरान् ॥
चतुरश्चतुरो बाह्ये वेष्टितं व्यञ्जनाक्षरैः ।
मा त्वा रुद्रेत्यृचा साध्यवर्णगर्भितया वृतम् ॥

भूपुराश्रिषु ॐ बीजं दिक्षु वं बीजमेव च ।
स्वर्णादिपट्टे विलिखेत् स्वगुरूक्तेन वर्त्मना ॥
आनुष्टुभं यन्त्रमिदं विलिख्य रुचकादिकम् ।
कृत्वा जप्त्वा च विधिवत् संपातस्पर्शनादिकम् ॥
सन्धारयति यो मर्त्यस्स जीवेच्छरदां शतम् ।
आयुरारोग्यसौभाग्यं धर्मार्थसुखमोक्षदम् ॥
किमत्र बहुनोक्तेन वाञ्छितार्थप्रदं परम् ।

**End:**

तिर्यग्भस्मसमूदं ततोर्ध्वमुदितं धृत्वानयोर्व्यत्ययो
विघ्नध्वंसनमन्यधारणकृतं भस्माभिधार्यं ततः ।
अन्यत्रोपरि भस्मधारणकृता मोहाद्दधन्निष्पतेत्
यद्यचन्दनकुङ्कुमाद्यपि च मृत्स्याल्लौकिकी केवलम् ॥ इति ॥
धार्यं भस्म सदाग्निहोत्रजनितं यद्वैदिकं वैदिकै-
स्तिर्यक्पुण्ड्रतया ललाटफलके वक्षस्स्थले मस्तके ।
बाह्वोर्मन्त्रपुरस्सरं क्रतुशतं तैरेव सम्यक् कृतं
स्नानं तीर्थसमस्तकोटिषु धरा दत्ताऽनवद्येऽखिले ॥

इति शङ्करसंहितायाम् ।

---

R. No. **5349.**

Paper. $10\frac{1}{2} \times 9\frac{1}{4}$ inches. Foll. 136. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Bhavadāsa Nambūdiri, Mayanūr Dēsām, Ottapalam, Malabar district.

ऋग्वेदप्रातिशाख्यम्, उदाहरणमण्डिकासहितम्.

ṚGVĒDAPRĀTIŚĀKHYAM WITH UDHAHARAṆA-MAṆḌIKĀ.

Similar to the work described under No. 883 of the D.C.S. MSS., Vol. II, wherein see for the beginning. By Viṣṇumitra.

Complete.

**End:**

यश्छन्दसां वेद विशेषमेतं भूतानि च त्रैष्टुभजागतानि ।
सर्वाणि रूपाणि च भक्तितो यः स्वर्गं जयत्येभिरथामृतत्वम् ॥

यो ब्राह्मणः छन्दसामेतं विशेषं वेद भूतानि च त्रैष्टुभजागतानि यो वेद सर्वाणि च रूपाणि त्रैष्टुभजागतानि यो वेद भक्तितः स स्वर्गं लोकं जयति । अथ एभिः छन्दोभिरमृतत्वं गच्छतीत्याह भगवाञ्छौनकः ।

अपीह श्लोकाः—

गायत्र्यादीनि छन्दांसि सोममाहुतयः पुरा ।
तानि सर्वमिदं कृत्स्नं त्रैलोक्यं सचराचरम् ॥
धन्यं यशस्यमायुष्यं पुण्यं पुष्टिकरं शुभम् ।
आत्यन्तिकं चापवर्ग्यं छन्दसां ज्ञानमुत्तमम् ॥
छन्दोज्ञानात् परं ज्ञानं नान्यदस्तीति मे मतिः ।
आहुर्यस्माद् द्विजश्रेष्ठास्तस्मात्तत्र प्रयत्नतः ॥

**Colophon:**

इति पार्षदव्याख्यायामुदाहरणमण्डिकायामष्टादशः पटलः । समाप्ता चोदाहरणमण्डिका ।

---

B. No. **5350.**

Paper. 10¼ × 8½ inches. Foll. 403. Lines, 20 in a page. Grantha. Good.

Transcribed in 1927–28 from a MS. of M.R.Ry. Śrīkṛṣṇacakravarti, Ketandapaṭṭi, North Arcot district.

Bound in 3 volumes.

स्मृतिकौस्तुभः

SMṚTIKAUSTUBHAḤ.

A treatise dealing with the religious, rites and duties of a twice-born. The author Rayasa Veṅkaṭādri also called Paradhīna was a minister of king Vīra a ruler of South India.

Wants beginning, otherwise complete.

**Beginning:**

अथ स्मृतिकौस्तुभग्रन्थ आरभ्यते—

गायत्र्यावगन्तव्याः । भरद्वाजसंहितायां पक्षान्तरमुक्तम् ।

मूलमन्त्रेण हुत्वाज्यं ततः प्रत्यक्षराहुतीः ।
एकां पुनश्च सर्वेण पौरुषेण च षोडश ॥
हुत्वात्र विष्णुगायत्र्या वैष्णव्यचोश्च हेतिभिः ।
हविर्निवेद्य देवाय तच्छेषेण तथाहुतीः ॥ इति ।

तथा च दर्शपूर्णमासादिसमुच्चये आभ्यां श्रुत्यादिकामेवानयोस्समुच्चये मानाभावाद्विकल्प इत्यवगन्तव्यम् । ततश्चक्रादिकमग्नौ विनिक्षिप्य संपूज्य तस्मिन्नग्नौ सुदर्शनषडक्षरेण विंशत्याहुतीः हुत्वा अग्निं प्रदक्षिणीकृत्य सुदर्शन महाज्वालेत्यादि तत्तन्मन्त्रेण तत्तत्स्थाने चक्रादिना प्रतपेत् ।

एतदप्युक्तं हारीते—

पश्चादग्नौ विनिक्षिप्य चक्राद्यायुधपञ्चकम् ।
पूजयित्वा सहस्रारं ध्यात्वा तद्वह्निमण्डले ॥
षडक्षरेण जुहुयादाज्यं विंशतिसङ्ख्यया ।
सर्वैश्च हेतिमन्त्रैश्च एकैकाज्याहुतिं क्रमात् ॥
ततः प्रदक्षिणं कुर्याद्वैष्णवः खलु पापहा ।
तेनैव बाहुमूले तु प्रतप्तेनाङ्कयेद्बुधः ॥ इति ।

**End:**

शाण्डिल्योऽपि—

यावन्निद्रां समभ्येति तावच्च मनसा जपेत् ।
निद्रान्तरे प्रबुद्धः सन् कीर्तयेद्भगवद्गुणान् ॥ इति ।

एवं चोक्तानि यानि कर्माणि तानि सर्वाणि विष्णौ समर्पयेत् ।

तदाहुः श्रीमदानन्दतीर्थभगवत्पादाचार्याः—

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥

इति सर्वमनवद्यम् ।

आचारस्य प्रकाशोऽयमाचन्द्रार्कं प्रकाशताम् ।
आशान्तव्याप्तयशसा पराधीनेन कीर्तितः ॥

**Colophon:**

इति श्रीमद्दक्षिणसमुद्राधीश्वरविश्वनाथमहीपालकुलतिलकस्यासकृदावर्तिततुलापुरुषादिषोडशमहादानमहाध्वरस्य वीरभूपालस्य साम्राज्यधुरंधरेण पराधीनापराभिधानेन रायसवेङ्कटाद्रिणा विरचिते स्मृतिकौस्तुभे आचारप्रकाशे सायाह्निकप्रकरणं समाप्तम् ।

समाप्तश्चायमाचारप्रकाशः ॥

R. No. **5351.**

Paper. 10¼ × 9¼ inches. Foll. 12. Lines, 20 in a page. Grantha. Good.

Restored in 1927–28 from a Library MS. described under No. 902 of the D.C.S. MSS.

**विकृतिकौमुदी—विकृतिवल्लीव्याख्या.**

VIKṚTIKAUMUDĪ : VIKṚTĪVALLĪVYĀKHYĀ.

Foll. 1a—11a. Foll. 11b—12 are left blank.

Same work as that described under No. 959 of the D.C.S. MSS., Vol II. By Gaṅgādharācarya.

Contains the first Paṭala complete.

---

R. No. **5352.**

Paper. 10¼ × 9¼ inches. Foll. 60. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1927–28 from a Library MS. described under No. 1425 of the D.C.S. MSS.

**लघुशब्देन्दुशेखरव्याख्या.**

LAGHUŚABDĒNDUŚĒKHARAVYĀKHYĀ.

Foll. 1a—59b. Fol. 60 is left blank.

Same work as that described under No. 1425 of the D.C.S. MSS., Vol. III.

Contains the Uttarārdha breaking off in the Bhvādi.

---

R. No. **5353.**

Paper. 10¼ × 9¼ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1927–28 from a Library MS. described under No. 1423 of the D.C.S. MSS.

**लघुशब्देन्दुशेखरव्याख्या—ज्योत्स्ना.**

LAGHUŚABDĒNDUŚĒKHARAVYĀKHYĀ : JYOTSNĀ.

Same work as that described under No. 1423 of the D.C.S. MSS., Vol. III. By Udayaṅkara.

Breaks off in the Halsandhi.

---

R. No. **5354.**

Paper. 10¼ × 9¼ inches. Foll. 100. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1927–28 from a Library MS. described under No. 935 of the D.C.S. MSS.

प्रातिशाख्यभाष्यम्—(शुक्लयजुः).

PRĀTIŚĀKHYABHĀṢYAM (WHITE YAJURVĒDA).

Same work as that described under No. 935 of the D.C.S. MSS., Vol. II. By Anantabhaṭṭa, son of Nāgadēva.

Complete.

---

R. No. 5355.

Paper. 10½ × 9½ inches. Foll. 172. Lines, 20 in a page. Dēvanāgari. Good.

Restored in 1927-28 from a Library MS. described under No. 4998 of the D.C.S. MSS.

विरोधवरूथिनीप्रमाथिनी.

VIRŌDHAVARŪTHINĪPRAMĀTHINĪ.

Same work as that described under No. 4998 of the D.C.S. MSS., Vol. II. By Śrīnivāsatātācārya son of Aṇṇayācārya and disciple of Ācāryadīkṣita.

Contains the first Virōdhōddhāra complete.

---

R. No. 5356.

Paper. 9½ × 7½ inches. Foll. 58. Lines, 20 in a page. Śāradā character. Good.

Purchased in 1927-28 from Dr. C. Kunhan Raja of the Adyar Library, Madras, who got it photographed from a MS. in the Prussian State Library.

तापसवत्सराजम्.

TĀPASAVATSARĀJAM.

A drama in 6 acts describing the story of Vatsarāja, the hero of Vāsavadatta and Ratnāvali; by Anaṅgaharṣa alias Mātrarāja, son of Narēndravardhana.

Almost complete. Wants a small portion in the beginning.

**Beginning:**

. . . . . . . . . . . . . . .

. . . . . . . . . . . . . . . . . ।

पाण्डुचन्दनरसेन मुखं किमर्थं

मत्थार्थितार्यविमुखी सुमुखि स्थितासि ॥

नटी—णहु किंच आणवेदु अय्यो ।

सूत्र—आर्ये शरद्गुणाविष्कारिणा नेपथ्येन वत्सराजस्य मे वासवदत्ता-भूमिकां सम्पादयिष्यतीति प्रस्तुतम् । स्मृत्वा, यावदसम्पादयन्त्येव सर्वं सम्पादितं भवता ।

नटी—विचिन्त्य, अय्य किं तावसवच्छराअ पेक्खन्ति सामाइआ ।

सू—आर्ये अथ किम् । ननु तस्यैव सकलनरेन्द्रचन्द्रमसः श्रीनरेन्द्रवर्धनसूनोरनङ्गहर्षापरनाम्नः श्रीमात्रराजस्य कृतौ कृतानुरागो जनः संप्रति।

स च कविः—

सद्वृत्तानुगतो गतो गुणवतामाराधनेऽनुक्षणं
कर्तुं वाञ्छति सर्वदा प्रणयिनां प्राणैरपि प्रीणनम् ।
मात्सर्येण विनाकृतः परकृतीः शृण्वन् बहत्युच्चकै-
रानन्दाश्रुजलच्छटाकुलमुखो रोमाञ्चपीनां तनुम् ॥

स च किल कविरेवमुक्तवान्—मया हि—

न कवित्वाभिमानेन न च व्यामूढचेतसा ।
रचितं नाटकमिदं स्वगोष्ठीभावितात्मना ॥

सा च गोष्ठी—

पदवाक्यप्रमाणेषु सर्वभाषाविनिश्चये ।
अङ्गविद्यासु सर्वासु परं प्रावीण्यमागता ॥

नटी—अय्य, किं अवरं विळंबीअदि ।

(नेपथ्ये) ।

अहो प्रसादः स्वामिनः ।

सूत्र—आकर्ण्य, आर्ये न कश्चिद्विलम्बः । तथाह्ययं मम कनीयान् भ्राता धृतकञ्चुकिभूमिक इत एवाभिवर्तते । तदेह्यावामप्यनन्तरकरणीयं सम्पादयावः ।

इति निष्क्रान्तौ । प्रस्तावना ।

ततः प्रविशति कञ्चुकी ।

कञ्चु—अहो प्रसादः स्वामिनः ।

हानिर्बलस्य सततं विषयोपयोगे
वाञ्छापि नास्ति शिथिलीकृतविग्रहस्य ।
बाल्योचितैर्मनसिजप्रभवैर्विकारैः
शून्यात्मनः स्खलितमस्य पदं ममेव ॥

तत्सर्वथा—

उपालम्भ्या भूयो न खलु करिणः सम्प्रति जनैः
सहन्ते नीचेभ्यः स्मरमुषितमानाः परिभवम् ।
क्षितीशो येनायं विषयसुखमोहान्वितमना
न पाञ्चालं वेत्ति प्रसभमुपरि न्यास्तचरणम् ॥

निःश्वस्य—भवतु यथादिष्टमेव सम्पादयामि । परिक्रम्यावलोक्य, भो भो नियोगिनः, एष खलु वत्सराजः समाज्ञापयति—

ताराकारं दधानैर्दधतु मणिभुवः कैरवैर्व्योमलक्ष्मीं
ज्योत्स्नां तन्वन्तु शुद्धाः स्वगितरविरुचोवे(वी)थयः केतकानाम् ।
वक्त्रैर्वाराङ्गनानां श्रिततिलकमिलल्लक्ष्मभिर्भूरिचन्द्राः
सर्वत्रान्तः पुरेऽस्मिन् भवतु कृतपदा कौमुदी वासरेऽपि ॥

**End:**

राजा—श्रृण्वन्, नातः परमपि प्रियमस्ति । पश्य ।
दृष्टा यूयं निर्जिता विद्विषन्तः माता देवी भूतधात्री च भूयः ।
सम्बन्धोऽभूद्दर्शकेनापि सार्धं किं दुष्प्रापं यन्न लब्धं भवद्भ्यः ॥

तथापीदमस्तु ।

आम्नायार्थविभाविनः प्रतिदिनं नन्दन्तु विप्राः परं
सभ्यस्तावदमी भवन्तु सुखिनो यावद्धरित्रीवराः ।
भृत्याः भौव . . . . . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . . . . ॥

---

## R. No. 5357.

Palm-leaf. 17 x 1¼ inches. Foll. 65. Lines, 8 in a page. Grantha. Good.

Purchased in 1927-28 from M.R.Ry. Svaminatha Bhaṭṭar, Stamp-vendor, Shoranur, Malabar district.

चम्पुरामायणम्.

CAMPURĀMĀYAṆAM.

Same work as that described under No. 12746 of the "D.C.S. MSS," Vol. XXI. By Śivarāmakavi.

Breaks off in the Kiṣkindhākāṇḍa.

### R. No. 5358.

Palm-leaf. 13¾ × 1 inches. Foll. 198. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1927-28 from M.R.Ry. Svāminātha Bhaṭṭar, Stamp-vendor, Shoranur, Malabar district.

अंशुमद्भेदः—काश्यपीयः.

AMŚUMADBHĒDAḤ : KĀŚYAPĪYAḤ.

Same work as that described under No. 13032 of the D.C.S. MSS., Vol. XXII.

Breaks off in Gṛhavinyāsalakṣaṇa.

---

### R. No. 5359.

Palm-leaf. 17 × 1½ inches. Foll. 242. Lines, 6 in a page. Telugu. Good.

Purchased in 1927-28 from M.R.Ry. Svāminātha Bhaṭṭar, Stamp-vendor, Shoranur, Malabar district.

वेदान्तकल्पतरुव्याख्या—परिमलः.

VĒDĀNTAKALPATARUVYĀKHYĀ : PARIMALAḤ.

Same work as that described under No. 4678 of the D.C.S. MSS., Vol. IX. By Appayadīkṣita.

Wants the beginning and end.

---

### R. No. 5360.

Palm-leaf. 17 × 1 inches. Foll. 51. Lines, 5 in a page. Grantha. Injured.

Purchased in 1927-28 from M.R.Ry. Svāminātha Bhaṭṭar, Stamp-vendor, Shoranur, Malabar district.

(a) रामायणसारतात्पर्यसंग्रहः.

RĀMĀYANASĀRATĀTPARYASAṄGRAHAḤ.

Foll. 1a—35b.

In praise of Śiva. Also attempts to establish the greatness of Śiva on the authority of the Rāmāyaṇa.

Name of the scribe ; Śēṣādri Śāstri.

Incomplete.

**Beginning :**

. . . . . . . प्राचेतसो मुनीश्वरः कमलासनवरलब्धसकलार्थवेदी श्रीरामचरितवर्णनात्मकं श्रीरामायणाख्यं महदादिमं काव्यं निर्ममे । तन्निर्माण एव तत्र तत्र निय . . . . . . . . स्वचरितविशेषैर्वक्तृवचनैस्स-

वचनैश्च शिवस्यैव सकलदेवतातिशायिनं महिमातिशयं व्यञ्जयामासेत्येतदर्थ-प्रतिपादकं शिवस्तोत्रमारभमाणस्त . . . . मं तावत् प्रतिजानीते—

वाल्मीकिरादिकविराडखिलार्थदर्शी
साक्षाद्विरिञ्च इव सम्प्रतिपन्नभावः ।
विश्वेशविष्णुमधिकृत्य कृते प्रबन्धे
व्यक्त्या तवैव . . . . . . परत्वम् ॥

व्यक्त्या व्यञ्जनाख्यया ध्वनिवृत्त्या । तत्र तावदगस्त्याश्रमप्रवेशसमये श्रीरामचन्द्रवचनैः . . . . नैश्च शिवमहिमातिशयद्योतनमाविष्करोति ।

रामायणे हि कलशप्रभवाश्रमस्था
देवादयोऽपि तमुपासत इत्युदीर्य ।
स्थानानि यत्र मधुजिन्मघवन्मुखा .
. . . . निगदितानि न ते कपर्दिन् ॥

अगस्त्याश्रमाभ्याशे लक्ष्मणं प्रति श्रीरामवचनानि—

अत्र देवास्सगन्धर्वास्सिद्धाश्च परमर्षयः ।
अगस्त्यं नियताहारं सततं पर्युपासते ॥
. . . . . यक्षाश्च नागाश्च पन्नगैस्सह ।
वसन्ति नियताहारं धर्ममाराधयिष्णवः ॥

**End:**

अतो रामायणं शिवमहिमप्रख्यापनप्रधानं भवत्येवेति सिद्धम् । अतः स्तोत्रप्रचयगमनार्थं समाप्तौ नमस्काररूपं मङ्गलं क्रियते ।

प्राचेतसाय कवये प्रथमाय तस्मै तत्काव्यहारतरलाय च राघवाय ।
विश्वात्मने तदुभयस्थिरभावलक्ष्मीमुख्यास्पदाय विभवे च नमश्शिवाय ॥

**Colophon:**

इति श्रीमदप्पय्यदीक्षित[स्य]कृतः श्रीरामायणसारतात्पर्यसंग्रहस्समाप्तः ॥

The scribe—

शेषन् स्वहस्तलिखितम् ।

---

(b) स्कान्दप्रामाण्यनिरूपणम्.

SKĀNDAPRĀMĀṆYANIRŪPAṆAM.

Foll. 24a—36b.

Establishes the authoritativeness of the Skāndapurāṇa.

Complete.

**Beginning:**

अत्र केचिदाहुः, स्कान्दपुराणान्तर्गतानां प्रामाण्यं न संभवति । स्कान्दादीनां तामसपुराणत्वेनाप्रामाणिकत्वात् । तथाहि—पुरा . . . . कर्ता चतुर्मुखः केषुचित्कल्पेषु सत्त्वेनोद्रिक्तो भवति, केषुचिद्रजसा, केषुचित्तमसा, यदा सत्त्वोद्रिक्तस्तदा वैष्णवानि पुराणानि प्रणिनाय ।

**End:**

यच्चतुर्थं वैलक्षण्यं पुराणान्तरसंवादरूपं तदपि साधारणमित्यवोचाम । ये च पञ्चमषष्ठे वैलक्षण्ये सामान्यप्रश्नोपक्रमत्वात् नष्टकोशत्वरूपे ते अपि भागासिद्धे अतिप्रसक्ते . . प्रागेवोक्तम् । यच्च सप्तमं वैलक्षण्यं नातिविस्तृतत्वमिति तदपि निर्वक्तुमेवाशक्यमित्युक्तमेव । तदलमनेन मशकमृगयासंरम्भणेत्युपरम्यते । तदेवं सिद्धमेव प्रामा . . . . . . . . . . नामिति प्रकृतमनुसरामः ॥

The scribe adds—

शेषाद्रिशास्त्रिलिखितम् ।

प्रमाणजालप्रामाण्यसाधनग्रन्थ एष तु ।
शेषाद्रिशास्त्रिलिखितो ग्रन्थस्याद्य प्रवर्तनात् ॥

---

(c) रामचन्द्रविजयः.

RĀMACANDRAVIJAYAḤ.

Foll. 36b—51a. Fol. 51b is left blank.

A poem narrating the story of Rāma.

By Vēṅkaṭakṛṣṇa, son of Vēṅkaṭārya and grandson of Śrīnivāsa of Bhāradvājagōtra. The author was a disciple of Śivasūryayajvan.

Breaks off in the third Sarga.

**Beginning:**

श्रीमानिभास्यो दिशतु श्रियं ते देवः स भानोरिव यस्य लोकः ।
पदार्थतत्त्वार्थसुबोधलव्धर्मी करावलम्बास्ततमां विधत्ते ॥
वन्दारुवृन्दारकमौलिवृन्दमन्दारनिष्यन्दिमरन्दपानात् ।
इन्दिन्दिरो विन्दति वन्दिभावममन्दमानन्दमुपेत्य यस्य ॥
अनन्यभावं भजतां पदाब्जं नास्तीति भूयो जननं जनानाम् ।
हस्ताभिनां प्रत्ययमाचरन्तं वन्दे भवानीपतिमिन्दुमौलिम् ॥

जन्मादि यस्माज्जगतस्ततो यं वदन्ति वेदान्तविदोऽधिकं ते ।
परं परब्रह्मपदाभिधेयं वन्दे शिवं दैवतमिन्दुमौलिम् ॥
यदीयवक्षोनिकषेऽतिनीले सुवर्णलेखेव विभाति लक्ष्मीः ।
यो वा स्ववक्षःस्थलतद्गृहान्तरजस्त्वदीपायितकौस्तुभश्रीः ॥

* * * *

स सार्वभौमो जयति स्ववंश्यः श्रीदक्षिणामूर्तिवरप्रसादी ।
विद्यास्तमल्लाकृतडिण्डिमेन योऽताडयत्पण्डितगण्डषण्डम् ॥
वाग्देवतासंवननस्ववाग्भ्यः श्रीकालिदासादिमहाकविभ्यः ।
तेभ्यो नमो ग्रन्थकृतां कवीनां यद्भारती दीव्यति मातृकेव ॥
विद्यागुरुर्मे शिवसूर्यपज्वा स लोकवन्द्यः शिवसूर्य एव ।
सन्मानसाम्भोजविकासहेतुस्तमोऽपहः स द्विजराजवृत्तिः ॥
अवाप्य वाक्सुखभाजि यस्मिन् गुरुः कविः सोऽपि कलानिधिश्च ।
शास्त्रेषु मूढा इति सञ्चिरन्ते किं ते समं तेन तुलां लभन्ते ॥
कलाधरत्वात् कमलापतित्वात् पद्मासनश्रीचतुराननत्वात् ।
मूर्तित्रयात्मापि विशुद्धसत्त्वो यो राजते विश्रुतपुण्यकीर्तिः ॥
विद्याविनीत्योरपि साहचर्यमाश्चर्यमालोक्य च दानलक्ष्म्या ।
मध्यस्थदृष्ट्या यमुदग्रतापं नराकृतिं रुद्रमुशन्ति सन्तः ॥
श्रीजैमिनिव्यासकणादपाणिन्याचार्यवर्योदितशास्त्रविद्यः ।
सत्कर्मकृद्ब्रह्मपदार्थसार्थतत्त्वार्थनिर्धारणलब्धवर्णः ॥

* * * *

कृतिर्नवीनेति न दूषणीया गुणागुणावत्र विचारणीयौ ।
परिग्रहार्हः प्रथमस्तयोस्स्यादन्यस्तु विन्यस्तपदान्तरोऽस्तु ॥
वसन्ति सन्तः कवयो धरण्यां तेषां प्रबन्धाश्च रसोर्मिबद्धाः ।
तथापि भक्त्या रघुवंशकेतोर्गाथामगाधां कथयेऽहमद्य ॥

* * * *

अस्ति प्रशस्ता रघुपुङ्गवानां पराक्रमाक्रान्तदिगन्तराणाम् ।
उपेयुषां जन्म दिनेशवंशे राज्ञामयोध्येति पुरी मनोज्ञा ॥
यत्र स्थितानां रमणीमणीनां कुचैर्विरोधादिव हेमकुम्भाः ।
आरोपितास्सौधशिखास्वदुर्गं सुव्यक्तविद्वेषणमापदे हि ॥

**Colophon:**

भारद्वाजकुलाब्धिवर्धनविधुर्यः श्रीनिवासः कविः
तस्माभूत्तनयो नयोज्ज्वलगुणो यो वेङ्कटार्यो बुधः ।
नव्ये वेङ्कटकृष्णनामविदुषा तत्सूनुना कल्पिते
काव्ये चारुणि रामचन्द्रविजये सर्गोऽग्रिमः पूरितः ॥

इति श्रीरामचन्द्रविजये प्रथमस्सर्गः ।

**End:**

**Colophon:**

इति श्रीरामचन्द्रविजये द्वितीयस्सर्गः ।

अथात्मजप्राप्तिनिदानमन्नमास्वाद्य तिस्रोऽपि नरेन्द्रपत्न्यः ।
दधुश्शनैर्दौहृदलक्षणानि प्रपेदिरे दृष्टिपथं च तानि ॥

* * * *

स्वस्त्यस्तु ते भूप निरामयाः किं प्रजा गजा वा सरथा हयाश्च ।
प्रियङ्करी वृत्तिरिति प्रजासु सिद्धानुवा . . . . . . . ॥
(सं)प्राप्तकामस्य तवागमस्य फलं ममानुग्रह एव नान्यत् ।
अतस्समस्ते कुशलीति प्रोक्त्वा तपोऽभिवृद्धिं तमपृच्छदीशः ॥
विधेयकार्येषु . . . . . . . . . . . वदायधीशे ।
निवेदयामास तमीहितार्थं मुनिस्तमेवावसरं विधाय ॥

---

R. No. **5361.**

Palm-leaf. 13¾ × 1 inches. Foll. 38. Lines, 6 in a page. Grantha. Injured.

Purchased in 1927–28 from M.R.Ry. Svāminātha Bhaṭṭar, Stamp-vendor, Shoranur, Malabar district.

सकलाधिकारः—(आगस्त्यः).

SAKALĀDHIKĀRAḤ (ĀGASTYAḤ).

Similar to the work described under R. No. 3828 ante.
Breaks off in the 25th Adhyāya.

**Beginning:**

सकलंनिष्कल . . . . . . त्रिविधमेव वपुः परमेष्ठिना ।
विधिमिमं सकलस्य यथोचितं शशिधरेण तथा कथयाम्यहम् ॥

चल चल . . . . . . . . . . . . . . . . . . शिलासुधाः ।
विविधलोहमृदुत्तमशर्कराविरचितं स्वयमष्टविधं भवेत् ॥

* * * *

सोमास्कन्देश्वरं चन्द्रशेखरं वृषवाहनम् ।
नटेश्वरं तथा गङ्गाधरं तु त्रिपुरान्तकम् ॥
कल्याणसुन्दरं चार्धनारिं पाशुपतं तथा ।
कङ्कालकेशवार्धं च भिक्षाटनमतः परम् ॥
चण्डेशानुग्रहं चैव दक्षिणेशं . . . . ।
. . . पञ्चमूर्तीनां भेदाः षोडशधा भवेत् ॥
एतेषां प्रतिरूपाणां मानकल्पमथोच्यते ।
(अ)ङ्गमानं च गर्भं च द्वाराधिष्ठानपादकम् ॥
हस्तमानं च तालं च यजमानोदयेति च ।
मूलबेराङ्गुलीमानं मानमात्राङ्गुलं तथा ॥
मानं तु रुद्रभेदं स्यात्तद्भेदं बहुधा भवेत् ।
पूर्णांशोदयतारनाहसदृशं पार्श्वद्वयांशं भवेत्
तद्भागोऽङ्गुल एष धातुनवरुद्राप्ती . . . दयः ॥

**Colophon:**

इत्यागस्त्ये सकलाधिकारे मानसंग्रहो नाम प्रथमोऽध्यायः ।

**End:**

वस्त्रैर्भूषणधान्यरत्नवसुभिः सन्तोषणी शिल्पिनः
कृत्वा तौ विधिवद्विरच्य . . . . . . . . शिल्पिभिः ।
आचार्यः सह शिष्य . . . . . . . . . वासादिकं
कृत्वा देवमनन्तभक्तिमनसा संस्थापनं कारयेत् ॥

**Colophon:**

इत्यागस्त्ये सकलाधिकारे नयनोन्मीलनलक्षणविधानं नाम चतुर्विंशोऽध्यायः ।

. . रन्ध्रे भगाकारं योनिरन्ध्रे सलक्षणम् ।
ऊर्ध्वाग्रेतत्प्रकर्तव्यमथवा रन्ध्र उच्यते ॥
भगाकारः कृताख्या तद् योनिमध्ये क्रमोऽर्धयुक् ।
बाणरत्नाधिकं चैव देवीपीठस्य लक्षणम् ॥

R. No. **5362.**

Palm-leaf. 14½ × 1 inches. Foll. 17. Lines, 7 in a page. Grantha. Injured.

Purchased in 1927–28 from M.R.Ry. Svāminātha Bhaṭṭar, Stamp-vender, Shoranur, Malabar district.

(*a*) **अपशब्दखण्डनम्.**

APAŚABDAKHAṆḌANAM.

Foll. 1*a*—2. Fol. 2*b* is left blank.

A brief discourse purporting to establish that there cannot be such a thing as 'Apaśabda' accepted by grammarians. By Gaṅgādāsadīkṣita.

Complete.

**Beginning :**

अये वैयाकरणदर्दुरूद, कोऽयमपशब्दो नाम ? शब्दादन्यो वा, व्याकरणविरुद्धो वा, तदनुदाहृतो वा, शिष्टाप्रयुक्तो वा, प्रत्यवायहेतुर्वा, असंस्कृतो वा, शब्दत्वे सति शब्दानधिकरणो वा, शब्दलक्षणरहितो वा, साधुशब्दत्वेनाव्यवह्रियमाणो वा, म्लेच्छशब्दो वा । न प्रथमः, शब्दादन्यत्वेन घटस्याप्यपशब्दत्वापत्तेः । न द्वितीयः, विरोधासंभवात् । को व्याकरणेन साकं शब्दस्य विरोधः ? तेजस्तिमिरन्यायेन सहानवस्थानलक्षणो वा, व्याघातलक्षणो वा ।

**End :**

तत्तद्गौरवस्यापि न्याय्यत्वात् । न च संस्कृतया पश्चाद्गता तेषामर्थप्रत्ययः स्वत इति वाच्यम् । विना तथापि सुवचत्वात् । तस्मान्नापशब्दोद्भावनं निग्रहस्थानम् ।

**Colophon :**

इति श्रीगङ्गादासदीक्षितप्रोक्तमपशब्दखण्डनं समाप्तम् ।

. . . . . ति सोमयाजिनो मज्जनाय खलु शब्दशासिना ।
निर्मितं मतिमतां कृते मया खण्डनं सकलसूरिमण्डनम् ॥

---

(*b*) **षड्भाषाचन्द्रिका.**

ṢAḌBHĀṢĀCANDRIKĀ.

Foll. 3*a*—6*b*.

Same work as that described under No. 1562 of the D.C.S. MSS., Vol. III. By Lakṣmīdhara.

Incomplete.

(c) आख्यातचन्द्रिका.

ĀKHYĀTACANDRIKĀ.

Foll. 7a—12a. Fol. 12b is left blank.

Same work as that described under No. 1514 of the D.C.S. MSS., Vol. III; and with additional stanzas in the beginning as given below.

By Bhaṭṭamalla.

Contains the first Kāṇḍa complete.

**Beginning :**

यदिशवो नामरूपाभ्यां या देवी सर्वमङ्गला ।
तयोः संस्मरणात् पुंसां सर्वतो जयमङ्गलम् ॥
अवलम्बेऽखिलालम्बं लम्बोदरपदद्वयम् ।
यदालम्बावलम्बेन लभतेऽलं बुधः श्रियम् ॥
वाणि कल्याणि कल्याणश्रेणीनिश्रेणिसंस्तवे ।
मदीयरसनावेद्यां विहरेष्टार्थदायिनी ॥

---

(d) यङ्लुगादिनक्षत्रमालिका.

YAṄLUGĀDINAKṢATRAMĀLIKĀ.

Foll. 13a—15b.

27 stanzas illustrating the modifications of some of the roots with the addision as well as with the omission of the suffix यङ्.

By Veṅkaṭācarya.

Complete.

**Beginning :**

यो लक्ष्म्या विजरीहरीति यमिनां चित्तेषु यस्य द्युतिः
पास्पर्धीति समृद्धशारदशशिस्तोमैरमेयप्रभैः ।
यस्यापाङ्गतरङ्गितैर्नरिनरीनर्ति स्वयं सेन्दिरा
विद्याढ्यतमा स वाजिवदनो देवो मुदे वो भवेत् ॥
वक्त्रे वाजी स देवः शरदिजमुदिरस्पर्धिशोभर्द्धिशाली
स्तुत्या मे मोमुदीतु स्तवनमिदमुरीचर्करीतु मकामम् ।
प्रादुर्बोभोतु चेतस्यविरतमखिलान् दोषवीक्ष्यात्मदोषान्
विम्रीषान् जङ्घनीतु स्फुटमथिरसनं मामके नानदीतु ॥

**Colophon :**

एते यङ्यङ्लुगन्तप्रत्ययघटितश्लोकाः ।

**End:**

> स्वापयति मत्सकाशे मापयति त्वय्यतीव दीनतरम् ।
> कारुणिकः सूरिजनः क्षेमीद्या मां समीचयति ॥
> हयमुखकटाक्षवीक्षालम्भितपदरत्नतुङ्गगम्भीरा ।
> तद्गुणनिचयोपचयादक्षतनक्षत्रमालिका जयति ॥
> इत्थं तिरुमलरायक्षोणीशतकोटिपाणिवाणीतः ।
> शब्दान् यदन्तपूर्वान् विशदीकुरुते स्म वेङ्कटाचार्यः ॥

---

(*e*) पदव्यवस्था.

PADAVYAVASTHĀ.

Foll. 16*a*—18*b*.

On the correct usage of the Parasmaipada and Ātmanēpada in verbal forms.

Complete.

**Beginning:**

> आस्ते शेते भूयतेऽनुभूयते व्यतिविन्दते ।
> तथा व्यतिलुनीते च व्यतिस्ते व्यतिगच्छति ॥
> व्यतिघ्नन्ति व्यतिहसत्यपि च व्यतिजल्पति ।
> भूपास्संप्रहरन्तेऽन्योन्यस्य व्यतिलुनन्ति च ॥

**End:**

> अन्यान् परिमोहयते रोचयते चाथ नर्तयते ।
> वादयते वासयते धापयतेऽकर्मके सचित्तकृते ॥
> अन्यत्र तु णिजन्तत्वात् सिध्यतीह पदद्वयम् ।
> एवं पदव्यवस्थायाः प्रक्रिया समगृह्यत ॥

---

(*f*) वर्णलक्षणम्.

VARṆALAKṢAṆAM.

Foll. 16*a*—17*a*. Fol. 17*b* is left blank.

A small prosodial tract dealing with the origin and number of letters in prosodic groups and with the auspicious or inauspicious character of different classes of letters.

Incomplete.

**Beginning:**

वृत्तलक्षणतः पूर्वं गणलक्षणमुच्यते ।
गणानां वर्णसाध्यत्वात् तेषां सङ्ख्या च तद्ध्वनिः ॥
कृतौ प्रयोज्यवर्णानां नियमश्च निरूप्यते ।
पुमान् समीरं जनयेद्द्विवक्षुरयं च हृत्कण्ठमुखान्वितस्सन् ।
तेषु स्थितेष्वष्टसु नादमाद्यं वर्णात्मना व्यञ्जयति क्रमेण ॥

**End:**

देवनृगतिका वर्णाः क्ष्त्यादिस्सा शुभप्रदा ज्ञेयाः ।
तिर्यग्गतिका वर्णा रौरवगतिकाश्च दुःखदाः सततम् ॥
नान्दीपद्ये ततः स्थाने वक्ष्ये वर्ज्याक्षराण्यहम् ।

---

## R. No. 5363.

Palm-leaf. $16\frac{1}{2} \times 1$ inches. Foll. 190. Lines, 5 in a page. Telugu. Slightly injured.

Purchased in 1927-28 from M.R.Ry. Svāminātha Bhaṭṭar, Stamp-vendor, Shoranur, Malabar district.

भागवतम्, सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Same work as that described under No. 2199 of the D.C.S. MSS., Vol. IV, Part I. The commentary is by Śrīdharasvāmin.

Contains the third Skandha complete; but wants some leaves in the beginning and middle.

---

## R. No. 5364.

Palm-leaf. $12 \times 1\frac{1}{2}$ inches. Foll. 46. Lines, 8 in a page. Kanarese. Slightly injured.

Purchased in 1927-28 from M.R.Ry. Svāminātha Bhaṭṭar, Stamp-vendor, Shoranur, Malabar district.

श्रीपुराणसमाम्नायः.

ŚRĪPURĀṆASAMĀMNĀYAḤ.

This is a summary of the Śrīpurāṇa dealing with the Jain Tīrthaṅkaras.

**Beginning:**

श्रीपते सकलज्ञानसाम्राज्यपदमीयु . ।
. . . . . . . . . . . . . . . . . . . ॥

पुराणं मुनिमानम्य जिनेन्द्र . . . . . . ।
. . . . पुराणस्य पीठिका व्याकरिष्यते ॥
अनादिनिधनः कालवर्तनालक्षणो मतः ।
लोकमात्रस्य सूक्ष्माणुपरिच्छिन्नप्रमाणतः ॥
वर्तिता द्रव्यकालेन वर्तना . . . . . . ।
. . . . . . . . . व्यवहाराय कल्पते ॥
उत्सर्पिण्यावसर्पिण्यौ द्वौ भेदौ तस्य कीर्तितौ ।
उत्सर्पादवसर्पाच्च बलायुर्देहवर्ष्मणाम् ॥
कोटिकोट्यो . . . . . . . सागरसङ्ख्यया ॥

* * * *

इत्याद्याः कालभेदोऽवसर्पिण्या वर्णितो मनाक् ।
उदक्कुरुसमः शेषो विधिरत्रावधार्यताम् ॥
ततो यथाक्रमं तस्मिन् काले गलति मन्दताम् ।
माता सुखस्वीर्यायुःशरीरोत्सेधद्रुमेषु ॥
सुं . . . . . काले द्वितीयस्समवर्तत ।
सागरोपमकोटीनां तिस्रः कोट्योऽस्य संमितः ॥
तदा मर्त्यां ह्यमर्त्यां . कैवल्योपमजीविनः ॥

* * * *

कालेऽस्मिन् भारते वर्षे मर्त्याः पल्योपमायुषः ।
गव्यूतिप्रमितोच्छ्रायाः प्रियङ्गुश्यामविग्रहाः ॥
जनान्तरेण संप्राप्तधात्रीफलमिताशनाः ।
ततस्तृतीयकालेऽस्मिन् व्यतिक्रामत्यनुक्रमात् ॥
पल्योपमाष्टभागस्तु यदास्मिन् परिशिष्यते ।
कल्प . . . . . . . क्रमादेव परिच्युतौ ॥
ज्योतिरिङ्गास्तदा वृक्षा गता मन्दप्रकाशताम् ।
पुष्पदन्तावथाषाढपौर्णमास्यां स्फुरत्प्रभौ ॥
सायाह्ने प्रादुरास्तां तौ गगनोभयभागयोः ।
प्रतिश्रुतिरिति ख्यातस्तदा कुलधरोऽग्रिमः ॥
बिभ्रल्लोकातिगं तेजः प्रजानां नेत्रमावभौ ॥

**Colophon:**

इति श्रीपुराणसमाम्नाये प्रथमं पर्व ॥

**End:**

सर्वे ते वृषभसेनमुनीशमुख्याः
सख्यं गताः सकलजन्तुषु शान्त . . ताः ।
कालक्रमेण यमशीलगुणा . . . . . . . . मुनिनो गणेन्द्राः ।
यो नाभेस्तनयोऽपि विश्वविदुषां पूज्यः स्वयंभूरिति
त्यक्ताशेषपरिग्रहेऽपि सकलस्वामीति . . . . ।
. . . . . . . . . . . कारिमतो . . . . : .
निर्वाणोऽपि बुधैरुपास्य च गुणा यः सोऽस्तु वः शान्तये ॥

**Colophon:**

श्रीपुराणसमाम्नाय . . . . . . . . . ॥

---

R. No. **5365.**

Paper. 10 × 8 inches. Foll. 20. Lines, 16 in a page. Dēvanāgarī. Good.

Presented in 1927–28 by M.R.Ry. V. Veṅkaṭarāmaśarma, Trivandram.

परिभाषावृत्तिः.

PARIBHĀṢĀVṚTTIḤ.

Foll. 1*a*—19*a*. Foll. 19*b* and 20 are left blank.

A brief work explaining the Paribhāṣās—i.e., technical rules of interpretation used in explaining Pāṇini's grammatical Sūtras.

Incomplete.

**Beginning:**

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ।

एको लक्षणेनाभिहितः, अपरः शास्त्र एव प्रतिनियतेन पदेन प्रतिपादितः ; तयोर्ग्रहणसंभवे प्रतिपदोक्तस्यैव ग्रहणं नतु लाक्षणिकस्य । सन्लिटोर्जेः । जिगाय । ज्यातेः संप्रसारणे जिरूपस्य लाक्षणिकत्वान्न भवति । जिज्यतुः ।

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ।

प्रातिपदिकग्रहणे स्त्रीपुंनपुंसकलिङ्गैर्विशिष्टस्यापि ग्रहणं भवति । तृतीया सदृशादिभिः । यथेह भवति पित्रा सदृशः पितृसदृशः ।

**End :**

प्रत्ययः परः सनादिराकपः ।

प्रत्ययसंज्ञ उक्तः स यतो विधीयते ततः परो भवति । सन् तितिक्षते । तव्यादयः कर्तव्यः करणीयः । पञ्चमीनिर्देशात्पूर्वः परो वेति सन्देहे पर एव यथा स्यादिति वाच्यम् । श्रक्रामकज्ञबहुचस्तु विशेषविधानाद्यथास्थानं भवन्ति ।

**Colophon :**

इति परिभाषावृत्तिः समाप्ता ।

---

R. No. **5366.**

Śritāla. 20¾ × 2½ inches. Foll. 101. Lines, 10 in a page. Malayālam. Good.

Presented in 1927–28 by M.R.Ry. Svāminātha Bhaṭṭar, Stamp-vendor, Shoranur, Malabar district.

**ज्ञानवासिष्ठम्.**

**JÑĀNAVĀSIṢṬHAM.**

Same work as that described under No. 1983 of the D.C.S. MSS., Vol. IV, Part I. Kāśmirapaṇḍita

Breaks off in the 32nd Sarga.

---

R. No. **5367.**

Palm-leaf. 15¾ × 1⅝ inches. Foll. 83. Lines, 6 in a page. Grantha. Good.

Presented in 1927–28 from M.R.Ry. S. P. Veṅkaṭācāryār, Big street, Coimbatore.

**सिद्धान्तकौमुदीव्याख्या—बालमनोरमा.**

**SIDDHĀNTAKAUMUDĪVYĀKHYĀ : BĀLAMANŌRAMĀ.**

Same work as that described under No. 1444 of the D.C.S. MSS., Vol. III. By Vāsudēvadīkṣita.

Contains the Śabdādhikāra incomplete.

R. No. 5368.

Palm-leaf. 14 × 1⅜ inches. Foll. 66. Lines, 7 in a page. Grantha. Injured.

Presented in 1927–28 by M.R.Ry. S. P. Veṅkaṭācāryār, Big street, Coimbatore.

(a) नीलकण्ठविजयचम्पूः.

NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Foll. 1a—64a.

Same work as that described under R. No. 900 ante. By Nīlakaṇṭhadīkṣita.

Complete.

---

(b) श्रुतबोधः.

ŚRUTABŌDHAḤ.

Foll. 65a—66b.

Same work as that described under No. 1800 of the D.C.S. MSS., Vol. III. By Kālidāsa.

Complete.

---

R. No. 5369.

Palm-leaf. 17 × 1¼ inches. Foll. 53. Lines, 9 in a page. Grantha. Injured.

Presented in 1927-28 by M.R.Ry. S. P. Veṅkaṭācāryār, Big street, Coimbatore.

(a) न्यायसिद्धान्तमञ्जरी.

NYĀYASIDDHĀNTAMAÑJARĪ.

Foll. 1a—27b.

Same work as that described under No. 4215 of the D.C.S. MSS., Vol. VIII. By Jānakīnātha alias Cūḍāmaṇibhaṭṭācārya.

Complete.

---

(b) वेदान्तपरिभाषा.

VĒDĀNTAPARIBHĀṢĀ.

Foll. 48a—53b.

Same work as that described under No. 4727 of the D.C.S. MSS., Vol. IX; and with the following colophon. By Dharmarājādhvarīndra, a disciple of Veṅkaṭanātha, a resident of the village of Vēlāṅguḍi.

Complete.

**Colophon:**

इति धर्मराजाध्वरीन्द्रविरचितायामद्वैतपरिभाषायामष्टमः परिच्छेदः

R. No. **5370**.

Palm-leaf. 9¼ × 1½ inches. Foll. 112. Lines, 11 in a page. Slightly injured.

Presented in 1927-28 by M.R.Ry. S. P. Veṅkaṭācāryār, Big street, Coimbatore.

कुवलयानन्दव्याख्या—अलङ्कारचन्द्रिका.

KUVALAYĀNANDAVYĀKHYĀ : ALAṄKĀRACANDRIKĀ.

Same commentary as that described under No. 12862 of the D.C.S. MSS., Vol. XXII. By Vaidyanātha, son of Tatsat Rāmabhaṭṭa.

Breaks off in the Yathāsaṅkhyālaṅkāra.

---

R. No. **5371**.

Palm-leaf. 14 × 1 inches. Foll. 64. Lines, 6 in a page. Grantha. Injured.

Presented in 1927-28 by M.R.Ry. S. P. Veṅkaṭācāryār, Big street, Coimbatore.

मालतीमाधवव्याख्या.

MĀLATĪMĀDHAVAVYĀKHYĀ.

Same work as that described under No. 12595 of the D.C.S. MSS., Vol. XXI, and No. 29 of M. Seshagiri Sastri's Report No. 2.

By Tripurāri, son of Parvatanātha.

Breaks off in the third Aṅka.

---

R. No. **5372**.

Palm-leaf. 14¼ × 1¼ inches. Foll. 39. Lines, 11 in a page. Grantha. Slightly injured.

Presented in 1927-28 by M.R.Ry. S. P. Veṅkaṭācāryār, Big street, Coimbatore.

मुद्राराक्षसम्.

MUDRĀRĀKṢASAM.

Same work as that described under No. 12616 of the D.C.S. MSS., Vol. XXI. By Viśākhadatta, son of Mahāśaya Pṛthu and grandson of Sāmantśevaradatta.

Complete.

## R. No. 5373.

Palm-leaf. 16 × 2¾ inches. Foll. 48. Lines, 13 in a page. Grantha. Good.

Presented in 1927-28 by M.R.Ry. S. P. Veṅkaṭācaryār, Big street, Coimbatore.

अभिज्ञानशाकुन्तलव्याख्या—साहित्यटीका.

ABHIJÑĀNAŚAKUNTALAVYĀKHYĀ : SĀHITYAṬĪKĀ.

Same work as that described under No. 12488 of the D.C.S. MSS., Vol. XXI. By Śrīnivāsācārya son of Timmayārya, belonging to the Vaikhānasasūtra.

Complete.

---

## R. No. 5374.

Palm-leaf. 16 × 1 inches. Foll. 98. Lines, 8 in a page. Grantha. Injured.

Presented in 1927-28 by M.R.Ry. S. P. Veṅkaṭācaryār, Big street, Coimbatore.

(a) सङ्कल्पसूर्योदयः.

SAṄKALPASŪRYŌDAYAḤ.

Foll. 1a—91b.

Same work as that described under No. 12710 of the D.C.S. MSS., Vol. XXI; and with the additional stanzas at the end as given below.

By Vēdāntadēśika.

यस्माभाताम्बुजातोदरनिवसदुरुश्री . . . . . .
द्वन्द्वामानर्गलोद्यन्निरवधिकदयावाहिनी मोहदूरा ।
श्रीमत्सङ्कल्पसूर्योदधिविकचसरोजातनिर्यत्सुधाब्धेः
मध्यं क्षिप्त्वाशु तापं हरति जगति नो रङ्गभृद्देशिकेन्द्रः ॥
जीयाच्छ्रीरङ्गनाथाभिधगुरुरनघो दिव्यकारुण्यसिन्धुः
सोऽयं विद्यासु नालं विततदशदिशापत्रलं मित्रमिन्दोः ।
सौम्यौ किञ्जल्कमष्टापदवसुमतिभृत्कर्णिकं कर्णभूषा
दिङ्नारीणां समुद्रामितमधुभरितं यद्यशःपुण्डरीकम् ॥

---

(b) शृङ्गारशेखरभाणः.

ŚṚṄGĀRAŚEKHARABHĀṆAḤ.

Foll. 92a—94b.

A love drama in one Aṅka, technically known as Bhāṇa.

By Rāmānujakavi of Śrīvatsa family and disciple of Raghuvara. Incomplete.

**Beginning :**

कल्याणं कलयन्तु सन्ततमम् . . . . . . .
. ह्वाहोत्सवमङ्गले सकुतुकं सीतारघूत्तंसयोः ।
किञ्चित्कुञ्चितनेत्रयोः . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . सर्वस्वसन्दायिनोः ॥

* * * *

नान्द्यन्ते सूत्रधारः सकुतुकमाकाशे कर्णं दत्वा—भो भोस्सदस्याः,

सहृदयहृदयहरं वत्सरसतमं चार्थसम्बन्धम् ।
सन्दर्भोऽपि च सरलस्तन्नो नेतव्यमभिनवं नाट्यम् ॥ इति ॥

अहो भाग्यमेव नो भाग्यम् । अद्य च—

कालोऽयं कुसुम . लाससमयः मञ्जुस्वनत्कोकिलः
सभ्याः सर्वकलाकलापनिलया विख्यातकीर्तिः कविः ।
सेयं सर्वमनोहराकृतिरहो सोऽहं धुरीणः परं
दिव्येऽस्मिन् भरतागमे सुतपसा सर्वं च सिद्धं हि नः ॥

* * * *

इदं पुनः पृच्छामि किंनाम रूपकं कीदृशं किन्निर्मातृकमभिनेतुमारब्धमिति ।

सू—भाव किं न जानासि निखिलसुरासुरमकुटतटखचितविविधमणिकिरणधोरणीनीराजितचरणारविन्दश्रीपूर्वरङ्गान्तराधीशाधिरङ्गनायकसन्ततध्यानामृतपरिपूर्णमनोरथेन श्रीवत्सवंशविमलमौक्तिकायमानेन चतुर्दशचतुष्टयकलानिलयश्रीरघुवरार्यगोपालसूरिचरणारविन्द . . . णायमानेन विमलमतिविलासशून्रा रामानुजार्यकविशेखरेण नीतं शृङ्गारशेखरं नाम नवीनं भाणम् ।

शृङ्गारपूर्णचन्द्रो मूर्तिमवष्टभ्य सन्ततं निवसन् ।
मुनिना हृदयेन्दूपलम . . . . यत्यहो यत्र ॥

**End :**

फुल्लन्मन्दारमञ्जुस्मितरुचिततिभिर्दिक्षु सन्तन्यमाना
ज्योत्स्नामच्छां मुखाम्भोरुहमधुरमधूल्लोलपानापतन्तः ।

भृङ्गानावारयन्ती क्षणक्षणितरणत्कङ्कणाभ्यां कराभ्यां
मन्दं मन्दं मृगाक्षी द्रुतकनकलतेवेयमायाति दूरे ॥

Fol. 95 contains some stanzas in praise of Kṛṣṇarāya and some Bandhaślōkas.

---

(c) भागवतम्.

BHĀGAVATAM.

Foll. 96a—97b.

Same work as that described under No. 2178 of the D.C.S. MSS., Vol. IV, Part I.

Contains the 25th Adhyāya of the eighth Skandha.

---

(d) श्रीनिवासगुरुनाममन्त्रमाहात्म्यम्.

ŚRĪNIVĀSAGURUNĀMAMANTRAMĀHĀTMYAM.

Fol. 98.

On the greatness of the sacred name of one Śrīnivāsaguru who is believed to be the same as the one praised in the works described under R. No. 2123 ante. The author also is believed to be identical with Vēdāntadāsa mentioned in the work described under R. No. 2123(b) ante.

Complete.

**Beginning:**

श्रीमान् भूमावखिलजगतां मङ्गलायावतीर्णः
सर्वानर्थान् प्रवदति सकृत्स्वाभिधां संश्रितेभ्यः ।
इत्थं सर्वैरपि शुभगणैर्यो महान् देशिकेन्द्रः
सोऽयं भूयादमितमहिमा श्रेयसे भूयसे मे ॥
सर्वश्रेयोनिरुपमनिधिर्नित्यवासः श्रियो यः
श्रीशश्रीश्रीकृदखिलमहत्त्वप्रदाता महांश्च ।
सच्छास्त्रार्थान् स्वयमुपदिशन् संश्रितेभ्यान् कृतार्थी-
कुर्वन्नित्यं जयति स गुरुः श्रीनिधिर्मे श्रिये स्यात् ॥

**End:**

गुरोर्यस्य श्रीनिवासमहादेशिक इत्यदः ।
नामैवाख्यात्यशेषार्थानेतांस्तस्मै नमो नमः ॥
वेदान्तदासविनुतं श्रीनिधिगुरुनाममन्त्रमाहात्म्यम् ।
सकृदिदमनुसन्धत्ते यः स्यात् स श्रेयसां निधिः सततम् ॥

R. No. **5375.**

Palm-leaf 16 × 1½ inches. Foll. 29. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1927-28 by M.R.Ry. S. P. Venkaṭācāryār, Big street, Coimbatore.

(*a*) नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Foll. 1*a*—2*b*.

Same work as that described under No. 561 of the D.C.S. MSS., Vol. I, Part III.

Complete.

---

(*b*) गरुडपञ्चाक्षरीस्तोत्रमन्त्रः.

GARUḌAPAÑCĀKṢARĪSTŌTRAMANTRAḤ.

Foll. 3*a*—4*b*.

Similar to the work described under No. 6157 of the D.C.S. MSS., Vol. XII.

Complete.

**Beginning:**

अस्य श्रीगरुडपञ्चाक्षरीस्तोत्रमन्त्रस्य काश्यप ऋषिः त्रिष्टुप् छन्दः श्रीबालगरुडो देवता । श्रीबालगरुडप्रसादसिद्ध्यर्थे जपे विनियोगः । क्षां अङ्गुष्ठाभ्यां नमः । क्षीं तर्जनीभ्यां स्वाहा । क्षूं मध्यमाभ्यां वषट् । क्षैं अनामिकाभ्यां हुम् । क्षौं कनिष्ठिकाभ्यां वौषट् । क्षः करतलकरपृष्ठाभ्यां फट् । क्षां हृदयाय नमः । क्षीं शिरसे स्वाहा । क्षूं शिखायै वौषट् । क्षैं कवचाय हुम् । क्षौं नेत्राय वौषट् । क्षः अस्त्राय फट् । भूर्भुवस्सुवरोमिति दिग्बन्धः ।

**End:**

आवेशयावेशय सिद्ध्या सिद्ध्या शीघ्रं शीघ्रया समस्तभूतबेतालान् नाशय नाशय सर्वग्रहं नाशय नाशय सर्वशत्रून् नाशय नाशय सर्व-सर्पान् स्वाहा ।

---

(*c*) रामायणचूर्णिका.

RĀMĀYAṆACŪRṆIKĀ.

Foll. 5*a*—10.

A small prose work describing briefly the story of Rama in a single, though lengthy, sentence.

Complete.

**Beginning:**

श्रीमद्रामायणकथासुधाप्रसङ्गः—

अक्षरक्षीरपूरितरत्नाकरे निःशेषदोषशेषफणाफलकमञ्चकयोगनिद्राप्रपन्नः, शार्ङ्गशङ्खगदानन्दकश्रीवत्सवनमालिकाभूषितः, ब्रह्मर्षिसेवितः, अखिलाण्डमण्डलनायकः, भक्ताभीष्टफलप्रदायकः, त्रिलोकजिष्णुर्विष्णुः, आकण्ठितकण्ठीरवपराक्रमदशकण्ठखण्डनाय विबुधपतिनिवेदितवृत्तान्तः, कोसलदेशीयभासुरभूसुररञ्जितरुचिरकुटीरशोभितसरयूतटनिकटे, सकलनगरातिशायिसौन्दर्यप्रकटे, रथमदवारणतुङ्गतुरङ्गवीरभटे, अयोध्यासंपुटे.

**End:**

श्रीकरपद्जनसकलजनराजाधिराजपौण्डरीकवाजपेयाश्वमेधयागशीलः, लोकपरिपालनलीलः, नीरोगनिरुपद्रवमानवाभिरामसकलसस्यपुण्यफलप्रकाशितां पृथिवीं पालयन् भक्तजनानां निरन्तरकल्याणश्रियं ददातु ॥

The scribe adds—

சுபகிருது௵ சித்திரை மீ 1௳ செவ்வாய்க்கிழமை தினம் ராமாயண சூர்ணிகை எழுதி முடிந்தது.

---

(*d*) लालिगीतम्.

LĀLIGĪTAM.

Foll. 11*a*—12*a*. Fol. 12*b* is left blank.

A set of songs in praise of God Viṣṇu.

**Beginning:**

गरुडगिरिमणिदीप गाङ्गेयवसन
करकलितरथचरण कारुण्यसदन ।
हरपुरन्दरविनुत हारमणिरशन
चारुतरतनुशोभ चन्द्रनिभवदन ॥ लालि ॥
कायाब(ध)बामय कमनीयभूष
मायामृगेन्द्र रिपुमथनैकरोष ।
गेयात्मशुभचरित गम्भीरघोष
जायामुखालोक जनितघनतोष ॥

**End :**

लालि ते निजभक्तविजयरथसूत
लालि ते नतसुलभ पाण्डवदूत ।
लालि ते गोपकुलनलिन दिनबन्धो
लालि ते नरसिंह करुणैकसिन्धो ॥ लालि ॥

---

(c) डोलोत्सवादिगीतम्.
DOLOTSAVĀDIGĪTAM.

Foll. 18a—24b.

Similar to the above; in praise of Lakṣminṛsiṁha.

Complete.

**Beginning :**

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
श्रीमान् श्रीमानिताङ्ग श्रुतिगरुडधराधीशशृङ्गाभिषङ्गो-
त्तुङ्गच्छृङ्गारभङ्गी जगदखिलजनत्राणमानः पुराणः ।
सत्त्वासच्चात्मविद्याप्रथितयमिधराराधनानन्दमन्दी-
भूतानन्तः परस्मिन् पद इव नृहरी राजते राजतेजाः ।
साक्षाल्लक्ष्मीनृसिंहः स्वयमयमति . सिद्धसिंहप्रभावः
प्रादुर्भावानुभावक्रमसमयसुधन्यासुधन्यासुधान्य ॥
आचार्याचार्यकार्य स्वमठशाठहठात्कारिकारी . . . ॥

* * * *

निद्राहि त्वं कुसुमशयने शोभने बालकृष्ण
प्रेम्णाव्यास्त्वं सह जगदवन् लालि देवेश लालि ।
विष्वक्सेनो विभुवर तव प्रेयसीसन्नियोगात्
सन्दृश्यास्ते परिजनपरं . . कैङ्कर्यतन्त्रैः ॥

* * * *

जय कृष्ण घनकृष्ण हतकृष्णाकदन
पदसेवाकृतदेवाखिलदेवदेव ॥ जय ।
कमलाकुच कमलाधृतकमलापह विमल
